कल्पकात्तिका

महामहोपाध्याय-पण्डित-पंचाननश्रीयुत
हरिहरकृपालु द्विवेदिभिर्न्याया-
चार्य्यैर्विरचिता

॥ श्रीः ॥

कल्पकलिका

(तर्कपादान्तशवरभाष्यव्याख्या)

महामहोपाध्याय पण्डित-पंचाननश्रीयुत-
हरिहरकृपालु द्विवेदिभिर्न्यायाचार्य्यैर्विरचिता

दरभङ्गामण्डलान्तर्गत पनिचोभग्रामवासिना कलिकतास्थ-
श्रीविशुद्धानन्दसरस्वती विद्यालयाध्यापकेन
पण्डितश्रीपलट्टू शर्म्मणा व्याकरण-
काव्यतीर्थेन प्रकाशिता

चौखम्भा विश्वभारती
पो० बाक्स नं० १३९
चौक (चित्रा सिनेमा के सामने)
वाराणसी-२२१००१
फोन : [illegible]

Printed by Rawatmal Chowdhury
BANIK PRESS
1, Sircar Lane, Calcutta.

भूमिका

अयि निखिलविद्यावदातमानसाः सहृदयधुरीणा स्तत्रभवन्तो महानुभावा विद्वद्वराः विदितमेवैतद् भवतां यन्निखिलधर्माचाराचरणभास्वरे भारते खण्डे सकलनिगमागमपारावारपारीणैः करामलकवद्धिगतब्रह्मप्रकाशै स्तत्वदर्शिभि र्महर्षिभिः परमकरुणया सकलजगन्नियन्तु श्चराचरप्रभवस्य श्रीपरमेश्वरस्य निःश्वाससंग्रहस्वरूप मृग्यजुःसामाथर्वलक्षण मखिलं वेदम् मन्त्रब्राह्मणारण्यकोपनिषदादिभेदै र्बहुधा विभक्तमपि सकलार्थसाधनोपयोगितया कर्मकाण्डोपासनाकाण्डज्ञानकांडरूपेण पुनस्त्रिधा विभज्य सकलमिदं प्राणिजातम् चिरमुपकर्तुमिति।

तत्राध्वरप्रयोगसमवेतद्रव्यदेवताद्यर्थस्मारकतया मंत्रभागस्य कर्मकाण्डत्वम् मंत्रोदितार्थेतिकर्त्तव्यताबोधकतया ब्राह्मणभागस्य तच्छेषत्वम् उपनिषद्भागस्य चोपासनाज्ञानप्रतिपादकत्वेनो पासनाकांडत्वं ज्ञानकांडत्वञ्च प्रतिपादितम् तदर्थनिर्णयसौकर्य्याय पुनर्न्याय-वैशेषिक-पातञ्जल-साङ्ख्य-मीमांसा-वेदान्तप्रभृतीनि दर्शनानि च निर्म्मितानि।

तथाच तेषु सकलेष्वपि दर्शनशास्त्रेषु पूर्वमीमांसादर्शनस्यैव सकलवेदार्थप्रकाशकत्वाद् वेदमूलत्वात् सर्वदर्शनोपयोगित्वात् "ज्योतिष्टोमेन यजेत स्वर्गकामः" "राजा राजसूयेन स्वाराज्यकामो यजेत" इत्यादि सहस्रशो निरतिशयस्वःस्वाराज्यादिप्रापकोपायप्रदर्शकत्वाच्च:]

सर्वोपादेयत्वम् सर्वमान्यत्वम् सर्वदर्शनालङ्कारत्वञ्च स्वीकृतमिति नाप्रत्यक्षं प्रेक्षावताम् ।

तच्चेद मखिलमंत्रब्राह्मणोभयात्मकवेद मधीयानानां निश्शेषविद्यानिष्णातानाम् विदुषामपि यथावदर्थावबोधो न मीमांसादर्शनाध्ययनमन्तरा कदापि सम्भवतीति सर्वथा मन्वानेन सर्वतंत्रस्वतंत्रेण तत्रभवता दीव्यचक्षुषा महर्षिप्रवरेण जैमिनिना सर्वजगदुपकाराय द्वादशाध्यायात्मकं पूर्वमीमांसाशास्त्र माविष्कृत मिति । तत्र भगवता शवरस्वामिना भाष्यं व्यरचि । स्वनामधन्यैः कुमारिलभट्टपादै र्वात्तिकं विरचितम् । तदनुसारिणी च पार्थसारथिमिश्रैः शास्त्रदीपिका प्रकाशिता । तत्र च शावरभाष्यस्या तिदुरधिगमत्वाद् दुर्बोधत्वाच्च न केवलं छात्राणामेव किंत्वध्यापकमहोदयाना मप्यनेकेषु स्थलेषु सम्मोहमवगाहते बुद्धि रित्याकलय्य परीक्षापारावारसमुत्तितीर्षूणां छात्राणामध्यापकानाञ्च पठनपाठनसौकर्य्याय "विहारोत्कलसंस्कृतसमितिसभापतीनाम् विविधविरुदावलीविराजमानमानोन्नतानाम् जी० सी० आई० ई० के० बी० ओ० प्रभृतिपदवीविभूषितानां मिथिलेश्वरश्रीरमेश्वरसिंहशर्म्ममहोदयाना मसकृदनुरोधेन विभूषितमहामहोपाध्यायपदैः प्रधानाचार्य्याद्यनेकोपाधिविशिष्टैः पण्डितप्रवरै रस्मद्गुरुवर्य्यैः श्रीहरिहरकृपालुद्विवेदिभि र्महानुभावैः शावरभाष्यस्य कल्पकलिकानाम्नीं टीकां प्रकाश्य गीर्वाणवाणीविलासप्रणयिनाम् प्रेक्षावताम् विशेषत श्छात्राणाञ्च परीक्षार्थिनां सुमहानुपकारो ऽकारीति तेभ्यो महद्भ्यो ऽनेके धन्यवादाः सन्ति ।

अथैतद्ग्रन्थप्रकाशनसाहाय्यं प्रभूतं वितरद्भिः सनातनधर्मप्राणैः

संस्कृतसरस्वतीप्रधानसेवकैः परमोदारहृदयैः श्रीमद्भिः श्रेष्ठिप्रवरैः श्रीमद्गुरुमुखरायगुप्ततनूजश्रीगङ्गुमलगुप्तात्मजैः—ओंकारमलगुप्त-महोदयै र्निरतिशयमुपाक्रियतेति तेभ्यो ऽतोतसंख्यान् धन्यवादा-नाशीर्वादांश्च वितरामि।

सेयं भाष्यस्य दुरूहार्थता मपनयंती सर्वार्थप्रकाशिका कल्पक-लिका सहृदयहृदयालङ्कारभूता पठनपाठनसौकर्य्यप्रदानेन सर्वेषां छात्राणा मध्यापकानाञ्च परमप्रमोदाय भविष्यतीत्याशास्ते—

नन्दप्रसाद चतुर्वेदो, सांख्यसाहित्यतीर्थः

मनोहरदास—जयनारायण-विद्यालयाध्यापकः

चौक पटना सिटी।

धन्यवादाः

आसी द्वैश्यान्ववायामलकमलदलोन्मेषकृत्तिग्मरश्मिः,
स्वव्यापारप्रमादव्यथितजनमनश्शान्तये शीतभानुः।
अर्थिव्रातोपनम्राभिमतफलकुलकॢप्तये कल्पकल्पः,
शिष्टश्रेष्ठो सुनिष्ठः सति गुरुमुखरायेत्यभिख्यो ऽत्र मुख्यः ॥१॥

तत्पुत्राः पंच पञ्चाननसदृशनिजोत्पादितात्मप्रभावाः,
कर्तव्यार्थे नदीष्णाः स्वधिगतविनया निष्पवित्राचरित्राः।
प्राभूवन्प्रौढतेजःप्रचितमुखरुचः किंतु तेषा मुपान्त्यः,
श्रीमान् गञ्जूमलोऽभू त्स्वसुतगुणगणै रग्रणी रग्रगण्यैः ॥ २ ॥

सर्वत्रादीनदीत्तो व्यवहृतिनिपुणः स्मेरपूर्वाभिभाषी,
स्निग्धोद्बुद्धान्तरात्मा व्यसनिषु विमुखः सम्मुखः सज्जनेषु।
आलोक्यानेकदुःखं जगति जनिमता मत्र जातापरागः,
स्वल्पायुः स्वर्गसौख्यान्यनुभवितु मसा वत्यज न्मर्त्यलोकम् ॥ ३ ॥

सद्रत्नं रत्नखाने रिव सहजगुणो मञ्जुमूर्त्ति स्वभावः,
सत्यश्रद्धासमृद्धिप्रथितपृथुयशा धीरधौरेयमेधः।
लोकश्रेयोऽर्थ मर्थाप्तवितरणमिति ज्ञापनार्थावतारः,
तुल्यप्रेमा त्रिवर्गे सहृदयहृदयानंदवृन्दैककंदः ॥ ४ ॥

स्वीयाचारविचारचारुचरितो व्यापारपारीणधीः,
दानौदार्यदयादमादगुणग्रामाभिरामाकृतिः ।
कार्याकार्यविवेकसेकसरसस्वांतो नितांतोन्नतिः,
श्रीलौङ्कारमल्लो ऽमलो ऽतुलमभूत्पुत्र स्तत: सत्तमः ॥ ५ ॥

विद्युद्यन्त्रपरिष्कृतैः प्रियकरै र्दीप्तैः प्रदीपै रपां,
सम्पातैः पवनैश्च घर्मसलिलोद्रेकापनोदोद्यतैः ।
युक्तापेक्षितसाधनै र्बहुविधैः शुभ्रांतराभ्रङ्कषा,
यस्यास्ते "पटना"भिधाननगरे विस्मेरवेश्मावलिः ॥ ६ ॥

अत्रैतद्धर्मशाला पथिकजनमुदे विद्यते हृद्यरथ्या,
सर्वारामा त्रिभूमि र्विपुलपरिकरा राजमार्गान्तिकस्था ॥
लोकाभीष्टार्थसिद्ध्यै सकलमहसुखं सत्यदेवस्य चास्मि-
न्नानन्दं दर्शकानां जनयति हृदये सुन्दरं मन्दिरं नः ॥७॥

धर्मोन्मूलनकौतुके ऽत्र समये सर्वे स्वयं स्वामिनः ।
सन्तीभ्यास्तु विशिष्य सन्तु न व ते यथोऽस्ति कथ्याः कथम् ॥
अर्थप्रौढ़नयःप्रभुत्वसहजप्राचीनधर्मादरा-
द्येकात्रासमशोभलाकृति रयं तद्वस्तुतः संस्तुतः ॥८॥

मीमांसाभाष्यभाषापरिचयविधये मन्दमेधानुरोधात् ।
स्वल्पस्पष्टार्थवाक्यैः स्फुटपदघटितैः संस्कृता वृत्तिरल्पा ॥
सर्वत्रास्याः प्रचारः कथमिव भविता मुद्रणे द्रव्यदैन्यम् ।
कोऽन्यो धन्यो वदान्यः प्रभुरिति मृशतःसङ्गमो ऽमुष्य मेऽभूत् ॥९॥

ज्ञात्वाशेष मसौ ममाशय मिहामन्दारविन्दाननः ।
धर्मोसौ मम तत्परोपकृतये मुद्रापयिष्येऽचिरम् ।।
इत्याहाथ मुदापनिद्रहृदयो दत्वा तिमुद्राशिषः ।
भारानस्य समर्प्य हर्षभरितांश्चायुष्मते स्मो वयम् ।।१०।।

तत्वोदर्कवित र्ककर्कशधियो ये सन्ति तेषां कृते
नायं किन्तु कृतो मया मृदुधिया मन्त्रो त्पिपासावताम् ॥
एतद्भाष्यगभीरतत्त्वनिकषग्रावोग्रतर्कस्फुर-
न्मानोन्मेयविवेचनश्रमभरःस्तोकाय मोदाय वः ॥११॥

दारै रपत्यैः सह संपदा च,
सौख्यै रसंख्यैः सह वन्धुवर्गैः।
सानन्द मोङ्कारमत श्चिरायु,
जींव्यादितीशं भृश मर्थयेऽहम् ।।१२॥

प्रणेतुः कथमिह प्रवृत्तिः

अथ भगवानाम्नायो प्राणिमात्राभीष्टयो रिष्टानिष्टप्राप्तिपरिहारयोः स्वस्ववर्णाश्रमाद्यनुकूलानुष्ठानयोग्यं यागदानहोमाद्युपाय मैहिकामुष्मिकफलकं यथाधिकारि प्रचुराप्रचुरशक्तिद्रव्यायाससाध्यं प्रति नियतदेशकालापेक्षफलपरिपाकोन्मुखं विदधत् कस्य नाम नेप्सिततमः परन्त्वलौकिकातिगहनार्थकतया अनालोचितमीमांसामार्गाणां तर्ककर्कशधियामपि दुरवगाहः किमुत साधारणव्युत्पन्नानां शास्त्रान्तरावलोकनाभ्यासनिपीतनिखिलागुष्काणां विदुषामित्यज्ञातः सन् तिरोहितापरिचिताक्षयनिधि रिव सविधस्थोपि न जनाभिलाषसिद्धये प्रभवेदिति योगदृशा अवश्यभाविभाविजनमेधामान्द्याविज्ञातकर्मकलापानुष्ठानविरहोपनतविविधदुर्निवारक्लेशजालविहस्ततां जन्मिनामालोक्य निसर्गतो ऽत्यग्रजाग्रदनुकम्पो विश्वपारदृश्वमनीषो न्यायानुगृहीतनानाशाखोपबृंहितकर्मापेक्षितसाध्यसाधनेतिकर्तव्यताप्रदर्शनपरो अतीन्द्रियज्ञाननिधि र्महर्षि र्जैमिनिमुनिः द्वादशलक्षण्या मीमांसयामास। अतिमहतो निखिलविद्याश्रयस्य प्रविभक्तवर्णाश्रमविभागस्य संक्षेपाय मन्दमतिसमवधानफलाय ततः परमतीते कियति काले तपोबलवीर्यविपाकाद्यपचयवशप्रादुर्भूतदोषाधीनतदर्थविपर्यासादुपरुद्धमानसेषु सौगतादयुद्भावितानर्थहेतुपशुहिंसाकर्मकालिकफलानुत्पादकालान्तरफलाविश्वासहेत्वन्तराधीनफलोत्पादत्वाणि कृत्वादिदोषाभासैः शिथिलीभवच्छ्रद्धाभक्तिविवेकप्रमुखगुणगणेषु नैरात्म्यक्षणिकत्वाद्युपदेशनिवारित-

निरयनियतनिदानकर्मभयेषु स्वाभाविकपरागविषयप्रवृत्तिशीलेषु इन्द्रियाद्यनुकूलविषयोपभोगानुरागपरोपदेशै धर्मपथात्पराङ्मुखीकृतेषु अभिमुखीकृतेषु कुतर्कपरिकल्पनासत्फलानुबद्धस्वमताभासेषु धर्मप्राणेषु भारतीयसनातनजनमनस्सु पुनर्दुर्वारौर्वानलज्वालावलीवलीढमानसत्व मवधाय निखिलशास्त्रमार्मिकमतिः पूज्यपादश्रीशङ्करापरावतारश्रीशंकराचार्यमहोदयै रपि शास्त्रतात्पर्यवि दित्युक्त्या सादरमुदाहृतो निरन्तरनिगमाटवीविहरणानुरूपप्रथितशबरस्वामिनामधेयः स्वल्पाक्षरप्रमितबहुतरार्थैः प्रतिपक्षाक्षेपप्रतिक्षेपविचक्षणै रतिमधुरा क्वचित्साक्षात्क्वचि त्तात्पर्यतः सूत्रार्थ तत्तात्पर्य च प्रदर्शयद्भिः मुख्यतया श्रौतार्थप्रदर्शनपरै र्वचनसन्दर्भैः भाष्य मुपनिबबन्ध। अत्र च समीचीनतर्केण परपक्षाभासं प्रतिक्षिप्य आम्नायार्थप्रमाणेन पराक्रम्य प्रवाति ष्ठिपत् उद्दधार च दुरध्वगत्वरीं जनतां समीहितसाधनतात्विकोपदेशव्रातेनेति न परोक्षं प्रेक्षावतामत्र सुगृहीतक्षणानाम्। किन्तु कालकलायाः अतिविचित्रपरिणतिशीलतया समतीते कियति समये पुनरेतद्ग्रन्थमपि विरलगुरुपर्वैरेयावधेयार्थकं साधारणविदुषां बुद्धिपथातिवर्त्ति शीलं मिवाभूदिति लब्धावसरैः नास्तिकैः पुनः कलिकल्पकोपमं प्रतायमान माम्नायदूषणाभास मवलोक्य अखिलविद्वद्वृन्दमौलिमालाप्रसूनप्रसूतपरागपुञ्जपिञ्जरीकृताविनिद्रनवनलिननिभचरणयुगलः पूर्वं निशितशरनिकरनिवारिताशेषतारकाद्यसुरसमूहो ऽधुना वाचैव सत्पथाचारप्रचारविरोधिनां तयैव तदुच्छेदाय भगवान् कुमार एव धृतापरावतारो ऽत्रभवान् कुमारिलभट्टो वादिदुरुत्तरातिकठिनतर्कशतसहकृतप्रमाणबलोन्मूलितप्रभाकर-

बन्धुप्रमुखाखिलसुहृत्जालापुनरुत्पादाय श्लोकवार्तिकतन्त्रवार्तिक-टुप्टीकाभिः पूर्वोत्तरपक्षतया निखिलदार्शनिकावलम्बनीयाभिः विशिष्य आम्नायार्थपरिज्ञानोपायभूताभि र्विशिष्टार्थप्रतिपादकमधुरस्त्र-रशालितया विप्रतिपन्नानामपि हृदयग्राहिणीभिः स्वतः स्वार्थप्रत्यायन-कुशलस्वभावाभिः तद्भाष्य मुद्दीपयाचक्रे यद्यपि श्रीमत्कुमारिलभ-ट्टोक्तयः अखिलमर्थजातं स्वतोनुभावयन्त्यो न व्याख्यान मपे-क्षन्ते तथापि विपश्चिता मग्रेसरेण पार्थसारथिव त्प्रातःस्मरणीयेन श्री-पार्थसारथिमिश्रेण सविस्तारं व्याख्याता अपि ता इति न पुन रिह व्याख्यानान्तरापेक्षा । किन्तुप्र कर्षत्वन्नि कर्षस्याप्यानन्त्यात् स्वल्प-समयप्रतिभावता मत्र प्रविविक्षूणामन्तेवासिना मुपकृतये शावरभाष्यस्य स्वल्पशरीरा सरलार्था टीका नितरा मपेक्ष्यते इतिविहारोत्कलसंस्कृ-तसमितौ प्रस्तावोऽभूत् ।

तदनु विविधविरुदावलीविभूषितसदनुष्ठानपरिनिष्ठितान्तःकर-णवृत्तिःसंस्कृताङ्गलभाषोभयरसनाभिज्ञानाद्द्वितीयरसनः पूर्वपुरुषै प्राणार्पणादप्युपायै श्चिरार्जितस्य परिरक्षितस्या विरलमुपयोगे ऽप्यपा-यरहितस्य त्रैलोक्यापूर्वरत्नस्याम्नायस्य वाचा कर्मणा चाद्वितीयाश्रयः सदासमरविजयिश्रीमन्महाराजाधिराजद्विजराजश्रीरमेश्वरसिंह महोदयो मिथिलामहेन्द्रो मुजफ्फरपुरनगरस्य तत्संस्कृतसमितौ निखिल धर्माचरणनिराकरणप्रवणे कामक्रोधमदलोभमोहाद्यनेकापसहायस-ध्रीचीने अतिकपूयाचरणपरायणे कलौ विविधविषयविषमरसा-स्वादवशमुकुलितमानसाना मधीयानाना मपि शाबरभाष्यपठनमति कठिनमिति कालान्तरे वार्त्तिकादिग्रन्था अनधिगतार्था भविष्यन्तीति

पर्यालोच्य टीकानिर्माणाय समादिशत् सामान्येन । आत्मन्यप्येतद्व्यापार मवदधानः तदनुकूलावकाशविरहा दशक्यमिदं प्रभुनिर्देशगौरवात्कथञ्चित्कार्य मेवेति दोलायितचित्रवृत्तिः सुपरिण्टेण्डेन्ट पदासीनेनोदारमूर्तिस्वभावेन डाक्टरश्रीहरिचन्द्रशास्त्रिमहोदयेन यावत्पाठनीयं तावल्लेखनीय मित्यध्यापकाना मितरापेक्षया समयः सुलभ इति प्रत्यबोधिषि प्रबन्धलेखाय व्यापृतः मोक्षकथायामपि धृतानादरः कथमिव पाठयेदपि लिखेदपीति जानानोपि परवश इव टीकाकरणाय समकल्पयम् । ततःपरावृत्य पाटलिपुत्रनगरे तदुपकरणसम्पादनाय त्वरित मुदयूयुजम् अवाप्तसाधनो लेखनाय प्रवृत्तो यावत्पञ्चषाणि पत्राणि नापूरयं तावदेव बलवता दैवदुर्विपाकानुगतदुःखवज्रेण विक्षतमना इत एव निमित्ता दिद मापतित मिति संशयानः जाताया विपदो ऽनुकूलमाचरितुं गृहमेवा यासिषम् तत्रापि शून्याश इव अपहृतसर्वस्व इव जड़वत्कियद्दिनानि कथञ्चिदयापयम् ततः संस्कृतकौंसिलसभावसरे पुनः पाटलिपुत्रं समागतः तदतीतमपि पुनःसाक्षादिवानुभवन् तदीयवस्तून्यवलोक्य यां दशामवापं तां निर्वक्तु मित्यलमात्मनो विशसनावस्थाश्रावणेन श्रोतुरपि दुःखकरेण दुःखाकरेण षष्ठपत्रार्द्ध मपूर्णपङ्क्ति लिखितं दृष्ट्वा पुनरुत्पीड़ितहृदयः कर्तु मकर्तु मिह चिरं चिन्तयानः यद्भावि तदभूत् परमपि भावि भवेदेव किमनयाऽनायत्तभावनया इदमेव तावत्पूर्णं करवाणीत्याशया लिखतः पूर्वं पङ्क्तिः पश्चात्पत्रं च पूर्त्ति मगाताम् । इतरापेक्षया इममेव शोकापनोदोपाय मीक्षमाणो ऽत्रप्रवृत्तः समाप्तिकामस्त्वरितलेखनशीलोऽभवम् । गुणानामेव ग्रहणे दोषाणां प्रहाणे च मति मवहितां कर्तुं नापारयम्

तदनुकूलचेतःप्रसादाभावात् भग्नोत्साहस्येदमेवातिबहु अपि दोषाः केचित्पुरुषस्वाभाविकधर्मतया न सुपरिहरा इत्यवश्यभाविनस्तेऽभूवन्नेत्र ये पुनरवधानेन निरसितुं शक्यास्तेऽपि चेतसः शोकाकुलतया समयसंकोचात्पुन र्निरीक्षितु मवकाशाभावात् स्वपरिच्युतेः सहसा स्वसाक्षात्काराभावाद् दुरवगाहविषयवशाच्चा परिहृताः सन्त्येवेति परीक्षकै रेव निराकार्याः सत्यवसरे ऽस्माभिरपि । "सर्वथा व्यवहर्तव्ये कुतोह्यवचनीयतेति" सत्यानुभूतिमूलकाभियुक्तोक्त्या अपुनर्निरीक्षितमेव प्राहिणवं मुद्रणाय मुद्रणञ्चास्य कल्याणकोटिभाजनसाम्प्रतिककलकत्ता नगरनिवासः श्रि०बाबूश्रीओंकारमलजालानमहोदयः स्वकीयद्रव्यव्ययेन स्वकृतप्रबन्धेन च कलकत्तानगरे एव कारितवान् प्रूफसंशोधनं कियत्पत्रपर्य्यन्तं सकलशुभगुणालंकृतः पं०श्रीबलदेवमिश्रः काव्यतीर्थोऽकार्षीत् कार्यवशात्कानपुरं गतवति तस्मिन्नेतत्कः कुर्यादिति सोच्छासं चिन्तयतो ऽनेकशास्त्रपरिशीलनलब्धवैदुष्यः श्रीविशुद्धानन्दसरस्वतीमहाविद्यालयाध्यापकः पंडितश्रीपलटूष्णशर्मशुभोदयो मम स्मृतिपथमागतः पत्रद्वारा समाधिगतैतद्विषयाशयोऽसा वतिविनीतः पूर्णावकाशविरहेऽपि सहर्षमग्रही दस्य संशोधनादि कार्यभारम् । अनैषीच्च सोत्साहमति श्रमेण समाप्तिम् । अतएव द्वाभ्या ममूभ्या मात्मीयाभ्या मनेकैःधन्यवादाः शुभाशीर्वादाश्च दीयन्ते ऽसकृत् । एतयोः साहाय्यमन्तरेदं कार्यं कथमपि न स्यादित्येनयो रुपकारेण चिरमन्वग्राहिषम् । यद्यपि मुद्रितेऽस्मिन् अर्थानुसन्धाननिबन्धना भूयांसो दोषाः सन्ति तथापि मदीया एवेति नान्य स्तद्वाच्य मर्हति आदर्शपुस्तके अभ्यासवशा त्सहैव पदानि वाक्यानि च लिखितानि न विभज्य स्थापितानि नवा पुर्वोत्तरवाक्यांगभाव-

सूचकचिह्नानि स्थापितानीति मुद्रितेपि तथैव प्रतिबिम्बितानीति नाति-चित्रीयते। किन्तु वाचकानां चेतसि चिरमुद्रेगकारितया ऽत्रमानितानि सहृदयैः स्वयमूहितव्यानि तानीति भृशं प्रार्थये। भाष्यं क्वचित्स्थूलाक्षरै र्मुद्रितं क्वचित्सूक्ष्माक्षरै रित्यत्र यन्त्रालयपरिवर्तनमन्यत्र स्थूलाक्षर-विरहश्चेति हेतुद्वयं बहिरङ्गदूषणं नार्थं तिरोधत्त इति न विशिष्य दूषणम् प्रेक्षावत्प्रवृत्तये इह पुनस्तत्त्वमावेदये अत्र भाष्यव्याख्यानं न मदीया-पूर्वाभिनवकल्पनाप्रलपितपदार्थकलितकलेवरम् क्व वा मादृशा मीदृ-शार्थे कल्पनावकाशसामर्थ्यं कथं वेदशव्याख्यानप्रकाशनेन प्रकृते लोकोपकारलेशोऽपि न चाहोपुरुषिकाख्यापनार्थ मत्र मे प्रवृत्तिः अपितु श्रीमत्पार्थसारथिमिश्रै रतिस्फुटं व्याख्याततया श्रीमत्कुमारिल-भट्टपादप्रणीतश्लोकवार्त्तिकाख्यपद्यमयटीकया अतिविशदीकृतेऽप्यत्रभाष्ये-ये उक्तटीकायाः काठिन्या द्विस्तृतत्वाच्च न तद् द्वारापि प्रवर्तितु मुत्स-हन्ते तेषां सुकुमारमतीनामत्र प्रवृत्तये मे प्रवृत्तिरियम्। यद्येतेन कश्चिदुपकारः स्यात्तर्हि अग्रेपि प्रयतिष्ये नात्रातीवकर्तव्यं दोषदृष्टिपरं मनः दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते इति श्रीमद्भपादोक्तय-नुसारेण परगुणग्रहण तत्परायणान्तःकरणा महामहिमशालिनो विद्वांसो दयोदयमधुरदृशा पदप्रचाराप्रगल्भस्य बालकस्येव मम स्खलनेऽपि धृतकौतुका निरीक्ष्येद मत्र मामकीनं श्रमं सफलयन्तु इति सप्रश्रयं प्रार्थयेऽसकृदिति शम्।

इति श्रीमतामाश्रवः

पं० हरिहरकृपालु द्विवेदी

॥ श्रीः ॥

श्रीगणेशाय नमः ।

कल्पकलिकायुते शाबर भाष्ये ।

अरबिन्दासनासीनाम् वीणापुस्तक धारिणीम्
प्रारब्धाभीष्टसिद्ध्यर्थं वन्दे वागीश्वरीमहम् ।१।
नमोऽखिलजगज्जन्म स्थेमभङ्गैक हेतवे । निवद्ध-
नर निस्तार सेतवे वृषकेतवे । २ । स्वर्गापवर्ग-
संसर्ग, मार्गेष्वागमनिर्गमौ । यतो जीवस्य जायेते
तदहं कर्म संश्रये ।३। अचेतनाचिन्त्यशक्तिस्वैरि-
कर्मवशंवदः । चित्रमुच्चावचं भावं चेतन श्चिर
मश्नुते ।४। वेदार्थविज्ञान महार्णवस्य पारं प्रया-
त्वल्पमतिः सुखेन । इतीव यः सूत्रतरिं प्रतेने तं
जैमिनिं वेदमुनिं प्रपद्ये ।५। चेतसा शबरस्वामि
पादपद्ममहं हृदि । चिरं निधाय सद्भा-
ष्यगभीरार्थं प्रकाशये ।६। त्रयी प्रकाशेऽपिहिते
परोक्तया पुंसः प्रवृत्तानपथेऽपिधानम्।। योऽपास्यत-
र्के पुनरुद्दधारध्येयः सदा नः सकुमारिलाङ्घ्रिः ।७।

ब्रह्माण्ड प्रततोरुशाखविमलन्यायप्रसूनो-
त्किरः पुण्यप्राप्तविवेकि सज्जनमनोभी-
ष्टार्थ सम्पादिनः ॥ सन्मूलाविक लाध्वरा-
खिलफलोल्लासित्रयोस्वस्तरोः भाष्य स्या-
ऽस्य सुखेन कल्पकलिकां टीकां समुद्दङ्क्षये
।८। नानाम्नायोच्चशाखाप्रचयसमुचिता लोकलो-
पाय चेष्टैः सवैज्ञै र्गञ्चकैश्चापरिहित वसनैर्वि-
प्लुतप्राच्याद्या मीमांसानन्दवापी ननु निगम-
महारण्य दुर्गस्थलस्था विज्ञैरेषाविशङ्कं कविवर
शवर स्वामिसूक्त्यैवसेव्या ।९। क्वेदं भाष्यमगा-
धबोध विबुधध्यानावधेयार्थकम् । क्वाहंहन्त हतोह-
मन्थरमतिर्व्याख्यातुकामस्तथा । तीर्थाप्लावसु-
घट्टभट्ट चरणोद्दिष्टापदुष्टाध्वना न्वन्तव्योस्मि
परिस्खवलन्नपिचलन्नौ वापहास्यः सताम् ।१०।
प्राच्याचारविचारचारुचरित प्रादुर्भवत्प्राणिभृत्
प्राज्यप्रेम परिष्कृता प्रतिभट प्रौढ़ प्रतापश्रियः
एषा श्री मिथिलेश्वराभिध महाराजाधिराज
प्रभोः निर्देशात्कलिका कृता प्रभवतु प्रेक्षावतां

प्रीतये । ११ । शब्दार्थानितराममी परिचिता नव्याः कविज्ञानिनाम् न ज्ञातेषु रुचिस्तथापि कृतिनामाधास्यते कौतुकम् "स्वल्पा प्रौढ़ पदा-क्रमोपचरिताव्यक्ताक्षरव्याहृतिः वालस्येवममा-प्यसाविति पृथुप्रत्याशया व्यापृतः ।१२। श्रीमद्भ भट्टकुमारिलस्य चरणैर्व्यक्तीकृते शावरे भाष्ये-ऽस्मिन्नपि नूतनार्थविषयव्याख्यास्पृहाचेत्तदा" स्यादेवं तरुणारुणस्य किरणैरामूलमौलिस्फुटे मेयेऽर्थेऽपिपुनः प्रदीपकलिकालोकाभिलाषः सताम् । १३ । मूलार्थावगमोपपत्यभिमतादोपार्थ संयोजनैः अन्यूनानधिका निरुक्तनियतस्पष्टार्थ वाग्विस्तरैः व्याख्यातानु भवत्यपेतविषयासङ्गो व्यथां यादृशीम् । कस्मै केन स तादृशीं प्रकटये जानन्ति ये तत्कृतः ।१४। नेयंबालमुदे यतोऽति-मधुरैः ख्यातैश्चशब्दैः कथा शक्या कर्त्तुमियन्तु किन्तु निगमन्यायोपनीतार्थानाम् ॥ धर्माधर्म-विवेकिनां कृतधियां लोकोत्तरश्रेयसे प्रारब्धेति क्वचित् पदैर्न कठिनैर्दुर्ध्यान्ममव्याहृतिः ।१५।

प्रयोजनपरिज्ञानमन्तरा स्वल्पप्रयास साध्ये कर्मणि शास्त्रे वा मन्दोऽपि न प्रवर्तते प्रागेव तु बहुलायास साध्ये तत्र प्रेक्षावानिति प्रकृतेऽत्र मीमांसा शास्त्रे प्रेक्षावत्प्रवृत्त्यौपयिक विषयप्रयोजन सम्बन्धाधिकारि रूपानुबन्ध चतुष्टय निर्देशाय। वेद ज्ञान निधिर्महर्षि जैमिनिः प्रथम मथातो धर्मजिज्ञासेति सूत्रयाञ्चकार। अस्यां द्वादशाध्याय्यां मीमांसायां प्रमाण भेदशेषप्रयुक्तिक्रमाधिकार सामान्यातिदेशविशेषातिदेशोहबाधतन्त्र प्रसङ्गाः। क्रमाद् द्वादशानामध्यायानां विषया इति स्पष्टमेव तद्विदाम्। ननु व्याकरण सूत्रकारस्य यथा प्रयोजनप्रदर्शनं विना व्याकरणसूत्र रचनायां प्रवृत्तिस्तथा महर्षि जैमिनि मुनेरपि मीमांसासूत्र रचनायां प्रवृत्तिः सम्भवतीति॥ वृथाप्रयोजन प्रदर्शनप्रयासः। शिष्या अपि तद्वदत्र प्रवर्त्तिष्य न्ते नहि प्रयोजनमनभिधाय सूत्राणि प्रणीतानीति। प्रेक्षावन्तो न प्रवर्त्तन्तेइतिनियमः। क्वचि

दस्ति दृष्टचर इति चेन्न। स्वल्प प्रयत्न-साध्ये कौतुकेन पर प्रेरणाया वा प्रवृत्तिसम्भवेऽपि व्युत्पन्न पद-पदार्थस्य निखिलवाक्यगत-सन्देह निराकरणप्रयोजनायां विद्यान्तरोपेय भूतायां प्रचुरपरिश्रमसाध्यायां पण्डितरूपैकवेद्यायां मीमांसायां प्रयोजन परिज्ञानमन्तरा प्रेक्षावतां प्रवृत्यसम्भवात्। किञ्च प्रयोजनाज्ञाना पराधेन शास्त्रान्तरा प्रवृत्तौ स्वल्पमेवानिष्टमापद्यते प्रकृत शास्त्रा प्रवृत्तौ तु निखिल वाःयार्थनिरूपणस्य योन्याय स्तस्मिन्नज्ञाते दुर्ज्ञातेवा सर्बवाक्यार्थ निरूपणमसत्स्यादिति विशिष्टा निष्टसम्भवाच्च अथैवं फलनिर्देशस्यावश्यकत्वे व्याकरणादा-विवात्रापि भाष्यकृतोपितत्प्रतिप्रदान सम्भवाद्धि शिष्य सूत्रकारस्यैव कथ-मत्र प्रवृत्तिरिति वाच्यम् प्रयोजनान्तरप्रति पादन संभावनया स्वोक्त प्रयो-जन प्रतिपादने निर्णयाभावात् प्रवृत्यौपयिक प्रयोजनान्तर पेक्षया प्रकृतप्रयोजनप्रतिपादनस्या त्यावश्कत्वाच्च। ननु श्रोतृवुद्धि समवधानाय यथा

प्रयोजन मभिहितम् तथा शास्त्रारम्भ हेतुभूतः सम्बन्धोऽपि वाच्यः अनेन सम्बन्धेनेदं शास्त्रमायात मिति अन्यथा सूत्रकृतोऽसंबन्ध प्रलापित्वशङ्कया विनेयानामविश्वासापत्तेः अतएवाजिज्ञासितार्था भिधायित्वशङ्कानिराकरणाय अथातो धर्मं व्याख्या स्याम इति वैशेषिकसूत्रे शिष्यप्रश्नानन्तर्य रूपः शास्त्रावतार हेतुभूतः सम्बन्धः प्रतिपादित इति चेत्सत्यम् धर्मज्ञानेन मीमांसाशास्त्रस्य साध्य-साधनरूपः सम्बन्धः धर्मज्ञान मीमांसाशास्त्रयोः समभिव्याहारादेव स्फुटं प्रतीयते इति न सूत्र-कृता स पृथक् निर्दिष्टः। अनन्य लभ्यार्थ सूचक त्वात्सूत्रस्य शिष्यप्रश्नानन्तर्यादिरूपः सम्बन्ध-स्तु न प्रकृत शास्त्रारम्भहेतुभूतः शिष्यप्रश्नं विनापि करुणा वरुणालय महर्षि जैमिने। तमः पङ्कमग्नस्य जगत उद्दिधीर्षया स्वतएवधर्म ज्ञानोपायभूत मीमांसाशास्त्रस्य प्रणयनसम्भ वात्। सचायं सम्बन्धः सम्बन्धिनः समभिव्या हारादेव स्फुटं प्रतीयते। इति न विशिष्याभिहितः

यत्तु वेदाध्ययनानन्तर्यमथशब्दार्थं मत्वा वेदाध्ययनेन मीमांशास्त्रस्यानन्तर्यरूपः शास्त्रावतार हेतुभूतः सम्बन्धः। अथ शब्देन साक्षादेवसूत्रकृताभिहित। इति। तदात्त्वपोऽसंगत इति तत्तुच्छम्॥ वेदाध्ययनजिज्ञासाक्रिययोरान्तर्यरूपसम्बन्धस्यार्थ शब्दार्थत्वेपि मीमांसाशास्त्रावतार हेतुभूतस्य तदानन्तर्यस्य तेनावोधनात् नहि जिज्ञासैव मीमांसाशास्त्रम् जिज्ञासा हि ज्ञानविषयिणीच्छा साच श्रोतृक्रिया मीमांसा तु वक्तृनिष्ठा विचारात्मिकेति तयोः परस्परं भेदात्। पर्यायभ्रमेण मीमांसायां धर्मजिज्ञासापद प्रयोग इति न शास्त्रावतार हेतुभूतः सम्बन्धः सूत्रकृता साक्षादभिहितः।

एवं शिष्यप्रश्न देवताराधन रसायनाद्यानतर्यरूपः गुरुपरंपरात्मकोगुरुपर्वो वा सबन्धो जिज्ञासायामेव बोधितो न मीमांसाशास्त्रे मीमांसाया जिज्ञासाभिन्नत्वात्, शिष्यप्रश्नानन्तर्यरूपः सम्बन्धः कणाद शास्त्रे प्रदर्शित एव गुरुपर्वं

क्रमश्च क्वचिदेवमभिहितः तद्यथा-ब्रह्मा बृहस्पतये मीमांसाशास्त्रं प्रोवाच सोपीन्द्राय सोप्यग्नये सच वशिष्ठाय सोपि पराशराय पराशरः कृष्णद्वैपायनाय सोपि जैमिनये। स च स्वोपदेशानन्तरमिमं मीमांसाग्रन्थं निववन्ध तदेवं सम्वन्धनिरूपणमपि न सत् निप्रयोजनत्वात् यादृशसम्वन्धाभिधने प्रकृतशास्त्रश्रवणे श्रोतॄणां प्रवृत्तिरनभिधभिधाने तत्रा प्रवृत्तिः तादृश एव सम्वन्धो वाच्यः अपेक्षितत्वात्। अप्रवृत्तिनिवृत्तिकरसम्बन्धप्रतिपादनं तु व्यथम्। यत्किञ्चिदनन्तरं यत्किञ्चिदुत्पत्तेः सर्वसम्मतत्वेनाजिज्ञासितत्वात् गुरुपरम्परा कथनमपि व्यर्थमेव निप्रमाणत्वात् निष्फलत्वाच्च नहि अस्मिन् सम्बन्धे किंचित् प्रमाणमस्ति क्वचित् क्रमान्तरस्यापि श्रवणात् तथाहि-ब्रह्मामहेश्वरो वा प्रजापतये मीमांसाशास्त्रं प्रोवाच प्रजापतिरिन्द्राय इन्द्र आदित्यायेत्यादि दर्शनमिति सप्रमाणकः सप्रयोजनश्च सम्बन्धो वाच्यः स च साध्यसाधन

भावरूप एव युज्यते इति भावः इदं पुनरिहावधे-
यम् ज्ञाप्यजन्यभेदेन विषयो द्विविधः ज्ञाप्यो
धर्मः जन्यस्तज्ज्ञानम् धर्मेण सह शास्त्रस्य सम्बंधः
ज्ञाप्य ज्ञापक भावलक्षणस्तज्ज्ञानेन सह जन्य-
जनकत्व लक्षणः धर्मज्ञानमवान्तरप्रयोजनम्
परमप्रयोजनमभ्युदयनिःश्रेयसे तत्कामोधि-
कारीत्यनुबन्ध चतुष्टयं श्रुत्यर्थाभ्यां सूत्रकारेण
श्रोतृप्रवृत्तिसिद्धये समुक्तम् लोकानुग्रहश्च-शास्त्र
प्रस्तावे हेतुः। ननु शिष्टाचारपरम्पराप्राप्तस्य
विघ्नध्वंस समाप्त्यादि फलकस्येष्टदेवतानमस्कारा-
द्यात्मकस्य मङ्गलस्याकरणात् सूत्रकारस्याशिष्ट
त्वशङ्कया प्रेक्षावतामास्तिकानामत्र प्रवृत्त्यनुप-
पत्तिरिति चेन्न। अन्यार्थनीयमानोदकुम्भवत्।
अथ शब्दश्रवणमात्रेण मङ्गलस्य कृतत्वात्
"ओंकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा
कण्ठं भित्वाथनिर्यातौ तेन मङ्गलिकावुभाविति"
स्मृतेः। लोकशब्दं प्रयुञ्जानेन भाष्यकारेणापि
तत्त्वानुस्मरणरूपं तत्कृतमेव विशुद्धज्ञानदेहाये-

त्यादि वदता वार्त्तिककारेणास्पष्टमेव मङ्गलाचरणं कृतमिति नात्र तदुपालम्भः सम्भवति इति ध्येयम्। लोके येषु अर्थेषु इति भाष्यम्।

कल्पकलिकायुते शावर भाष्ये

धर्म जिज्ञासाधिकरणम्।

सूत्रम्। अथातो धर्म जिज्ञासा।

भा०लोके येषु अर्थेषु प्रसिद्धानि पदानि तानि सति सम्भवे तदर्थानि सूत्रेष्वित्यवगन्तव्यम्! ताध्याहारादिभिरेषां परिकल्पनीयोर्थः परिभाषितव्यो वा एवं वेदवाक्यान्येव एभि र्व्याख्यायते। इतरथा वेदवाक्यानि वाख्येयाति स्वपदार्था श्च व्याख्येया इति प्रयत्नगौरवं प्रसज्येत?

अत्र षड़र्थाः प्रतीयन्ते। १ सर्वव्याख्या। २ उपालम्भः। ३ प्रत्याख्यानम्। ४ परिसंख्या। ५ स्तुतिः। ६ अथ शब्दस्य दूषणम्। व्याख्यानं द्विविधं साधारणमसाधारणञ्च आद्यं निखिल

व्याख्येयानुगत मन्यमेकैकसूत्रनियतम् ननु प्रथमसूत्रसन्निधिपाठात् आदिमसूत्रघटकार्थ शब्ददूषणपरमेव युज्यते इति चेन्न। आदौ प्रयुक्तस्य भाष्यस्य निखिलव्याख्यानशेषत्वसम्भवे नाथशब्ददूषणपरत्वनिर्णायकप्रमाणाभावात् सर्व व्याख्यानसाधारणविषयस्य निरूपणं ग्रन्थादावेव युज्यते इति न स्थानकृतो विशेष इति भावः ननु सकृदुच्चरितस्य वाक्यस्यानेकर्थत्वकल्पनमनुचितमिति चेन्न। व्याख्यातृपुरुषभेदेनैकवाक्यस्यानेकार्थत्वस्वीकारेपि स्वस्वमते एकार्थकत्वस्यैव सम्भवेनैकमतेऽनेकार्थत्व कल्पनाभावेनादोषात्। गतोस्तमर्क इत्यादिवत् सति तात्पर्ये पौरुषेय वाक्यस्यानेकार्थत्व स्वमपि कारणात्र कल्पनायामपि दोष विरहाच्च। पूर्वोक्तेषु षट्सु पदोषु सर्वव्याख्यानसाधारणं व्याख्यानं मधुना प्रदर्श्यते तथाहि सूत्रेषु निखिलव्याख्येयसूत्रेषु यानि पदानि सानी तानि सति सम्भवे लोकप्रसिद्धार्थानि एव ग्राह्याणि इत्यनेन प्रवृत्तिरुक्ता न पदान्तरा

ध्याहारेणैषाँ परिकल्पनीयोऽर्थः गुणवृद्धयादि वपरिभाषितव्यो वेत्यनेन च निवृत्तिरुक्ता प्रवृत्ति निवृत्ति परकवाक्यास्यैव शास्त्रत्वात् पदाहुवृ द्धाः प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा पुंसाये नोयदितच्छास्त्रमधीयते इति। अत्रै तच्छब्दस्य सर्वनामत्वेन तस्य निसर्गतः प्रधानपरामर्शितया सूत्राणां सप्तम्या विशेषेणत्वप्रीत्या गुणतया प्रधानभूतानां पदानामेव परामर्शस्य न्याय्यतया प्रवृत्तिवन्निवृतेः पदविषयत्वप्रतीयातावपि तत्रा-ध्याहारादेः प्राप्तिविरहादगत्या निवृत्तिःगुण-भूतेषु सूत्रेषु एव बोध्य पदस्य प्रवृत्तिप्रत्यत्यो भयात्मकस्य नियतक्रमतया तत्राध्याहारादे वक्तु मशक्यतया पदघटितवाक्ये एव तन्नि-वृतिरवगन्तव्या तत्राध्याहारादेर्वक्तुं शक्यत्वात् ईदृश सर्वसाधारण व्याख्यान फलं भाष्यकारः स्वयमेवाह एवं वेदवाक्यान्येभिर्व्यायन्ते इत्यादि अयं भावः वेदवाक्य कुसुम ग्रथनार्थत्वात् सत्राणाम् सत्रैवें दवाक्यान्युदाहृत्यव्याख्यायन्ते

तेषां प्रयोजन वत्वात् नतु तदुपायभूतसूत्राणि ते षां स्वातन्त्र्येण प्रयोजनवदर्थप्रतिपादकत्वाभावत् एतेन व्याख्यानेन सर्वाणि सुत्राणि व्याख्यातानि सुत्रेषु व्याख्येषु निखिलानि पदानि लोकप्रसिद्धार्थकान्येवेतिनात्रापूर्वार्थकल्पनाप्रयुक्त संशयावकाशः नन्वत्र भाष्ये एव शब्दस्वारस्येन सर्वत्रसूत्र व्याख्यानस्या नाश्यकत्वप्रतिज्ञयाग्रे करिष्यमाणं सूत्र व्याख्यानमसंगतंस्यादिति चेन्न अल्पार्थकत्वतात्पर्येणात्रैव शब्दप्रयोगात लोक प्रसिद्धार्थकपदग्रहणेन प्रायः सूत्राणि व्याख्यातानि क्वचिदप्रसिद्धार्थकपदव्याख्यानमल्पमवशिष्यते तच्च सदपिस्वल्पत्वादसदित्युपचर्य्यते इति भावः इतरथेति भाष्यम् यदिसूत्रेषु लोकप्रसिद्धार्थकातिरिक्तानि पदानि गृह्णीरन् तदा वेदवाक्यव्याख्यानं स्वसूत्र व्याख्यानं चापेक्षितं स्यादित्युभयव्याख्याने प्रयत्नगौरवं स्फुटमेव, ननु प्रसिद्धार्थकपदग्रहणस्या ध्याहारादिवर्जनस्य सति सम्भवे सर्वत्र सर्वसम्मततया त्र विशिष्य-

तदभिधानं मन्दफलम् नहि बलाद् प्रसिद्धार्थक-
पद ग्रहण मध्याहारादि योजनं चक्वचित् क्रियते
इति चेन्न नासूया कर्त्तव्येतिन्यायेन पौरूषेय-
वाक्ये केनचित् स्वप्रसिद्धार्थकस्याप्यौचित्येन त-
त्रतस्यगुणत्वे प्रसिद्धार्थकत्वस्य गुणत्वेना दोषात्
नहि प्रसिद्धार्थो न वाच्यः पौरूषेयेण वाक्येनेति
नियमः तथा सति विनेयानामविश्वासापत्तेः
प्रसिद्धार्थाभिधान द्वारैव क्वचिद् प्रसिद्धार्थ
मपि विश्वसिति लोकः तस्मा त्साति सम्भवे
प्रसिद्धार्थकग्रहण मध्याहारादिवर्जनमित्युक्ति
भाष्यकृतो नासंगतेतिबोध्यम् ।

एवमपि येषां न परितोषस्तेषांसन्तोषार्थसमाधा
नान्तर मुच्यते। अथवा तन्त्रान्तरे गुणवृद्ध्यादि-
परिभाषया अध्याहारादिना च सूत्रव्याख्यानं
पश्यतः तदपि व्याख्यानाङ्गमेवेति भ्राम्यतः विवे
काय न तद् व्याख्यानाङ्गमित्यस्मिन् शास्त्रे नतद-
पेक्षत इत्युपदेशे भाष्य तात्पर्य्यमितिबोध्यम् ।
द्वितीये उपालम्भपक्षे भाष्यमिदमित्थं व्याख्येयम्

प्राचीनवृत्तिकारस्य भवदासस्यै तत्सूत्रव्याख्यान मीदृशम् अथात इति पदद्वयेना नन्तर्यमात्र मुच्यते तथा च वेदा ध्ययनानन्तरं वेदार्थविचारः कर्त्तव्य इति तदेतदुपालभ्यते लोके येषु अर्थे-ष्वित्यादि भाष्येण भिन्नं पदद्वयेपमेकपदीकृत्या नन्तर्यमात्रार्थकत्वमथातः शब्दस्य व्याख्यानम-युक्तम् मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येऽवधारणइति कोषात् अथ शब्दस्य मङ्गलाद्यर्थकत्व प्रसिद्ध मेव अतः शब्दस्यापि हेत्वर्थकत्व प्रसिद्धं "क्षेम-सुभिक्षोयमतोस्मिन्प्रतिवसामीति भाष्येण तस्य प्रसिद्धार्थकत्वप्रदर्शनात् तदेतत्प्रसिद्धार्थकं भिन्नं पद द्वय स्वार्था त्प्रच्याव्यान्यत्रार्थे एकपदीकृत्य प्रयुज्यमानं पारिभाषिकं स्यात् तच्च सत्यां गता-वसंगतम् गौरवात्फलाभावात् विनेयानामपरितो-षकत्वाच्च एवंच लोके येषु अर्थेषु मलङ्गलानन्तर-हेत्वाद्यर्थेषु प्रसिद्धानि यानि अथातः पदानि तानि सति सम्भवे आनन्तर्य हेत्वाद्यर्थकान्येव सूत्रेषु ग्राह्याणि नाध्याहारादिभिरेषां परिकल्पनी-

योथ ः परिभाषितव्यो वा फलवद् वेदवाक्यस्यैव व्याख्येयत्वात् अन्यथा वेदवाक्यत्य स्वपदार्थस्यच व्याख्याने प्रयत्नगौरवं स्यात् सूत्रव्याख्यानक्लेश परिश्रान्तो वेदवाक्यार्थावगतये न प्रवर्तेतोपाय सौकर्य्य स्योपेय प्रवृत्यौपास्योयेद्यकत्वात ३ तृतीये प्रत्याख्यानपक्षो इत्थं भाष्यसंगतिः। भाष्यकारो हिसूत्राणि पठित्वा तानिअव्याख्यायैव वेदवाक्यानि उदाहृत्य व्याचष्टे ततईदृशी शङ्का जायते भाष्यकारःसूत्राणि पठित्वापि नव्या चष्टे केवल वेदवाक्यान्येवव्याचष्टे तत्कस्य हेतोः किमेषां हुं फत्तदि वत्कश्चिदर्थ एव नास्ति उत्तार्थपरिज्ञानभावात् अर्थ वा स्फुरार्थतया निष्प्रयोजनतया चाव्याख्येयत्वा दिति अस्याः शङ्काया निराकरणं प्रत्याख्यान भाष्येण क्रियते सूत्राणि नव्याख्येयानि निष्प्रयोज नत्वात् सप्रयोजनत्वाच्च वदेवाक्यान्येव व्याख्ये यानि वेदवाक्येन हि अभ्युदयनिःश्रेयसोपयोगि कर्मोपदिश्यते इति तदर्थं विचारः आवश्यकः नहि अनिश्चित्य कर्म कर्तुं शक्यते नवा विचारं

विना तन्निश्चय इति तच्चिकीर्षया तन्निर्णयः श्रेयान् ॥ सूत्रेण तु स्वतः न किंचित्कर्तव्यमुपदिश्यते इति निष्फलत्वात् तद्विचारो नावश्यक-इति वृत्तिकारेण लौकिकार्थानुसरणपरेण वेद-वाक्यव्याख्याने एव यत्नःकार्यः तदिदमुक्तं वेद-वाक्यान्येव एभि र्व्याख्यायन्ते मा भूत्केवलसूत्र-व्याख्यानं-उभयव्याख्याने को दोष इत्यत आह इतरथा हि इत्यादि भाष्येण प्रयत्नगौरवदोषः तत्रस्फुटं प्रदर्शितः। अथ उपायभूतसूत्रव्याख्यानं विना कथमुपेयस्य वेदवाक्यस्य विचारः कर्तुं शक्यः सत्यम् ॥ उपायभूत सूत्रार्थज्ञानमावश्यकं परन्तु सूत्राणामतिस्फुटार्थकतया तदर्थज्ञानाय न व्याख्यानापेक्षेत्याह लोके येषु अर्थेषु यानि पदानीति। ततश्चासन्देहान्न सूत्रव्याख्यानमपेक्ष्यते इति तद्भावः सोयं प्रत्याख्यानपक्षो न युक्तः यतः पदं विभज्य सूत्राणि भाष्यकृताद्यापि न व्याख्यातानि तथापि तात्पर्यतः सर्वसूत्राणि व्याख्यातान्येवेत्य-लपवुद्धे रेवैष निर्णयः। सूत्रव्याख्याने न भाष्यकृत

स्तात्पर्यम् इति प्रत्याख्यानमेव ज्यायः निपुणप्रज्ञ-स्तु तात्पर्यतः सूत्राणां व्याख्यानदर्शनात्प्रत्याख्या-नपक्षो भाष्यकृतो नाभिप्रेत इत्येव परामृशति। अतएव चोदनासूत्रे नन्वशक्तमिदं सूत्रमिति। न्यूनत्वं चोदयित्वा परिहरिष्यति एवमर्थैकत्वादे-कं वाक्यं साकाङ्क्षं चेद्विभागे स्यादित्यत्र किमथ-मुभयं सूत्रितमित्यतिरेकं चोदयित्वा परिहृत्य सम्यक् सूत्रितमिति वक्ष्यति। विशये प्रायदर्शना-दित्यत्र चागमकं सूत्रमितिन्यूनतां चोदयित्वा परिहारं च वक्ष्यति तदिदं सूत्रव्याख्यानप्रत्या-ख्यान पक्षो विरुध्येत अपि च उपायभूतसूत्र-व्याख्यानं बिनोपेयभूतवेदवाक्यविचारोऽशक्य सम्पादन इति प्रत्याख्यानपक्षः सर्वथा अनुचितः नच सूत्रं विनापि उपायान्तरेण वेदविचारस्य कर्त्तुं शक्यतया न तदर्थं सूत्रव्याख्यानमपेक्ष्यत इति वाच्यम् वेदविदामुपायान्तरस्य सुकरस्य प्रदर्शयितुमशक्यत्वात्॥ अपि च सूत्रव्याख्यान-प्रत्याख्यानवादिनापि न व्याख्यानमात्रं प्रतिषिषे-

धयिषितं तथा सति नव्याख्यातव्यमित्येवोच्येत। अध्याहारादिभि र्न परिकल्पनीयोऽर्थ इतिवदता तु दुष्ट व्याख्यानमेव निराचिकीर्षितमिति निर्दुष्टव्याख्या अनुमन्यते अतएव स्वयं कृत सूत्रव्याख्यानेन न विरोधः इति॥ इदानीं परिसंख्यापक्षे चतुर्थे भाष्यतात्पर्यं निरूप्यते। वैदिकजैमिनीयवाक्ययो र्यथाश्रुतगृहीतार्थयो-र्यत्र व्याख्याने परस्परं विरोधः प्रतिसन्धीयते तत्रश्रुतार्थानुसारेण श्रुतिं व्याख्याय तदनुसारे-णाध्याहारादिभिः सूत्रार्थोवर्णनीयइत्यनेन भाष्ये-णोपदिश्यते वेदो वा प्रायदर्शनादिति सूत्रे सू-त्रानुसारेणैव वेदस्यान्यथाकरणं दृश्यते इति तु न सत् यतस्तत्रापि ऋगादिशब्दानां लक्षणया वेद परत्वं न सूत्रानुसारेण व्यवस्थापितमपि तु वैदि-केनोपक्रमेण विरोधात् तथाहि प्रजापतिरकाम-यत प्रजाः सृजेयेति सतपोऽतप्यत तस्मा-त्तेपन्नात् त्रयो देवा असृज्यन्त अग्निर्वायु रादित्यः ते तपोऽतप्यन्त तेभ्यस्तेपानेभ्यः त्रयो

वेदा असृज्यन्त अग्ने ऋग्वेद, वायोर्यजुर्वेद
आदित्यात्सामवेदः इत्युपक्रम्य श्रूयते
ज्योतिष्टोमे तस्मादुच्चै ऋचा क्रियते उपांशु
यजुषा उच्चैःसाम्ना अत्रोच्चैष्ट्वादयो धर्माःकि
मुपक्रमवाक्योक्तवेदधर्माः उत ऋगादिधर्मा
इति सन्दिह्योपक्रमवाक्यानुसारेण संजातविरो-
धितया च ऋगादि शब्दानां लक्षणया वेदपर-
त्वमङ्गीकृत्योच्चैष्ट्वादयो धर्मा वेदगामिन इति
व्यवस्थाऽपितमिति स्पष्टमेव तद्विदाम्। तथाऽच
यत्रापि न सूत्रानुसारेण वेदस्यानर्थत्वकल्पना
तथा च वेदवाक्ययोः परस्परं विरोधे दुर्वलस्य
लक्षणादयो दोषाः सन्तु नाम श्रुतिसूत्रविरोधे तु
सूत्रस्यैवान्यथा करणं युज्यते अप्रधानत्वात् सूत्रा-
णाम् न तु वेदवाक्यानां तेषां प्राधान्यात् ननु प्रधा
नविरोधेऽप्रधानस्यान्यथाकरणं प्रसिद्धमेवेतिनिष्-
फलैव तथापि परिसंख्येतिचेदुच्यते येषां सूत्रापेक्ष
या श्रुतेः प्राधान्यनिर्णयः पौरुषेयापौरुषेयत्वनिब-
न्धनविशेषग्रहश्च तेषां परिसंख्याया मन्दफलत्वेपि

येषां धर्मे यथा वेदः प्रमाणं तथा सूत्रमपि नादृष्टा-
र्थकयोरनयो कश्चिद्विशेषः येन सूत्रव्याख्याने अ-
ध्या हारादि कार्यं न वेदव्याख्याने इति मतिःतेषां
परि संख्यार्थवती एवं श्रुतिसूत्रयोरगृहीतविशेषयोः
परस्परविरोधेऽविशेषाद्‌ विकल्पस्स्यात्‌ तथा वेद
वाक्यव्याख्यानोपायभूतानां सूत्राणां प्रथममु-
पस्थितानामसंजातविरोधितया यथाश्रुतार्थकत्व-
मास्थायैतदनुसारेण वेदार्थो नेयः स्यादिति
तन्निवृत्तये परिसंख्यार्थवती अत्रैवं भाष्यं यो
जनीयम्‌ यत्नगौरवभयात्‌ यत्प्रसिद्धार्थग्रहणं
अध्याहारादिवर्जनं चाश्रयणीयं प्राप्तमनूद्य त-
त्सर्वं वेदाविरोधसम्भवे सति नासतीत्ययमर्थो
विधीयते सति संभवे कर्तव्यमित्येवं विधिरूपं
वाक्यस्यासति सम्भवेनेत्येवं निषेधपरत्वात्परि-
संख्यात्वमिति असम्भवे सति अध्याहाराश्रयणो-
दाहरणं । तृतीयाध्याये चतुर्थपादे तृतीयसूत्रे ।
अपि वा शेषभाजां स्याद्विशिष्टकारणत्वादित्यत्र
स्पष्टम्‌ ॥ तथा हि दर्शपूर्णमासयोः मध्याद

वद्यति पूर्वार्धाद्वद्यति इति श्रूयते तत्रावत्त-स्य हविषो नाशदोषापहारे सति यस्य सर्वाणि हवींषि दुःष्येयु नंश्ये-युरपहरेयु र्वा आज्येनैतादेवताः परिसंख्याय यजेंतेति पुनः श्रूयते अत्रैवं सन्देहः किं हविषो विनाशादौ सति आज्येन यजेत उत शेषादेव पुनरवदेयम् न च तथा सति अत्राज्यविधानमनर्थकं स्यादिति वाच्यम् । निखिलस्य हविर्विनाशतात्पर्येणास्य वचनस्याज्यविधायकत्वाभ्युपगमात् ॥ प्रकृते निश्शेषहविर्विनाशाभावेनैतद्विधे नं प्रवृत्तिः एवं च प्रकृते अवदाने विनष्टेऽपि अवशिष्टे पुनर्मध्यपूर्वार्द्धसंभवात् तत एव पुनरवदेयं नहविरन्तरस्याज्यस्यापेक्षा यत्र संपूर्णं हविर्विनष्टं तत्र हविरन्तरापेक्षाया माज्यं हविर्विधीयते इति प्राप्ते सिद्धान्तः । संपूर्णं पुरोडाशं प्रकृत्य श्रूयते मध्यादवद्यति पूर्वार्धादवद्यति अवत्तहविर्विनाशे तु अविकलपुरोडाशाभावात् ॥ न पुनरवदानं तत्र युज्यते अवदेयस्यो-

परितनाङ्गुलिपर्वमात्रावयवस्य हविषस्तत्रास-त्वात्,अधस्तनावयवस्य सतोपि हविष्ट्वाभावात्। तस्मात्तत्र हविव रन्तरमाज्यमेव भवति ॥ न च यस्य सर्वाणि हवींषि दुःष्येयु रित्यत्र सर्वशब्द-श्रवणात्सर्वहविर्विनाशे एवाज्यं विधीयते नावयवविनाशे इति वाच्यम् हविर्विनाशमात्र-स्यैव हविरन्तरविधाने निमित्ततया सर्वशब्दस्य वाक्यपरिसमाप्तिन्यायेन प्राप्तानुवादकत्वाङ्गीका-रात्। एवं सिद्धान्तिते यत्र शेषकार्यार्थं गृहीतस्या-वदानस्य नाशस्तत्र किं कर्तव्यमित्यपेक्षाया मपि वा शेषभाजामित्यादि सूत्र मुपतिष्ठते अस्यार्थः स्विष्टकृदिडादिनाशः किं शेषावदाननिमित्तमु-त नेति सन्दिह्य यागशेषप्रतिपत्त्यर्थत्वात्तन्नाशे पुनः शेषादवदेयम् इतिपूर्वपक्षे साकल्यदशायां उत्तरार्द्धावयवस्य स्विष्टकृत्संस्कार्यस्य द्रव्यस्य विनाशात्॥ अवशिष्टस्यो त्तरार्द्धस्य तादृशद्रव्यत्वा भावान्न ततो वदेयम् पूर्वोक्तन्यायेन हविर्विनाशे आज्यस्येव द्रव्यान्तरस्यापि न प्रयोजकत्वम् अन्यत्र

क्रियमाणानां शेषसंस्कारकत्वायोगात् सूत्रस्थे नापि वा शब्देन पुनरवदानव्यावृत्तिर्बोध्यते, एवं च स्वार्थावत्तनाशे शेषभाजां नावदानं किन्तु लोप-एवन्याय्यः ॥ तथा च यत्राध्याहारं विना श्रौतार्थो न संगच्छते तत्रागत्याध्याहारः कार्य्य एव यत्र तु अध्याहारं विनापि सूत्रार्थ उपपद्यते तत्राध्याहारादिकल्पना न संगतेति निष्कर्षः । एवं पशोश्च विप्रकर्षः तन्त्रमध्ये विधानादितिसूत्रे विधानादितिपदं प्रथमया विपरिणम्यते विधा-नस्य साध्यत्वेन प्रथमार्हत्वात् । तथा च पशो श्चविप्रकर्षात् तन्त्रमध्ये पुरोडाशानां विधान-मित्याकारेऽर्थसंगति र्नान्यथा एवं लौकिक-वैदिकवाक्ययो रविशेषेण पौरुषेयत्व शङ्कानिरा-करणार्थमिदं सूत्रं । लोके सन्नियमात् प्रयो-गसन्निकर्षः स्यादिति अत्र लोक इतिपदस्य व्यवहितेन सन्निकर्षपदेन संम्बन्धः तथा च लोके प्रमाणान्तरसंवन्धात् प्रयोगसन्नियमः स्यात् । लौकिकानां शब्दानां प्रमाणान्तरगोचरा-

र्थाभिधायकतया पौरुषेयत्वं वैदिकानां तु शब्दानां प्रमाणान्तरागोचरार्थाभिधायकत्वेनापौरुषेयत्वमिति तयो र्महद्वैषम्यमितिभावः। यद्यपीदं परिणामोदाहरणमपि सम्भवति तथापि परिणामोदाहरणस्य पूर्वमेव प्रदर्शनात् एतद्व्यवहितकल्पनोदारणमेव युक्तमिति वोध्यम् । एवं व्यवधिवाक्यभेदसूत्रान्यथाकरणगुणकल्पनोदाहरणानि वोध्यानि । स्तुतिपक्षपरिग्रहणेदानीं भाष्यं व्याख्यायते पारिभाषिकाद्यर्थावधाननिवन्धनक्लेशपरिजिहीर्षया परमकारुणिको भगवान् जैमिनि महर्षिः लोकप्रसिद्धार्थैः पदैः मीमांसाशास्त्रं निवबन्धेतिलोकेइत्यादि सूत्रकारस्य स्तुतौ भाष्यतात्पर्यम्। सूत्रकारस्तुतेः प्रकृते उपयोगाभावादयमपिपक्षो न समीचीन इति॥ अथशब्ददूषणपक्षः परिगृह्यते भवितव्यं तु तेनेत्यतः तत्तु वेदाध्ययनमित्यतो वा प्रागेकवाक्यभूतेन लोकइत्यादि भाष्येणाथशब्ददूषणं प्रदर्श्यते लोके प्रसिद्धार्थ पदैः सूत्रैः वेदार्थ निर्णयः कार्यो

इत्यभिप्रायो निरूपितः। स चात्र न संगच्छते अथशब्दार्थनिर्णयाभावात् यदव्यभिचारेण धर्मजिज्ञासा भवति तस्य नियताऽव्यवहितपूर्ववर्त्तिनः पदार्थस्य निरूपणमन्तरा किन्निरूपितानन्तर्यमथशब्दार्थः प्रतीयेत तत्प्रतीतिं विना कथमथशब्दस्य प्रसिद्धार्थकत्वं यत्किञ्चिदानन्तर्यस्य सर्वत्र सत्वेन तदुक्तौ न किञ्चित्प्रयोजनम् अवश्यमेव जनः किंचित्कृत्वा किञ्चित्करोति इतिसार्वजनीनमेतत् ॥ अयं भावः भवितव्यं तु तेनेत्यतः प्रागेकवाक्यभूतेन भाष्येण प्रसिद्धार्थैः पदैः वेदार्थनिर्णयः प्रतिज्ञातः सचेह नास्ति अथशब्दार्थाविवेकात् तत्तु वेदाध्ययनमितिद्वितीयावधौ प्रसिद्धार्थकमेवपदं वक्तुं शक्यं तच्च नेह दृश्यते अप्रसिद्धार्थकस्याथशब्दस्योपादानादित्याक्षेपः ॥ ननु पूर्वोक्तेषु साधारणादिषु पञ्चस्वपि पक्षेषु प्रसिद्धार्थकपदग्रहणस्य व्यवस्थापिततया प्रसिद्धार्थकाथशब्दग्रहणतात्पर्येण पुनरेतदर्थकथनमनुचितं मनाकाङ्क्षितत्वादिति

चेन्न। निदर्शनपरत्वात्तदुपादानस्य यथा अथशब्दः प्रसिद्धार्थकः एवं पदान्तरमपि बोध्यमित्याशयेन तदभिधानम् अथवा प्राचीनवृत्तिकृता भवदासेन भिन्नार्थकमथातइतिपदद्वयमेकपदीकृत्यानन्तर्यमात्रार्थकमिति व्यवस्थापितं तन्निराचिकीर्षया अष्टमाद्याथशब्दवदस्यापि केवलस्याथ शब्दस्यानन्तर्यमात्रार्थकत्वं न पदद्वयस्येति तात्पर्येणाथशब्दार्थकथनमित्याशयो विभाव्यताम् अपि च यत्र विधिवाक्यं विचार्यते तत्रैव सूत्रव्याख्यानं निराकृतं सूत्रविधिवाक्योभयविधव्याख्याने प्रयत्नगौरवस्य प्रदर्शनात् यत्र तु किंचिदपि विधिवाक्यं न व्याख्यायते तत्र सूत्रव्याख्यानं न निराकृतम् अन्यथात्र कस्यचिदपि विधिवाक्यस्य विचाराभावेन सूत्रस्याप्यव्याख्याने भाष्यमेव निर्विषयं स्तात्। यद्वा सर्वत्र सूत्रे प्रसिद्धार्थकस्यैव पदस्य ग्रहणमितिप्रतिज्ञाते ऽत्राथशब्दे पूर्ववृत्तस्य नियतस्य कस्यचित्प्रतीत्यभावेन नियतानन्तर्यस्य बोद्धुमश-

क्यतया कथं प्रसिद्धार्थकस्यैव पदस्यात्रग्रहण-मिथ्याक्षेपस्य समाधानायाथशब्दार्थकथनं युज्यते एव। आक्षेपभाष्यम् तत्र लोक इत्यादि यद्वा नावयवार्थं प्रदिदर्शयिषया अथशब्दव्याख्याने येन प्रसिद्धार्थकपदग्रहणप्रतिज्ञाविरोधः सम्भाव्येत किन्तु तदर्थकथनप्रसङ्गेन शङ्कासमाधानाभ्यां वेदाध्ययनस्य पूर्ववृत्तित्वं स्नानोत्कर्षश्च निरूपणीये ते चाथशब्दार्थनिरूपणप्रसङ्ग मन्तरा न निरूपयितुं शक्येते अनाकाङ्क्षिताभिधानभयात्। तथा च न पूर्वोक्तविरोधः इदं पुनरिहावधेयम् साधारणादिपञ्चसु पक्षेषु प्रयत्नगौरवपर्य्यन्तं पृथग् वाक्यम् तत्र लोकइत्यादि तु वाक्यान्तर मथशब्ददूषणपरम् तस्य चावधिद्वयं पूर्वादिशाव सेयम्।

आक्षेप भाष्यम्

"तत्र लोकेऽयमथशब्दो वृत्तादनन्तरस्य प्रक्रियार्थो दृष्टः नचेह कश्चिद्वृत्त मुपलभ्यते, भवितव्यन्तु तेन यस्मिन् सति अनन्तरं धर्मजिज्ञासाऽवकल्पते तथाहि प्रसिद्धार्थकः स कल्पितो भवति तत्तु वेदाध्ययनम् तस्मिन् सति सावकल्पते । नैतदेवम् अन्यस्यापि कर्मणोनन्तरं धर्मजिज्ञासा युक्ता प्रागपि च वेदाध्ययनात् ।

तत्रभवितव्यमित्यादेःपूर्वेण दूषणग्रन्थेनैकवाक्यभूतस्य योर्थः स व्याख्यातः प्रथमावधिपक्षो तुभवितव्यमित्यादिःपरिहारग्रन्थः अयंभावः सूत्रे सर्वत्र सतिसम्भवे प्रसिद्धार्थकस्यैव पदस्य ग्रहणमितिप्रतिज्ञया ऽनर्थकस्याप्रसिद्धार्थकस्य च पदस्याग्रहणबोधनादानन्तर्य्यार्थकस्यैवाथशब्दस्य ग्रहणमित्युत्सर्गतः प्राप्तावपि यन्निरूपितानन्त-

र्थमथशब्देनाभिधित्सितं तस्य प्रमाणविरहे-
ण निर्णयशङ्कायां कृत्रिमेण कर्तु रिव धर्मजि
ज्ञासारूप कार्येण कारणस्य पूर्ववृत्तस्य कस्यचित्क
ल्पनं सम्भवतीत्याशयेन सामान्यतः उत्तरं। भवित
व्यन्तु तेनेति सामान्यसिद्धिरेव विशेषं साध-
यतीति तात्पर्येण विशिष्याह तत्तु वेदाध्यय-
नम् यदातु भवितव्यमितिदूषणभाष्यन्तदा तु
वेदाध्ययनमित्येवोत्तरमिति भाष्यार्थस्तु अथप्र
जानामधिपः प्रभाते इत्यादौ यथा अथशब्दस्य
पूर्व वृत्तानन्तरप्रतिपादकत्वं दृष्टं तथा अथातो
धर्मजिज्ञासा इत्यत्र न किञ्चित्पूर्वं बृत्तं समुपल-
भ्यते यदानन्तर्यमथशब्दस्य व्यवस्थाप्येत इत्याह
न चेति ननु शिष्यप्रश्नाद्यानन्तर्यमेवास्तु तर्हि-
अथ शब्दार्थ इत्यत आह भवितव्यन्तु तेनेति न
किञ्चिदानन्तर्यं वुबोधयिषितं तस्य सर्वत्र सुलभ-
त्वेन तदुपादाने प्रयोजनविरहात् किन्तु तस्या-
नन्तर्यं वक्तव्यं यस्मिन् सति नियमेन धर्मजि-
ज्ञासा भवति असति न भवति न च शिष्यप्र-

श्नादि स्तथा किन्तर्हि तदित्याह तत्तु वेदाध्ययनम् तस्मिन् हि सति सावकल्पते इति आक्षेपभाष्यं नैतदेवम् अन्यस्यापीतिननु नावश्यं नियमः वेदाध्ययनानन्तरमेव धर्मजिज्ञासा भवति अनधीतवेदस्यापि संकल्पादितो धर्मजिज्ञासादर्शनादित्याशङ्कते अन्यस्यापीति। नन्वेतदाक्षेपोऽयुक्तः धर्मजिज्ञासारूपकार्येण तत्कारणीभूतस्य वेदाध्ययनस्यैव वृत्तत्वनिश्चयात् अन्यथा धूमसत्तयाग्निसद्भावनिर्णयोपि न स्यात् तत्रापि अन्यतोपीतिसंदेहसंभवात् प्रमाणदृष्टार्थे सन्देहाभावस्तु प्रकृतेऽपि समः इतिचेत्सत्यम् ॥ सूत्रस्याथशब्देनैव वेदाध्ययनानन्तर्यमुपदिश्यते इत्यभिप्रायेणाक्षेपः तेनानन्तर्यमात्रं वक्तुं शक्यते न विशिष्टानन्तर्यम् अन्यथाऽप्रसिद्धार्थकत्वेन पारिभाषिकत्वापत्तेः। विशिष्टशक्तौ प्रमाणाभावात् कोषादित आनन्तर्यमात्रे शक्तिग्रहात् तथा च यदनन्तरं धर्मजिज्ञासा भवति तन्न ॥ वेदाध्ययनमेव किन्तु संकल्पादिकमपि सम्भवती त्याशयेना अहन्य-

स्यापीति। वस्तुतस्तु असूत्रितत्वोपालम्भो न युक्त
सूत्रेणानन्तर्यमात्रमुपदिश्यते तच्च दृष्टार्थकमि-
ति तेनवेदाध्ययनमाक्षिप्यते एवं च यदनन्तर-
मेव धर्मजिज्ञासा भवति तद्वेदाध्ययनमेवा-
न्यथानन्तर्योपदेशस्यादृष्टार्थत्वापत्तेः। यत्किंचि-
दानन्तर्यस्य सर्वत्र सत्वेन तदुपदेश प्रयोजन-
विरहात् विशेषानन्तर्यमेव बुभुत्सितं तच्च वेदा-
ध्ययनमेव दृष्टार्थोपकारकोपि संकल्पादि र्नाक्षि-
प्यते तस्य क्रियामात्रोपकारकत्वेन साधारणतया
जिज्ञासायामसाधारणकारणत्वाभावात् ॥ प्रा-
गपिच वेदाध्ययनादिति ॥ आक्षेप भाष्यम् ननु
अन्यस्यापिककर्मणोनन्तरं धर्मजिज्ञासाभव-
तीत्युक्त्यावदेदाध्ययनात, प्रागपिसा लब्धैवेतिपुनः
तदुपादानंपुनरुक्तमिति चैन्न ॥ एतद्भाष्य-
स्यापिचेतिपदद्वयस्या न्यथायोजनीयत्वात् अपि
च प्राग् वेदाध्ययनाद्धर्मजिज्ञासा युक्ता अय
म्भावः वेदार्थ एवधर्मो न बुद्धादिवाक्यार्थ
इत्यस्य जैमिनिमुनेः वेदवाक्यार्थ विचारे एव

प्रवृत्तिरित्यस्य च निर्णयस्याभावेन धर्म-सामान्य ज्ञानाद् बुद्धादिदेशनाया अपि धर्मगोचरत्वाभिमानेन तद्वाक्यश्रवणानन्तरमपि धर्मजिज्ञासा भवितुं युक्त ेति। न वेदाध्ययनानन्तर्य-नियम स्तस्यामित्याशये नान्यस्याप्यनन्तर मित्याद्याक्षेपः हानोपादानविषयकजिज्ञासाया हानोपादानात् प्रागेव जायमानतया पूर्वं धर्मजिज्ञासा तदनन्तरं वेदार्थं एव धर्म इतिज्ञानं तत स्तदर्थवोधाय वेदोध्येय इत्यध्ययनप्रवृत्तिरिति क्रमालोचनेना ध्ययनात् प्रागेव धर्मजिज्ञासा प्राप्नोतीति तात्पर्येण प्रागपीति द्वितीयाक्षेप इत्यपि चिन्त्यम्। वस्तुतस्तु अग्रिमभाष्यानुसरेण वेदमधीत्या थातोधर्मजिज्ञासेति सूत्राकारः स्वीकर्त्तव्यः। तथा चा स्यविधिद्वये तात्पर्यम् वेदमधीत्यैव नानधीत्य तथा अनन्तर मेव नान्यत्कृत्वेति तच्चैकस्मिन् वाक्ये न संभवति विधिद्वयाभ्युपगमे वाक्यभेदप्रसङ्गात् एवं चैकस्मिन् वाक्ये एकमेवविधेयमपरमनूद्य तथा च वेदमधीत्यैवेति-

वचनव्यक्त्या यदा आनन्तर्यमनूद्य वेदाध्ययन मेव विधीयते तदा वेदाध्ययनानन्तर्यस्य जिज्ञासायामविधानात्। अन्यस्यापि कर्मणो ऽनन्तरं जिज्ञासा नवारितेत्यभिप्रायेणोक्तं भाष्यकृता अन्यस्या पिकर्मणोनन्तरं धर्मजिज्ञासा युक्ता यदा तु वेदाध्ययनमनूद्या नन्तर्य मेव जिज्ञासायां विधीयते या वेदमधीत्य जिज्ञासा सा वेदाध्ययनानन्तर मेवेति वचनव्यक्त्या वेदाध्ययनोत्तर काले जायमानायां जिज्ञासायां तदानन्तर्यविधाने पि ततः प्राक् काले जायमान जिज्ञासापरं तद्विधानाभावेन सा ततः पूर्वमपि प्राप्नोतीत्याशयेन प्रागपि वेदाध्ययनादित्याद्दोपः॥ एवं च विधिद्वयतात्पर्येणाद्दोपद्वयमिति न पुन रुक्तिदोषलेशः। उच्यत इत्यादिसमाधानभाष्यम्॥ अयमाशयः सत्यं। भगवता बुद्धेन धर्मादेशिताइत्यभिमानवतां पुंसां बुद्धवाक्य श्रावणानन्तरमपि धर्मजिज्ञासा जायते इति न सर्वत्र जिज्ञासायामध्ययनस्य पूर्ववृत्तत्वमिति। किन्तु यादृश जिज्ञासा

तात्पर्य्येण थशब्दं प्रयुक्तवानाचार्यः तादृशी जि-
ज्ञासावेदाध्ययनानन्तरमेव भवति नान्यतः इत्याह

भा० उच्यते तादृशीन्तु धर्मजिज्ञासामधिकृत्याथशब्द प्रयु-
क्तवाना चार्यः या वेदाध्ययन मन्तरेण न सम्भवति।
कथम्। वेदवा क्यानामनेकविधोविचार इह वर्त्तिष्यते।

तादृशोमिति। वेदवाक्यानामनेकप्रकारकविचार
इह भविष्यति इति जिज्ञासा अधीतवेदस्यैव भ-
वति नान्यस्य तथा च तादृशजिज्ञासा तात्पर्य्येणा-
ध्ययनस्य पूर्ववृत्तत्वमुक्तमिति नान्यानन्तर जि-
ज्ञासामादाय व्यभिचारः। यदपि हानोपादानवि-
षयक जिज्ञासाया हानोपादाना प्रागेवेत्यादिना
धर्मजिज्ञासोत्तरं वेदाध्ययनमाश्रित्याक्षेप स्तस्या-
प्येतदेवोत्तरम् अनधीतवेदस्य तदर्थ विषयक-
जिज्ञासाया असम्भवेन तदर्थं तदध्ययनस्य पू-
र्ववृत्तत्वमावश्यकं वेदार्थस्य धर्मत्वानवगमे त-
ज्जिज्ञासया कथं तदध्ययनप्रवृत्तिरिति तु न शङ्क्य-
म् हितकारि पित्रादीनां प्रेरणाया तत्र प्रवृत्तिस-
म्भवात् अन्यथा बालस्य कुत्रापि प्रथमाध्ययने
प्रवृत्ति र्नस्यात् तेषां तदानीं तत्फलज्ञानाभावात्

अद्यापि पित्रादि प्रेरिता एव बाला अध्ययनाय प्रवर्तन्ते इति न काचिददृष्टचरकल्पनेतिधेयम्। यद्पिच वेदमधीत्या थातोधर्मजिज्ञासेतिसूत्राकारमङ्गीकृत्य एकस्मिन् वाक्येऽध्ययनानन्तर्ययोरेकदा विधानासम्भवेनानन्तर्यमनूद्याध्ययनविधेरध्ययनमनूद्यानन्तर्यविधेश्च पर्यायेण स्वीकारादन्यस्यापि प्रागपीत्याद्योपद्वयमुक्तम्। तदपि न मनोरमम्। आनन्तर्यमात्रे विधि स्वीकारेणान्यस्यापीतिचोद्यानवतारात् अथ तथापि वेदाध्ययने विधेरनभ्युपगमात् प्रागपीति चोद्यं स्यादेवेतिचेन्न। तादृशीमित्यनेन तस्यापि परिहारात् न जिज्ञासामात्रे ऽध्ययनस्य पूर्ववृत्तत्वमुच्यते। किन्तु विशिष्टजिज्ञासायां साचाध्ययनानन्तरमेव न ततः प्रागिति न कोपि चोद्यावसरः॥ न चाध्ययनानन्तर्ययोर्द्वयो र्विधिस्वीकारे वाक्यभेदः अन्यतरविधौ अन्यतराद्योपो दुर्निवार इति कथं चोद्यपरिहार इतिवाच्यम्। आनन्तर्यविधि स्वीकाराद न्यस्यापीत्यस्य परिहार स्फुट एव धर्मो हि वेदार्थ

एवेति। धर्मजिज्ञासापदेन वेदार्थजिज्ञासावोधनात् सा चाध्ययनं विना न सम्भवतीति अध्ययने विधिं विनापि सामर्थ्यादेव तल्लाभ इति। नानधीतवेदस्य तत्प्रसक्तिरितिस्फुटमेव ततः प्रागपीत्यस्य परिहार इति सर्वं चतुरश्रम् ॥ भाष्यार्थ स्तु तादृशीं विविधवेदवाक्यविचारविषयिणीं धर्मजिज्ञासा मुद्दिश्याथशब्दः सूत्रकृता प्रयुक्तः यादृशी च जिज्ञासा अधीतवेदस्यैव भवितुं युक्ता नानधीतवेदस्यस्येति ॥ तच्चावेदाध्ययनमिति। कुतो नानधीतवेदस्य सेत्यत आह वेदेति। सामान्यतो ज्ञातस्यैव सन्देहविषयत्वाभ्युपगमेन पक्षप्रतिपक्षोद्भावनया विचारणीयत्वात् अज्ञाते सन्देहाभावेन तद्विचार विषयकेच्छाया असम्भवेन तज्जिज्ञासोत्पत्तयं सामर्थ्यादेवाध्ययनलाभ इति न ततः प्राक्से ति भावः। अध्ययनानन्तर्यविधिद्वयोपयिकपूर्वा क्तवचनव्यक्तयोरन्यतरेणापि श्रौतार्थो न विधीयत इत्याहा पिचेत्यारभ्य वक्ष्यतीत्यन्तेन भाष्येण किन्तर्हि विधीयते त्यपेक्षायामाह।

भा॰ अपि च नैव वय मिह वेदाध्ययना त्पूर्वजिज्ञासाया: प्रतिषेधं शिष्मः, परस्ता च्चानन्तर्यम् नहि एतदेकं वाक्यं पुरस्ताच्च वेदाध्ययनात् धर्मजिज्ञासां प्रतिषेधयिष्यति परस्ता च्चानन्तर्य्यं प्रकरिष्यति भिद्येन हि तथा:वाक्यम् अन्या हि वचनव्यक्ति रस्य पुरस्ताद् वेदाध्ययनाद्धर्म जिज्ञासां प्रतिषेधते अन्याच परस्ता दानन्तर्य मुपदिशति वेदानधीत्य इति एकस्यां विधीयते अनूद्य आनन्तर्य्यम् विपरीतमन्यस्याम् अथै कत्वाच्चैक- वाक्यतां वक्ष्यति ।

किन्तु "अधीतेवेदे इत्यारभ्य एमर्थोयमुपदेश इत्यन्तेन भाष्येण" पूर्वभाष्यार्थः प्रदर्श्यते भवतु नाम वेदाध्ययनात्प्राग्धर्मजिज्ञासा तावतापि न नोविरोधः नहि वयं ततः पूर्वं तस्याः प्रतिषेधं शिष्मः नापि परस्तादानन्तर्यमित्यत्रापि शिष्म इतिकेचिदध्याहरन्ति तेषामयमाशयः नतावदधोत्यैवेतिवचनव्यक्त्या ध्ययने विधिः वेदार्थजिज्ञासायामध्ययनस्य सामर्थ्यादेवलाभात् नाप्यानन्तर्ये विधिः अदृष्टार्थत्वापत्तेः न्यायशास्त्रेऽदृष्टार्थविधानस्या न्यायत्वात् ।

अतो लक्षणया न्यपरत्वं नानन्तर्यपरत्वमिति तदयुक्तम् आनन्तर्यवचनव्यक्ते र्भाष्य दर्शनात्।

नचैवमदृष्टार्थविधानापत्तिः केवलस्य श्रुतार्थस्य विधानाभावात् अजहत्स्वार्थलक्षणयाऽनन्तर्य वि-शिष्टगुरुकुलनिवासनिवृत्तिव्यावृत्तिरूपोर्थोविधी-यते स्नानजिज्ञासे हि मिथोविरुद्धे नच गुरु-गृहे निवसतो धर्मं जिज्ञासमानस्यापि स्नानमदृ-ष्टार्थं संभवतीतिनानयो र्विरोध इतिवाच्यम्-ब्रह्म-चारिणो हि न स्नायादित्यनेना स्नाननियमोक्त्या तदवध्यपेक्षाया मधीत्यस्नायादित्यनेन विहिताध्य-य नमवधिरिति तदुत्तरकालिक स्नानस्य सकलब्र-ह्मचारिधर्मनिवर्त्तकत्वेन गुरुनिकेतन निवासनिवृ-त्ते रपिसूचकतया तस्या अविचार विरोधित्वस्य स्फुटत्वात् गुरुं विना विचारासम्भवात्। अविरोधि सत्ता च विरोध्यन्तरा भावव्याप्ता एवं चाध्ययनोत्तरं प्रतीयमाना जिज्ञासा स्वविरुद्धस्नानाभावं लक्षय ति यद्यपि पर्यायेण द्वयोः प्रवृत्तौ न विरोध स्तथापि युगपत्प्रवृत्तौ विरोधोऽस्त्येव अधीत्य स्नायादित्य-नेन प्राप्तं स्नान मुत्कर्षणाभावादनन्तरमेव प्राप्तं भुक्त्वा गच्छेत्यादौ भोजनानन्तरगमनवत्।

धर्मजिज्ञासापि तस्मिन्नेव काले प्राप्ता तेन विरुद्ध्ये
ते अपि च नैववयमितिभाष्यस्यायं संक्षेपार्थः
वेदमधीत्याथातोधर्मजिज्ञासेत्याकारसूत्रघटकान-
न्तरार्थकाथशब्देन वेदाध्ययनात् पूर्वंधर्मजिज्ञासा-
याः प्रतिषेधो धर्मजिज्ञासायां वेदाध्ययनानन्तर्य
ञ्चेत्युभयं न युगपद्विधातुं शक्यते वाक्यभेदप्रसं-
गात् वाक्यभेदं दर्शयितुमाह। अन्यथाहि वचन-
व्यक्तिरित्यादि वेदाध्ययनात्प्राग् धर्मजिज्ञासा-
प्रतिषेधाय वेदमधीत्यैव नानधीत्येतिवचनव्यक्तिः
स्यात् तस्यामध्ययनानन्तर्यविधानाय तु अनन्तर
मेव धर्मजिज्ञासा कर्त्तव्येतिवचनव्यक्तिः स्यात्
पूर्वत्रानन्तर्यमनूद्य वेदाध्ययने विधिरुत्तरत्राध्ययन-
मनूद्यानन्तर्ये विधिः तदेतद्वयमेकेन वाक्येन युग-
पद्विधातुमशक्यं सकृदुच्चरितः सकृदेवार्थंबोधय-
तीतिन्यायात् आवृत्यातु अर्थद्वयबोधाभ्युपगमे-
वाक्य भेद प्रसंगात् एकवाक्यत्वसंभवे वाक्यभेद
कल्पनाया जघन्यत्वात् ॥ नन्वेकवाक्यताकारणा-
भावादस्तु तर्हि वाक्यभेद एवेत्यत आह अर्थैक-

त्वादेकवाक्यतामिति ॥ अश्रौतार्थत्वादेतदुभयं न विधेयं किन्तु गुरुगृहनिवासनिवृत्ति व्यावृत्ति रनेन विधित्सितेति प्रदर्शयितुमाह ॥ किन्त्विति अयम्भावः वेदाध्ययनोत्तरं धर्मविचारः समावर्त्तनं चेत्युभयं युगपत् प्राप्तं तत्र वाचनिकेन स्मार्त्तस्नानेन न्यायप्राप्तस्य दुर्वलस्य धर्मविचारस्य वाधाभावायाथ शब्देनाजहल्लक्षणया सकलब्रह्मचारिधर्म निवृत्तिव्यावृति र्वोध्यते

भा० किञ्च अधीते वेदे द्वयं समापतति गुरुकुलाच्च समावर्त्तितव्यम् वेदवाक्यानि च विचारयितव्यानि । तत्र गुरुकुलान्मा समावर्त्तिष्ट कथं नु वेदवाक्यानि विचारयेत् इत्येवमर्थोऽयमुपदेशः । यदि एवं न तर्हि वेदाध्ययनं पूर्वं गम्यते । एवं हि समामनन्ति वेद मधीत्य स्नायादिति । इह च वेद मधीत्य स्नास्यनूधर्मं जिज्ञासमान इममाम्नायमति क्रमेत् । न चा म्नायो नामातिक्रमितव्यः ॥

इत्याह गुरुकुला न्मासमावर्त्तिष्टेतिस्मार्तस्नानेन-दुर्वलस्य न्यायप्राप्तस्य धर्मविचारस्य वाधोयुक्त इत्येतत्तात्पर्येणाह यद्येवमिति ॥ अयंभावः अधीत्य स्नायादिति । स्मृत्या अध्ययनोत्तरं स्नानं विहितं एवं च वाचनिकेन वलवता स्नानेनाध्यय-

नोत्तरं जिज्ञासाया वाधितत्वादध्ययनपूर्वकवत्वं जिज्ञासायां न स्यादित्याह यद्येवं न तर्हि वेदाध्ययनं पूर्वं गम्यते इति। यदिचाथशब्दवलेन श्रौतार्थेन न्यायप्राप्तेना पिधर्म विचारेण स्नानमेव वाध्यते तर्हि अधीत्यस्नायादि त्याम्नायः विधीयते वाधितो भवेन्नचा म्नायोनाम वाधनीय इत्याह।

भा० तदुच्ययेत अतिक्रमिष्याम इमाम्ना यमनतिक्रामन्तो वेदमर्थवन्तं सन्तमनर्थकमवकल्पयेम दृष्टो हि तस्यार्थः कर्मावबोधनं नाम नच यस्याध्ययनमात्रात् तत्र भवन्तो याज्ञिकाः फलं समामनन्ति यदपिच समामनन्तीव तत्रापि द्रव्यसंस्कारकर्मसु परार्थत्वात् फलश्रुति रर्थवादः स्यात् इत्यर्थवादतां वक्ष्यति नचाधीतवेदस्य स्नानानन्तर्यमेतद्विधीयते नहि आनन्तर्यस्य वक्ता कश्चिच्छब्दोस्ति पूर्वकालतायां क्त्वास्मर्य्यते न आनन्तर्यं दृष्टार्थतावाध्ययनस्य आनन्तर्यं व्याहन्येत लक्षणायात्वेषोऽर्थः स्यात् नहि वेदं स्नान मदृष्टार्थो किन्तु लक्षणया अस्नानादि नियमस्य पर्यवसानवेदाध्ययन समकाल माहुः।

नचाम्नायो नामेति परिहारभाष्यमतिक्रमिष्याम इति ॥अयमाशयःस्वाध्यायो ध्येतव्य इत्यध्यनविधिना विहितमध्ययनं दृष्टार्थकं दृष्टंच फलं तदर्थविधारणं अर्थावधारणं च नविचारमन्तराइत्यध्-

यनविधिरेव विचारमप्याक्षिप्य विदधाति नचाध्य-
यने विधिं विनापि अध्ययनमर्थ ज्ञानहेतु रध्ययन-
त्वाद् भारताध्ययन वदित्यादि प्रमाणान्तरेणापि
अध्ययनेऽर्थज्ञानहेतुत्वं प्राप्तमेवेति न तत्र
विधिस्वीकारप्रयोजनमिति वाच्यम् दर्शपूर्णमा-
सादिजन्यापूर्वों पयिकावघात-दिवन्नियमविधि-
स्वीकारात्। व्युत्पन्नस्य स्वतः पुस्तकादिदर्शने-
नार्थज्ञानसम्भवेऽपि ततः स्वाध्यायसंस्कारान-
भ्युगमेन क्रत्वपूर्वानुत्पत्त्या तदुत्पत्तये अध्ययन-
विधिजन्यस्वाध्यायसंस्कार आवश्यकः। नियमपू-
र्वकाधीतवेदै रवगतानि कर्माणि फलदानीतिनि-
यमात्। नचानारभ्याधीततत्त्वेन श्रुत्याद्यभावा
च्च। न क्रत्वर्थत्वं किन्तु अदृष्टार्थं तच्चाक्ष-
रराशिमन्त्रग्रहणेनापि संभवतीति न तदर्थं
विचारापेक्षा नतरां गुरुगृह निवासप्रयो
जनमितिवाच्यम् संभवति दृष्टे फले अदृष्टफ-
लकल्पनाया अनुचितत्वात् तदुक्तं "लभ्यमाने
फले दृष्टे नादृष्टपरिकल्पना। विधेश्चनियमार्थत्वा

न्नानर्थक्यं भविष्यति" तदिह अर्थावधारणरूप-
दृष्टफलौपयिकाध्ययन विधिविचारं विना नुपप-
द्यमानो विचारमाक्षिपन् तद्विरुद्धं स्मार्तं स्नानं
वाध्यते अन्यथा अर्थाव धारणाफलकस्वाध्याया-
ध्ययनविधिवोधितस्याम्नायस्यानर्थक्यापत्तेः। त-
दिदमुक्तं वेदं प्रयोजनवन्तमिति। ननु अदृष्टा-
र्थकतयापि आम्नायः सार्थक इति नार्थक्यमत
आह दृष्टो हि तस्यार्थः कर्मावबोधनं नामेति।
किञ्च यत्रैकस्याप्याम्नायस्याप्रामाण्यं तत्र तन्मू-
लभूतस्मृतेरप्रामाण्यप्रसक्तिः। यत्र पुनः समस्त-
स्यैवाम्नायस्या नर्थक्यं तत्र का वार्ता स्मृतिप्रामा-
ण्यस्य तस्माद् धर्मजिज्ञासया स्मार्तस्नानस्यैव
वाधो युक्तः। पूर्वं विरोधमङ्गीकृत्य विचारेणैव
स्नानवाध उक्त इदानीं विरोधाभावान्नस्नानेन
धर्मजिज्ञासाया वाधप्रसक्ति रित्याह नचेति "अ-
यमाशयः" अधीत्यस्नायादिति। स्मृत्याध्ययनो-
त्तरं स्नानं विधीयते नत्वनन्तरं नहि आनन्तर्या-
स्य वाचकः कश्चिच्छब्दोत्र श्रूयते। पूर्वकाल-

तायां क्त्वः स्मरणात् एवं च यत्र किंचिद्बाधकं नास्ति तत्र क्त्वा प्रत्ययेनानन्तर्यं प्रतीयते यथा श्रुत्वा हसति यत्र तु बाधकं दृश्यते यथा प्रकृते तत्र क्त्वा प्रत्ययेनोत्तरकालमात्रं प्रतीयते नानन्तर्यम् एवं च विचारोत्तरमपि स्नाने अध्ययनोत्तरकालस्याबाधितत्वान्नविरोध इति अपरमपि-दृष्टार्थताचाध्ययनस्यानन्तर्ये व्याहन्येत लक्षणया त्वेषोऽर्थः स्यादितिभाष्यद्वयं पुनरुक्ततया कैश्चित्परित्यक्तं। तथाहि दृष्टार्थतेतिभाष्यं दृष्टो-हि तस्यार्थः कर्मावबोधनमित्यनेन पुनरुक्तम् लक्षणयेति। ज्ञातार्थत्वादिति तदयुक्तम् तात्पर्यभेदेन पौनरुक्त्याभावात् आनन्तर्यन्न क्त्वाशब्दवाच्यमिति तात्पर्येण पूर्वं भाष्यमग्रिमन्तु यदि क्त्वाशब्द वाच्य मानन्तर्यमङ्गीक्रीयते तदा तदभ्युपगमे ऽध्ययनं दृष्टार्थं न स्यात्स्नानेन विचारबाधप्रसङ्गादिति लक्षणयोत्तरकालएवार्थोऽङ्गीकर्तव्यः तथाच पौनरुक्त्याभावात्तत्परित्यागोऽसंगत एव अधीत्येत्यत्राधिपूर्वकेणागतावित्यस्य प्र-

योगाभ्युपगमे येगत्यर्थका स्तेज्ञानार्थका इत्यभि-
युक्तोक्त्या अधिगम्येत्यर्थाश्रयेण विचारस्नानयो-
रविरोधोपपादनन्तु न सत् इङिकोरेवाधिपूर्वकत्वा-
ऽव्यभिचारश्रवणात् अध्ययनशब्दस्याक्षरराशिसा
त्रग्रहणे एव रूढत्वाच्च विचारविशिष्टस्याध्ययन-
पदवाच्यत्वे प्रमाणाभावा च्च ॥ ननु गुरुगृहे निवसतो
धर्मजिज्ञासमानस्य ब्रह्मचारिणो ऽदृष्टार्थमधीत्य
स्नायादित्यनेन स्नानं विधीयतामित्याशङ्क्य
परिहरति "चेदमिति" अयं भावः न स्नायादित्य
नेन ब्रह्मचारिणोऽस्नानादि:नियमोविहित स्तस्या-
वध्ययपेक्षायामधीत्यस्नायादितिविहितं स्नानं अ-
स्नानादिनियम निवृत्तिं लक्षयति गुरुकुलवासादयो
पि तत्सह चरितास्तन्निवृत्तौ निवर्त्तन्ते इतिस्मृतेः
दृष्टार्थत्वमन्यथा अदृष्टार्थत्वं स्यात् तच्चानिष्टं
संभवति दृष्टफलकत्वे अदृष्टकल्पनाया अन्याय्य
त्वादिति। यावदध्ययनं तावदेवतेऽ नुष्ठीयन्ते
ऽध्ययनसामाप्तिरेव तेषामवधिः तत्समाप्तौ सकल
ब्रह्मचारिधर्मा निवर्त्तन्ते अध्ययनाङ्गत्वात् तद्धर्मा-

णाम् नहि अङ्गिसमाप्तौ अङ्गानि अनुष्ठातुं शक्यन्ते तथा सति अङ्गत्वमेव तेषां न स्यादिति न्यायमूलकस्मृतेः सकलब्रह्मचारिधर्मनिवृत्तिलक्षणायामदोषः यदध्ययनस्यार्थावबोधपर्य्यवसायित्वं व्याख्यातं स्नानशब्दस्य अस्नाननियमनिवृत्तिपरत्वमुक्तं अथशब्दस्य गुरुकुलनिवासनिवृत्तिव्यावृत्तिपरत्वं यादीरितम् अत्र सर्वत्राध्ययनस्य दृष्टार्थत्वमेव हेतुरिति प्रकरणार्थोवसेयः नच स्मृतिविरोधपरिहाराय स्नानानन्तरमेवधर्मविचारः कर्तुमुचित स्तावतापि वेदानर्थक्यनिवृत्ति सम्भवादलं स्मृते र्लक्षणाभ्युपगमेनेतिचेत् सत्यम् स्यादेवं यदि स्नान मात्रमेव विहितं स्यात् किन्तु स्नात्वा भार्यामुपगच्छेत् कृष्णकेशोऽ ग्नीनादधीतेत्यादिवचनेन कर्मान्त रस्यापि कर्तव्यतया निर्देशा त्तेषां च धर्मविचार विरोधितयाऽवश्यबाधनीयत्वे प्रथमोपस्थितस्य विरोधिनः स्नानस्यैव बाधनं युक्तम् अपिच ज्ञानसाध्यस्याग्न्याधानादिकर्मणो ज्ञानमन्तराऽशक्यसम्पाद

नीयतया ज्ञानस्यावश्यकत्वे विचारं विना तदर्ज-
नाभावा त्स्नाना त्प्रागेव विचारं विना तदर्जना-
भावात्स्नानात्प्रागेव विचारोऽनुष्ठेय इति । पाठ
क्रमानुरोधेन प्राप्तमपि स्नानाध्ययनयोरानन्तयम-
र्थक्रमेणाध्ययनप्रयोजनौपयिकेनजिज्ञासानन्तर्येण
वाध्यते पाकहोमयोरिव पाठक्रमादर्थक्रमो वलीया-
निति पञ्चमे निरूपयिष्यते यद्यपि अधीत्य स्नाया-
दित्र क्त्वाप्रत्ययो ल्पप्रस्थानितया श्रूयते इतिश्रुति
क्रमो भवितुमर्हति तथापि स्मृतिगतत्वेन विप्रक-
र्षात् पाठक्रमतुल्य इति पाठक्रमोभिहितः क्रमस्य
पदार्थधर्मतया दुर्वलत्वेन प्रधानेनाध्ययनपदार्थेन
वाध इतिनास्नाध्यननयो रानन्तर्यमाश्रयणीयम्
अध्ययनबैयर्थापत्तेः ॥ इदन्तु वाध्यं विरोधहेतुक
त्वाद् वाधस्य येन येन धर्मविचारस्य विरोध स्तत्त
देववाध्यते येन तु तस्य न विरोधस्त त्तेन
वाध्यते एवं च मधुमांसादिभक्षणस्य धर्मविचार-
विरोधित्वाभावात् न वाधः मधुमांसादिभक्षयन्न
पिधर्मं जिज्ञासितुमर्हति नच मधुमांसादिभक्षणव

द्वारपरिग्रहोपि स्यात् तस्यापि तद्विचारविरोधित्वा-
भावादितिवाच्यम् स्नात्वाभार्यामधिगच्छेदित्य-
नेन स्नातकस्यैव दारपरिग्रहस्मरणात् समाप्त-
ब्रह्मचारिधर्मः स्नातको भवति अन्यथा अस्नान-
निवृत्तेरपर्यवसानत्वानापत्तेरिति वेदमधीत्य स्ना-
याद्द् गुरुकुलान्मा समावर्त्तिष्ट इति अदृष्टार्थता
परिहारायैव। तस्माद्वेदाध्ययनमेव पूर्वमभि-
निर्वर्त्य अनन्तरं धर्मो जिज्ञासितव्य इति अथ
शब्दस्य सामर्थ्यम्। नच ब्रूमोऽन्यस्य कर्मणोऽ
नन्तरं धर्मजिज्ञासा न कर्तव्येति। किन्तु वेद-
मधीत्य त्वरितेन न स्नातव्य मनन्तरं धर्मो
जिज्ञासितव्य इति अथ शब्दार्थः। वेदमधीत्य
स्नयाद् गुरु कुला न्मासमावर्तिष्ठेत्यदृष्टतापरिहा-
रायैवेतिभाष्यम् नन्विदं भाष्यमसंगतं वेदाध्य-
यनानन्तरं स्नानमुक्तं पुनः गुरुकुला न्मासमा-
वर्त्तिष्ठत्यप्युक्तं गुरुकुलात्समावर्त्तनं च स्नान-
मेवेति मिथो विरुद्धमिति चेन्न वाक्यभेदेन
भाष्यद्वयस्य व्याख्येयत्वात्। तथाहि अधीत्य

स्नायादितिस्मृति र्नाध्ययनानन्तरमेव समावर्त्तं
बोधयति अध्ययनस्या दृष्टार्थत्वापत्तेः किन्तु
वेदार्थविचारानन्तरमेवंच यावद्विचारो न समा
प्यते तावदस्नाननियमः पालिनोय इत्येवाधीत्य
स्नायादित्स्मृतेरर्थः गुरुकुलान्मासमावर्तिष्ठेत्ये
तत्तु यथाश्रुतमधीत्य स्नायादितिस्मृतिवि
परीतार्थमत स्ततो पनेयम अपनीतस्यायमर्थ
स्मृते र्लाक्षणिकार्थकत्वप्रदर्शनप्रसंगेना न्यशब्द
स्या नन्तर्यार्थकत्वं परित्यज्य गुरुकुलनिवासनि
वृतिव्यावृत्तिपरत्वेन व्याख्याने दृष्टार्थत्वमेव हेतु
तथाच वेदमधीत्य गुरुकुलात्समावर्तनमविधा
धर्मजिज्ञासा कार्या इत्येवाथातोधर्मजिज्ञासेति
सूत्रार्थः ननु अधीत्य स्नायादितिवलेनाध्ययना
नन्तरं गुरुगेहान्निवृत्तिः विचारार्थं पुनर्गुरुगेहे स
मागमश्चेति कालभेदेनोभयोरविरोधसम्भवे
नोक्तार्थेस्मृते र्लक्षणा युक्तेति चे न्न अकृतार्थं
गुरुगेहा न्निवृत्तिः पुनरागमश्चेत्युभयोरदृष्टार्थ
त्वप्रसंगात् निर्गमस्य वाचनिकत्वेना दृष्टार्थत्वे

संभवेपि तत्र स्मृते रतात्पर्यात् आश्रमान्तरप्र-वेशायैव निर्गमस्य स्मृतिबोधितत्वादित्यलं भूरिभाषितेन ।

* भा० अतः शब्दो वृत्तस्यापदेशको हेत्वर्थः । *

यथाक्षेम सुभिक्षोऽयम् अतो हमस्मिन् देशे प्रतिवसामीति एवमधीतो वेदो धर्मजिज्ञासायां हेतु र्ज्ञातः अनन्तरं धर्मोजिज्ञासितव्य इति अतः शब्दस्य सामर्थ्यम् धर्माय हि वेद वाक्यानि विचारयितुमनधीतवेदो न शक्नुयात् अतः एतस्मात्कारणात् अनन्तरं धर्मं जिज्ञासितुमिच्छेदित्यतः शब्दार्थः ।

अतः शब्द इति अतः शब्दो हेत्वर्थकः यतो वेदाध्ययनं धर्मजिज्ञासाहेतु रतः तदनन्तरं धर्मजिज्ञासा कार्या अध्ययनस्य जिज्ञासा हेतुत्वे एवानन्तर्यस्य दृष्टार्थकत्वं नान्यथा एवं च दृष्टार्थकानन्तर्याभिधायिना अथशब्देनैवा ध्ययने जिज्ञासा हेतुत्वबोधनादतः शब्दोपादानंव्यर्थमितिभ्रम वारणायातः शब्दार्थो व्याख्यायते अध्ययने धर्म जिज्ञासायोग्यत्व रूपं हेतुत्वं अथ शब्देनोक्तं तथाचाधीतवेदः पुरुषो धर्मजिज्ञासाधिकारी इत्ये-

तावन्मात्रमथशब्देनोक्तं नत्वनुष्ठानयोग्यत्वमत स्तद्वक्तुमप्यतः शब्दः स्वाध्यायो ध्येतव्य इत्यध्य-यनविधिरेवेतिकर्तव्यताभूतस्य धर्म विचारस्यो त्पादकोऽनुष्ठापकश्च तत्रोत्पत्तौ अध्ययनस्य हेतुत्व मथशब्देनोक्तम् अतएव तस्मिन् हि सा वकल्पते इतिभाष्यकृतोक्तम् ।

अतः शब्दोप्यध्ययनविधेरेव धर्मजिज्ञासां प्रत्यनुष्ठायकत्वलक्षणप्रयोजकहेतुत्वमाह । धर्म-जिज्ञासां प्रत्यध्ययनविधे रनुष्ठापकत्वानभ्युपगमे फलार्थताप्यनुष्ठापकत्वेनाशंक्येत सा शूद्रे पि संभवात् तस्यापि विचारं प्रयुञ्जीत इति सिद्धान्त चन्द्रिका तथा च शूद्रे विद्याधिकारनिवृत्तये अध्य-यनविधेरेव विचारप्रयोजकत्वमितिवक्तुमतःशब्दः एवं च वेदाध्ययनानन्तरं तदर्थ जिज्ञासा कार्या अन्यथा तदध्ययनमनर्थकं स्यात् अध्ययनं हि अर्थज्ञानहेतुतया विहितं अर्थज्ञानं च न विचारं विनेति तद्विचाराय प्रयतितव्यं नतूष्णीमवस्था-तव्यम् एवं च येषां त्रैवर्णिकानामध्ययनेऽधिकार-

स्तेषामेव धर्मजिज्ञासायामप्यधिकारो नान्येषां शूद्रादीनाम् तेषामुपनयनाभावेन विद्याधिकारस्य वक्तुमशक्यत्वात् उपनयनविधौ शूद्राणामश्रवणात् वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यमित्यनेन त्रैवर्णिकानामेव निर्देशात् तेषामेव विद्याधिकारः अतः शब्दोपादानप्रयोजनान्तरम- पि प्रदर्श्यते वृत्त हेतुत्वाभिधायिना अतः शब्देन अथशब्दस्या ध्ययनानन्तर्यार्थकत्वसिद्धिः अन्य- था अत्र मङ्गलार्थकोऽथ शब्दः सूत्रकृता प्रयुक्त इत्यपि भ्रमः स्यात् नचेदृशार्थस्य प्रकृते ऽन्वया- सम्भवेन न तदर्थग्रहणम् किंचा न्यार्थनीयमानो- दकुम्भदर्शनवत् श्रवणमात्रेणैव मङ्गलनिष्पत्त्या नतादृशार्थाभिधानोपयोग इतिवाच्यम्। स्वभावतः प्राप्तं यत्किञ्चित् क्रियानन्तर्यमनुवदन्नथशब्दः मङ्गलार्थतया सूत्रकृता प्रयुक्त इति विभ्रमसंभा- वनाया अपरिहारात् अथवा अथ शब्दोऽध्ययनस्य धर्मविचारहेतुत्वं प्रतिपाद्य स्नानमपिवाधत इत्येत त्प्रदर्शनाय अतः शब्दोपादानम् यतोऽधीतवेदः

पुरुषो धर्मविचारयोग्यो भवति अतः कर्मणि अधिकर्तुं त्वरितं धर्मं विचारयेन्न वृथा समयं यापयेत् अन्यथा वेदाध्ययनस्य वैफल्यापत्तेः "धर्मं जिज्ञासितुमिच्छेदितिभाष्यम्" नन्वत्र सनः इषे र्लिङ स्तुमुनश्चेच्छावाचकत्वेन पौनरुक्त्यमिति चेन्न भावानववोधात् ज्ञातुमिच्छा जिज्ञासेत्यत्र सन्प्रत्ययवाच्याया इच्छायाः समानपदोपात्तं ज्ञानं कर्मेति ज्ञानकर्मिकेच्छा सन्नन्तभागेन प्रतीयते इष् धातुवाच्याया इच्छायाः कर्म धर्मो वा पदान्तरोपात्तः ज्ञानेच्छैव वा द्वयं वेतिभिन्नविषयत्वात् क्व पौनरुक्त्यावकाशः लिङः तुमनश्च भिन्नार्थवाचकतया न प्रकृते दोषः न च सूत्रकृतैकैवेच्छा प्रदर्शिता भाष्यकृता किमर्थमिच्छाद्वयमुपात्तमितिचेत् सूत्रकारेच्छाभिनिवृत्तये इच्छान्तरोपादानात् नचेच्छाविषयकेच्छायां प्रमाणाभावः मन्दाग्नीनां भोजनेच्छायामिच्छादर्शनात् न कचिदनुपपत्तिः धर्माय जिज्ञासा धर्मजिज्ञासेति भाष्यम् ।

भा० धर्मार्थजिज्ञासा धर्मजिज्ञासा सा हि तस्य ज्ञातुमिच्छा स कथं जिज्ञासितव्यः को धर्मः कथं लक्षणः कान्यस्यसाधनानि कानि साधनाभासानि किंपरश्चेति तत्र कोधर्मः कथं लक्षण इतिएकेनैव सूत्रेण व्याख्यातं चोदना लक्षणोर्थो धर्म इति कानि अस्य साधनानि कानि साधनाभासानि किं परश्चेति शेष लक्षणेन व्याख्यातं क पुरुषपरत्वं क वा पुरुषोगुणभूत इत्येतासां प्रतिज्ञानां पिण्डस्यैतत्सूत्रम् अथातो धर्म जिज्ञासेति ।

ननु धर्मायजिज्ञासेतिविग्रहप्रदर्शना च्चतुर्थीतदर्थेतिसूत्रेण समासोऽभिप्रेतो न युज्यते चतुर्थी तदर्थे प्रकृति विकृतिग्रहणं कर्तव्यमितिवार्तिकानुसारेण विकृति वाचकचतुर्थ्यन्तस्य प्रकृतिवाचकशब्देन समासस्येष्टतया प्रकृते धर्मस्य विकृति वाचकत्वाभावेन समासस्यासाधुत्वं न च धर्माय जिज्ञासेतिविग्रहो न तादृशसमासाभिप्रायकोऽपितु सामर्थ्यप्रदर्शनायेतिवाच्यम् समर्थः पदविधिरित्यनेनैव सामर्थ्यलाभे तदुपादानस्य वैयर्थ्यापत्तेरिति चेन्न सा हितस्येति भाष्योक्त्या षष्ठीसमासस्यैवेष्टत्वात् तादर्थ्यसम्बन्धाभिधायिष-

ष्ठ्यन्तस्य धर्मशब्दस्य जिज्ञासापदेन समास इति बोधनाय धर्माय जिज्ञासेत्युक्तिः नच तादर्थ्यविवक्षायां चतुर्थ्येव प्राप्नोति नषष्ठीति कथं षष्ठ्यन्तस्य धर्मपदस्य समास इति वाच्यम् तादर्थ्यस्य तत्वेनाविवक्षायां चतुर्थ्या प्राप्तया सम्बन्धसान्येन तद्विवक्षायां सामान्यसवन्धस्य सवन्धविशेषविश्रान्तत्वेन सामान्येन तादर्थ्यसम्बन्धस्यैव षष्ठ्यर्थत्वात्। निखिलं व्याख्येयमंशमेकस्यां प्रतिज्ञायामन्तर्भावयन् भाष्यकारः पृच्छति स कथं जिज्ञासितव्य इति कथं लक्षणं यस्य स कथं लक्षणः कानि साधनाभासानि अन्यसाधनमन्यस्य साधनाभासः। यथाक्रत्वर्थं पर्णमपीत्वादि पुरुषार्थस्या पापश्लोकश्रवणादेः यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यादिप्रसिद्धस्य गोदोहनेनापः प्रणयेदित्यादिविहितस्य पुरुषार्थस्य गोदोहनादेः क्रतोः साधनाभासत्वम् एतेषां प्रतिज्ञातानां यस्य यत्र व्याख्यानं तत्र तं दर्शयता भाष्यकारेणोक्तं कोधर्मः कथं लक्षण इति द्वयं

चोदनासूत्रेण व्याख्यातमित्युक्ता अवशिष्टं शेषलक्षणेन व्याख्यातमित्युक्तम् शेषलक्षणश-ब्द श्च तृतीये प्रसिद्धः अत्र शेषलक्षणशब्देना-वशिष्टं निखिलं मीमांसा शास्त्रमभिप्रैति तेन कतिपयप्रतिज्ञातानां तत्राव्याख्यानेऽपि न क्षतिः धर्मः प्रसिद्धोवास्यात् अप्रसिद्धोवेति भाष्यम् ।

भा० धर्मः प्रसिद्धो वास्या दप्रसिद्धो वा सचेत्प्रसिद्धः न जिज्ञासितव्यः अथा प्रसिद्धो नतराम् तदेतदनर्थकम् धर्म जिज्ञासा प्रकरणम् अथ वार्थवत् धर्मं प्रति हि विप्रति पन्ना बहु विदः केचिदन्यं धर्ममाहुः केचिदन्यम् सोयमविचार्य प्रवर्तमानः कश्चिदेवोपाददानः विहन्येत अनर्थं च ऋच्छेत् तस्माद्धर्मो जिज्ञासितव्य इति स हि निःश्रेयसेन पुरुषं संयुनक्तीति प्रतिजानीमहे तदभिधीयते ।

धर्ममीमांसाशास्त्रयोः प्रतिपाद्यप्रतिपादकत्व-संबन्ध एव शास्त्रावतारहेतुः समर्थितः सूत्रकृता धर्मोहि अस्यप्रतिपाद्यतया प्रयोजनमितिवदता सो यं तदा स्याद् यदि धर्मो जिज्ञास्यः स्यात् अजि-ज्ञास्यत्वे प्रेक्षावत्प्रवृत्त्यनुपपत्त्या तदारम्भस्यै-

ववैफल्यम् धर्मश्चेत्प्रसिद्ध स्तदा न जिज्ञास्यः स्फीतालोकमध्यवर्त्ति घटवत् अथ खपुष्पवदप्रसिद्ध स्तथापि तद्वन्नजिज्ञास्यः जिज्ञासाशब्देन प्रकृत्याज्ञानं प्रत्ययेन चेच्छोच्यते तत्र प्रसिद्धे ज्ञानं भवति इच्छैव नोत्पद्यते। असिद्धविषयकत्वादिच्छायाः अप्रसिद्धे तु न ज्ञानं नापीच्छेति तदुभयाभावबोधनाय नतरामित्यतिशयोक्तिः धर्मम्प्रति विप्रतिपन्ना बहुविदः।

सू० चोदनालक्षणोर्थो धर्मः ॥ २ ॥

भा० चोदना इति क्रियाया प्रवर्तकं वाक्यमाहुः आचार्य चोदितः करोमीति हि दृश्यते। लक्ष्यते येन तल्लक्षणं धूमो लक्षणमग्नेरिति हि वदन्ति तथा यो लक्ष्यते सोर्थः पुरुषं निश्श्रेयसेन संयुनक्तीति प्रति जानीमहे ॥

इति भाष्यम् अयमभिप्रायः प्रसिद्ध्यप्रसिद्धिभ्यां धर्मस्याजिज्ञास्यत्वं यदापादितं तदयुक्तं प्रसिद्धि रप्रसिद्धिर्वा जिज्ञास्यत्वे न तन्त्रम् किन्तु सन्दिग्धत्वं सप्रयोजनत्वं च स्फीतालोकमध्य-

वर्त्ति घटादयो नजिज्ञास्यन्ते तत्र हेतुरसंदिग्ध-
त्वम् अप्रयोजनत्वाच्च न खपुष्पादयः धर्म स्तु
सन्दिग्धः विप्रतिपन्ना बहुविद इति भाष्येण
जिज्ञासा हेतुभूतसंशयप्रदर्शनात् तथा सप्रयोज-
नोपि सहिपुरुषंनिःश्रेयसेन संयुनक्तीतिभा-
ष्योक्तः तदिह जिज्ञासाहेतुभूतसंशयप्रयोजनव-
त्वाद्धर्मस्य जिज्ञास्यत्वम् प्रथमं तावद्धर्मो द्विधा-
विप्रतिपत्तिः किं प्रमाणकोधर्मः किंस्वरूपश्चेति
तदेतद्विप्रतिपत्तिद्वयस्याद्येन पादेन निर्णयःक्रियते
अत्रधर्मे चोदनैव प्रमाणमिति व्यवस्थापनेन
प्रत्यक्षादीनां प्रामाण्यनिराकरणा त्प्रत्यक्षादि-
प्रमाणगम्य श्चैत्यवन्दनादि न धर्मः किन्तु
चोदनागम्योग्निहोत्रादिरेव धर्म इति स्वरूपम-
पिसविशेषं कथितं भवति धर्मे चोदनाया निरपे-
क्षं प्रामाण्य मिहैव पादे वर्णितम् अवशिष्टे
पादत्रये चोदनामूलतया अर्थवादादीनां प्रामा-
ण्यं साध्यते अतः समस्तोध्यायः प्रमाणलक्ष-
णमेव वेदप्रामाण्यवादिनामपि तत्र तत्र वि-

शेषविप्रतिपत्तिदर्शनान्नस्वतोनिर्णाय इति दर्शं मीमांसा शास्त्रं एकशास्त्रपरिशीलन शालिनां संशयाभावाद्बहुविदामित्युक्तम् अथातोधर्मजिज्ञासेतिप्रथमसूत्रेण शास्त्रारम्भमुपपाद्येदानी शास्त्रमारभते चोदनालक्षणोऽर्थोधर्म इति लौकिकाकारशून्यतया धर्मस्य प्रत्यक्षाविषयत्वेनतन्मूलकप्रमाणान्तरविषयत्वस्य शङ्कितुमप्यशक्यतया निष्प्रमाणक एव धर्मः स्व स्व कल्पनानुसारेण लोक धन्धनाय केवलं वुधै र्निरूपित इति केचित् न कल्पनामात्रेण धर्मोनिरूपितः किन्तु योगिनां प्रत्यक्षगम्यः तेहिकारुकणिकतया आर्षप्रत्यक्षेण धर्मस्वरूपमवगम्यलोकोपकारायनिवबन्धुरित्येक इदृशयोगिसद्भावे प्रमाणाभावाच्चोदनागम्य एव धर्मो न प्रमाणान्तरगम्य इत्याद्यनेकविप्रतिपत्तिर्दृश्यते सधर्मः चोदनालक्षणः अर्थात् चोदनाप्रमाणकः लक्ष्यतेऽनेनेतिव्युत्पत्या लक्षणशब्दस्य प्रमाणपरत्वात् चोदनाप्रमाकत्वकथनेऽपि एकत्रप्रमाणसंप्लवसंभवा त्प्रमाण-

न्तर मूलकत्वनिरासो न प्रतीयते इति तत्प्रति-पत्तये चोदनैव तत्र प्रमाणं न प्रत्यक्षादि इति व्याख्येयम् प्रत्यक्षादीनां तत्र प्रमाण्य निरासेऽपि चोदनायामव्यभिचारेण प्रामाण्यासाधना त्तदर्थं सा च प्रमाणमेव नाप्रमाणमित्यपि वोध्यम्। एवं च सामान्यतः प्रसिद्धं धर्ममनूद्य प्रमाणविधि-र्वोध्य इति भावः ननु धर्मे प्रमाणान्तरप्रवृत्त रन-ङ्गीकारात् कथं तदनुवादः प्रमाणान्तरानुपस्थि-तस्यानुवादासंभवात् अनुवादसिद्धये प्रमाणान्त-रमूलकत्वाभ्युपगमे तु चोदनैव प्रमाणं सा च प्रमाणमेवेति व्याख्यानमसंगतं प्रत्यक्षादे रपि तत्र प्रामाण्याभ्युपगमात् निर्मूलसामान्यप्रसि-द्ध रनभ्युपगमात् विशिष्यप्रमाणान्तरानवगमे-पिलोकप्रसिद्धिरेव मूलमित्यपि न निर्मूललोक-प्रसिद्धेः शास्त्रीयार्थव्यवस्थापकत्वाभावात् न च जगद्वैचित्र्यान्यथानुपपत्त्यैव तत्प्रसिद्धिः।

स्वभावभेदेनापि जगद्वैचित्र्योपपत्तिसम्भ-वात तावतापि चोदनाया अनुवादकत्वापत्ते श्च।

अत्रोच्यते अग्निहोत्रादयः कर्मविशेषा धर्मत्वे
लोके प्रसिद्धाः तत्कारी पुरुषः लोके धार्मि
इत्याख्यायते तदिदं निर्मूलमिति केचि
योगिप्रत्यक्षमूलमित्येके एवं चात्र बहुविधविप्र
तिपत्तिदर्शनात्प्रत्यक्षादिव्यवच्छेदेन चोदनाया
प्रामाण्यं प्रतिज्ञायते तथा च सामान्यतः प्रसिद्ध
धर्ममनूद्य चोदनाप्रामाण्यं विधीयते इत्यत्र न
काचित् क्षतिः। चोदनाप्रामाण्यविधानादेव धर्म
स्वरूपविशेषयोरर्थात्सिद्धिः। तथा हि चोदनाप्र
माणमेव नाप्रमाणमित्युक्ता अर्थादेतज्ज्ञाय
चोदनागम्यस्याग्निहोत्रादेर्धर्मत्वमस्त्येव न
नास्तीति धर्म स्वरूपसिद्धिः सैव प्रमाणं न प्र
त्यक्षादीत्यवधारणात् चोदनागम्यस्याग्निहोत्राद
रेवधर्मत्वंनचैत्यवन्दनादेः तत्र कस्याश्चिच्चोद
नाया अदर्शनादितिधर्मविशेषसिद्धिः अथवा
न्यथा वा वचनव्यक्ति यश्चोदनालक्षणः अग्नि
होत्रादिः सधर्म एव नाधर्मः स एव च धर्मः
नचैत्यवन्दनादिरितिधर्मस्वरूपतद्विशेष सिद्धिरि

तिभावः। ननु कोधर्मः कथं लक्षणइत्येकेनैव सूत्रेण व्याख्यातमितिभाष्यम् ननु सकृदुच्चरितन्यायेनैकेन वाक्येनैकविध एव वाक्यार्थबोधः सम्भवति तत्कथं वाक्यार्थद्वयोत्पत्तिरितिचेत्सत्यम्। श्रुत्या एकवाक्येन वाक्यार्थद्वयोपपत्तिर्नसम्भवति किन्तु श्रुत्यर्थाभ्यां ततः वाक्यार्थद्वयमुपपादयितुं शक्यत एव तथा हि यश्चोदनागम्यः स एव धर्मो नेतरश्चैत्यवन्दनादिरिति धर्मस्वरूपविधावर्थाद्गम्यते चोदनैव प्रमाणं न प्रत्यक्षादि यदा च चोदनैव प्रमाणं न प्रत्यक्षादीत्युच्यते तत्प्रामाण्याभिधित्सया तदा अर्थादेतद्गम्यते चोदनागम्योऽग्निहोत्रादिरेव धर्मोनेतरश्चैत्यवन्दनादिरित्यनेनपूर्वमुक्तमपि पुनस्पष्टप्रतिपत्तयेऽभिहितमित्यवधेयम् चोदनेति क्रियायाः प्रवर्तकेतिभाष्यम् चोदनाशब्दो यद्यपि लिङादिप्रत्यायकस्तथापि केवलस्य तस्य लोके प्रयोगाभावात्तद्घटितपदप्रयोगसम्भवेऽपि तावन्मात्रेण कस्यचित्प्रवृत्तेरदर्शनात्तद्घटितवाक्यस्यलक्षकः

इत्यभिप्रायेणाहभाष्येक्रियायाः प्रवर्त्तकं वचनमिति अत्रैवलोकानुभवंदर्शयति आचार्यचोदितः करोमीति अथवा न केवलांलिङ्गादिप्रत्ययः विधेयेपुरुषं प्रवर्त्तयितुमीष्टे किन्तु किं केन कथमित्याद्यवेच्छितसाध्यसाधनेतिकर्तव्यता सहितं विधिघटितं वाक्यमित्यभिप्रायेण प्रवर्तकंवाक्यमित्युक्तम् चोदनाहिभूतमितिभाष्यम् ।

भा० चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुम् नान्यत्किञ्चनेन्द्रियम् न च तथाभूत मप्यर्थं ब्रूयाच्चोदना यथा हि यत्किञ्चन लौकिकं वचनम् नद्यास्तीरे फलानि सन्ति इति । तत्तत्थ्यमपि भवति वितथ मपि भवतीति उच्यते ॥

नन्वेतदुपादानं धर्मे चोदनायाः प्रामाण्यं प्रत्यक्षादीनामप्रमाण्यमित्यत्र युक्तिप्रदर्शनाय तदनुचितं प्रतिज्ञासूत्रे तदर्थसाधनाभावेन युक्तिप्रदर्शनस्यानाकांच्छितत्वात् सदौत्पत्तिकसूत्रेऽस्य वक्ष्यमाणत्वच्चेतिचेन्न प्रतिज्ञातार्थसमर्थनाय तदुपादाने दोषाभावात् सम्भवदर्थविषकं वाक्ये प्रति-

ज्ञोच्यते नचेदं तथा नित्यं प्रमाणान्तरानुगामिनः शब्दस्येदृशेऽर्थे प्रामाण्यं स्वतन्त्रस्य प्रत्यक्षस्य चाप्रामाण्यमित्यभिधानादित्याक्षेपनिरासाययुक्ति-प्रदर्शनस्यावश्यकत्वात् । तथा चातीन्द्रियार्थेषु शब्दसामर्थ्यदर्शनात् प्रत्यक्षादेश्चसामर्थ्याभावात् चोदनैव प्रमाणं सा च प्रमाणमेवेति प्रतिज्ञायाः संभावितार्थकत्वं साधूपपद्यते नन्वेवम् । अत्यन्तासतोऽप्यर्थस्य शब्देन बोधनात् । तत्र तस्यैवधर्मेऽपिचोदनाया अप्रामाण्यमेव स्यादितिचेन्न तत्र तदर्थज्ञानोत्पादहेतुकत्वरूपप्रामाण्यस्यो त्सगतः प्रसक्तावपि अर्थान्यथाधीहेतुदोषज्ञानवशात्तत्र तदपनोदवत् प्रकृते तदभावेन प्रामाण्यस्य सुस्थिरत्वात् चोदनाशब्दस्य विधायकवाचकतया तस्य च भूतादिषु प्रसक्ते विरहाच्चादना हि भूतमिति भाष्योक्ति रसंगतेति तु न शङ्क्यम् प्रमाणविशेषस्य प्रत्यक्षादे धर्मे प्रामाण्यनिरासे तत्र किंप्रमाणमिति प्रमाणविशेषजिज्ञासया तद्विशेषस्य शब्दस्यै व सामर्थ्य-

प्रदर्शनमुचितमित्यगत्या शब्दसामान्ये चोदना-
पदस्य लक्षणाङ्गीकारात् अपिच भूताद्यभिधान-
सामर्थ्यं शब्दस्य न चोदनात्वप्रयुक्तं किन्तु शब्द-
सामान्यप्रयुक्तमिति सामान्यमुखेनैव तत्र तस्य
सामर्थ्यप्रदर्शनमुचितम् तदयं भाष्याशयः चोद-
ना धर्मे प्रमाणं शब्दत्वात् भूताद्यभिधायिशब्द-
वत् शब्देषु अतीन्द्रियाभिधानसामर्थ्यं दृष्टं न
प्रत्यक्षादिषु इति धर्मेऽपि शब्दएव प्रमाणं न
प्रत्यक्षादि धर्मस्यातीन्द्रियत्वादितिभावः लक्षण-
पदेन निमित्तं यदोच्यते तदा प्रमितेः कारण
मात्रमवगम्यते यदा प्रमाणमुच्यते तदा प्रमिते
रसाधारणं कारणं प्रतीयते तदेव करणं व्यापार-
वदसाधारणं कारणं करणमिति प्रसिद्धेः प्रमाण-
मपि विवक्षाभेदेन भिद्यते तथा हि यदि शब्दा-
दि प्रमाणं तदा तदर्थाधिगतिः फलम् यदा च
तदर्थाधिगतिः प्रमाणं तदा हानोपादानोपेक्षा-
बुद्धयः फलम् नच यदा ज्ञानादिपरं लक्षणपदं
तदा शब्दपरचोदनाशब्देन सामानाधिकरण्यं न

स्यादितिवाच्यम् लक्षणया ज्ञानादिपरचोदनापदेन तत्परलक्षणाशब्दस्य सामानाधिकरण्योपपादनसम्भवात्। निमित्तमात्रलक्षणपक्षे शब्दप्रामाण्यपक्षे च मुख्यमेव सामानाधिकरण्यम् वस्तुतस्तु सर्वस्मिन् पक्षे सामानाधिकरण्यं सूपपादम् लक्षणाशब्दस्य लक्ष्यतेऽनेनेतिव्युत्पत्त्या यथाज्ञानादिपरत्वं तथा चोदनापदस्यापिचोद्यतेऽनयेतिव्युत्पत्त्या ज्ञानादिपरत्वं अत एव प्रवर्त्तेऽहमिति ज्ञानं येन शब्देन जन्यते साचोदनोच्यते यद्वा प्रवर्त्तनफलामतिरित्युक्तिः संगच्छते एवं च मतभेदेन लक्षणाशब्देन निमित्तप्रमाणयोरुभयोर्ग्रहणमितिभावः। ननु गोदोहनादि द्रव्यं नीचैस्त्वादि गुणो यागादिक्रिया च फलसाधनत्वाद्धर्मो नापूर्वादिरिति श्रेयस्करभाष्योक्त्या गोदोहनद्रव्यादे धर्मत्वात् तत्र प्रत्यक्षादिप्रमाणप्रवृत्तेः सर्वसम्मतत्वा त्तत्र चोदनैव प्रमाणमित्यवधारणमसंगतमिति चेन्न ऐन्द्रियकेण गोदोहनत्वादिधर्मेण तेषां प्रत्यक्षत्वेपि तेन रू-

पेण धर्मत्वाभावाद् येन रूपेण श्रेयः साधनत्वेनै-
षां धर्मत्वं तेन रूपेण प्रत्यक्षत्वानभ्युपगमात्
शब्दैकसमधिगम्यत्वाच्छ्रेयस्साधनत्वस्येति यु-
क्तमेव चोदनाया एव तत्र प्रामाण्यं नेतरस्येति नि-
रूपणम्। ननु न युक्तं तादृशनिरूपणं नान्यत्
किञ्चनेन्द्रियमितिभाष्योक्त्या इन्द्रियस्यैव तत्र
सामर्थ्यनिराकरणं प्रतीयते न प्रमाणान्तरस्येति चे-
न्न दृष्टान्तप्रदर्शनार्थत्वादिन्द्रियोपादानस्य।
यथेन्द्रियमतीन्द्रियेऽसमर्थं तथा प्रमाणान्तरमपि
यद्वा नान्यत्किंचनेत्यत्रहेतुरिन्द्रियमिति अयं
भावः अन्यत्प्रमाणमतीन्द्रियेऽसमर्थं कुत इत्य-
पेक्षायां इन्द्रियपूर्वकत्वात् प्रमाणान्तरस्येन्द्रिया-
प्रवृत्तौ तत्सामर्थ्यविरहात् एवं च प्रमाणान्तर-
प्रवृत्त्यसंभवात् चोदनैव तत्र प्रमाणमिति सिद्धम्
ननु माभूद्भूतादिषु प्रत्यक्षप्रसक्तिः अनुमानं
तु भवत्केन वार्यते। नदीपूरभेदादिना व्यवहि-
ताया विप्रकृष्टाया मेघोन्नत्या पिपीलिकाण्ड-
सञ्चरणेन वा अनागतायाश्च वृष्टेरनुमानमाम-

नन्ति न्यायविदः एवं गन्धादिना तदाश्रयीभूत-सूक्ष्मद्रव्यस्य शाखादिकम्पनेन वायोश्वेति नाखिलप्रमाणस्य प्रतिषधोपपत्तिरिति चेन्न तत्र सामान्येन लिङ्गलिङ्गिसम्बन्ध ग्रहणेनानुमान-स्वीकारेऽपि प्रकृते सामान्यतोविशेषतोलिङ्गिनोधर्मस्य केनचिद्रूपेण कस्यचिल्लिङ्गस्य सम्बन्ध-ग्रहणाभावेनानुमानासम्भवात् एवं तर्हि शब्द-स्यापि गृहीतसम्बन्धस्यैव प्रत्यायकतया प्रकृते-पूर्वोक्तदिशासम्बन्धग्रहणासम्भवात् कथं चोद-नैव प्रमाणमित्यवधारणमगृहीतसंबन्धस्य शब्द-स्य प्रत्यायकत्वे तु प्रथमश्रवणेऽपि तस्य प्रत्यायकत्वापत्तिरितिचेत् सत्यम् स्यादेव दोषो यदि वाचकतया शब्दो धर्मं बोधयेत् किन्तु तद्भूताधिकरणोक्तदिशा वाच्यवाचकभावरूपसम्बन्ध-ग्रहनिरपेक्षैरेव पदैः पदार्थहेतुकवाक्यार्थबोध-स्यैव व्यवस्थापयिष्यमाणत्वात् तदेतत्सर्वं तत्रैव स्पष्टीभविष्यति। ननु अतथाभूतमप्यर्थमिति-भाष्यम् न सर्वत्र शब्दः प्रमाणं विप्रलम्भकवा-

क्यस्याप्रमाणस्यापिदर्शनात् किन्तु पत्रप्रमाणा-
न्तरेणार्थमवधाय शब्दः प्रयुज्यते तत्र प्रमाणम-
न्यथा तु नेतिनियमः तत श्च प्रकृते प्रत्यक्षा-
दिप्रमाणसंवादविरहेण कथं चोदनायाः प्रामा-
ण्यमित्यभिप्रायेण शङ्कते ननु अतथाभूतमिति
न च संभवद्वक्तृदोषेण लौकिकवाक्येन नित्यनि-
र्दोषस्या पौरुषेयस्य वेदवाक्यस्य साधर्म्यापाद-
नमयुक्तमिति वाच्यम् नास्तिकैरपौरुषेयत्वान-
भ्युपगमात् तन्मते चोदनाया अपि पौरूषेयत्व
लोकवाक्यवद् वेदवाक्यानामपि अतीन्द्रियार्थे
न प्रामाण्यमिति अपि च वक्तृप्रत्ययाधीनं
शब्दस्य प्रामाण्यं वेदस्य नित्यत्वेतु वक्तुरभावात्
स्वरसत एवाप्रामाण्यं प्रसज्जते । शब्दान्तरप्रामा-
ण्यस्य वक्तृप्रत्ययाधीनत्वेऽपि वेदस्य स्वत एव
प्रामाण्यमिति तु अश्रद्धेयम् प्रमाणान्तरप्राप्ता-
र्थबोधकस्वभावस्यैव वाचां सर्वत्र दर्शनात् अनु-
भवप्राप्तार्थबोधकस्मृतिवत् प्रमाणान्तरप्राप्तार्थबो-
धकवाक्यानामपि न स्वतः प्रामाण्यमित्येव शु

ज्यते लोकमर्यादानुसारात् तदतिक्रमणे परीक्ष-
काणामश्रद्धेयत्वापत्तिरिति भावः। ननु न प्रमा-
णान्तराप्राप्तार्थप्रापकवाक्यानामेव प्रामाण्यमिति-
नियमः श्रोतृवर्गादृष्टपूर्वाभिनवागतपुरुषोदीरि-
तवैदेशिकविचित्रार्थवाचां लोके प्रामाण्यदर्शना-
दिति चेन्न वक्तुराप्तत्वनिश्चये तत्र तदीयानुभ-
वकल्पनयैव प्रामाण्याभ्युपगमात् यत्र तु स्वस्य
वक्तुर्वा अनुभवो नावधार्यते तदर्थकं वाक्यं न प्र-
माणमिति लोकानुसाराद्वेदेऽपि तथैव युक्तं अथ
वेदादतीन्द्रियार्थेऽपि ज्ञानोत्पाद दर्शनात्तदुत्पाद
हेतुत्वरूपं प्रामाण्यं तत्राक्षतमिति कथं तदप्रामा-
ण्यमिति चेन्न तथाविधप्रामाण्याङ्गीकारेऽर्थ-
सत्त्वानपेक्षयाज्ञानजनकस्यासदर्थकवाक्यस्यापि
प्रामाण्यापत्तेः। तस्मात् स्वतन्त्रज्ञानजनकं
वाक्यं प्रतिज्ञावाक्यवन्न प्रमाणम् वेदो न प्रमाणं
स्वतन्त्रज्ञानहेतुत्वात् प्रतिज्ञावाक्यवत् प्रमाणा-
न्तराप्राप्तार्थबोधकं वाक्यं न प्रमाणं प्रमाणान्त-
रागृहीतार्थकत्वाददृष्टार्थबोधकवृद्धवाक्यवत् वेदो

न प्रमाणं नित्यत्वादाकाशवदित्यादयः प्रयोगा अत्र बोध्याः नच तन्मते वेदनित्यत्वानङ्गीकारान्नेदृशप्रयोगः वेदनित्यत्ववादिनां हेतुप्रसिद्ध्या प्रसङ्गापादनसम्भवान्नान्यतरहेत्वसिद्धिर्दोषः। एवं प्रयोगान्तराणि बोध्यानि। विप्रतिषिद्धमिदमितिभाष्यम्। एतदाक्षेपसमाधानाय पूर्वमेतत् चिन्तनीयम् किं ज्ञानस्य प्रामाण्यं अप्रामाण्यं च स्वत एव किंवा कारणगुणदोषावधारणादुभयं परतः अथवा अप्रामाण्यं स्वतः प्रामाण्यं परतः किम्वा प्रामाण्यं स्वतः अप्रामाण्यं च परतो निर्णीयते इति ज्ञानस्य प्रामाण्याप्रामाण्यजननस्वभावाभावे परसन्निधिसहस्रेणापि तत स्तदुत्पादासम्भवादुभयं परत इति केचित् अनभ्यासदशोत्पन्नज्ञाने स्वतः प्रामाण्याप्रामाण्योभयानवधारणदर्शनात्। कारणगुणदोषाहितज्ञानगतगुणदोषाभ्यां यथार्थत्वायथार्थत्वरूपप्रामाण्याप्रामाण्योभयनिर्णयदर्शनादुभयं परत इतिपरे। तत्र मिथो विरुद्धतदुभयजननस्वभावस्यैकत्र ज्ञाने

स्वाभाविकत्वाभ्युपगमे ज्ञानोत्पत्तिवेलायामेवा न्यतरावधारणापत्तिरत स्तदुभयं स्वतइतिपक्षो- ऽसंगतः एवंकारणगुणदोषदर्शनात् पूर्वमुत्पन्नेन ज्ञानेनार्थापरिच्छेदे तस्य निस्स्वभावत्वापत्त्या तद वधारणस्यावश्यकतया तदुभयं परत इत्यपिपक्षो- संगत एव अपिच कारणगुणदोषाभ्यां प्रामा- ण्याप्रामाण्ययोरुत्पादाभ्युपगमे गुणदोषोभयर- हिताच्चक्षुरादे रुत्पन्ने ज्ञाने तदुभयोरुत्पादास- म्भवेन तस्यनिः स्वभात्वप्रसंगादिति ज्ञानं हि द्वि- विधं प्रमाणं वास्वाद प्रमाणं वा कोटिद्वय- भिन्नं ज्ञानं तु न किमपि संभवति नच मिथो- विरोधात् तदुभयजननस्वभावो माभूदेकत्र ज्ञाने ज्ञानव्यक्तिभेदेन तदुभयस्वीकारे तु न विरोध इतिवाच्यम् तदुभयावच्छेदकज्ञानत्वातिरिक्त- धर्मस्य तत्रानुपलम्भात् ज्ञानत्वस्यैव तदुभयावच्छे- दकत्वकल्पनाया न्तु एकस्यामेव ज्ञानव्यक्तौ अवच्छेदकानुरोधादवच्छेद्यद्वयप्रसक्तौ विरोधः स्फुटएवेति तदुभयस्थितये ज्ञानव्यक्तिभेदाश्रयणे

ऽपि तत्परिचायकचिह्नान्तराभावात् ज्ञानत्वस्य
चाविशेषात् न तयोर्विवेक इति अप्रामाण्यं स्वतः
प्रामाण्यंपरत इति केचि त्समर्थयन्ते प्रामाण्या-
भावरूपस्याप्रमाण्यस्यावस्तुत्वा न्नदोषजन्यत्व-
संभव इति तत्स्वतः प्रामाण्यस्य तु वस्तुत्वात्कार-
णगुणजन्यत्वमितिकारणगुणजन्यत्वनिर्णया दे-
तन्निर्णय इति तत्परतः अत एव रजतारजतोभ-
यनिबन्धनरजतज्ञानं प्रामाण्यं यथार्थत्वलक्षणं
गुणादिज्ञानेनावधार्यते अन्यथा स्वप्नादिज्ञाना-
नामपि स्वतः प्रामाण्यं स्यात् नच तेषामपि
तावदुत्सर्गतः स्वतः प्राप्तमेव प्रामाण्यं किन्तु-
दोषज्ञाननिबन्धनाप्रामाण्येनापनोदः क्रियते
इति वाच्यम् तस्यावस्तुत्वेन दोषनिबन्धनत्वा-
भावात् नचा प्रामाण्यस्य स्वाभाविकत्वे प्रमाण-
ज्ञानेऽपि तत्स्यात् ज्ञानस्वभावस्य तत्रापि सत्वा-
दन्यथाज्ञानमेव तन्न स्यादितिवाच्यम् स्वाभावि-
कत्वेन तत्र तत्प्रसक्तावपि कारणगतगुणज्ञानाधी-
नप्रामाण्येनापनोदाभ्युपगमात् यत्र तु कारण-

तद्गुणज्ञानं नास्ति यथा विभ्रमादौ तत्राप्रामाण्यं स्वत एवे तिनावस्तुनः कारणत्वमिति तथा च शुक्तिरजतादिविभ्रमे इन्द्रियस्य सत्वेपि दोषादेव गुणाभावः स्वप्नविभ्रमे तु इन्द्रियाद्यभावादेव तद्गुणविरह इति तत्रतदपनोदाभावात्स्वतस्तत् शुक्तिरजतादिविभ्रमेषु दोषैर्गुणापहरणा न्मिथ्यात्वनिर्णय इति मीमांसकानां भ्रमोदोषैर्मिथ्यात्वधीरिति वस्तुतस्तु अप्रामाण्यापनोदकप्रामाण्यकारणीभूतगुणानां दोषैरपाकरणात्प्रामाण्यानुत्पत्त्या अपनोदकाभावेन स्वतोजायमानमप्रामाण्यं ज्ञायत इति एवं च परतः प्रामाण्यमितिपक्षे वेदस्यापौरुषेयत्वे वक्तुरभावा त्तदीयप्रकृतवाक्यार्थयथार्थज्ञानादिरूपगुणजन्यत्वासंभवादप्रामाण्यम् पौरूषेयत्वेऽपि पुरुषस्यातीन्द्रियार्थे शुद्ध्यसम्भवा त्सुतरामप्रामाण्यम् एवं स्वतोद्वयमित्यत्रापि तयोः सांकर्यमित्यप्रामाण्यम् परतो द्वयमित्यत्रापि गुणाभावादेवाप्रामाण्यमिति पूर्वपक्षसंक्षेपः अथसमाधानम्। स्वतः स्वविषया-

वधारणासामर्थ्यं ज्ञानस्य यदि नाङ्गीक्रियेत तदा न्येनतत्संपादनासम्भवात्कदाचित् क्वचित्कस्यचिदर्थस्यावधारणं न स्यादिति सर्वस्य जगत आन्ध्यमेव प्रसज्येत यदपि गुणजन्यत्वावधारणात्परत इति तदपि च गुणानां निर्वक्तुमशक्यत्वात् तथा हि के पुनर्गुणाः नहि चक्षुरादिषु प्रामाण्यौपयिकाः केचनगुणाः चक्षुरादीनामतीन्द्रियत्वेन तद्गुणोपलब्धेरशक्यत्वाच्च वैमल्यादिकं तु दोषाभावान्ना तिरिच्यते तदधीनं प्रामाण्यं तु वेदेऽपिसंभवतीतिनात्रास्माकं प्रद्वेषः गुणावधारणादेव प्रामाण्यधीरितिकथमवगतम् । ज्ञानस्य विषययथार्थत्वं गुणनिमित्तं अतः कारणभूतगुणज्ञानेन तदवगम्यत इति चेत् न्न यथार्थत्वस्यगुणनिमित्तत्वानभ्युपगमात् अत एव दुष्टेन्द्रियजन्यस्या पिपीतः शङ्ख इति ज्ञानस्य शङ्खांशे प्रमात्वमुपपद्यते तथाच स्वकारणातो यथार्थत्वं दोषच्चा यथार्थत्वमित्येकास्मिन्नेव पीतः शङ्ख इति ज्ञाने विषयभेदेन प्रमात्वाप्रमात्वयोः स्थितिः किंच

घटादिकार्यजातं स्वोत्पत्तयेस्वकारणं दंडाद्यपेक्षते नतु जलाहरणादिके कार्ये स्वकारणमपेक्षते एवं प्रामाण्यं स्वोत्पत्तये स्वकारणं गुणाद्यपेक्षतां नाम स्वार्थप्रकाशनरूपकार्ये तु तदनपेक्षमेव किंच ज्ञानं स्वविषयप्रकाशनाय स्वकारणगत गुणमपेक्षेत तदानवस्थाया स्वविषयपरिच्छेद एव न स्यात् तथाहि स्वकारणगतगुणावधारणं ज्ञानान्तरेण वाच्यम् तदपि ज्ञानं स्वविषयीभूतगुणप्रकाशनाय स्वकारणगुणावधारणमपेक्षेत तदपिगुणावधारणं ज्ञानान्तरेणेतिरीत्या नवस्थास्यादिति प्रामाण्यं चेदस्ति स्वत एववाच्यमिति ननु स्वतः प्रामाण्यपक्षेपि अनवस्था तदवस्थैव यत्र ज्ञाने प्रामाण्यापवादकदोषज्ञानं नास्ति तत्रैव ज्ञाने प्रामाण्याङ्गीकारात् यत्रतुतदपवादकदोषादिज्ञानं तत्र तदनभ्युपगमाद् "अर्थान्यथात्वधीहेतुदोषज्ञानैरपोद्यात" इत्युक्तेः ततश्च दोषाभावज्ञानं स्वविषयपरिच्छेदाय तत्र दोषाभावज्ञानान्तरमपेक्षते एवं तदपितदपीति इतिचेन्नैवम् दोषज्ञानाभावा-

देव तदपनोदाभावस्वीकारात् दोषज्ञानं हि तद-
पनोदकं तदभावस्तु अनपनोदक इति भावः
यत्तु अप्रामाण्यस्य व्यतिरेकरूपतया ऽवस्तुत्वात्
नदोषजन्यत्वमिति न तत् ततोवसेयमिति तन्न
अप्रामाण्यस्य भावरूपत्वात् अनवधारणात्मकस्य
संशयस्य अतद्वतितत्प्रकारकस्य विपर्ययस्य च
ज्ञानस्वरूपतया वस्तुत्वेनदोषजन्यत्वे बाधकाभा-
वात् तथाचा यथार्थत्वस्य दोषजन्यतया दुष्टका-
रणजन्यज्ञानस्या यथार्थत्वमेवेति न संशयादेर्य-
थार्थत्वम् यच्चाज्ञानरुपमप्रमाण्यं तत्तु न ज्ञान-
कारणजमिति न तत्रदोषव्यापारापेक्षा ननु यथा-
प्रामाण्यस्य गुणाजन्यत्वे ऽनवस्था तथा अप्रामा-
ण्यस्य दोषजन्यत्वाभ्युपगमेऽपि अनवस्थास्यादि-
तिचेन्न सजातीयपरंपरापेक्षायामनवस्थास्वी-
कारात् यथाप्रमाणज्ञानं सजातीयप्रमाणान्तर
ज्ञानमपेक्षते एव मप्रमाणज्ञानं स्वसजातीयमप्रमा
णज्ञानान्तरमपेक्षेत स्यादेवानवस्था तद्विहप्रमाण-
ज्ञानविषयीभूतार्थान्यथात्वदोषज्ञानाधीनमप्रमा-

ण्यं प्रामाण्यन्तु स्वत इति नानवस्था यत्रैकस्मिन्-
विषये शुक्तिशकलादौ पूर्वमिदंरजतमितिज्ञानमु-
त्पन्नं तत्रैवपुनर्नेदंरजतमितिसमीचीनंज्ञानमुत्पन्नं
तत्रनेदं रजतमिति स्वतः प्रमाणेन ज्ञानेन पूर्वस्मि-
न्निदंरजतमितिविपर्ययज्ञाने अर्थान्यथात्वरूपा-
प्रमाणता जातेतिनानवस्था नचोत्तरज्ञानेन पूर्व-
स्मिन्ज्ञाने अप्रामाण्यं यथा तथा पूर्वज्ञानेनोत्तर-
स्मिन्नेवज्ञानेकुतोनाप्रमाणतेतिवाच्यम् यतो हि
पूर्वं ज्ञानमुत्तरज्ञानमबाधित्वोत्पद्यते पूर्वज्ञानोत्प-
त्तिवेलायामुत्तरज्ञानस्यासत्वेन तद्बाधस्य वक्तुमश-
क्यत्वात् उत्तरज्ञानोत्पत्यनन्तर न्तु उदीचैवप्राचो
बाधेनासत्वा त्कथमुत्तरस्य बाधः पूर्वस्मिन् ज्ञाने
सत्येव तद्विपरीतार्थविषयकमुत्तरज्ञानंजायत इति
तेनपूर्वबाधः संभवत्येव पूर्वज्ञानबाधं विनोत्तर-
ज्ञानस्योत्पत्यसम्भवा त्स्वोत्पत्तिवेलायामेवोत्तर-
ज्ञानेन पूर्वज्ञानेऽर्थान्यथात्वरूपाप्रमाणताबोधना
ल्लाघवमितिध्येयम् । तथा च पूर्वज्ञानविपरी-
तार्थग्राहकत्वेन समानविषयतयो त्तरज्ञानस्य

पूर्वज्ञानबाधकत्वं शुक्तिरजतादिज्ञानप्रदर्शनेना-
भिहितं क्वचिच्च पीतः शङ्ख इत्यादौ दोषज्ञान-
स्य समानविषयत्वाभावेऽपि कार्यैक्याद् बाधकत्वं
क्रत्वर्थचमसः पुरुषार्थेन गोदोहनेनेव यत्र तु
बाधकज्ञानेसन्देहोवतरति तत्र तृतीयज्ञानमवश्य-
मपेक्ष्यते इतिनानवस्था नचैवं सम्वादात्प्रामा-
ण्यापत्तिः तृतीयज्ञानस्य द्वितीयज्ञानारोपितदो-
षोत्सारणमात्रप्रयोजनत्वात् तृतीयज्ञानेन निर-
स्तेपूर्वज्ञानारोपितदोषे पूर्वज्ञानप्रामाण्यं यथा-
स्थितमेवेति न क्षतिः यदा तु द्वितीय तृतीयज्ञा-
नयोः सम्वादः तदा प्रथमस्याप्रामाण्यमेव द्विती-
यज्ञानप्रामाण्यमपि न तृतीयाधीनम् द्वितीयज्ञा-
नशङ्कानिराकरणमात्र व्यापारापेक्षणात् एवं च
सर्वेषां प्रमाणानां स्वतस्त्वमिति न्यायेन शब्द-
स्यापि प्रामाण्यं स्वत एवेति प्रदर्श्यते । अर्थबो-
धजनकत्वमेव ।

शब्दस्य प्रमाणत्वं नच तदानाप्तवा वाक्ये-
ऽप्यस्तीति तस्यापि प्रामाण्यं प्रज्येतेतिवाच्यम्

तत्र दोषेण प्रसक्तप्रामाण्यापनोदाभ्युपगमात्
वेदवाक्ये तु ने दृशाक्षेपः तत्रदोषसम्भावना-
विरहात् शब्दसाधर्म्यात् दोषशङ्का न युक्ता
स्वतः शब्दे दोषाभावात् वक्तृदोषेण हि शब्दो
दुष्यति नान्यथा वेदे वक्तुरभावा न्न दोषशङ्कालेश
इति तद्वाक्यस्य स्वतः प्रमाणता ननु लौकिकवा-
क्ये वक्तृगुणान्वया व्यतिरेकानुविधायिनः प्रमाण्य
स्य दर्शनाद्वैदिकवाक्येऽपि तत्कल्पनाया औचि-
त्येनापौरुषेयत्वाभ्युपगमे तेषामप्रामाण्यमेव स्या
दिति चेन्न उभयत्र दोषाभावस्यैव प्रमाण्यं प्रति
प्रयोजकत्वाभ्युपगमेन वेदप्रामाण्यसमर्थनसम्भ-
वेन वक्तृगुणस्य तत्र प्रयोजकत्वकल्पनायां गौर-
वायत्तेः। नच दोषाभावस्य प्रामाण्यं प्रतिप्रयोज-
कत्वाभ्युपगमेऽपि परतः प्रामाण्यमित्येवायातमिति
वृथैव गुणानां तत्र प्रयोजकत्वनिरास इति वा-
च्यम्। दोषाणां प्रमाण्यापनोदकार्थान्यथात्वादि-
प्रयोजकतया यत्र दोषाः सन्ति तत्र तदपनोक-
सत्वात् तन्निरासेपि दोषाभावे अपनोदकाभावा

द्रुत्सगतः प्राप्तप्रामाण्यस्यावस्थानात् दोषोत्सार
णमात्रे दोषाभावव्यापारो न प्रामाण्ये इति न।
तस्य परतस्त्वमितिभावः एवमेव लौकिकवाक्येऽपि
स्वत एव प्रामाण्यम् न्यायस्योभयत्र समत्वात्
लौकिकवाक्ये गुणावधारणेन दोषाभावनिर्णयः।
वैदिकवाक्ये तु निराश्रयत्वादिति न प्रामाण्यस्य
परतस्त्वमिति नचवैपरीत्यमेव किं न स्यादितिवा
च्यम् गुणज्ञानस्य प्रामाण्यप्रयोजकत्वे पूर्वोक्तरी
त्या नवस्थापत्तेः। दोषाभावस्य तु दोषोत्सारण
मात्रे व्यापार इति तन्निराकृता दोषाः स्वतः
प्राप्तं प्रामाण्यं न निघ्नन्तीतिभावः। ननु आप्तवक्तृ
गुणावधारणेन लौकिकवाक्ये प्रामाण्यापदाभाव
शक्यनिर्णयः वेदे तु वक्तुरभावेन तन्निर्णयास
म्भवादप्रामाण्यमेव प्रसज्यते इतिवाच्यम् वक्तृदो
षस्यैव शब्दे संक्रमणमित्यङ्गीकारेण वक्तुरभावे
तद्द्वारा दोषसंक्रान्ते र्वक्तुःशक्यतयैव तन्निर्णया
त् एवं च वेदप्रामाण्यरक्षणार्थं नैयायिकानां कर्तृ
कल्पनाऽनुचिता अन्यथा शाक्यादिग्रन्थवद् वेद

स्यापि अप्रामाण्यं स्यात् दोषस्य तत्रे वातत्रा-
पिसम्भवात् निर्दोषपुरुषकल्पनाया उभयत्र सा-
म्यात् स्वतःप्रामाण्ये पि लौकिकवाक्यस्य मूला-
न्तरापेक्षा तत्र दोषाभावनिर्णयाय वेदे तु दोषसं
भावनाविरहा न्नतन्मूलापेक्षा मूलाभावो वैदिक
वाक्ये गुण एव न दोषोऽन्यथा नुवादत्वापत्तेः।
यद्यपि लौकिक वाक्यानां संवादात् प्रामाण्यमव-
गतं तथापि अपौरुषेयवाचामतीन्द्रियार्थे प्रमाणा-
न्तरसंवादासंभवेपि दोषाभावादेव प्रामाण्यनि-
र्णयः। किंच संवादेन प्रामाण्यनिर्णयो न क्वचि-
त्कर्तुं शक्यः यत्रै कस्मिन् विषये समानमनेकंज्ञानं
जायते तत्र न पूर्वज्ञाने प्रामाण्य मुत्तरज्ञानग्राह्यं
उत्तरज्ञानाविषयत्वात् पूर्वज्ञानस्य विषयकृतविशेषा
भावाच्च तथापि उत्तरज्ञानग्राह्यत्वे विनिगमनावि-
रहेणोत्तरज्ञानप्रामाण्यं पूर्वज्ञानेन गृह्यत इत्यपि
स्यात् अपिचा गृहीतप्रामाण्यकेनोत्तरज्ञानेन संवा-
दासंभवा त्तदर्थं तत्रापि ज्ञानान्तरापेक्षायामनवस्था
स्फुटैव अन्ततः क्वचित्स्वतः प्रामाण्यग्रहे तु कल्प

नालाघवाय प्रथमज्ञाने एव तत्कल्प्यताम्। अर्थक्रि-
याकारिज्ञानं संवाद इत्यपि न अर्थक्रियाकारिज्ञाने
तदसंभवेन तत्रैव प्रामाण्यग्रहणे तेन पूर्वज्ञाने
प्रामाण्यग्रहस्य वक्तुमशक्यत्वात्। प्रामाण्यग्राह-
कज्ञाने प्रामाण्यानवधारणात् असत्यपि विषये
स्वप्नादौ अर्थक्रियादर्शनेन तत्राप्यनाश्वासात्
अपि च प्रवृत्युत्तरभाविना अर्थक्रियाकारिकत्वज्ञा-
नात् पश्चात् प्रवर्त्तकज्ञानस्य प्रामाण्यावधारणं
कृतोद्वाहस्य लग्नपरीक्षणमिवनिरर्थकं श्रोत्रादिज-
न्यज्ञाने संवादाभावात् स्वत एव प्रामाण्यमिति-
भावः। नचाप्ताऽप्रणीतागमस्य क्वचिदपिप्रामाण्य-
दर्शनेनेतादृशस्याम्नायस्य कथं प्रामाण्यमितिचे-
त्सत्यं प्रामाण्यस्या नुमानिकत्वे स्यादेवं तत्तु न त-
स्य स्वतस्त्वाभ्युपगमात् अन्यथा तत्राप्यनुमाना-
न्तरापेक्षायामनवस्थापत्तेरिति। नन्वेवंप्रामाण्यस्यो-
त्पत्तौ स्वतस्त्वोपपादनेऽपि ज्ञप्तौ तदसम्भवः। नहि
ज्ञानमुत्पद्यमानमात्मानंगृह्णाति दूरे स्वधर्मतया प्रा-
माण्यग्रहणम् नचा गृहीतेन तेन तद्व्यवहारसिद्धि-

रिति चेन्न आत्मतद्धर्मप्रामाण्यग्रहणं विनाप्यर्थ-
प्रकाशकतया सत्तामात्रेण कृतकार्यत्वाभ्युपगमात्
अवधृतविषयप्रामाण्यकज्ञानस्य प्रवर्तकत्व मिति
प्रामाण्यापनोदकदोषादेरग्रहे अर्थे ज्ञानेन प्रका-
शिते निःशङ्कं पुरुषः प्रवर्तत इति तस्य कृतका-
र्यत्वे पश्चात् प्रामाण्यजिज्ञासायां तत्रा नुमानम-
वतार्य प्रामाण्यं निश्चीयते तथाच वक्ष्यते भाष्ये
ज्ञातेत्वनुमानादवगच्छाम इति अयं भावः। प्रा-
माण्यं द्विविधं विषयगतं ज्ञानगतं च तत्र ज्ञानग-
तप्रामाण्यग्रहणे अस्तु नाम ज्ञानग्रहणापेक्षा। धर्मि
णं विना तन्निष्ठतया धर्मग्रहणासंभावात् विषयग-
तमर्थं तथात्वरूपप्रामाण्यं ज्ञानग्रहणं विनापि सु-
ग्रहम्। तत एव च ज्ञाने प्रामाण्यव्यवहारः। ईदृशं
च प्रामाण्यम् अज्ञातेनापि ज्ञानेन गृह्यते इति
तस्य स्वतस्त्वम्॥ एवंप्रामाण्यन्तु न स्वतः अप्रमा-
णज्ञानं न्तु न स्वकीयाप्रामाण्यं स्वयं ज्ञापयितु-
मर्हति शुक्तिशकलादाविदंरजतमितिजायमानं
ज्ञानं रजतमिदमित्येवाग्राहयति पुनर्नेदंरजतमि-

ति तेनाप्रमाणज्ञानं असत्प्रामाण्यं गृह्णाति त
एव च पुरुषं प्रवर्तयति ततोस्यमिथ्यात्वनि
याय परापेक्षास्त्येवेति नचैवं वेदस्यापि स्व
प्रामाण्यं न स्यात् तत्रापि पूर्वोक्तानुमानस्य वा
कस्य दर्शनादितिवाच्यम् अर्थान्यथात्वदोषज्ञा
नस्यैव तद्बाधकत्वाङ्गीकारेणानुमानस्य तदबा
कत्वात् आगम विरुद्धत्वादनुमानं न तं बाधितु
त्सहते मिथ्यात्वादनुमानस्यबाध्यत्वमितितु
आगमस्य मिथ्या त्वेअनुमानस्य बाधकत्वं अनु
मानबाध्यत्वे च तस्य मिथ्यात्वमित्यन्यो
श्रयात् नचागमार्थस्य यथा नुमानातिरिक्तंबाध
नास्ति एव आगमातिरिक्तं तदर्थसाधकमपि
स्तीति बाधवत्तदर्थसिद्धिरपिस्यादितिवाच्यम्
नरशिरः कपालं शुचीत्यनुमामान वदागमवि
ध्यनुमानानवतारात् आगमार्थसम्वादकप्रमाण
भावान्न तदर्थसिद्धिरिति नकिंचित् चक्षु रा
गृहीतस्यापि गन्धस्य घ्राणग्राह्यत्वेनाङ्गीक

शत् अस्मन्मते वेदस्य प्रमाणाभावोऽसिद्ध इति न सत्तेनानुमानोदयवाध इति तुन सत् अस्मन्मतेतस्य सिद्धप्रमाणत्वात् न तव तादृशमनुमान मस्मदादीनां तादृशार्थवोधनाय प्रभवति मदीयागमविरुद्धत्वात् नच त्वदर्थंतवानुमानंपरार्थत्वात्पदप्रयोगस्य नच वेदवाक्या त्तव शाब्दवोधो न जायत इतिवक्तुंशक्यते ततोऽसन्दिग्धवोधदर्शनात् नचैवं शाक्यादिवाक्यतोपि शाब्दवोधदर्शना त्तेषामपि प्रामाण्यं स्यादितिवाच्यम् इन्द्रियाणामतीन्द्रिय पदार्थगृहणे सामार्थ्याभावाद्विप्रलिप्सादि दोषसम्भवाच्च पौरूषेवाक्यानां न तादृशार्थे प्रामाण्य मपौरुषेय वेदवाचामेतादृश दोषसम्भावनाविरहेण पवादाभावात्प्रामाण्यमित्यङ्गीकारात् कल्पनागौरवभयाद्द वेदप्रामाण्यरक्षार्थे नकर्तृ कल्पना नापि महाजनपरिगृह इति न मीमांसकानां क्वचिददृष्टकल्पना तदेवं नित्यनिर्दोषापौरुषेयवाक्येन सर्वेषामसन्दिग्धाविपर्यस्तशाब्दबोधदर्शना तत्प्रामाण्यमविश-

ङ्कमेव अप्रामाण्यकारणीभूत संशयादेरत्राद
र्शनात् तदेतत् नचाग्निहोत्रं जुहुयादित्यादिना न
चेवेत्यादिनाचभाष्येण निराक्रियतेइति। भाष्य
संक्षेपेणायं भाष्यार्थः यत्र धर्मे वादिनां बहुधा
विप्रतिपत्तयः सधर्म श्चोदनालक्षणः चोदनै
लक्षणं साचलक्षणमेवेति श्रुत्यर्थाभ्यां को धर्मः
कथंलक्षण इत्येतद्रूप मेकेन 'चोदनालक्षणोऽर्थो
धर्म'इतिसूत्रेणसूत्रकृताव्याख्यातम् तत्र सूत्रघट
कचोदनापदार्थं। भाष्यकारो व्याचष्टे चोदनेति
चुदप्रेरणेइत्यस्मात् णिजन्तात् ण्यासश्रन्थो
युजिति युच्प्रत्ययेन चोदयतीति व्युत्पत्याचोद
नापदनिष्पत्तिः। तथाचप्रेरणापरपर्य्यायः चोदना
शब्दः चोदनापदं यद्यपि विधिवाचकत्वेनान्यत्र
प्रसिद्धं तथापि तावन्मात्रस्य प्रयोगायोगा त्तद्घ
टितस्य पदस्य प्रयोगेऽपि तस्य प्रवर्त्तकत्वायोगा
ल्लक्षणयाप्रवर्तकवाक्यं चोदनापदे नाभिधीयते
चोदनापदस्य तत्रनिरूढलक्षणां दर्शयितुमाह
आचार्यचोदितः करोमि इतिदृश्यते इति तथाच

तत्र तत्पदस्य स्वारसिकप्रयोगदर्शनान्नाप्रसिद्धार्थलक्षणापि इतिनापूर्वार्थकल्पनया प्रसिद्धार्थकपदपरिग्रहप्रतिज्ञाभङ्ग इतिबोध्यम् क्रमप्राप्तं लक्षणपदार्थं निरूपयितुं तद्व्याचष्टे लक्ष्यतेयेनेति तथा च करणव्युत्पत्त्या लक्षणपदं प्रमितिकारणं तद्विशेषोभयपरम् कारणविशेषश्च प्रकृतेप्रमाणमेवेति चोदनालक्षणं यस्य सचोदनालक्षणश्चोदना प्रमाणक इत्यर्थः सम्पद्यते । एवं च यदा शब्दः प्रमाणं तदर्थाधिगमश्च प्रमेय स्तदा चोदनालक्षणयोः सामानाधिकरण्यम् उभयोःशब्दपरत्वात् एवं लक्षणपदं यदा निमित्तमात्रपरं तदापि तयोः सामानाधिकरण्यमुपपद्यते यदाचवाक्यार्थावगमस्य प्रमाणत्वं हानोपादानादिबुद्धीनांफलत्वं तदा चोदनापदस्य तत्र लक्षणां कृत्वा सामानाधिकरण्यमुन्नेयम् चोदनापदस्यमुख्य वृत्त्या शब्दपरत्वादितिभावः वह्निज्ञानजनकज्ञानविषयत्वाद्धूमस्य लक्षणत्वं धूमज्ञानजन्यज्ञानविषयत्वाद्वह्नेर्लक्ष्यत्वमित्यभिप्रायेणाहधूमोल-

क्षणमिति यद्वावह्निपदं तज्ज्ञानपरं धूमपदमपि
लक्षणाया ज्ञानपरं तथा च वह्निविषयकानुमिति
जनकं धूमविषयकं ज्ञानमिति प्रमाणार्थकल
क्षणग्रहणसंगतिः लक्षणां विनापि ज्ञायमानस्य
हेतोरनुमापकत्वमित्य भिप्रायेणप्रमाणार्थकल
क्षण ग्रहण संगतिरिति केचित्। शब्दस्या तीन्द्रि
यार्थेसामर्थ्यं प्रदर्शयितुमाह चोदनाहीति भू
तमतीतम् व्यवहितं कुड्यादिभि रावृतं विप्र
कृष्टं देशकालासन्निहितं अर्थजातं शब्दः बो
धयितुं शक्नोति शब्दादेवेदृशार्थबोधो नान्यत
इति ननु नान्यत इत्युक्त्यैइन्द्रियस्यैव निरासो न
प्रमाणान्तरस्येति कथं चोदनैवेत्यवधारणमि
तिचे न्न दृष्टान्तप्रदर्शनार्थत्वादिन्द्रियोपादा
नस्य यथा तत्रेन्द्रियमसमर्थं तथाप्रमाणान्तरम
पीतिभावः अथवा तत्रनान्यत्प्रमाणं समर्थं कुत
इन्द्रियासामर्थ्यात् इन्द्रिय पूर्वकत्वा त्प्रमाणा
न्तरस्येन्द्रियनिवृत्तौसुतरातन्निवृत्तिः तथाच किं
शब्दः प्रश्नार्थकः पृथग्वोध्यः च शब्दोपि हेत्व

थंकः पृथगेवेतिभावः नन्वेवमतीन्द्रियार्थेलौकिक-
वाक्यवद् वैदिक वाक्यस्यापि प्रामाण्यं न स्या-
दित्यभिप्रायेण शङ्कते नच तथाभूतमिति अयं
भावः यत्रप्रमाणान्तरेणार्थं निश्चित्य लोकः शब्दं
प्रयुङ्क्ते तत्र सप्रमाणं यथा नद्यास्तीरे पञ्चफलानि
सन्ति इत्याप्तोक्तः अन्यथा परप्रतारणाय यत्र-
तादृशं प्रयुंक्ते तत्र स न प्रमाणमितिप्रमाणान्तर-
प्राप्तार्थ बोधकशब्दस्य लोके प्रामाण्यदर्शनाद्वेदे-
पि तथा वाच्य मितिनातीन्द्रियार्थे ततुप्रमाण
मित्याशयः यद्यप्येतत्सर्वम्पूर्वमुक्तं तथापि संक्षे-
पेणभाष्यार्थ प्रदर्शनाय पुनरभिहितमितिनाज्ञा-
तपूर्वापुन रुक्तिरितिध्येयम् समाधानभाष्यम् उ-
च्यते विप्रतिषिद्धमिति अयमभिप्रायः ।

भा॰ विप्रतिसिद्धमिदमुच्यते ब्रवीति वितथं चेति
ब्रवीति उच्यते ऽवबोधयति बुद्ध्यमानस्य निमित्तं
भवति इति यस्मिंश्च निमित्त भूते सति अव बुद्ध्यते
सोऽववोधयति यदि च चोदनायां सत्याभनि होत्रात्
स्वर्गोभव तीति गम्यते कथ मुच्यते न तथा ब्रवी-
मीति अथ न तथा ब्रवीति इति कथ मवबु ध्यते अस

न्तमर्थं मववुध्यते इति विप्रति षिद्धम् नच स्वर्गकामो तजेत इत्ययो वचना त्सन्दिग्ध मव गम्यते भवति वा स्वर्गो न भव तीति नच निश्चितमिद भव गम्यस्तानं मिथ्या स्यात् ।

वाक्यस्य वितथत्वं प्रमाणान्तर संवादाभावाद्वा वक्तृगुणजन्यत्वानवधारणाद्वा संन्दिग्धार्थवोधकत्वाद्वा विपरीतार्थंवोधकत्वाद्वा अवोधकत्वाद्वोच्यते तत्र तावन्न प्रथमः प्रामाण्यस्य प्रमाणान्तरसम्बादाधीनत्वनिराकरणात् नापिद्वितीयःप्रमाणस्या न्वयव्यतिरेकाभ्यां दोषोत्सारणमात्रंप्रत्युपयोगित्वव्यवस्थापनेन प्रामाण्यं प्रति कारणत्वानभ्युपगमात् । नापितृतीयचतुर्थौं सन्देहविपर्ययोरनुपदं निराक्रियमाणत्वात् । तस्मादबोधकत्वमात्रमप्रामाण्य कारणमवशिष्यते इत्यभिप्रेत्येद मुच्यते विप्रतिषिद्धमिति। उच्चार्यमाणःशब्दो यदिस्वार्थं बोधयति तदा कथं वितथमर्था त्स्वार्थं न वोधयतीति वोधयति न वोधयतीति मिथो विरुद्धमुच्यते इत्येतदेव स्फुटयति अववोधयतीत्यादिना ब्रवीति। स्वार्थमवबोधय तिस्वार्थबोधस्यनि-

मित्तं भवति स्वार्थबोधनिमित्तस्यैव शब्दस्य तादृशार्थं बोधं प्रत्यनिमित्तत्वमुच्यते इति विप्रतिषिद्धमिदं प्रमाणे विप्रतिषेधमुक्त्वा प्रमेयेऽपि तं दर्शयति चोदनायां सत्यामिति। अग्निहोत्रं जुहुयात्स्वर्गकाम इति वाक्येन अग्निहोत्रात् स्वर्गो भवतीतिगम्यते तत्कथमुच्यते नाग्निहोत्रात्स्वर्गो भवतीति यस्माद्वाक्याद्योऽर्थो न प्रतीयते तत एव स प्रतीयते इति विप्रतिषिद्धमित्याह असन्तमर्थमिति ननु नावोधकत्वनिमित्तं वितथत्वमुच्यते येनैवं विप्रषेधः स्यात् किन्तु सन्दिग्धार्थ विषयक बोधनिमित्तकत्वप्रयुक्तं तथाच प्रमाणान्तरसंवादाभावात्तत्र संशयो जायते अग्निहोत्रात् स्वर्गो भवति वा नवेत्याशंक्य निराकरोति नचेत्यादिना। सन्देहबोधकपदाभावात् शब्दस्य सांशयिकत्वस्वभावानङ्गीकारात् सन्देहाभाव प्रदर्शनायाभिलापेन तदाकारं स्पष्टयति भवतिवेति नच संदेहं विना स्यमिथ्यात्वमित्याह नचेति। नचमाभूत्सन्देहादस्यमिथ्यात्वं विपर्यबोधकत्वा त्तु

मिथ्यास्यादित्याशंक्याह योहिजनित्वेति यथा शुक्तिशकले जायमानमिदं रजतमितिज्ञान मुत्तरभाविना नेदं रजमितिज्ञानेन वाध्यते एवं वेदवाक्यो ज्जायमानं ज्ञानं केनचि द्विज्ञाने वाध्येत मिथ्या स्यात् किन्तु प्रकृते वाधकज्ञानाभावाद वाधितमेव तज्ज्ञानमिति कथमस्य मिथ्यात्वं मिथ्याज्ञानप्रसरस्थलं दर्शयति कालान्तरे इति। कालान्तरे कूटकार्षापणादिप्रतीतौ पुरुषान्तरे जाततैमिरिके द्विचन्द्रादिप्रतीतौ अवस्थान्तरे पीतशंखादिप्रतिभासे देशान्तरे शुक्तिरजतादिज्ञाने भवति वाधक प्रत्यय इति ततः तेषां मिथ्यात्वं नचेदं कचि द्विपर्य्येतीत्याह नचैवेति उपसंहरति तस्मादिति। वैदिकवाक्यापेक्षया लौकिकवाक्ये वैषम्यं दर्शयति यत्त्विति अयं भावः।

भा० योहि जानित्वा प्रध्वंते नैतदेवमिति समिथ्याप्रत्ययः। नचैष कालान्तरे पुरुषान्तरे अवस्थान्तरे देशान्तरे वा विपर्य्येति तस्मादवितथः यत्तु लौकिकं वचनं च्चेत्प्रत्ययितात्पुरुषादि न्द्रियविषयं अवितथमेव तत् अथा प्रत्ययितादनिन्द्रिय विषयं वा तावत् पुरुषबुद्धि प्रभव मप्रमाणमू अशक्यंहितत् पुरुषेण ज्ञातुमृते वचनात्

शब्दे तावत्स्वतोदोषो नास्ति किन्तु पुरुष-दोषसंक्रमात् शब्दोदुष्यति इति पुरुषस्यैवापराधो न शब्दस्येत्याहतच्चेत्प्रत्ययितादिति तथा भूतम तथा भूतं वा यथादृष्टार्थं यो वदति सप्रत्ययित इति इन्द्रियविषयमित्यपि तस्यैव बिशेषणम् इन्द्रिय-मित्युपलक्षणं प्रमाणान्तरस्यापि एवं चेन्द्रियविष-य मित्यनेन प्रमाणान्तरमूलकमुच्यते तथा च प्रमाणान्तरमूलकं यत्प्रत्ययितवाक्यं तत् प्रमा-णमेवेति तद्दृष्टान्तेना म्नायाप्रामाण्यसाधनम-संगतं दृष्टान्तस्य साध्यविकलत्वात् प्रत्ययित-भिन्नोऽप्रत्ययितः अनिन्द्रिय विषयमित्यपि त-स्यैव विशेषणं तथाचासम्भवत्प्रमाणान्तरमूलं यदप्रत्ययितवाक्यं तत्पुरुषदोषाद्दुष्टमिति तेन नित्यनिर्दोषापौरुषेयवाक्यस्य ना प्रामाण्यं साध-यितुं शक्यते दृष्टान्तासिद्धेरिति । यत्तु यथाव-स्थितार्थदर्शित्वं यथादृष्टार्थवादित्व मित्युभयं प्रत्ययितशब्देन गृह्यते यथादृष्टार्थवादिन एव प्रत्ययितार्थत्वेशक्तिशुकलं रजतं पश्यतं स्तदनु-

सारे गोदं रजतमितिवदतोपि यथादृष्टार्थ वादि-
तया तदीयवाक्यस्यापि प्रामाण्यापत्तिः एवं यथा-
दर्शिन एव वा तदर्थत्वे सत्यरजत ज्ञानवतो
भ्रमादिदं रंग मितिप्रयुञ्जानस्य यथादर्शितया
प्रत्ययितपदेन ग्रहणे रजतपरतदीयरंगवाक्यस्य
च प्रामाण्यं स्यादिति यथादर्शित्वं यथा वादि-
त्वमित्युभयं प्रत्ययितपदेन गृह्यते इन्द्रियविष-
यमिति तु नात्रविशेषणं किन्तु पृथगेव कोटिः
एवं चानाप्तवाक्यमतथाभूतमपि श्रोतुरिन्द्रियवि-
षयभूतमिति तत्प्रमाणमुच्यते इति व्यवस्था-
पितंतदसत् उदाहरणप्रत्युदाहरणयो मिथोविरो-
धेन ग्रन्थव्याघातात् तथाहि भवन्मते यथादर्शित्वं
यथावादित्वमित्युभयं सम्भूय प्रामाण्यकारणं
मिन्द्रियविषयमिति तु पृथगेव प्रामाण्य कारण
तथाचा नयोरेकैकस्य प्रत्युदाहरणे मिथोविरोधः
पूर्वस्य प्रत्युदाहरण मनाप्तवाक्यं तत्रापि इन्द्रिय-
विषत्वेन प्रामाण्याङ्गीकारादिन्द्रियविषयमित्य-
स्योदाहरणमेतज्जातमित्येकस्मिन्नेववाक्ये व्या-

ख्याभेदेन प्रामाण्याप्रामाण्ययोः स्वीकारात् एव-
मिन्द्रियविषयमित्यस्य प्रत्युदाहरण मनिन्द्रिय
विषयमाप्तवाक्यं दृष्टसत्यवादित्वेन प्रमाणत्वे-
नोदाहृतं तदेवानिन्द्रियविषयत्वेना प्रमाणत्वेनो-
दाह्रियते इति स्पष्ट उदाहरण प्रत्युदाहरणयोर्वि-
रोधइति किंच इन्द्रियविषयमित्यस्य यदि दृश्य-
मानार्थं विषयक बोधजनकं वाक्यमित्यर्थः
स्वीक्रियते तथा चानाप्तस्यापि न निखिलं वाक्य-
मप्रमाणं व्यवहारानुपपत्तेः किन्तु यदैन्द्रियकार्थं
तत्प्रमाणं अन्यदप्रमाण मित्येवाभ्युपेयम् तदा
अनिन्द्रियविषयमित्यस्य श्रोतुर नुपलभ्यमाना
र्थविषयकं वाक्यमिति व्याख्येयं स्यादेवंच अ-
शक्यं हि पुरुषेण ज्ञातुं ऋते वचनादितिभाष्यं
व्याकुप्येत श्रोतृवर्गानुपलभ्यमानस्यपि वैदेशि-
कार्थजातस्य वक्त्राज्ञातुं शक्यत्वात् नहि उप-
लभ्यनाममेवार्थं प्रतिपादयन् वक्ता कृतकार्यो
भवति अज्ञातार्थबोधप्रयोजनकत्वा च्छब्दस्येती-
न्द्रियविषयमनिन्द्रियविषयमित्येतदुभयं संभव-

त्रमाणमूलासम्भवत्प्रमाण मूलपरतयैव व्याख्ये यम् तएवाशक्यहीतिभाष्यं स्वरसतः संगच्छते असम्भव त्रमाणान्तरमूलके ह्विवचनं विना उपायान्तरेण ज्ञातुमशक्यमितिभावः प्रत्ययः सञ्जातोऽस्येतिप्रत्ययितः तदस्य संजातमितीतजन्तः सत्यमिथ्योभयसाधारणज्ञानापरपर्यायः प्रत्ययइति नैतेनसत्यवादीगृह्यते किन्तु यथादृष्टार्थवाद्यवेति भावः प्रत्ययितपदार्थे एवेन्द्रियविषयमित्यपिविशेषणमेंवचैतदुभयं संभूय प्रामाण्यलक्षणैक्यं ननु वा शब्दोपादानस्वारस्यात् पृथक्पृथगेवलक्षणं न समुचितमितिवाच्यम् निपातानामनेकार्थत्वेन प्रकृते समुच्चयार्थकस्यैव स्वीकारात् अनिन्द्रियविषयं वेति प्रत्युदाहरणवाक्ये वाशब्दो विकल्पार्थक एव उदाहरणवाक्ये प्रत्ययितत्वेन्द्रियविषयत्वयोः सम्भूयकारणत्वेपि एकैकवैकल्येन प्रत्युदाहरणद्वये विकल्पस्यावश्यकत्वा त्तथा हि सत्यवादिनि अपि अशक्तिके ग्रध्रस्य दर्शनशक्ति र्नास्ति प्रत्यक्षाद्यभावा त्तत्रा प्यप्रामाण्यम् एवं शक्ये प्य-

र्थेमिथ्यावादिनि पुरुषे अनाश्वासादेवाप्रामाण्यम् नहि द्रष्टुमशक्ये ऽर्थे वचनं विनोपायान्तरेणाऽर्थाधिगतिः सम्भवति। तदाह अशक्यं हि तत् पुरुषेण ज्ञातुमृते वचनादिति। यदि कश्चित् सर्वज्ञः स्यात् तर्हि चोदना न्तरेणापि धर्माधर्मौ जानीयादिति चोदनैव धर्मे प्रमाणमित्यवधारणमसंगतं स्यादतः सर्वज्ञनिराकरणपरमिदम् भाष्यमिति केचित् तन्न अशक्यं हि तदिति वाक्यघटकतदो तीन्द्रियार्थपरामर्शितया तत्रैव ज्ञानोत्पत्तेर्निराकार्यत्वात् न सर्वत्राप्रस्तुतत्वात् किञ्च षड्भिःप्रमाणैः सर्वं जानान श्चोदनयैव धर्मं जानीयादिति तत्सिद्धौ नचोदनाप्रामाण्यावधारणप्रतिज्ञाभङ्गः इतिनासौ निराकार्यः एकेनैव प्रमाणेन सर्वंपश्यन् सर्वज्ञोभवतीति कल्पना तु प्रतिज्ञाविरोधित्वादशक्यत्वाच्च निराकार्या नहि चक्षुषा गन्धमजिघ्रन्नविकलकरणः कश्चन एवं कल्पयितु मर्हति प्रतिनियतविषयत्वात् प्रमाणानाम् इदानि मिव पुरापि करणानां स्वभावो नियत एवेति न

किञ्चिदेतत् । एतेनैदानीन्तनपुरुषस्येदृशप्रत्यक्षा-
सम्भवेऽपि प्राक्तनपुण्यकर्मणावतीर्णस्याप्रति-
हतज्ञानशक्तेः पुरुषधौरेयस्य वुद्धादे र्दिव्यदृष्टि-
जनितः सर्वविषयकोपालम्भः सम्भवतीतिनिरस्तम्
इदानीमिवपुरापिप्रमाणस्वभावविपर्यासानङ्गीका-
रात् नन्विदानीमपि प्राणिभेदेन सातिशयम्
प्रत्यक्षमुपलभ्यते तथाहि आलोकोपकरणसहित-
मेवचक्षुरस्मदादिप्रत्यक्षं जनयति मार्जार स्तु
आलोकसन्निकर्षं बिनापि तमसि पदार्थान्पश्य-
ति सम्पातिनामा च गृध्रराजः योजनशतव्यवहि-
तामपि दशरथनन्दनसुन्दरीं ददर्शेतिश्रूयते
रामायणे सोयम् दर्शनातिशयः कुत्रचिन्निरति-
शयमतिशयं गमयति यत्रचास्य परः प्रकर्षः ते-
योगिनः दर्शनस्य च परोतिशयः सूक्ष्मव्यवहित
बिप्रकृष्टभूतभविष्यदादि विषयत्वमिति योगिज्ञा-
नस्य सर्वविषयकत्वं नानुपपन्नमितिचेन्न अति-
शयस्य स्वबिषये दर्शनाद्धर्मस्येन्द्रियाविषयत्वेन
तत्रतदतिशयकल्पनायां प्रमाणाभावात् । अन्यथा

गन्धग्राहिणा घ्राणेन रूपस्यापि दर्शनं स्यात् नचै
तत् सम्भवति तेषामितरेन्द्रियनिर्माणवैयर्थ्या-
पत्तेः। नच रूपवतोघटादे र्नीरूपस्य रूपस्य स्थूल-
स्य केशादेश्च प्रत्यक्षदर्शना न्नप्रत्यक्षेविषयनि-
यम इतिधर्मविषयकत्वमस्य सम्भवतीतिवाच्यम्
वर्तमानविषयकत्वनियमस्य प्रत्यक्ष स्वीकृतत्वेन
भविष्यति धर्मे तत्प्रवृत्तेरयोगात् इन्द्रियलिङ्गा-
दयः षडेव ज्ञानहेतवः तत्रेन्द्रियस्य वर्तमानमात्र-
विषयतया तदुत्पन्नज्ञानस्यापि तन्मात्रविषयकत्वं-
नभविष्यद्धर्मविषयकत्वं नतरांसर्वविषयकत्वमिति
एवं लिङ्गाधीनानुमानदेरपि न धर्म विषयकत्वं
धर्मस्यालौकिकत्वेन तत्र लिङ्गग्रहणासम्भ-
वादत एव नैषां सर्वविषयकत्वमपि सर्वत्र
लिङ्गादेरसम्भवा दसर्वज्ञस्य परिचयासंभवाच्च
ननु यथाशाक्यै र्बुद्धस्य सर्वज्ञत्वं कल्प्यते तथा
मीमांसकै र्वेदस्यापौरुषेयत्वं कल्प्यते इति द्वयोः
कल्पनायानिष्प्रमाणकत्वा त्सर्वज्ञत्वकल्पनायां कः
प्रद्वेषोभवताम् न खलु कश्चित् प्रद्वेषः। किन्तु

सर्वज्ञत्वकल्पनाया न्नकिञ्चित्प्रमाणं पश्यामः प्रत्यक्षस्य वर्तमानमात्रग्राहितया ऽतीते तदसम्भवात् ॥ संभवे तु विप्रतिपत्तिरेव न स्यात् लिङ्गादेरभावा न्नानुमानादिप्रसङ्गः प्रत्युत विपरीतमेवानुमानं सम्भवति। अतीतः कालः सर्वज्ञत्वाभाववान् कालत्वादेतत्कालवत् बुद्धो न सर्वज्ञः पुरुषत्वात् अस्मदादिवत् अन्योन्याश्रयाच्चागमो पि न तत्र प्रामाण्यं समश्नुते तस्य सर्वज्ञत्वे तदीयागमप्रामाण्यं तदीयागमप्रामाण्ये च तस्य सर्वज्ञत्वम् पुरुषान्तरप्रणीतागमवशेन तत्सिद्धि स्तु न्न तत्र मूलप्रमाणाभावेन तादृशागमानां सुतरामप्रमाणत्वात् नित्यागमस्य च भवद्भिरनङ्गीकारात् सर्वज्ञः सर्वविदित्याद्यागमस्तु अर्थवादः शरीरिपुरुषप्रतिपादने तदनित्यत्वप्रसङ्गात् नित्यागमाभ्युपगमे तु तेनैवधर्मप्रतिपादनसंभवान्न सर्वज्ञत्वकल्पना अर्थवती ॥ यत्तु कश्चिदाह माभूत् सर्वज्ञः धर्मज्ञस्तु भविष्यति तदुक्तं तैरेव कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते "दूरं पश्यतु

मावाऽसौ तत्वमिष्टं तु पश्यतीति” प्रमाणमप्य-
नुमानम् चैत्यवन्दनादिधर्मप्रतिपादकं बुद्धवाक्यं
प्रमाणम् तद्वाक्यत्वात् सर्वं क्षणिकमित्यादिवाक्य-
वत् दृष्टार्थे तदीयवाक्यप्रामाण्य दर्शनादतीन्द्रिया-
र्थेऽपि तत्कल्पनमुचितमतएव वेदप्रामाण्यरिरक्ष-
यिषया मन्त्रायुर्वेदप्रामाण्यवच्चमतत्प्रामाण्यमाप्त-
प्रामाण्यादित्यभिहितं नैयायिकैरिति तन्न। ऐन्द्रि-
यकार्थे तद्वाक्यप्रामाण्यस्वीकारेपि अतीन्द्रियार्थे
तत्कल्पनायां प्रमाणाभावात् सप्रतिसाधनत्वं च
हेतोः बुद्धवाक्यमप्रमाणम् अप्रमाणमूलकत्वाच्चै-
त्यवन्दनवत् बुद्धो न सर्वज्ञ इतिमद्वाक्यं प्रमाणं
मद्वाक्यत्वाद् वह्निरुष्ण इतिमदीयवाक्यवदिति
असर्वज्ञत्वं प्रमितं बुद्धवाक्ये साधयितुं शक्यं
सर्वज्ञत्वं तु न क्वापि केनचित् प्रमाणेन प्रमित-
मिति तन्न बुद्धवाक्ये साधयितुं शक्यं साध्या-
प्रसिद्धेः। नचाहं सर्वज्ञ इतिबुद्धोक्तौ प्रमाणम्
उद्धतवादित्वापत्तेः नचेदानीन्तनपुरुषस्य बुद्धः
सर्वज्ञइत्यविच्छिन्नस्मरणादर्शना त्तदुपपत्तये त-

दानीन्तनैः पुरुषै स्तत्प्रमितमिति कल्प्यत इति वाच्य मेतादृशस्मरणे प्रमाणाभावात् प्रत्युतविपरीतस्मरणदर्शनात् इह वटे यक्ष इतिवन्निर्मूलस्मरणस्यापि सम्भवा च्च अपि च बुद्धं सर्वज्ञं जानानोपि सर्वज्ञः स्यात् अन्यथा तदीयज्ञानतद्विषयापरिज्ञाने स तं तथा कथं जानीयादित्यनेकसर्वज्ञताकल्पनापत्तिः। असर्वज्ञस्यायं सर्वज्ञ इतिज्ञानासम्भवादिति न सर्वज्ञतायां प्रमाणं नतरां च तदीयागमस्य प्रमाण्यम् स्वयूथ्यद्वेषेण लाभपूजाख्यातिकामनया च शास्त्रप्रणयनं न वीतरागस्य वुद्धस्य शोभते निर्व्यापार श्च नशक्नोति शास्त्राणि प्रणेतुम् अस्यामी अज्ञानसंशयाश्छेतव्या अयं सिद्धान्तो ग्राहयितव्य इमे तदुपाया इति साध्यसाधनफलानां यावद्विकल्पप्रत्ययो नभवे त्तावत्तदनुकूलवाक्यप्रयोगो न संभवति नच निर्विकल्पप्रत्यक्षेण निखिलं जगदवलोकयतो बुद्धस्यै तादृशविकल्पसंभवः बुद्धदेशनाया स्तच्छिष्यप्रणीतत्वे सुतराम प्रामाण्यम्

तेषामसर्वज्ञत्वात् न चत स्यसांनिध्याद्कुड्यादि-भ्योपि देशनाः निस्सरन्ति शिष्येभ्य स्तनिस्सरणे कानुपपत्तिरिति वाच्यम् श्रद्धाजडं प्रत्येवेतादृश-वाक्योपयोगसम्भवात् किञ्च कुड्यादिभ्य स्तन्निः-सरणे सुतरामनाश्वासः एतेन अनावृतज्योतिः पुरुषः स्मर्य्यते इति विनैवेन्द्रियं स्वत एव सव जानाति शरीरेन्द्रियाद्यावृत स्तु इन्द्रियादिद्वारा किंचिदेवजानातिइतिविदेहस्य स्वाभाविकं सर्वबि-षयकज्ञानमितिमतं निरस्तं प्रमाणाभावात् मुक्ता-गमस्यैव प्रमाणत्वे अन्योन्याश्रयः मुक्तस्यापि-सर्वज्ञत्वे तदीयागमः प्रमाणं तत्प्रामण्त्वे च मु-क्तस्य सर्वज्ञत्वमिति विदेहस्य शब्दोच्चारणोपयि-केन्द्रियाद्यभावादागमप्रणायनासम्भवः शरीरिण स्त्वसर्वज्ञत्वा न्नतत्प्रणीतागमेविश्वासः। इदानीं मुक्तः सर्वज्ञो यदि कश्चित् दृश्येत तदा एत दनुसारेणपूर्बतनोपि मन्तव्यः स्यात् नचेदानीं तादृ शः क्वचिदनुभूयते इति किमनुसारेण तथाकल्प नायै श्रद्धा स्यात् यदपिच बेदविदेकदेशिमतं

एवमानुपूर्वीको वेदोनित्य एव नास्त्यस्य कश्चि ज्जनयिता किन्तु प्रजापतिरेव पूर्वमार्षेण प्रत्य- क्षेणामुं ज्ञातवान् तदुपदेशाच्चान्येऽपि महर्षयो धिजग्मुरेनमिति तदपि न शब्दोच्चारणमन्तरा तदानुपूर्वीज्ञानस्येदानीमिव पुराप्यसम्भवात् अन्यथा इदानीं धर्मादेर प्रत्यक्षत्वेपि प्राक्काले तत्प्रत्यक्षत्वमपि कल्पनीयं स्यात् एवमिदानीं कस्यचित्सर्वज्ञत्वाभावेऽपि प्राक् काले तत्कल्पना- प्रशक्तिः स्यादिति दृष्टविरोधा त्सर्वज्ञादिनिरासव दयमपिपक्षो निराकर्तव्य एव पुरुषदोषोपरागाद प्रामाण्यापत्तिर न्यथा स्यात् । तद्वचने विश्वासा भावा च्च इदानीमिव पुरापि पुरुषाणां मिथ्यावा- दित्वसम्भवाच्च किंचैवमस्यागमप्रतिभासः स्वप्न ज्ञानवन्निर्हेतुकता मिथ्या स्यात् किंचेदानींतनपु- रुषापेक्षया प्रजापतेरुच्चारणमन्तरा शब्दज्ञानं जातमित्यतिशयः कल्पनीयः स्यात् तदनु आग- मस्य नित्यता मुधैव कल्पिता यदि तु प्रजापतेः स्मरणं कल्प्यते तदा नुभवं विना स्मरणानुत्प-

त्येदानीं तदभावादनिर्मित्तं स्मरणं कल्पेत प्रलय-
पूर्वकालानुभवस्य चिरातीतत्वेन तेनाविकलग्रन्थ-
राशि रविस्मरणासम्भव श्च प्रजापतेरिव शाक्या-
दीनामपि ग्रहणासम्भवेन तन्निरासानौचित्यात्
धर्मस्यातीन्द्रियत्वात् शब्दस्य चैन्द्रियकत्वात् न
तुल्यतेतिचेत् न अनुच्चारितशब्दस्या प्यतीन्द्रिय-
त्वेन शाक्यादिसाम्यात् पुरुषसर्वज्ञत्वकल्पनायां
अर्थप्रत्यायने पुरुषः स्वतन्त्रः स्यात् अस्मिन् तु
पक्षे न कस्यापि स्वातन्त्र्यम् शब्दस्यार्थप्रत्यायने
पुरुषापेक्षा पुरुषस्यापि शब्दस्य रूपपरतन्त्रतेत्यु-
भयोरपि पारतन्त्र्यम् स्यात् नचपूर्वपूर्वपुरुषा-
नुसारेणोत्तरोत्तरपुरुषाणां वेदाधिगम इति पार-
तन्त्र्यम् तवापीतिवाच्यम् एकपुरुषाधीनत्वे तेन
तत्वतोदृष्टम् । अन्यथावेतिसंशयसंभवेन स्वतः
प्रामाण्यहानिः स्यात् अनेकपुरुषाधीनत्वे त्वे तादृ-
शसंशयाभावान्नदोषः किंच दीर्घकालान्तरितानेक-
नेकदुरूहपदार्थस्मरणानुत्पत्त्या स्वयं कृत्वा विश्वा-
सार्थमेवं बदति स्मृतोयम् नमयाकृत इति शङ्कया

तत्र प्रेक्षावतामपि विश्वासापत्तेः। अनेकपुरुष-स्मरणाभ्युपगमे तु एकेन विकृतस्यापि परैर्यथाव-दवधारणात् पारतन्त्र्यं निवर्तते एकस्य प्रति-भानं तु कृतकादविशिष्टम् एवंच वेदेनैकः स-म्प्रदायप्रवर्तकः अपि वहव एव ननु जैमनीया-नामपि अपौरुषेयत्वकल्पना निष्प्रमाणा प्रमाण-विरुद्धा च नहि कस्यचिद् वाक्यस्या पौरुषेयत्वं लोके दृश्यते तथाचोक्तम् भो भगवन्तः सभ्याः क्वेदं दृष्टम् क्व वाश्रुतम् लोके यद्वाक्येषु पदनां रचना नैसर्गिकी भवति। यदि स्वाभाविकी वेदे पदनां रचना भवेत् पटेहि हन्त तन्तूनां कथंनैस-र्गिकी न सेति चेन्न। यतो यथेदानींतनाः पुरुषा न वेदस्य कर्त्तारः किन्तु अध्येतारस्तथा प्राक्कालेपि न केचन कर्तारइति क्व दृष्टविरुद्धकल्पना स्माक-मिति चोदनैव धर्मे प्रमाणं नान्यदिति भावः। ननु बुद्धादेरतीन्द्रियार्थज्ञानाभावेऽपि वचनान्तरेण विज्ञाय चैत्यबन्दनादिधर्मदेशना स्यादित्याशङ्क्य निराकरोति भाष्ये।

* भा०—अपरस्मात्पौरुषेय वचनात्तदवगतमितिं चेत् तदपि ते नैव तुल्यम् नैवं जातीयकेषु अर्थेषु पुरुषवचनं प्रामाण्य मुपैति जात्यन्धा नामिव वचनं रूपविषयेषु । नच विदुषा मुपदेशो नावक ल्प्यते उपदिष्टवन्तश्च मन्वादय स्तस्मात्पुरुषात् सन्तो विदित वन्तश्च यथा चक्षुषा रूप मुपलभ्यत इति दर्शनादेवावगतम् ।

अपरस्मादितियथास्ववचनेनातीन्द्रियार्थोपदेशो न सम्भवति तदर्थापरिज्ञानादेवं वचनान्तरमपि पौरुषेयम् नातीन्द्रियार्थे प्रमाणमिति तेनाप्युपदेशो न प्रामाणिकः यथाजन्मान्धस्योपायाभावात् रूपज्ञानं न सम्भवतीति तदुपदेशस्तदशक्य एवं पौरुषेयवाक्येन धर्मोपदेशो न शक्यसम्पादनः तदर्थज्ञानाभावात् नच तेषामतीन्द्रियार्थज्ञाने किंचित्प्रमाणमस्तीति भावः । ननु तदुपदेशान्यथानुपपत्तिरेव तत्र प्रमाणमित्यभिप्रायेण नच बिदुषामिति । अयम्भावः यदि बिदुषां मन्वादीनां धर्मविषयकमध्यत्वं न स्यात् तर्हि तेषां धर्मविषयकोपदेशो न स्यात् अस्ति च तेषांधर्मविषयकोपदेश इति तदुपदेशान्य-

थानुपपत्तिरूपार्थापत्तिरेव धर्मप्रत्यक्षे प्रमाणं तद नङ्गीकर्तृमते अनुमानम्प्रमाणम् । तथाहि मनु र्धर्मदर्शी तदुपदेष्टृत्वात् यो यदुपदेशी सतद्दर्शी यथा वैद्यः तत्तद्रोगप्रशमकौषधस्य उपदेष्टा चायं धर्मस्य तस्मात्तदर्शी नहि रूपदर्शनासमर्थस्य रूपो पदेशः सम्भवति रूपोपदेदर्शना त्तु तस्य रूपदर्श नसामर्थ्यं ततोर्थादापद्यते अनुमीयते वा तस्माद्ध- र्मोपदेशात्तेषां तद्दर्शित्वमर्थापत्यानुमानेव वा नि- श्चीयते नच विप्रलम्भकादिवाक्यवत्प्रे चावतां तदनुपादेयमेवा प्रमाणत्वादिति वाच्यम् महा- जनपरिग्रहीतत्वे न प्रामाण्याङ्गीकारादित्याह तस्मा दिति परिहारभाष्यम् ।

* भा० उच्यते उपदेशा हि व्यामोहादपि भवन्ति असति व्यामो हे वेदादपि भवन्ति ।

उपदेशइति अयमभिप्रायः उपदेशो न विद्वत्तया व्याप्तः परप्रतारणाय अजानतो प्युपदेशदर्शनात् अत एवात्मख्यातिपूजा- लाभाय शाक्यग्रन्थे धर्मदेशना व्याजेनानेकविध

उपदेशः तथाच नार्थापत्तिः अन्यथाप्युपपत्तेः तद्दर्शनं विनापि बालोन्मत्तादिवदुपदेशः सम्भवति अनुमानपक्षे विप्रलम्भकादिवाक्ये व्यभिचार इति भावः नन्वेवं तर्हि स्मार्तधर्मबोधकमन्वादिवाक्यानामपि प्रामाण्यं न स्यादित्याशंक्याह असति व्यामोह इति अयमभिप्रायः स्मार्तधर्मोपदेशस्य मूलभूतं तदीयं प्रत्यक्षं न संभवति धर्मस्यातीन्द्रियत्वात् किन्तु वैदिकवचनंतन्मूलं वेदादेवाधिगम्य लोकोपकाराय महर्षयो मन्वादयो धर्ममुपदिष्टवन्त इति वेदमूलकत्वात्तेषामुपदेशः प्रामाणिकः। येषां स्मार्तधर्माणां मूलभूताः श्रुतय इदनीं नोपलभ्यन्ते तत्र मतभेदोवहुविदां ह्रासदर्शनतो ह्रासः सम्प्रदायस्य मीयतामित्युक्तदिशा बुद्धिमान्द्या दालस्यादिदोषाच्चाध्येतॄणामभावात् ताःश्रुतय उच्छिन्ना इदानीं नोपलभ्यन्ते स्मार्तधर्मस्य प्रवर्त्तका मनुप्रभृतयो महर्षयः अनेकविधासु शाखासु अवश्यानुष्ठेयान् धर्मानव लोक्य साध्यसाधनेतिकर्तव्यतानिरूपण पुरः सर

मनायासेनैकत्र वोधाय स्मृतावुपनिववन्धुः ततः अक्के चेन्मधु बिन्देतेतिन्याये नाल्पपरिश्रम-साध्यस्मार्तग्रन्थाध्ययने विद्वान्सः प्राबर्तिषत इति तन्मूलभूताः श्रुतयो ऽध्येतुरपराधादुच्छिन्ना इति केचित्। अन्येतु शाखोच्छेदे दृढतरप्रमाणा-भावात् स्मार्तधर्ममूलभूताः श्रुतयो नित्यानुमेया एव अत एव स्तुतिनिन्दार्थवादै मूलभूतश्रुति-कल्पनं साधु संगच्छते इत्याहुः। प्रकाशादौ पराक्र-म्येदमभिहितमितितत्रैवद्रष्टव्यम् विस्तरभीतेरे-तदर्थनिरूपणाय न प्रायतिषि वौद्धादिवाक्यानां प्रत्यक्ष श्रुतिविरुद्धत्वा न्नतैर्मूलभूतवेदानुमा-नमिति। नतेषामतीन्द्रियार्थे प्रामाण्यम् एवंच यथापीतः शङ्ख इति प्रत्यक्षाभावात् पीतवङ्खप्रत्य-योनिश्चयात्मको ज्ञातः प्रतिष्ठित श्च पश्चात् दोषावधारणेन वाध्यते एवं वौद्धवाक्यादर्थ-निश्चयोजातः प्रतिष्टितश्च पश्चादतीन्द्रियार्थ-दर्शनोपायाभावादपौरुषेयवाक्यमूलकत्वाभावाच्च वाध्यते इति तद्वाक्यानामप्रमाण्यमेव यद्वा

प्रमाणान्तरमूलकत्वावधारणं विना बुद्धादि वाक्याज्जातोपि निश्चयो द्रागेव विलीनोऽनुत्पन्नस-समो भवति यथापरप्रतारणाय विप्रलम्भकादि य-द्वावाक्यमुच्चारयति तदैव ज्ञातदोषस्य पुरुषस्य त-दीयवाक्यार्थे प्रमाणाभावनिर्णया त्ततो जातोपि वोधः प्रतिष्ठितो न भवति तस्मिन्नेव काले पश्य-ति श्रोतुरविशेषकरत्वा न्नष्टसमो भवति इति तदी यवाक्ये प्रामाण्याग्रहः तथा बुद्धादिवाक्यश्रवण-वेलायामेव तत्र मूलापरिज्ञाना त्तदर्थवोधस्याप्रति-ष्ठितत्वा त्तद्वाक्यप्रमाण्यसम्भावनापि नभवति आ-त्मख्यातिपूजालाभार्थंलोकधन्धनार्थमेवायम् वद-ति नैवमयमर्थस्तात्विक इत्याह ।*

* भा० अपि च पौरुषेयाद्वचनात् एवमयं पुरूषो वेद इति भवति प्रत्ययाः न एव मपमर्थ इति विप्लवते हि खल्वपि कञ्चित् पुरुषकृताद् वचनात् प्रत्ययः नतु वेद वचनस्य मिथ्यात्वे किञ्चन प्रमाणमस्ति ।

अपिचपोरुषेयं त्वाद्वचनादिति भाष्यम् पौरुषे-यवाक्या त्तादृशार्थवोधमेव वक्तु र्निश्चिनोति श्रोता नेदृगेवायमर्थ इति तथा च पौरुषेयवाचां मूलान्त-

रावधानादेव प्रामाण्यमन्यथातीन्द्रियार्थे तद्विषय-
कज्ञानाभावे तद्विषयकशब्दरचनायाः कर्तुमशक्य-
त्वात् अपौरुषेयवाचा न्तु पुरुषनिमितत्वाभावेन
स्वार्थेप्रमूलापेक्षाविरहा त्स्वतः प्रामाण्यमिति भावः
प्रत्यपपदेन साधारणं ज्ञानं विवक्ष्यते ननिश्चय स्त-
स्यार्थेप्रतिष्ठितत्वात् पौरुषेयवचनादर्थेज्ञानमात्रंजाय-
ते न यथार्थज्ञानमिति नार्थ सिद्धिरनेनेतिभावः ननु
नवाक्येन तन्मूलभूतार्थज्ञानमनुमातुं शक्यते अश
क्त्यादिना न्याभिधित्सया न्यप्रयोगदर्शनेन व्यभि-
चारात् किंच पूर्वमर्थज्ञानं ततोविवक्षा ततोवाक्य-
प्रयोग इत्येव क्रमदर्शना द्वा क्यार्थज्ञानापेक्षया
अन्तरङ्गविवक्षाया एवानुमानं न संभवति व्यभि-
चारा त्प्रागेवतु तदर्थज्ञानानुमानम् घटाभिधित्स-
या भ्रमादिना पटप्रयोगेण व्यभिचारदिति चे न्न
आप्तवाक्याभिप्रायपरत्वाद्भाष्यस्य तथाचाप्तद्वाक्ये
तन्मूलभूतार्थज्ञाने न व्यभिचारः यथार्थवक्तुरे-
वाप्तत्वात् तत्तद्वाक्यापेक्षया प्रयोक्तुराप्तत्वमेव
अशक्त्यादिनोच्चारितवाक्यापेक्षया न तस्याप्तत्व

मेकान्तत आप्तत्व न्तु भीमाग्रजेप्यशक्यमिति न पोणिपिहितं प्रेक्षावताम् अनाप्तवाक्याभिप्रायेणाह भाष्ये विप्लवते होति विप्लुति भ्रान्तिः संशयो वा पुरुषकृता त्पौरुषेया द्वचना द्वाक्यात् प्रत्ययः तन्मूलभूतवाक्यार्थज्ञानं तद्विक्षावेति तदर्थः तथा चनबाक्यमात्रे मूलभूतांज्ञानावधारणं अपितु आप्तवाक्ये तत्र च न व्यभिचारः एवंच वाक्य-सामान्ये न तन्मूलभूतार्थज्ञानावधारणं सामार्थ्य-माप्तवाक्ये अनाप्तवाक्ये तदपवाद इत्युभयाङ्गी-करणं पौरुषेयवाचां प्रामाण्यमप्रामाण्यंचो भयं समर्थितं भवति आप्तवाक्ये मूलावधारणा-त्प्रमाण्यमनाप्तवाक्ये तदनवधारणादप्रामाण्यम् वाक्येन मूलभूतार्थज्ञानानुमानं न साक्षादपितु प्रणालिकया तथाहि वाक्यार्थप्रत्ययः पदपदार्थर-चनाधीनः रचना च विवक्षाधीना विवक्षा च ज्ञाना-धीनान्वयव्यतिरेकाभ्यां रचनाया विवक्षाधीनत्वा-वगमात् विवक्षान्तरेण रचनान्तरदर्शनात् प्रणा-लिकयामूलज्ञानजन्यैव रचनेति युक्तं कार्यभूतर-

चनातः मूलज्ञानानुमानं एवं च वाक्यार्थावधारणा-
मनुमानमेव नशाब्दं वाक्येनार्थनिश्चयो ऽपि न
साक्षात् किन्तु वक्तृज्ञानद्वारैवेति अपि च
रोगशान्तये औषधं भुञ्जानं प्रति कश्चित्
पृच्छति किमर्थमिदं भुङ्क्ते स वदति एतद्रोग-
शान्तये पुनः स पृच्छति किमत्र ते प्रमाणं
सब्रवीति नाहं जानामि किन्तु स वैद्यो जानाति
य एवं कर्तुं मा मुपादिदिति लोकव्यवहारदर्शना
द्वक्तृज्ञानद्वारैव शब्देनार्थनिर्णयो न साक्षादिति
गम्यते नन्वेवं वक्तृज्ञानद्वारा अर्थनिर्णयाङ्गीकारे
शब्दस्यार्थाप्रत्यायक तयावाचकत्वमेव न स्यात्
नचा र्थाप्रत्यायकस्य वाचकत्वं लोकवेदयोः स-
म्भवतीति वेदप्रामाण्यमेत्र न स्यादेवं शब्दार्था-
प्रतीतौ मूलज्ञानानुमानमपि कथमिति चे न्न
भावानवबोधात् न वयं शब्दस्य प्रत्यायकत्वं
निराकुर्मः शब्दाः श्रवणमात्रेण व्युत्पन्नस्य
समीचीनेऽसमीचीन वार्थेधियं जनयन्त्ये व किन्तु
शब्दादर्थज्ञाने जातेऽपि पुरुषदोषानुप्रवेशशङ्कया

यावन्मूलज्ञानं न जायते तावत्तत्र संशया त्तस्या-
प्रतिष्ठितत्वम् मूलज्ञानावधारणानन्तरं तस्य समी-
चीनत्वनिर्णये तत्सन्देहनिराकरणा त्ततोजाय-
मानो वाधः प्रतिष्ठितो भवतीति युक्तं निश्चयस्य
वक्तृज्ञानाश्रयत्वम् यद्यपि अर्थज्ञानं विना वक्तृ
विशिष्टार्थज्ञानं न संभवति विशिष्टबुद्धौविशेषण-
ज्ञानस्य हेतुत्वादिति। विशिष्टार्थज्ञाना त्पूर्वमेवा-
र्थप्रत्ययः तथापि अर्थ प्रत्ययस्य सत्यमिथ्यासा-
धारण्या त्प्रामाण्यनिर्णायकत्वानभ्युपगमेन वक्तृ-
विशिष्टार्थज्ञानस्यैव प्रामाण्यनिर्णायकत्वेन पूर्व-
भावित्वमर्थनिर्णायस्य च तदुत्तरभावित्वमिति
पौरुषेयवाचां पुरुषबुद्धिनिमित्तं प्रामाण्यमित्य-
तीन्द्रियार्थे बुद्धादिवाक्यस्य न प्रामाण्यं तदर्थ
ज्ञानाभावादिति भावः नचैवं वेदेऽप्रामाण्याशंका
अत्र वक्तुरभावेन तद्बोनिमित्तकप्रामाण्यस्य
तत्र शङ्कितुमप्यशक्यत्वात् किन्तु पदार्थद्वारा एव
प्रामाण्यमित्याह न तु वेदवचनस्य मिथ्यात्वे
इति पुरुषबुद्ध्यपराधेन लौकिकवाचा मप्राण्यम्

अपौरुषेयवाचां पुरुषबुद्ध्यपराधासम्भवा न्ना प्रमाणत्वम्। शब्दस्य वक्तृज्ञानानुमापकतया तत्रैव तद्व्यापार स्वीकारेण तज्ज्ञाने एव शब्दानां प्रामाण्यं नार्थसद्भाव इति मते बुद्धादिवाक्यानामपि स्वविवक्षितार्थे प्रामाण्याद् प्रामाण्यस्य क्वचिदपिवाक्ये ऽसिद्ध्या तदापादनं वेदवाक्ये अप्रयुक्तं तत्र प्रामाण्यविरहात् लौकिकवाक्ये यदि अप्रामाण्यं न सम्भवति त्वन्मते तर्हि वेदवाक्ये कथं तदाशङ्का यदि च लौकिकवाक्यानां वक्तृज्ञाने प्रामाण्यमर्थसद्भावेत्वप्रामाण्यम् एवं वेदवाक्यस्यापि अर्थसद्भावे अप्रामाण्यं वक्तुरभावा त्तत्राप्यप्रामाण्यमेवेत्यभिप्रायः तदा वैदिकवाक्यानामर्थसद्भावे एवव्यापारस्वीकारेण विषये वक्तृज्ञानेऽप्रामाण्यसाधने सिद्धसाधनं लौकिकवैदिकवाक्योः पौरुषेयत्वापौरुषेयत्वाभ्यां स्वभावभेदात् वेदस्य वक्तुरभावा त्तज्ज्ञाने प्रामाण्यस्य वक्तुमशक्यतया सद्भावे एव प्रामाण्या ङ्गीकारा त्तत्राप्रामाण्येन किंचित्प्रमाणमिति वा

तात्पर्येणान वेदस्य मिथ्यात्वेतिभाष्यम् ननु प्रमाणा प्रमाणोभयविधलौकिकवाक्ये वाक्यत्वं दृश्यते तस्यैव वेदेऽपिदर्शनाद्व वेदवाक्यमपि लौकिक-वाक्यवदप्रमाणं स्यादित्याशङ्कते सामान्यतो दृ-ष्टमिति भाष्यम् ※

* ननु सामान्यतो दृष्टं पोरुषेयं वचनं वितथमुप-लभ्य वचनसास्यादिदमपि वितथमवगम्यते न अन्य-त्वात् नहि अन्यस्य वितथभावे अन्यस्य वैतथ्यं भवितुमर्हति अन्वत्वादेव नहि देवदत्तस्य श्यामत्वे यज्ञदत्तस्यापिश्यामत्वं भवितुमर्हति

नचाप्रामाण्ये वक्तृदूषणं प्रयोजकमुक्तं नतुवाक्यत्वमितिवाक्यत्वहेतुक स्तदाक्षेपो न युक्त इति वाच्यम् अप्रामाण्यं प्रतिदूषणस्य प्रयोजकत्वाभिधानेपिवाक्यत्वस्य अत्राप्रयो-जकत्वानभिधाना त्तत्रापि प्रयोजकत्वाभिमाने न दूषणोपन्यासात् अस्तु वा लौकिकवाक्ये कि-ञ्चिदप्रामाण्यप्रयोजकं वाक्यत्वं तत्र वर्तते एवं चा त्रापि वाक्यत्वदर्शना न्मिथ्यात्वं स्यादित्यभि-प्रायेण तथाभिधानम् तथाचेदृशः प्रयोगः वेदवा-

क्यमप्रमाणं वाक्यत्वा ल्लोकवाक्यवदिति अत्रदूष-
णमाह भाष्ये न अन्यत्वा ल्लौकिकवाक्यापेक्षया-
वैदिकवाक्यस्यान्यत्वात् व्यभिचारं ग्राहयति। न-
हीति नचा न्यत्वादिति समाधानमयुक्तम् पक्षदृ-
ष्टान्तयो र्भेदस्यानुमानानुगुणत्वात् नहि पर्वतो
वह्निमान्धूमान्महानसवदित्युक्तेमहानसस्यपर्वता-
न्यत्वाभिधानेनानुमितिप्रतिरोधो जायते इतिचे
त्सत्यम् भाष्यस्या यमभिप्रायः पौरुषेयवाचामर्थ-
ज्ञाने एव प्रामाण्य न्नार्थतथात्वे एवमयं पुरुषो
वेदेतिभाष्योक्तेरेवंच वेदवाक्यानामप्रामाण्यसा-
धने लौकिवाक्यं न दृष्टान्तः साध्यविकलत्वात्
लौकिकवाक्यानामपि प्रामाण्याङ्गीकारात् यदि
वक्तृज्ञानद्वारा अर्थांशेपि लौकिकवाक्यानां
प्रामाण्यमभ्युपेक्ष्यते तदासमीचीनार्थकवाक्ये
व्यभिचारः नहि वाक्यमात्रमप्रामाणमिति। केना-
प्यङ्गीकर्तुं शक्यते अथातीन्द्रियार्थकत्वे सति
वाक्यत्वादित्युच्यते तर्हि यत्रैकस्मिन् विषये
वाक्यद्वयं मिथो विरुद्धं श्रूयते यथेन्द्रोस्ति इत्येके-

नोक्तं परेण इन्द्रो नास्ती त्युक्तं तत्रैक मवश्यं-
सत्यार्थम् परस्परविरोधे प्रकारान्तराभावा त्तथा-
चात्रै व व्यभिचारः वस्तुतस्तु एतयोर न्यतरस्या-
स्तु सत्यत्वं तावतापि प्रामाण्यं न सम्भवति
उभयोरपि अतीन्द्रियार्थकत्वेन मूलप्रमाणासत्वात्
तस्माद्वक्ष्यमाणान्येव दूषणानि भाष्यमित्थंयो-
जनीयम् परेण हि सामान्यतो दृष्टं वक्तव्यत्वेन
प्रतिज्ञातं ततोऽन्यदिदं तदाभासमनैकान्तिकहे-
तुत्वात्। अथवा एवं भाष्याशयः सर्वत्रै व सामा-
न्यानुमाने विपक्षः हेतुरहितो भवति यथा पर्वतो
वह्निमान् धूमादित्यादौ विपक्षे जलह्रदे धूमो न
वर्ततेप्रकृते प्रमाणवाक्यं विपक्ष स्तत्रापि वाक्यत्वं
वर्त्तते इत्यनैकान्त्या न्नानुमानम् अन्यत्वादित्यस्य
अनाप्तवाक्यापेक्षयाऽऽप्तवाक्यस्यान्यत्त्वतोभिन्नत्वा-
दित्यर्थः। यद्वा लौकिकवाक्यस्य मिथ्यात्वप्रयोजकं
दुष्टत्वं सत्यत्वप्रयोजकं चादुष्टत्वं तयोरन्यत्वा
न्नदुष्टवाक्यस्य मिथ्या त्वदर्शनाददुष्टवाक्यस्या
पि मिथ्यात्वमापादनीयं तयो र्भिन्नत्वादित्यर्थः

अत्रैव दृष्टान्तमाह नहि देवदत्तस्येति स्पष्टार्थं यद्वाप्रमाणस्यापि स्वविषये एव प्रामाण्यन्नान्यत्रेति लौकिकं वचनं स्वविषये वक्तृज्ञाने प्रमाणमेवेति साध्यविकलो दृष्टान्त इत्याह नहि अन्यस्येति अयमर्थः अर्थांशे वाक्यस्य मिथ्यात्वे पिज्ञानांशे न तस्यमिथ्यात्वमित्याह नहि अन्यस्येति यद्वा यथालौकिकवैदिकवाक्ययो र्वाक्यत्वसाम्येऽपि लौकिकत्वं वैदिकत्वं चेतिमिथोविरुद्धं धर्मद्वयं वाक्यत्वेन सह विकल्पेन व्यवतिष्ठते क्वचिल्लौ-किकत्वसमानाधिकरणं वाक्यत्वं तथाप्रमाणत्वा-प्रमाणत्वयोरेकत्र विकल्पेनव्यवस्थित्या किंचिद्वै-दिकंवचनं प्रमाणं किंचिच्चाप्रमाणंभविष्यति इत्या शङ्क्याहनहीति नहि वाक्यत्वेनसहवर्तमानं वैदि-कत्वं अप्रमाणत्वेनाऽपि सह वर्त्तितुमर्हति अन्यत्वा-देवेतिसुगमम् यद्वा अयं भाष्यार्थः लौकिकवाक्यस्य सामान्यतोऽप्रमाणस्यापि दर्शनेन वैदिकवाक्य-स्यापि न तद्वदप्रमाणत्वं किंतु प्रमाणत्वमेव दोषविरहाद् वाधविरहाच्च समीचीनप्रत्यक्षवत्

यत्खलु ज्ञानसाधनं सदोषं वाधसहितं वा तदे-
वाप्रमाणं यथा भ्रान्तपुरुषप्रत्यक्षवाक्यादि अतो-
न्यत्वाद् निर्दोषत्वाद् वाधरहितत्वा च्च वेदवाक्यस्य
नाप्रामाण्यं नहि अन्यस्य दोषवाधसहितस्य
भ्रान्तादिवाक्यस्या प्रामाण्यमिति अन्यस्य दो-
षादिरहितस्यापौरुषेयस्य वेदवाक्यस्य वैतथ्यं
भवति अन्यत्वादेव अपौरुषेयत्वं दोषादिरहित-
त्वंच साधयिष्यते। ज्येष्ठत्वादुपजीव्यत्वा त्प्रत्य-
क्षमनुमानापेक्षयाप्रवलमिति वलवति प्रत्यक्षे सति
तद्विरुद्धमनुमानं कथमुदयमासादयेदित्यभिप्रा-
येणाह।*

* भा० पुरुष वचन साधर्म्याद् वेद वचनं वितथमि-
त्यनुमानं व्यपदेशादेवगम्यते प्रत्यक्षस्तु वेदवचनेन
नचानुमानं प्रत्यक्ष विरोधि प्रमाणं भवति।

अपिच पुरुषवचनसाधर्म्यादिनि अनाप्तवा-
क्यसाधर्म्येण वेदस्य वैतथ्यानुमानं न संभ-
वति वलवता वेदवाक्यजन्यप्रत्यक्षात्मकज्ञानेन
विरोधात् इत्यर्थः। नन्विदमसंगतम् नहि अत्र

प्रत्यक्षानुमानयो र्विरोधसम्भावनावर्त्तते तथा वेदवाक्येन प्रत्यक्षज्ञानाजननात् वाक्यार्थेन सम-मिन्द्रियसन्निकर्षाभावात् नचवाक्यार्थेन सम-मिन्द्रियासन्निकर्षेपि शब्देन सहश्रोत्रेन्द्रियस-न्निकर्षात् शाब्दप्रत्यक्षस्यैबात्र प्रत्यक्षपदेन ग्रहण-मिति बाच्यम् भिन्नबिषयत्वेनाबिरोधितया तस्या नुमानवाध्यत्वासम्भवात् अत्यन्तासतोप्यर्थस्य शब्देन भानाङ्गीकारात् अथ शाब्दवोधात्मकज्ञा-नस्य प्रत्यक्षत्वमुच्यते घटः प्रत्यक्ष इतिवत्त-दप्ययुक्तम् स्वामते ज्ञानप्रत्यक्षत्वानभ्युपगमात् अनुमानगम्यत्वा त्तस्येति चे न्न प्रत्यक्षशब्दस्य साधर्म्याल्लक्षणया शाब्दबोधात्मकज्ञानपरत्वात् प्र-त्यक्षसाधर्म्यं च शाब्दबोधे पूर्वोत्पन्नत्वात् दृढत्वात् स्वतः प्रामाण्यात् । परतः प्रामाण्याभावाच्च बैदि-कवाक्यश्रवणसमनन्तरजापयमानशाब्दबोधविष-याविश्वासनिबन्धनोत्तरजातवेदवाक्यवैतथ्यानुमा-नुपेक्षया प्रकृतवाक्यार्थबोधस्य पूर्वोत्पन्नत्वात् वैतथ्यानुमानाभासापेक्षया दृढत्वात् स्वतः प्रामा-

णयादिना च गुणवृत्या यत्प्रत्यक्षशब्दः शाब्दज्ञाने एवप्रयुक्त इति भावः। अथवा प्रत्यक्षपदं मुख्यार्थकमेव अप्रामाण्यकारणी भूतौ संशयविपर्ययौ निरस्तौ इति। ज्ञानाभावनिमित्तकवैतथ्यानुमानमवशिष्यते ततश्च ज्ञानाभावपरमेव भवदीयवैतथ्यानुमानम् तदसंगतं भवतां मते ज्ञानप्रत्यक्षत्वाभ्युपगमात् केवलं मीमांसका एव ज्ञानमनुमेयमितिब्रुवते नान्ये इति भवतां प्रत्यक्षविरुद्धाप्रतिज्ञा वेदवाक्याद्ध भवतामपि ज्ञानोत्पत्तिरभिमता अन्यथा अबोधकत्वादेवाप्रामाण्यशङ्कास्यात् वैतथ्यानुमानं च परिशेषाद्ज्ञानाभावविषयकमिति तत एव ज्ञानं तदभावश्चे त्युभयाभ्युपगमेस्पष्ट एव भवतां प्रतिज्ञाविरोधः विशेषविरुद्धो वाहेतुरनेनप्रदर्श्यते भवतां मते यत्रवाक्ये मिथ्यात्वं तत्र बाधज्ञानमितिबाधज्ञानसहितमेव वाक्यत्वं मिथ्यात्वव्याप्यमिति तादृशमेव वाक्यत्वमन्यत्रापिमिथ्यात्वं गमयेत् नान्यादृशं प्रकृते बाधदर्शनस्य वक्तुमशक्यतया नतदधीमिथ्यात्वासिद्धिः

अस्मिन् पक्षे प्रत्ययशब्दः शाब्दबोधात्मकज्ञानपरतया गौणो बोध्यः गौणहेतवश्चापूर्वं प्रदर्शिता एव ।*

* भा० तस्माच्चोदनालक्षणो ऽर्थः श्रेयस्करः एवं तर्हि श्रेयस्करो जिज्ञासितव्यः किं धर्मजिज्ञासया उच्यते य एव श्रेयष्करः स एष धर्मशब्देनोच्यते । कथमवगम्यताम् यो हि यागमनुतिष्ठति तं धार्मिक इति समाचक्षते य श्च यस्य कर्ता स तेन ।

व्यपदिश्यते यथा पाचकः लावक इति तेन यः निः श्रेयसेन पुरुषं संयुनक्ति स धर्मसब्देनोच्यते । न केवलं लोके वेदेऽपि यज्ञेन यज्ञ मयजन्तदेवाः तानिधर्माणि प्रथमा न्यासन्नितियजति शब्दवाच्यमेव धर्मं समामनन्ति ।

तस्माच्चोदनालक्षणः श्रेयस्कर इति भाष्यम्

ननु उपक्रमोपसंहारयोरैक्याय येन शब्देनोपक्रम स्तेनैव शब्देनोपसंहारस्यौचित्येन को धर्मः कथं लक्षण इति भाष्ये धर्मशब्देनोपक्रान्तस्य तेनैवशब्देनोपसंहारस्य युक्ततया श्रेयस्करशब्देनोपसंहारे कोभिप्रायो भाष्यकृत इति चे दयमभिप्रायः पदार्थधर्मः पक्षधर्म इत्यादिप्रयोगानुसारेण वृत्तिमत्तात्पर्येणापि धर्मशब्दप्रयोगादनेकार्थकतया कस्य

ग्रहणमित्यपेक्षायां यः श्रेयस्कर स एव धर्मशब्दे ना त्रग्राह्यो नान्य इति सूचनायै दृशोपसंहारः। कः श्रेयस्कर इत्यपेक्षायां यागादिरेव श्रेयस्कर इति लोकव्यवहारेण दर्शयति यो यागमनुतिष्ठतोति भाष्यम्। ननु कथमेवंविज्ञायते यागकर्तृत्वनिबन्धन एव याज्ञिके धार्मिकशब्दप्रयोगो न तज्जन्यापूर्वान्तः करणवृत्यादिनिबन्धन इति चेदित्थम् यदि लोकः परान्तःकरणवृत्यपूर्वादिःपश्ये त्तदा तन्निबन्धनधार्मिकपदप्रयोगः तत्र स्यादपि किन्तु न त जानाति नचा ज्ञातप्रवृत्तिनिमित्तकः शब्दः लोकेन प्रयुज्यते इति यागादिनिमित्तक एव धार्मिकपदप्रयोगो नहेत्वन्तरनिबन्धन इति श्रेयस्कर एव धर्मो नापरः यत्र कर्मणि यस्य नाधिकार स्तस्य नासौ श्रेयस्कर इत्यनधिकारिशूद्रानुष्ठितयागादे र्न धर्मत्वं चित्रया यजेत पशुकाम इत्यादिश्रुत्या चित्रादि यागानुष्ठायिनां पश्वादिफलप्रदर्शना त्पश्वादिफलकानां चित्रादीना मेवधर्मत्वमवगम्यते वेदे पि-

यागधर्मयोः सामानाधिकरण्यदर्शनाद्द यागस्यैव धर्मत्वमितिदर्शयितुमाहभाष्ये यग्येन यज्ञमित्यादि नच यागधर्मशब्दयो लिङ्गवचनभेदात् कथं सामानाधिकरण्यम् समानलिङ्गवचनकयोरेव सामानाधिकरण्यौ-चित्यादिति वाच्यम् छान्दसत्वात् छन्दसि लिङ्गवचनयो र्व्यत्ययस्य बहुलं छन्दसीतिदर्शनात् मतान्तराभिमतधर्मस्वरूपनिराकरणमेवमवधेयम् सांख्याः यागानुष्ठानजन्यमनोवृत्तिविशेषं धर्ममाहुः शाक्या स्तु चेतसो ज्ञानस्य ज्ञानान्तरजन्यां वासनां धर्ममूचुः। आर्हता स्तुकायारम्भकान् परमाणून् पुद्गलान् धर्ममभिदधुः। वैशेषिका स्तु आत्मनो विशेषगुणं धर्मं प्राहुः। एकदेशिनश्च अपूर्वं धर्ममूचुरिति। एतेषु सर्वेषु पक्षेषु लोके धर्मशब्दप्रयोगो नदृष्ट इति नैषां धर्मत्वम् लोकप्रयोगविरोधात् चोदनातः तेषां श्रेयस्साधनत्वानवगमाच्च ननु अन्तःकरणवृत्यादीनां श्रेयस्साधनत्वाप्रतीत्या मास्तु तेषां धर्मत्वं अपूर्वस्य तु तेनापूर्वं कृत्वा नान्य।

थेतिवक्ष्यमाणतया श्रेयः साधनत्वं प्रतीयते एवेति तस्य कथं न धर्मत्व मितिचेन्न अश्रुतत्वात् नहि यजेत स्वर्गकाम इति वाक्ये न यागस्वर्गयो रन्तराले साध्यसाधनभावेनापूर्वं न्नाम किंचित् प्रतीयते यागस्वर्गयोरेव तेन रूपेण प्रतीयमानत्वात् अन्यथा यागे श्रुतस्य स्वर्गसाधनत्वस्य स्वर्गे श्रुतस्य यागसाध्यत्वस्य हानिरश्रुते ऽपूर्वे यागसाध्यत्वस्य स्वर्गसाधनत्वस्य च कल्पना स्यात् साध्यसाधनभावस्वरूपानङ्गीकारे प्रकारान्तरेणापूर्वसिद्धिरेव न संम्भवति। प्रमाणाभावात् तर्हि अपूर्वानंगीकारे एभिरपूर्वंकृत्वेतिग्रन्थस्य कथं संगतिरितिचेदित्थम्। अपूर्वं हि यागादिनिष्ठा फलस्य सूक्ष्मावस्था शक्तिरंकुरस्थानीया नस्वतन्त्रं नामा पूर्वं किंचिदित्यर्थः। ननु भवतु यागादिनिष्ठाशक्तिरेवापूर्वं तावता पि कथं न तत्र धर्मशब्दप्रयोग इतिचेन्न शक्तिषु लोके- धर्मशब्दप्रयोगादर्शनात् सर्वेषु पदार्थेषु शक्तयः सन्त्येव यथा वह्न्यादिषु दाहादिशक्तयः तासु च

शक्तिसामर्थ्यादय एव शब्दाः प्रयुज्यन्ते न धर्म-शब्दा अन्यथा वह्न्यादिषु दाहानुकूलशक्तिदर्श-नात्त त्तात्पर्येणापि धर्मशब्दप्रयोगः स्यात् न च दहनधर्मा वह्निरिति प्रयुज्यत एव लोके तस्यार्था-न्तरपरत्वात् अन्यथा धार्मिको वह्निरित्यपिस्या-दिति श्रेयः साधनयागादिरेव धर्म इति। अत्र भाष्य न्निगदव्याख्यातमिति न तदर्थनिरूपणम-पेक्ष्यते चोदनालक्षणस्यैव धर्मलक्षणत्वसम्भवाद-र्थग्रहणं व्यर्थमित्याशङ्क्य ततप्रयोजनप्रदर्शनाया ह भाष्ये उभयमिहेति।*

* उभयमिह चोदनया लक्ष्यते अर्थोऽनर्थश्चेति कोर्थः यो निःश्रेयसाय ज्योतिष्ठो मादिः कोऽनर्थः यः प्रत्य-वायाय श्येनो वज्रः इषुरित्येवमादिः तत्र अनर्थः उक्तो माभूदिति अर्थग्रहणम् कथं पुनरसौ अनर्थः हिंसा हिंसा हिंसाच प्रतिषिद्धेति कथं पुनरनर्थः कर्त-व्यतयोपदिश्यते उच्यते नैव श्येनादयः कर्तव्या विज्ञा यन्ते यो हि हिंसितुमिच्छेत तस्यायमभ्युपायः इति हि तेषामुपदेशः श्येनेनाभिचरन् इति हि समामनन्ति न अभिचरित्यमिति।

अर्थः निःश्रेयसौपयिकःज्योतिष्टोमादिः अन-

र्थः प्रत्यवायफलकः श्येनादिः एतदुभयं चोदना-लक्षणं चोदनया तदुभयं गम्यते इत्यर्थः। तत्रानर्थः श्येनादि धर्मलक्षणं माभूदित्यर्थ-ग्रहणमिति ननु क्रियाप्रवर्त्तकवाक्यस्यैव चो-दनापदेन ग्रहणमिति पूर्वोक्त्या निषेधवाक्यवि-षयाणां हिंसादीनां चोदनालक्षणत्वाभावादेव तद्व्यावृत्तिः एवं निषेधविधीनां निवारणार्थक-त्वकल्पनेऽपि न हिंस्यान्न पिवेदित्यादीनां हिंसा-सुरापाननिवारणमेव प्रतीयते निवारणं च प्रवृत्ति प्रतिबन्धकौदासीन्यव्यतिरेकेण नान्यदौदासीन्यं च तत्र प्रवृत्त्यभावादेव सम्पद्यते इति नैषां क्रि-याविशेषप्रवर्त्तकत्वम् एवं निषेधविधिस्वीकारे-ऽपिहिंसाद्यानाद्यभाव एव विधेयः सोपि हिंसा-दिनिवृत्यैवसिद्धो न क्रियान्तरमपेक्ष्यते यदपेक्ष-या चोदनात्वं प्रसज्येत ततश्चोदनापदेनैवानर्थस्य श्येनादे र्व्यावृत्या तदर्थमर्थपदोपादानप्रयोजना-भावादुभयमनेनेतिभाष्यमसंगतमेवं कोनर्थ इति प्रश्ने श्येनाद्युदाहरणमपि न साधु श्येनस्य श्येने-

नाभिचरन् यजेतेतिवाक्यविहितत्वेनानर्थत्वाभा-वात् नच विहितस्य प्रतिषेधः समुपपद्यते व्याहततत्वेना प्रामाण्यापत्तेः, नन्वतिरात्रेशोडशिनं गृह्णातीत्यनेन विहितस्य शोडशिग्रहणस्य नातिरात्रे शोडशिनं गृह्णातीत्यनेन प्रतिषेधदर्शना दत्रापि तथा किन्नस्यादितिचेन्न वैषम्यात्तु शोडशिग्रहणो विधेयादन्यत्रावकाशमलभमानः प्रतिषेधोऽगत्या विधेये शोऽशिग्रहणे एवाभिनिविशते अन्यथा तद्वैयर्थ्यापत्तः प्रकृते तु माहिंस्यादितिसामान्यशास्त्रं यागवहिर्भूतभूतहिंसाप्रतिषेधेन सावकाशमिति यागाङ्गभूतहिंसाविषये विशेषशास्त्रेण श्येनादिना प्रतिरोधा न्न प्रवर्त्तते अन्यथा विधिनिषेधयोरेकत्र समावेशापत्तौ शोडशिग्रहणस्येव श्येनादेरपि अनर्थत्वं नस्या त्तथाच श्येनादेरनर्थ त्वकथनमर्थपदेन तद्व्यावर्त्तनं च भाष्योक्तमसंगतं स्यात् यदपि कथं पुनरसौ अनर्थो इति प्रश्ने हिंसा हिंसा साच प्रतिषिद्धेत्युक्तं तदपि न प्राणवियोगानुकूलभावनाया हिंसायाः साधनं श्येना-

दि कृपाणावन्नतु स्वत स्तस्या हिंसात्वमिति हिं-
साफलकः श्येन स्ततो भिन्नः यदपि कथं पुनर-
नर्थः कर्तव्यतयोपदिश्यते इतिप्रश्ने नैव श्येनादयः
कर्तव्यतया विज्ञायन्ते किन्तु योहिंसितुमिच्छे-
त्तस्यायमुपाय इति हि तेषामुपदेशः श्येनेनाभि-
चरन् यजेतेतिकर्म षष्ठ्या विधेयत्वमुक्तं तदपि
व्याहतम् नैवश्येनादय इति विधेयत्वनिराकरण-
मसंगतम् श्येनस्याविधाने विधेयान्तरस्यादर्श-
नादस्याविधायकत्वापत्तेः। रागतः प्राप्तस्य फलस्य
सर्वत्राविधेयत्वात् नच फल मनूद्येतिकर्तव्यतां
श्येनेन विधीयतामितिवाच्यम् यथा फलानुराग-
वशादविहिते पि तत्साधने विधिव्यापारं विना पुं-
सां प्रवृत्तिः तथा तद्धेतुतयेतिकर्तव्यतांशेऽपि तदु-
पपत्तौ तदंशे विधेयत्वाङ्गीकारानौचित्यात् फला-
र्थिनः साधनांशे इव इतिकर्तव्यतांशेऽपि प्रवृत्तेः
सूपपाद्यत्वात्। किंच एवं सति सर्वत्र साधने
विधेयत्वानभ्युपगमे ज्योतिष्टोमादेरपि अविधेय-
त्वापत्तौकोधर्मइति प्रश्ने यो निःश्रेयसाय ज्योति-

ष्टोमादिरितिभाष्यमसंगतं स्यात् एषामपि फल-साधनत्वेनैवोपदेशात् प्रत्युत अग्नीषोमीयपशुहिंसाद्वारानिषेधविधेः प्रसरादनर्थत्वमेव स्यात्। किंच शत्रुवधमुद्दिश्य श्येनादीनामविधाने तेषां तदङ्गत्वमेव न स्यात् तथा तदङ्गानामपिसाधनाङ्गत्वं न स्यात् अविहितस्य फलतत्साधनांगत्वाभावात् नच नैवकर्तव्यतया विज्ञायन्ते इतिभाष्ये कृत्यप्रत्ययदर्शनेन साध्यतया विधेरनभ्युपगमेपि साधनतया विधानस्यानिराकरणा त्तदंशे विधेरनुज्ञानेन विरोधाभावा न्नश्येनादीनां शत्रुवध-साधनताहानिरितिवाच्यम् विहिते निषेधशास्त्राप्रवृत्तेः। प्रवृत्तोरनौचित्येन श्येनादीनामनर्थत्वेन प्रत्युदाहरणासंगते स्तदवस्थात्वात् सर्वत्र साधनत्वेनैव विधानमुपलभ्यते न साध्यत्वेन फलस्याविधेयत्वादितिसत्यम्। भाष्यं तर्हि एवं व्याख्येयम् क्रियाप्रवर्त्तकवाक्यस्यैव चोदनापदेन ग्रहणे इदं भाष्यमसंगतं भवतीतिप्रवर्त्तकं निवर्तकं चोभयविधं वाक्यं चोदनापदेन ग्राह्यम्। क्रियायाः प्र-

वर्त्तकमित्युक्तिस्तूदाहरणार्था यथा क्रियाप्रवर्त्तकं वाक्यं चोदना तथा,तन्निवर्त्तकमपीत्यर्थः। अन्यथा अनर्थव्यावृत्ति-प्रयोजनपरार्थ-पदोपादानमसंगतं स्यात् अर्थान्वितचोदनातात्पर्येण वा तथोक्तिः एवंञ्च विधिनिषेधयोरुभयोश्चोदनात्वेन विधि-रूपया चोदनया ज्योतिष्टोमादीनां धर्मत्वं निषेध-रूपया चोदनया च निषेध्यानां श्येनादीनामन-र्थत्वं लक्ष्यते इत्युभयोश्चोदनालक्षणत्वं सम्य-गेव तथाच विधेयानामेवार्थत्वं न निषेध्याना-मिति अर्थपदेनैषां व्यावृत्ति र्युक्तैव ननु यथापरि-ग्रहाय धर्मः सूत्रितः तथा परिहराय अधर्मः कि-न्न सूत्रितः नहि अविज्ञातः परिहर्तुं शक्य इति-चो द्रुच्यते धर्मविपरीतो ऽधर्म इतिविधेयस्यार्थं त्वे प्रतिपादिते निषेध्यस्य तद्विपरीतस्या नर्थत्व मर्थात्सिद्ध्यतीति न पृथक् तदुक्तिः। तावतापि श्येनस्यानर्थत्वोदाहरणमसंगतम्। विहितत्वादिति चेत् सत्यम् स्वरूपेण श्येनस्या नर्थत्वाभावेऽपि श-त्रुवधरूपफलगतार्थत्वोपचारादनर्थत्वम्। फलग-

तानर्थत्वस्य साधने आरोपादित्यर्थः श्येनशब्द-स्यैव वाफले शत्रु बधे लक्षणा तथा च श्येनपद-लक्ष्यस्य शत्रु वधस्यानर्थत्वमुच्यते इति नविरोध-गन्धः एत च्च भाष्यकारेणैव स्पष्टीकृतम्। श्येन-फलम् अनर्थः न श्येनः श्येनादिस्वरूपस्यानर्थत्वे हिंसा हि सेति ग्रन्थसङ्गति र्न स्यात् श्येनादीनां विधेयत्वे नानर्थत्वानुपपत्तेः। अन्यथा कस्यचि त्तत्र प्रवृत्ति र्न स्यात् नहि अनर्थाय कश्चि त्प्रवर्तितु महति। यदा तु विधिरेव चोदना तदा इदं भाष्यमेवं व्याख्येयम्। यथा हिंसा साधनत्वेन श्येनादि र्विधीयते तथा ज्योतिष्टोमादिसाध्यत्वेन स्वर्गादि र्विधीयते इति साधनवत् साध्यमपि विधेयमेव। फलं हि द्विविधं अर्थोऽनर्थः च तत्र स्वर्गादिरर्थः अप्रतिषिध्यमानत्वात् हिंसादि रनर्थः मा हिंस्यादितिशास्त्रान्तरेण प्रतिषिध्यमानत्वात् नच विहिताया हिंसायाः कथं प्रतिषेधः जाना-त्येवासौ मया कर्तव्यमुपायं तु न वेदेतिभाष्येण तस्य लिप्सार्थलक्षणेतिसूत्रेण च फलस्याविधेय-

स्वप्रतिपादनात् श्येनादिविधिना फलांशो माहिं-
स्यादिति सामान्यशास्त्रेण प्राप्तस्य निषेधस्या
निवारणात् अभिचारविषये प्रवर्तमानः प्रतिषेधः
फलांशे ऽनिवारणा त्तदंशे ऽनर्थत्वं बोधयति
नश्येनादौ अभिचारविधिना तत्र सामान्यशास्त्र-
प्रवृत्तिप्रतिरोधात् भाष्यंत्वेवं योजनीयम् उभयं
चोदनया लक्ष्यते साध्यं साधनं च साध्यमपि
द्विविधमर्थोऽनर्थश्च कोऽर्थ इत्यत्रार्थशब्देन
साधनं लक्ष्यते किंसाधनमित्यर्थः। उत्तरमाह
ज्योतिष्टोमादिः कोऽनर्थ इत्यत्रानर्थपदं फलपरं
तथा च कोनर्थफलकः श्येनादिः तथा चानर्थफ-
लकश्येनादिव्यावृत्तये अर्थग्रहणं कृतम् अर्थसा-
धनत्वमुक्तं श्येनादेर्धर्मत्वमधर्मत्वं वा किमपिनो-
क्तम् कथं पुनरनर्थः कर्तव्यतयोपदिश्यत इति
भाष्यम् यः कर्तव्यतयोपदिश्यते श्येनादिर्नासौ
अनर्थः य श्चा नर्थः हिंसा नासौ कर्तव्यतयो-
पदिश्यते इति नेदं चोद्यं युक्तमिति वाच्यम्
भावानवबोधात् उभयं चोदनालक्षणमितिश्रवणा

त्साधनव त्फलस्यापि विधेयत्वाभिमानात् नैव श्वेनादयः कर्तव्या इति भाष्यम् । ननु पूर्वोक्त दिशा फलस्यैव विधेयत्वं प्रसक्तमिति तदेव सिद्धान्ते निराकरणार्हं न श्वेनादिः तत्र तस्याप्रसक्तेर्विधेयत्वेन निषेधा सम्भवा च्चेतिचेंत्सत्यम् एवं सति भाष्यं भित्वा व्याख्येयम् नैवेति एकं वाक्य मस्यायमर्थः अनर्थः कर्तव्यतया नैवोपदिश्यते अपितु श्वेनः कर्तव्यतयोपदिश्यते स च नानर्थः यश्चा नर्थः फलं स न कर्तव्यतयोपदिश्यते इति तद्भावः कर्तव्येति प्रश्नवाक्यघटकतव्यप्रत्ययो न साध्यत्वतात्पर्येण प्रयुक्तः तथा सति उत्तरवाक्येऽपि तदर्थकस्यैवाङ्गीकर्तव्यत्वापत्तौ प्रश्नोत्तरयोरसाङ्गत्यापत्तेः। कथ मनर्थः साध्यतयोपदिश्यते इति शंका न युज्यते अनर्थत्वसाध्यत्वयोः विरोधाभावात् सुरापानादे रनर्थस्यापि साध्यत्वदर्शनात् तन्निराकरणमपि न संगच्छते तस्यामसाध्यत्वप्रदर्शनासंभवात् प्रश्नवाक्ये तव्यप्रत्ययेना नर्थस्य कथं विधेयत्वमिति शंका स-

म्भवति, उत्तरवाक्येना नर्थस्य विधेयत्वं प्रतिपाद्यते किन्तु श्येनादेः नचासौ अनर्थः इति अनर्थस्यैव विधेयत्वं निराकार्यम् अत एव श्येनेनाभिचरन्यजेत इति हि समामनन्ति इति भाष्यकारेणोक्तम् अभिचरन्निति लट्स्थानिकशतृप्रत्ययप्रदर्शनेनाभिचारस्याविधेयत्वं सूचितम् तेषामुपदेश इत्यनेन श्येनादे र्विधेयत्वं सूचितम् विध्युपदेशयोः पर्यायत्वात्। नहि अविहितस्योपदेशः अप्रयोजनत्वात् इति फलस्यैव विधेयत्वमाशङ्क्य निराकृतं न साधनस्येति स्फुटमेव प्रतीयते। श्येनादय इत्यादिपदेनेतिकर्तृतायाः अपि संग्रहः। एवं च साधनेति कर्तव्यतांशद्वये माहिंस्यादितिनिषेधशास्त्रं न प्रवर्तते फलांशे तु प्रवर्तते एव तस्याविधेयत्वादिति तदेवानर्थस्य प्रत्युदाहरणम् यत्तु साधनेतिकर्तव्यतांशयोरपि हिंसायां निषेधशास्त्रं प्रवर्तते इति तस्यापि अनर्थत्वमिति तत्तुच्छम् ननु लौकिकहिंसावदग्नीषोमीयादिहिंसाप्यनर्थ इति चेन्न। लौकिकहिंसायां माहिं-

स्यादितिनिषेधेनानर्थत्वबोधनेऽपि अग्नीषोमीय-हिंसायां निषेधशास्त्राप्रवृत्या अनर्थभावे प्रमाणाभावात्। प्रत्यक्षादेस्तत्रासामर्थ्यात् नच लौकिकहिंसायामनर्थत्वज्ञानात् हिंसासामान्येनात्रापि तदाशंकास्यादिति वाच्यम्। तत्र निषेधमूलकानर्थत्वनिश्चयेऽपि प्रकृते तदभावेन सन्देहानुपपत्तेः। अथ पशुवधबन्धनादिक्लेशं पश्यतोऽनुमानं भवति एतादृशं दुःखं कर्तुः स्यादितिचेन्न नेदानीं कर्तु दुःखा नुपलम्भात् सुखस्यैवोपलम्भाच्च कालान्तरेऽपि तदेवानुमेयं न तद्विपरीतं प्रमाणाभावात् अनुमानप्रयोगश्चेदित्थम्। हिंसा स्वविषयगतफलसमानफलदात्री क्रियात्वाद्द दानक्रियावत्। यथा दानक्रिया सम्प्रदेये यादृशं सुखं जनयति कालान्तरे दातुस्तादृशमेव सुखं जनयति। तथा हि सापि स्वविषये पश्वादौ हिंस्यमाने यादृशं दुःखं जनयति कालान्तरे सापि हिंसकस्य तादृशमेवदुःखं जनयिष्यति इत्यनुमानेन वैदिकहिंसाया अपि अनर्थहेतुभावो निर्णीयत

इति चेन्न । अगम्यागमनसुरापानादिक्रियायां व्यभिचारात् नहि एतादृशी क्रिया तादृशं फलं जनयति इति केनापि वक्तुं शक्यम् तथा सति तत्प्रतिषेधस्यैवासांगत्यापत्तेः । अपि च हेतुरपि विरुद्धः प्रायश्चित्तादौ दुःखनिवृत्तये गोदानविधानात् । नहि तत्र सम्प्रदानस्य क्षीरपानादिजन्यं सुखमिव सुखं भवति दातुः प्रमाणविरोधात् संप्रदानापेक्षया दातुः सहस्रगुणफलस्मृतेः दृष्टान्तरस्य साध्यवैकल्याच्च दानक्रियायां सिषाधयिषितदुःखविरहात् पक्षसपक्षयोः साध्यभेदात् सपक्षे संप्रदानतुल्यबलत्वव्याप्तो हेतुः पक्षे तु हिंसाकर्मफलतुल्यफलत्वमिति नानुमानप्रणाली यदि सपक्षवत्पक्षेऽपि सुखमेव साध्यते तदा विरुद्धो हेतुः दुःखसिषाधयिषया प्रयुक्तेन हेतुना सुखसाधनात् ज्योतिष्टोमहिंसा सुखकरी विहितत्वात् जपहोमादिवत् अपिच जपहोमादिभ्यः परपीड़ानुग्रहयोरभावात्तेषामफलत्वमेवस्यादितिशास्त्रैकवेद्ययोर्धर्माधर्मयोरनुमानावतारानौचित्यम्

शास्त्रं विहाय परपीड़ानुग्रहमूलकानुमानेन धर्मा-धर्मयोर्व्यवस्थापनेऽगम्यागमनादौ भूयान् धर्म एव स्यात् परपीड़ाया अभावेन अनुग्रहस्य च सत्वात् हृदयक्रोशनमपि निष्कारणम् हृदय-क्रोशने नाधर्मः तेन हृदयक्रोशनमित्यन्योन्याश्र-यश्च अन्येतु नाग्नीषोमीयहिंसायामनर्थहेतुत्व-मनुमानेन ज्ञाप्यते येन पूर्वोक्तदूषणगुणाज्ज्ञापक-प्रमाणविरहः शक्येत वक्तुम् माहिंस्यादितिशा-स्त्रमेवात्र प्रमाणम् शास्त्रं हि पदार्थस्य यादृशी शक्ति रस्ति तस्य तादृशीं शक्तिं ज्ञापयति। यथा वह्निरुष्णः जलं शीतं नहि स्वातन्त्रेण कस्यचि च्छक्तिं जनयति अपनयति वा नहि कृशानुः शी-तल इति शतकृत्वोपि वचने स तथा भवति ; किंतु स्वयमेव तदात्मनः प्रामण्या त्प्रच्यवते एवं हिंसायां सतीमेव प्रत्यवायजनशक्तिं माहिं-स्यादितिशास्त्रं ज्ञापयति लोकानुजिघृक्षया व्युत्पन्नस्येति लौकिकहिंसावदग्नीषोमीयहिं-सायामपि तदेव प्रमाणम् इत्याहुः तत्तुच्छम्।

यतः शास्त्रं ज्ञापकमेव नोत्पादकमित्यविवादम्
किन्तु विशिष्यशक्तिं ज्ञापयति न सामान्यतः
अन्यथा ब्राह्मणानामिव शूद्राणामपि सुरापाना-
देर्निरयनिपातनिदानत्वापत्तेः वैश्यस्तोमादे र्वि-
प्रराजन्ययोः फलसाधनत्वापत्तेश्च दर्शपूर्णमा-
सयो रन्यदापिकरणप्रसङ्गाच्च सायं प्रातर्विहित-
स्याग्निहोत्रस्य मध्याह्नेऽपि करणप्रसङ्गाच्च ननु
वैश्यस्तोमादे रधिकारिविशेषं निर्दिश्य विधाना-
त्फलम् माहिंसादित्यनेन तु अविशिष्य हिंसा-
मात्रस्या नर्थत्वज्ञापना दग्निषोमयाहिंसायामपि
तत्प्रसज्यत एवेति वाच्यम् विशेषशास्त्रेणाग्नी-
षोमीयं पशुमालभेतेत्यनेन विरोधिना यज्ञाङ्ग-
हिंसातोऽव्यावर्त्तमानस्य निषेधशास्त्रस्य तदनङ्ग-
हिंसायामेव व्यवस्थापितत्वात् तत्रैवानर्थत्वं व्यव-
स्थितं न याज्ञाङ्गहिंसायामित्यङ्गीकारात् तद-
प्युक्तं पदार्थशक्ति र्व्यवस्थितेति तदपि न वल-
वीर्यविपाकादि जनन क्षममपिभोजनं मनातुरस्य
सुखमिति किमातुरस्यापि तथा कल्पयितुं

शक्यम् विपरीतदर्शनात् यदि भोजनं कर्तृभेदा द्भिन्नं नैकं तदा यागाङ्गत्वतदनङ्गत्वोपाधि-भिस्तद्भेदः प्रकृतेऽपि न दण्डवारित इति तुल्यम् अन्यथा क्रियात्वेनैकफलकत्वाभ्युपगमे अश्वमेधब्रह्महत्ययोः समानफलकत्वापत्तिः याग-त्वेन भेदाभ्युपगमे तु सर्वेषां यागानां यागत्वे-नैक्यापत्तौ सोमचित्रादियागानामविशेषफलक-त्वापत्ति र्दुर्वारैव स्यात्। यदि यागव्यक्तिभेदा त्फलभेद इत्युच्यते तदा प्रकृतेपि हिंसाव्यक्ति-भेदा त्फलभेद इत्यत्रापि दृष्टिर्दीयताम्। ननु सुहृद्भावेनै तत्पृच्छामि विहितापि हिंसाकुतो-नानर्थःलोकवद्वेदेऽपि हिंस्यमानपशोः क्लेश-साम्यात् विशेषान्तरस्यादर्शनादितिचेत्सत्यम् धर्माधर्मयोः शब्दैकसमधिगम्यतया वैदिक-हिंसायामनर्थ बोधकविधेरदर्शनात् मा हिंस्यादि-तिनिषेधशास्त्रप्रवृत्ते रत्रनिवारितत्वात् अग्नीषो-मीयं पशुमालभेतेत्यादि हिंसाबोधकविधेरत्रदर्श-नाच्च किंच पुरुषार्थत्वेहिंसाया अनर्थत्वं स्याद-

पिप्रकरणा त्तु क्रत्वर्थत्वमेव तस्या अवसीयते क्रत्वर्थत्वे क्रतूपकार एवानया सम्पाद्यते तदुपकारश्चहृदयाद्यवदाननिष्पादनद्वारा दृष्टार्थो व्रीह्याद्यवदानवन्न प्रोक्षणादिवददृष्टार्थः। अन्यथा अर्थफलस्यानर्थफलत्वं क्रत्वर्थस्य पुरुषार्थत्वं संस्कारस्य अर्थकर्मत्वं दृष्टार्थ स्याददृष्टार्थत्वमिति चतुष्टयं प्रमाणविरुद्धं कल्पनीयं स्यात् एवं च यागाङ्गहिंसायां नानर्थत्वं किन्तु तदनङ्गहिंसायामेवेति फलगतानर्थत्वतात्पर्येण श्येनादीनामनर्थत्वं नतदङ्गभूतहिंसातात्पर्येणेतिबोध्यम्। यत्तु साधनवत्फलांशोपि विधेयः चोदनालक्षणत्वात् भावनान्तर्गतत्वादिति तत्तुच्छम्। उद्देश्यविधया शत्रुवधस्य चोदनार्थत्वेपि विधेयत्वाभावात् नहि सर्वस्य प्रवर्तकवाक्यार्थस्य विधेयत्वमेवेतिनियमः। किन्तु यत्र प्रवर्तकवाक्यश्रवणं विना पुरुषो विहिते कर्मणि प्रवर्त्तितुं नार्हति तस्यैव विधेयत्वमित्येवनियमः। फलस्य तु रागविषयतया स्वतः पुरुषप्रवर्त्तकत्वं न तत्र प्रवर्तकतया चोदनापेक्षेति

फलांशेन विधिः रागादेव तत्र प्रवृत्त्युपपत्तेः किंतु साधनेतिकर्तव्यतांशयोरेव क्लिष्टंकर्मेतिन्यायेन तत्र विधिमन्तरा प्रवृत्त्यनुपपत्तेः । तस्मात् सिद्धं श्येनस्य स्वरूपेण धर्माधर्मोभयानात्मकत्वं शत्रुवधस्या नर्थत्वेन तदुपचारतया श्येनस्याधर्मत्वम् ननु न केवलं यागाङ्गहिंसायामनर्थत्वमनुमानेनैवोच्यते अपितु आगमेना पि तथा हि "श्रेयान् द्रव्यमयाद् यज्ञाद् ज्ञानयज्ञः परन्तप विधियज्ञाज्जपयज्ञो विशिष्टो दशभि र्गुणै"रित्याद्यागमः द्रव्ययज्ञापेक्षया ज्ञानयज्ञस्य प्राशस्त्यं हिंसा भावनिबन्धनमेव बोधयति तथा मन्त्रवर्णोऽपि "यत्पशुर्मायुमकृतोरोवापद्भिराहते अग्नि र्मा तस्मादेनसो विश्वान्मुञ्चत्वंहस" इति संज्ञपनादेनो दर्शयति इति चेन्न हिंसाबाधकप्रत्यक्षश्रुतिबलादेवं विधागमानामर्थवादत्वाङ्गीकारस्यौचित्यात् । अन्यथा तत्र संज्ञपनादिबोधकश्रुतीनामप्रामाण्यापत्तेरित्यलमनल्पजल्पितेन । *

* भा० नन्वशक्तमिदं सूत्रमिमावर्था वभि वदितुम् ।

चोदना लक्षणो धर्मः :न इन्द्रियादि लक्षणः अर्थश्च धर्मः न अनर्थइति हीदं वाक्यं तदेवं सति भिद्यते उच्यते यत्र वाक्यादर्थोऽवगम्यते तत्रैवम् तत्तु वैदिकेषु न सूत्रेषु अन्यतोऽवगम्यतेर्थे सूत्रम् एवमर्थ मिद मित्यवगम्यते। तेन च एक देशः सूत्र्यते इति सूत्रम् तत्र भिन्नयोरेव वाक्ययोरिमा वेक देशावित्य-त्वव गन्तव्यम् अथवा अर्थस्य सतश्चोदना लक्षणस्य धर्मत्वमुच्यते इति एकार्थ मेवेति।

नन्वशक्तमिदं सूत्रमिति भाष्यं ननु चोदना-लक्षणो धर्मोन प्रत्यक्षादिलक्षणस्तथा अर्थो धर्मः नानर्थ इत्येतदर्थ द्वयबोधनसामर्थ्यं नैकवाक्य-स्येत्यभिप्रायेण शङ्कते नन्वशक्तमिति नच पौरुषे-यवाक्येषु प्रमाणान्तराधिगतार्थेषु अनुवादकतया वाक्यभेदो नदोषाय विशेषतश्च सूत्रेषु सूत्राणा-मनेकार्थसूत्रंन्च न स्वभावस्य गुणत्वादितिवाच्यम् एषामपिप्रमाणान्तरानधिगत वैदिकार्थज्ञापकतया वेदतुल्यत्वात् ततश्च वैदिकवाक्यव त्सूत्रेष्वपि वाक्यभेदो दोष एव इतिचेत्सत्यम्। श्रोतुरप्रती-तार्थकत्वे वक्तुः प्रतीतार्थकतया अपूर्वार्थाभिधा-नाभावेन संक्षेपविवक्षया वाक्यभेदस्यायुक्तत्वा-

भावात् अर्थद्वयप्रतिपादनमेकेन सूत्रेण संभवति अत एव परिसंख्याविधौ सति संभवे वाक्यभेदादिदोषवर्जनमुक्तं संगच्छते असम्भवे तु वाक्यभेदः सूत्रेष्ववगन्तव्य इत्यभिप्रायेणाह उच्यत इति भा० अस्यार्थः यत्र वाक्यादपूर्वोर्थः प्रमाणान्तरानाधिगतोऽर्थः प्रतीयते तत्र वाक्यभेदः दोषः सकृदुच्चरितस्य वाक्यस्यार्थद्वयबोधजननसामर्थ्यानङ्गीकारात् शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात्। सकृदुच्चरितः सकृदेवार्थंगमयतीत्यभियुक्तोक्तेः एकस्मादेव वाक्यादर्थद्वयबोधाभ्युपगमे अर्थनिर्णयो न स्या त्सर्वत्रतात्पर्यनिर्णायकप्रकरणाद्यु पस्थिते रसम्भवात्। अन्यतो वेदवाक्यादवगतार्थेषु सूत्रेषु वाक्यभेदो न यतः सूत्रं न स्वातन्त्रेण धर्माधर्मयोर्लक्षणंब्रूते पौरुषेयवाक्यत्वेन तद्ग्रहणसामर्थ्याभावात्। किन्तु वेदवाक्यात्तयो र्यादृशं लक्षणमगतं तादृशमेवानुवदति बह्वर्थसूचकत्वा त्सूत्रस्येत्याह तेनेति एकदेशःचोदनालक्षणोर्थोधर्म इति सूत्र्यते

नेन्द्रियादिलक्षणेनानर्थ इत्यपरोंशः अर्थाद्गम्यते इति तदपि वाक्यभेदेन सूचयति लौकिकवाक्ये तस्यादोषत्वादिति भावः ननु सूत्रकारस्यावगतार्थत्वेपि श्रोतॄणामनवगतार्थतया वाक्योच्चारणस्य परार्थकतया श्रोत्रपेक्षयाऽज्ञातज्ञापकत्वा त्सूत्रेऽपि वाक्यभेदो दोष एवेत्याह भाष्ये भिन्नयोरेवेति। अयमभिप्रायः अर्थद्वयबोधनाय सूत्रं द्विरावर्तनीयम् चोदनालक्षणो धर्म इत्येकं सूत्रं अर्थो धर्म इत्यपरं सत्रे पूर्वसूत्रेऽर्थग्रहणमुत्तरसूत्रसिद्धत्वादनुवादः एवमुत्तरसूत्रे चोदनालक्षणमनुवादः उत्तरसूत्रसिद्धत्वात् विध्यनुवादाभिप्रायेण तन्त्रोच्चारितस्य धर्मपदस्य पर्यायेणोभाभ्यां संबन्धः। एवं विध्यनुवादतात्पर्येणार्थद्वयबोधने वाक्यभेदो न दोषः विधेयार्थद्वयतात्पर्येण तस्य दोषत्वात् तथाचेहैकसूत्रार्थः यश्चोदनालक्षणः स धर्म इति चोदनालक्षणमनूद्य धर्मो विधीयते। ततः योऽयं धर्मः सोऽर्थ एव नानार्थ इति नन्वेवमर्थाभ्युपगमे अर्थोधर्म इति

वाक्ये चोदना पदस्या संबन्धात् अचोदनालक्ष-
णस्यापि अर्थस्य धर्मत्वं स्यात्। एवं मुत्तरसूत्रे
चोदनालक्षण इत्येतावन्मात्रोक्तया चोदनालक्ष-
णस्या नर्थस्यापि धर्मत्वं स्यादितिचेन्न अन्विता-
र्थकयोरेव परस्परसंवन्धाभ्युपगमात् न केवलयोः।
उत्तरसूत्रे चोदनालक्षणस्यैव धर्मत्वकथनाद
र्थो धर्म इति पूर्वसूत्रेपि तादृशार्थक एव धर्म-
शब्दो नकेवलः अचोदनालक्षणः एवं पूर्वसूत्रे
अर्थस्यैव धर्मत्व कथनादुत्तरसूत्रेऽपि तादृशार्थक
एव धर्मपदसबन्ध इति नानर्थस्य धर्मत्वं परस्प-
रसाहचर्यादर्थात्मक एव चोदनालक्षणो धर्म
इति सिद्धम्। अर्थोपि चोदनालक्षणविशिष्टएव
धर्मोनेन्द्रियादिलक्षण इति सिद्धम् समाधाना-
न्तरम्भा० अयमर्थः योर्थः चोदनालक्षणः स
धर्म इत्यर्थात्मकं चोदनालक्षणं विशिष्टमनूद्य
धर्मत्वविधानेऽपि वाक्यभेदः स्फुट एव योर्थःचो
दनालक्षण इत्यनुवादकं वाक्यं स धर्म इति वि-
धायकमितिविध्यनुवादाभ्यां वाक्यभेदे सिद्धे

किं कल्पान्तरानुसरणेनेतिचेत् तन्त्रे णोच्चरितस्य धर्मपदस्य वाक्यद्वये संबन्ध स्वीकारेण वाक्यभेदस्य कथंचि त्परिहर्तुं शक्यत्वात् चोदनालक्षणमनूद्य धर्मत्वविधौ अनर्थ स्यापि श्येनादे श्चोदनालक्षणासम्भवा त्तस्य धर्मत्ववारणाय अर्थग्रहणमावश्यकम् धर्ममनूद्यचोदनालक्षणविधौ तु अर्थात्मकस्यैव धर्मस्य प्रसिद्ध्या व्यावर्त्तकाभावाद नर्थकमर्थग्रहणमिति चे त्सत्यम् अस्मि न्पक्षे नित्यानुवादार्थकतया नार्थग्रहण वैय्यर्थ्यम् एतदभावे चोदनालक्षणो धर्म इत्येतावन्मात्रं सूत्रं स्यात्। तथा सति य श्चोदनालक्षणः स धर्म इत्यपि वचनव्यक्तिः स्यात् एवं च चोदनालक्षणस्यानर्थस्यापि धर्मत्वं प्रसज्येत इति तद्व्युदासाय अर्थग्रहणम्। अर्थग्रहणे कृते तु योर्थो धर्मः स चोदनालक्षण इति वचनव्यक्तये नित्यानुवादो र्थशब्दः प्रयुज्यते ननु यदि इदृशी वचनव्यक्ति स्तर्हि कथं भाष्यकारेण अनर्थ उक्तो माभूदित्यर्थग्रहणं कृतमित्युक्तम्। अयम

भिप्रायो भाष्यकारस्य । अर्थपदस्य विशेषणत्वं विनापि तदुपादानसामर्थ्यादेवानर्थस्य धर्मत्वप्रापकताहृशवचनव्यक्ति र्न भवति इति तदुपादानस्या नर्थ निवृत्तिः फलमित्यभिप्रेत्या नर्थो धर्म इत्यभिहितं भाष्यकारेण । एवं च वचनव्यक्तिविशेषपरिग्रहार्थोऽ र्थशब्द इति भाष्याभिप्रायः । प्रमाणवचनव्यक्त्याश्रयणे प्रमाणलक्षणस्यादौ निवेश उपपद्यते तत्प्रतिज्ञानात् स्वरूपवचनव्यक्त्याश्रयणे तु धर्मस्वरूपपरं भेदलक्षणमेवादौ क्रियेत नच तथाकरोत् तस्मा त्सूत्रकारस्यैषैववचनव्यक्तिरभिप्रेतेत्यन्ये । अर्थस्य ज्योतिष्टोमादे श्चोदनालक्षणस्य धर्मत्व मुच्यते यो र्थश्चोदनालक्षणः स धर्म इति वचनव्यक्तेरितिभाष्यार्थः । वस्तुतस्तु एवं रीत्या र्था भ्युपगमे विध्यनुवादाभ्यां वाक्यभेदापत्ति स्तदवस्थैवेतिपूर्वोक्तपरिहार एव साधीयान् ।

इति कल्पकलिकायां चोदनाविवरणम् ।

अथ धर्म प्रामाण्य परीक्ष्यता धिकरणम् ।

तस्य निमित्त परीष्टिः ॥ ३ ॥

* भा० उक्तमस्माभिः चोदना निमित्तं धर्मस्य :ज्ञानमिति तत्प्रतिज्ञामात्रेणोक्त, मिदानीं तस्य निमित्तं परीक्षिष्यामहे । किं चोदनैवेति अन्यदपीति तस्मा न्न तावन्निश्चर्यायते चोदनालक्षणो ऽर्थोधर्म इति तदुच्यते ।

* ननु चोदनालक्षणो र्थो धर्म इति प्रतिज्ञाते तदुपपादकहेत्वभिधानमेवाकांक्षितत्वादुचितमितितदुपेक्ष्य धर्मनिमित्तपरीक्षाप्रतिज्ञा असंगतेति चेन्न प्रमाणस्वरूपयो रविशेषेण प्रतिज्ञानात्कस्य प्रतिज्ञाभागस्य सदौत्पत्तिकसूत्राभ्यां हेतुरभिधीयते इति विशिष्य निर्णयाभावा त्तत्स्पष्टप्रतिपत्तये अस्मि न्पादे चोदनाख्यधर्मनिमित्तस्य परीक्षणं प्रतिज्ञायत इत्यभिप्रायात् अयं सूत्रार्थः तस्य धर्मस्य ज्ञाने यन्निमित्तं चोदनेति तत्परीष्टिः परीक्षा कर्तव्येति इषुगतावित्यस्मा द्धातोरनिच्छार्थस्येति युचि परेवेति क्तिन्युचो विकल्पस्मरणाद्द युज्विधौ पर्येषणेति-

रूपं क्तिन्विधौ तु परीष्टिरितिरूपं सिद्धयति। परिपूर्वकादीक्षधातोः क्तिनि आगमशास्त्रस्यानित्यत्वाभ्युपगमादिडभावे स्कोरितिकलोपे ष्टुत्वे परीष्टिरितिसिद्धं परीक्षणं परीष्टिरित्यर्थः। तस्य धर्मविषयकतत्वज्ञानस्य यन्निमित्तं कारणं चोदनाख्यं तस्य परीष्टिः परीक्षा। युक्तिपूर्वकसाधकतर्ककलापैः विचारः कर्तव्य इत्यन्ये तथा च तस्येत्यनेन न धर्मस्य ग्रहणं किन्तु तज्ज्ञानस्य ज्ञानं प्रत्येव चोदनाया निमित्तत्वात्। अत एव चोदनानिमित्तं धर्मस्य ज्ञानमितिभाष्ये उक्तम् ज्ञापकार्थकनिमित्तपदाश्रयणे तु तस्य धर्मस्य ज्ञापकं यच्चोदनेति तत्परीष्टिरित्यर्थोऽपि संगच्छते परन्तु ज्ञानपदोपादानं भाष्येनिर्वीजं स्यात् प्रतिज्ञामात्रेणोक्तमिति। नन्विदमयुक्तं चोदना हि भूतमित्यादिना हेतूनां तत्र प्रदर्शितत्वादिति चे न्न सूत्रकारेण तन्नाभिहितमिति तत्तात्पर्येणैतद्भाष्यसंगतेः सूत्रकृता प्रतिज्ञामात्रेण धर्मस्य ज्ञानं चोदनानिमित्तमित्युक्तं

तत्र हेतु र्नोक्त इत्यर्थः । अथवा भूताभिधानसामर्थ्य प्रतिपादनद्वारा प्रत्यक्षागोचरार्थाभिधानसामर्थ्यसम्भावनाप्रदर्शनतात्पर्येणैव भाष्यकृता चोदना हि भूतमित्याद्युक्तं न प्रतिज्ञातार्थ साधनं प्रदिदर्शयिषया इति स्वतात्पर्येणाप्येतद्भाष्यं साधु संगच्छते अन्यदपीति प्रत्यक्षाद्यपीति यावन्निमित्तपरीक्षणां न क्रियते हेत्वादिप्रदर्शनेन तावच्चोदनैव निमित्ति न निश्चीयते प्रतिज्ञामात्रेणा र्थसिद्धे रदर्शनाद् एकाकिनी प्रतिज्ञा हि प्रतिज्ञार्थं न साधयेदित्यभियुक्तोक्तेरिति भावः

इति तृतीयं निमितसूत्रम् सम्पूर्णम् ।

धर्मे प्रत्यक्षस्य अप्रामाणताया अधिकरणम् सूत्रम् ।

सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धि-जन्म तत्प्रत्यक्ष मनिमित्तं विद्यमानोपलम्भ नत्वात् ॥४॥

* भा० इदं परीक्ष्यते प्रत्यक्षं तावदनिमित्तम् । किं कारणम् एवं लक्षणकं हि तत् सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धि जन्म तत्प्रत्यक्षम् सति इन्द्रियार्थसम्बन्धे या पुरुषस्य बुद्धि र्जायते तत्प्रत्यक्षम् भविष्यत् च एषोऽर्थो न ज्ञानकालेऽस्तीति सतश्चैतदुपलम्भनं नासतः ।

* प्राचीनवृत्तिकारेण भवदासेन सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमित्येतत्पर्यन्तमेकं सूत्रं कृत्वा प्रत्यक्षलक्षणपरतया व्याख्यातम् अनिमित्तंविद्यमानोपलम्भत्वादित्यपरं सूत्रं मत्वा पूर्वसूत्रलक्षणलक्षितं प्रत्यक्षं धर्मं प्रत्यनिमित्तं प्रत्यक्षस्य विद्यमानोपलम्भत्वात् धर्मस्य च भाव्यत्वादित्यर्थकतया व्याख्यातमिति तन्न सूत्रकारस्याजिज्ञासितार्थाभिधानप्रसंगात् । पूर्वसूत्रप्रतिज्ञाद्वयी कृता चोदनैव प्रमाणं सा च प्रमाणमेवेति तयोरेकत्राप्यंशे इदं न संगच्छते। प्रत्यक्षलक्षणं न प्रक्रान्तं येन तन्निरुक्तेरवसरः स्यात् । अपिच प्रत्यक्षस्यैव विशिष्य लक्षणं किमिति कृतं अनुमानादेरपिसत्वात् । तेषामपि लक्षणकरणमावश्यकं न च तानि प्रमाणान्येव न संभवन्ति इति वक्तुं शक्यं प्रमाणत्वेनाङ्गीकारात् नवा प्रत्यक्षेऽन्तर्भवंति येन प्रत्यक्षलक्षणेनैव संगृहीतानि भवेयुः। नच प्रत्यक्षलक्षणनिरूपणानन्तरं तत्पूर्वकत्वा त्तेषां पृथक् लक्षणं विनापि ज्ञानं भवेदिति

न तल्लक्षणाकरणापेक्षेतिवाच्यं तेषामवान्तरलक्षण-स्वरूपादिपरिच्छेदाय तदावश्यकत्वात्। लोकप्र-सिद्धत्वात् न तल्लक्षणापेक्षेति तु न सत् प्रत्यक्ष-स्यापि लोकप्रसिद्धतया तल्लक्षणस्याप्यनपेक्षित-त्वापत्तेः। अपिच वहूनां प्रमाणानामेकतमस्यैव लक्षणाकरणे प्रमाणांतरलक्षणाकरणे सूत्रकारस्या-शक्ति र्वा वोधिता स्यात्प्रमाणान्तरे ऽनभिमति र्वा सूचिता। स्यादन्यथा एकस्यैव लक्षणप्रमाणायन मयुक्तं स्यात् सम्पूर्णसूत्रस्यैकवाक्यत्वसंभवे वाक्यभेदकल्पनायां अप्ययुक्तत्वं लक्षणस्याति व्यापकत्वं च दोषः। स्मरणस्याप्येवं विधत्वात् किंवा स्वप्नज्ञानं विहाय सर्वत्र विभ्रमे लक्षणाति-व्याप्तिस्तेषामपि अधिष्ठानेन्द्रियसन्निकर्षजत्वात्। ननु न येन केनचिदिन्द्रियसंप्रयोगो विवक्षितः किन्तु यद्विषयकं ज्ञानं जायते तेनेन्द्रियसन्निकर्षो भिमत स्तथा चेदं रजतमित्याभासे नाति व्याप्ति स्तस्य रजतेन्द्रियसन्निकर्षजत्वाभावाभावादिति-चेन्न सत्सं प्रयोगस्येदृशार्थकत्वाभावात् नचे-

द्दशार्थलाभाय तत्सतोऽर्थस्यासः कार्यः तत्संप्रयोग इति सत् प्रत्यक्षमिति ततश्च प्रत्यक्षं द्विविधं सत् आभासं च आद्यमेव प्रमाणत्वेनेष्टम् तत्संप्रयोगजं प्रत्यक्षं प्रमाणं अन्यसंप्रयोगज माभासं यथा शुक्तौ इदं रजतम्। ननु ज्ञानमात्रे विषयेन्द्रियसन्निकर्षस्य हेतुतया विशेषणोपादानमन्तरापि येन केन चिदर्थेनेन्द्रियसन्निकर्षस्य स्वत एव लाभे सत्संप्रयोगस्य सार्थक्याय ग्राह्यविशेषणत्वमेवाङ्गीक्रियते एवं च यद्विषयकं ज्ञानं तेनैवेन्द्रियसन्निकर्षो वाच्य स्तथाचा भासे नातिव्याप्तिरित्यपि न शुक्तिशकलादेरपि सत्वादाभासस्यापि सत्संप्रयोगजत्वेनापरिहारात्। नहि शब्दसार्थक्याय वाच्यार्थकल्पनं सम्भवति स्वप्नादिज्ञानव्यावतनाय तत्सार्थक्या च्च यत्तु धर्मं प्रत्यनिमित्तत्वबोधनाय प्रत्यक्षलक्षणानुवादः तदपि न पुरोवर्तिन एवानुदत्वे न प्रकृते तदभावात्। नहि यत्सतीन्द्रियसम्प्रयोगे ज्ञानं जायते तत्प्रत्यक्षं प्रतीयतामिति वचन व्यक्तिः किन्तु लोक प्रसि-

द्धस्य प्रत्यक्षस्य सत्संप्रयोगजन्यत्वाद् विद्यमानो-
पलम्भनत्व मतोभाविनि धर्मे अनिमित्ततेति-
वचनव्यक्तिरेव साधीयसी । ननु प्रत्यक्षमनिमित्त
मेवं लक्षणकत्वादितिभाष्योक्त्या लक्षणानुवादः
स्फुट एव प्रतीयते । इति चेन्न भावानव बोधात्
न प्रत्यक्षस्वरूपलिलक्षयिषया तत्स्वरूपोक्तिरपितु
धर्मंप्रति अनिमित्तत्वमित्य तद्बोधनाय कृत एवं
लक्षणकत्वात् किन्तल्लक्षणं विद्यमानोपलम्भ-
नत्वं कुतोविद्यमानोपलम्भनत्वं सत्सम्प्रयोगजत्वा-
त्। तथा च सत्सम्प्रयोगजत्वहेतुक विद्यमानोप-
लम्भनत्वं प्रत्यक्षस्य धर्मः अतः प्रत्यक्षं धर्मं प्रत्य
निमित्तमिति तद्भावः सत्संप्रयोगजत्वसिद्धिः
कुतः अत्र प्रत्यक्षमनिमित्तं विद्यमानोपलम्भन-
त्वात् विद्यमानोपलम्भनत्वं च सत्संप्रयोगज-
त्वात् सत्सम्प्रयोगजत्वं च प्रत्यक्षत्वादिति त्रयः
प्रयोगा बोध्याः । ननून्नतमेघदर्शनेन भविष्यति
वृष्टिरित्यनुमानेऽपि मेघेन्द्रियसम्प्रयोगजत्वस्य
सत्वेनातिव्याप्तिरिति चेन्न सच्छब्दस्य वर्तमानार्थ-

कतया सत्सम्प्रयोगसमानकालिकस्य ज्ञानहेतु-तया विवक्षणेन प्रकृते तदभावेन दोषविरहात्। लिङ्गज्ञानमुत्पाद्य विरतव्यापारे इन्द्रिये पश्चा ल्लिङ्ग-ज्ञाने नानुमिति र्जायते इत्यनुमिति काले इन्द्रिय व्यापारस्यासत्वान्न वर्तमानत्वमिति भावः। नन्वेवं भवदासमतेप्यनुमानेऽति व्याप्ति र्वारयितुं शक्यते सन्सम्प्रयोगः सत्संप्रयोग इति विग्रहाभ्युपगमेन सदर्थस्य विषयाविशेषणतयेन्द्रियसन्निकर्षस्यैव विशेषणत्वस्वीकारेण भविष्यद्वृष्ट्यनुमाने सन्नि कर्षस्याविद्यमानत्वादिति चेन्न। तेन हि सता सम्प्र-योगः सत्संप्रयोग इति विग्रह प्रदर्शनात्। ग्राह्य-विशेषणतयैव सच्छब्दार्थस्य व्यवस्थापितत्वात् यदि तु तन्मतेपि सदर्थस्य सम्प्रयोगविशेषणत्वं परित्यज्य ग्राह्यविशेषणत्वमेवाङ्गीक्रियते तदा पीतः शङ्ख इत्याद्याभासेऽति व्याप्तिः स्फुटैव। ननु लोक-प्रसिद्धप्रत्यक्षानुवादेन धर्मम्प्रति अनिमित्तत्व-मेव विधीयते धर्मं प्रति प्रत्यक्षमनिमित्तं अप्र-माणाम् विद्यमानोपलम्भनत्वात् विद्यमानार्थ-

ग्राहित्वात्। धर्मश्च न वर्तमानः यजेतेत्यादिवाक्ये न त्रिकालानवच्छिन्नस्यैव धर्मस्य बोधनात्। तर्हि लक्षणाभिधानस्य किम्प्रयोजनमितिचेदिदम् प्रत्यक्षं धर्मम्प्रत्यनिमित्तं विद्यमानोपलम्भनत्वादित्यत्र यदि कश्चिद्धेत्वसिद्धिमुद्भावयेत् तत्र विद्यमानोपलम्भनत्वमेव कुतः तदा एवम् वक्तव्यम् विद्यमानोपलम्भनं प्रत्यक्षम् सत्सम्प्रयोगजत्वात् सत्संप्रयोगजत्वस्याप्यसिद्धिशङ्कायां तदपि प्रत्यक्षत्वेन साधनीयम्। सत्सम्प्रयोगजं प्रत्यक्षं प्रत्यक्षत्वात् एवं च प्रत्यक्षं न धर्मग्राहि प्रत्यक्षत्वादस्मदादिप्रत्यक्षवत् नच प्रत्यक्षमात्रस्य पक्षत्वाभ्युपगमे तदतिरिक्तहेतोरभावे दृष्टान्तासिद्धिः अस्मदादिप्रत्यक्षस्य धर्मप्रत्यनिमित्तत्वसाधने सिद्धसाधनं चेति चेन्न योगिप्रत्यक्षस्यैव पक्षीकरणात् निश्चितसाध्यसाधनवत एव दृष्टान्ताङ्गीकारेणास्मदादि प्रत्यक्षस्यैव दृष्टान्तत्वसम्भवात्। अत्र सत्सम्प्रयोगजत्वप्रत्यक्षत्वयो र्व्याप्तिः स्फुटैव। लक्षणपक्षे यथानुमानादिलक्षणं

कुतो न कृतम् तथा धर्म म्प्रत्यनिर्मित्तत्वप्रतिपाद
नेऽपि अनुमानादीनामनिमित्तत्वं कुतो न दर्शित
मित्याक्षेपो न युक्तः। प्रत्यक्षपूर्वकत्वादनुमानादेः
प्रत्यक्षनिवृत्तौ नानुमानादेरवकाशः। धर्मस्याप्र-
त्यक्षत्वे तन्निरूपितव्याप्ते दृष्टान्तस्य चाग्रहणात्
लक्षणपक्षे प्रत्यक्षलक्षणे नानुमानादिलक्षणस्या-
गतार्थत्वात् नप्रत्यक्षलक्षणवदन्यस्यापि लक्षणस्य
निरुक्तौ पर्य्यनुयोगः सम्भवतिञ्च निमित्तत्वप्रति-
पादने तु प्रत्यक्षस्यानिनित्तत्वकथनादेवान्येषा-
मनिमित्तत्वं ज्ञायत एवेति न पृथक् तदुक्तिः। ननु
सत्सम्प्रयोगजत्वस्याभासेऽपि सत्वेन तस्यापि प्र-
त्यक्षत्वापत्ति र्न नहि प्रत्यक्षलक्षणमुच्यते ये-
नातिव्याप्ति राभासे दीयेत किन्तु धर्मं प्रत्यनि-
मित्तं प्रत्यक्षमेवंलक्षणकत्वात्। लौकिकप्रत्यक्ष-
स्यैवंलक्षणकत्वमस्त्येव यदिआभासस्यापि एवं
लक्षणकत्वमस्ति तदा तदपि धर्मम्प्रत्यनिमित्त
मेवेति नकश्चिद्दोष इति। शाक्या स्तु शरीरेन्द्रि-
याद्यावरणावृत्त एव जीवोऽल्पज्ञोभवति इन्द्रिया-

दिसवन्धादेव जानाति निर्मुक्तदेहाद्यावरणः स्वत एव सर्वंस्थूलसूक्ष्मं व्यवहितं विप्रकृष्टं सन्निकृष्टं पश्यति इति धर्माधर्मौ अपि पश्यत्येवेति विद्यमानोपलम्भत्वं योगि प्रत्यक्षस्यासिद्धमित्याहुः। तन्निराकरणाय सूत्रकारेण प्रत्यक्ष मात्रस्य विद्यमानोपलम्भत्वमुच्यते। एवं च योगि प्रत्यक्षं न धर्मग्राहकं प्रत्यक्षत्वादस्मदादि प्रत्यक्षवद् यद्वा धर्मो न प्रत्यक्षः अनागतत्वाद्भ भविष्यद्वृष्टिवत् तथा च नाश्रयासिद्धिरपि न वा स्मदादि प्रत्यक्षमादाय सिद्धसाधनम्। विशिष्य धर्मस्य प्रत्यक्षत्वाभ्युपगमेन नार्थान्तरमितिद्योतनाय लोक प्रसिद्धं सत्संप्रयोगजत्वं विद्यमानोपलम्भसाधनार्थमाह जैमिनिः। ननु लौकिकप्रत्यक्षो ऽस्तु एवमेव भावनाप्रकर्षजं योगिविज्ञान न्तु अविद्यमानोपलम्भनमपिस्यादिति तत्र तदसिद्धमिति चे न्न। लोकप्रत्यक्षस्य विद्यमानोपलम्भत्वदर्शनात् योगिप्रत्यक्षस्य तद्विपरीतस्वभावकल्पनानौचित्यात्। योगिप्रत्यक्षं विद्यमानोपलम्भनं

प्रत्यक्षत्वादस्मदादिप्रत्यक्षवदित्यनुमानसम्भवा च्च विद्यमानोपलम्भन न्तु सत्संप्रयोगजत्वेन पूर्वोक्तदिशा वसेयम्। तैलधारावदविच्छिन्नस्मृतिसन्तरिरेव भावना साक्षानुभूतविषया भवति धर्मश्च न शब्दातिरिक्तप्रमाणेनानुभूत इति कथं तद्भावना। एवमेव वैशेषिकाभ्युपगतं प्रातिभं ज्ञानं निरसनीयम्। ते हि भावनाप्रकर्षजं योगिज्ञानं धर्ममपिगृह्णातीत्याहुः। अपिच तन्मते अस्मदादिज्ञानमपि क्वचिदनागतविषयकं प्रमाणम् श्वो मे भ्राता गन्तत्यत्रतै दर्शितम् यदाहुः। "नानर्थजं न सन्दिग्धं न वाधविधुरीकृतम् नदुष्टकारणं चेति प्रमाणमिदमिष्यताम्।" क्वचिद्वाधकयोगादस्तु तदप्रमाणता किन्तु यत्रापरेद्यु भ्राता आगत स्तत्र किमुत्तरम्। ननु भाविज्ञानविषयस्य भ्रात्रागमनस्य तदानीमसत्वेना र्थजत्वा भावात्कथं तस्यप्रामाण्यमितिचेदुच्यते। यदीदृशं ज्ञानं भ्रात्रागमनं वर्तमानत्वेन गृह्णीया त्स्यादप्रमाणम् भावित्वेन गृह्णत् ज्ञानं विषयावाधा त्कथं न प्रमा-

णाम् भवतु प्रमाणं तावता पि इन्द्रियार्थसन्निक- र्षजत्वाभावा त्कथं प्रत्यक्षमिति न शङ्क्यम् मनः सन्निकर्षेण तस्य जायमानत्वात्। नच वाह्ये वस्तुनि तस्य स्वातन्त्र्याभावा त्कथमेतत् सुरभि- चन्दनमित्यादौ चाक्षुषविषयचन्दनविशेषणीभू- तगन्धादे र्नासाव्यपारं बिनापि मनसा ग्रहणवत् प्रकृते पि सम्भवात्। नवर्तमानमात्रग्राहित्वं प्रत्यक्षस्येति अस्मदादिप्रातिभज्ञानवद्द भविष्य- ति धर्मे योगिनां प्रत्यक्षं प्रमाणं सम्भवतीति न चोदनैव तत्र प्रमाणमितिसंक्षेपः। तन्न पाणौ कतिवराटकाः सन्तीत्यादाविवाभासस्यापिदर्शने- नाप्रमाणत्वात् न हि क्वचित्काकतालीयन्यायेन विषयावाधदर्शनमात्रेण तज्जातीयज्ञानमात्रस्य प्रामाण्यं कल्पयितुं शक्यम् वहुलं व्यभिचारद- र्शनात्। अतः योगिनामपि प्रातिभं ज्ञानमनागते न प्रमाणं लिङ्गाभासजत्वात् इतिविद्यमानोपल- म्भसाधनौपयिकं सत्संप्रयोगजत्वं व्याख्यातम्। यद्वा धर्मो न प्रत्यक्षः भावित्वाद्द भविष्यद्वृष्ट्या-

दिवदित्यादौ अनागतार्थविषयकयोगिप्रत्यक्षे भविष्यत्वस्य व्यभिचारनिरासाय सत्सम्प्रयोगजत्वविशेषणमुक्तं सूत्रकारेण तथा च योगिनां तादृशप्रत्यक्षे प्रमाणाभावान्न व्यभिचारः। ननु भाविनो धर्मस्याप्रत्यक्षत्वोपपादनेऽपि उत्पन्नस्य तस्य प्रत्यक्षत्वं स्यादेवेति चेन्न। यागादेः फलसाधनरूपेणैव धर्मत्वाङ्गीकारेण यागानुष्ठानसमये भाविनः फलस्यासत्वेन तत्साधनत्वग्रहस्य कर्तुमशक्यतया यागानुष्ठानोत्तरं फलसद्भावदशायां साधनीभूतयागादेः चिरविनष्टतया धर्मिणोऽभावेन तत्साधनत्वग्रहस्य सुतरामशक्यत्वात्। अपूर्वं धर्म इति वादिनां मतेऽपि न तत्प्रत्यक्षमन्यथा प्रत्यक्षप्रमाणपूर्वकत्वापत्त्या तस्य स्वरूपप्रच्युतिरेव स्यात् फलजननशक्तिरेव यागधर्म इति मतेपि प्रत्यक्षं तत्रासम्भवि सर्वशक्तीनामप्रत्यक्षत्वात् तथा च योगिनां प्रत्यक्षं न धर्मविषयकं विद्यमानोपलम्भत्वादप्रत्यक्षत्वादिति सिद्धम्। एवं प्रत्यक्षत्वादित्यपि बोध्यम् यत्तु सदसतोः

सवन्धानर्हतया असतेन्द्रियसंप्रयोगासंभवेन सता संप्रयोग इतिसत्पदोपादानमन्तरापि सामर्थ्यादेव लब्धे तदुपादान मनर्थकम् यदाह "सदित्यसद्व्युदासाय ननियोगा त्संगंस्यते संप्रयोगो हि नियमा त्सत एवोपपद्यते" इति तदसत् सूत्रार्थानवबोधात् नहि अत्र तृतीयातत्पुरुषः किन्तु कर्मधारयः। सं श्वासौ सम्प्रयोगश्चेति तथा च वर्तमानार्थकसच्छब्दोपादानादेवाऽतीता नागतादिविषयकं योगिनां प्रत्यक्षं निराक्रियते नान्यथेति तदुपादानमावश्यकम्। न च सत्सम्प्रयोग इति निमित्तसप्तम्यैव संप्रयोगस्य वर्तमानत्वं लभ्यते अतीतानागतयो र्निमित्तत्वासम्भवात् कार्यनियतपूर्ववर्त्तित्वस्यैव तत्वात्। भिन्नकालिकयो र्निमित्तनैमित्तिकभावाभावात् किं सत्पदोपादानेनेति चे न्न। भविष्यत्संप्रयोगाद्‌ भविष्यदर्थविषयकं योगिज्ञानं जायते इत्येतन्निरासाय तदावश्यकत्वात् अन्यथा अतीते अनागते वेत्यपिभ्रान्तिः स्यात्। सं शब्दः सम्यगर्थः प्रयोग इन्द्रियाणाम-

शेषु व्यापारः तथा च [सम्प्रयोगोपादानं दुष्टप्रयोगवारणाय तेन दुष्टकरणानां शुक्तौ इदं रजतमित्याद्याभासज्ञानजनकानां व्युदासः। सता संप्रयोग इति भवदासव्याख्यायां सम्प्रयोगस्य सकलसम्बन्धपरत्वेन व्याख्यातत्वादाभासे अनुमानादौ चातिव्याप्तिःस्फुटैवेतीन्द्रियव्यापारतयाव्याख्यातं तथा चादुष्टेन्द्रियव्यापाराभावा न्नतत्र दोषलेशः। वौद्धा स्तु सम्प्रयोगशब्दं व्याप्तिपर्यायं जानन्तः श्रोत्रचक्षुषोरप्राप्यकारित्वाल्लक्षणमव्यापकमाहु स्तद तिस्थवीयः चक्षुषः प्राप्यकारित्वात्। ननु अप्राप्यकारि चक्षुः सान्तरग्रहणात् पृथुतरग्रहणा च्च सान्तरस्य विकृष्टदेशस्थितस्य पदार्थस्य ग्रहणा दत एव दूरेग्रामं पश्यामीति प्रत्यय उपपद्यते चक्षुषः प्राप्यकारित्वे तु इदं न संगच्छेत ग्राहकेण चक्षुषा दूरत्वाभावात् यथा समीपस्थितं वस्तु चक्षुः सम्बद्धं तथा दूरस्थमपीति वैलक्षण्यानुपपत्या अप्राप्यकारित्वमेव युज्यते इति चक्षुरप्राप्तिकृत

मेव दूरत्वं तथा च तैरुक्तम् रूपोपलब्धिसंवर्त्तकेन कर्मणा तत्तृष्णापूर्वकेण चक्षुरभिनिर्वृत्तमतो-रूपोपलब्धेः कारणं भवति अस्यार्थः रूपसाक्षात्कारसम्पादकेन तदिच्छापूर्वकानुष्ठितेन प्राक्तन कर्मणा चक्षुरुत्पन्नमतो रूपसाक्षात्कारकारणं। न चालोकसहकृतस्यापि कृष्णसारस्य चक्षुषः दूरस्थेन प्राप्तिरिति सान्तरग्रहणाद् प्राप्यकारि चक्षुः अपरे तु चक्षुरप्राप्यकारि सान्तरग्रहणात्। यन्नैवं तन्नैवं यथाघ्राणम् पृथुतरग्रहणाच्च स्वल्पस्य चक्षुषः महति सेनावनादौ सर्वतः संयोगो न भवितुमर्हति द्रव्याश्रयस्य संयोगस्य परिछिन्नवृत्तिकत्वात् घटाकाशसंयोगवत् दिग्देशग्रहणादपि चक्षुषोऽप्राप्यकारित्वम् प्राप्यकारित्वे तु दिग्देश व्यपदेशो न स्यात् घ्राणादिवत् सन्निकृष्टविप्रकृष्टयो स्तुल्यकालग्रहणाच्च यथा गन्ता दूरं चिरेण अदूरमचिरेण प्राप्नोपि तथा चक्षुषः प्राप्यकारित्वे स्वस्थानाद दूरस्या विलम्बेन दूरस्थस्य विलम्बेन प्राप्तिः स्यात्। तथाच शाखाचन्द्रमसो स्तुल्य-

कालोपलब्धि नं स्यात् नहि समीपस्थे मन्दगति-दूरस्थे शीघ्रगतिरिति कल्पयितुं शक्यते। प्रमाणाभावात् यथोक्तं दिङ्नागेन "सान्तरं ग्रहणं न स्यात् प्राप्तौ ज्ञानेऽधिकस्य च अधिष्ठाना द्बहिर्नाक्षं तच्चिकित्सादियोगतः सत्यपि च वहिर्भावे न शक्तिविषये क्षणो यदि च स्यात्तदापश्ये दप्युन्मील्य निमीलनादिति" सत्संप्रयोगजत्वमेवासिद्धं विषये संप्रयोगाभावादित्याहुस्तन्न सान्तर ग्रहणादि त्यस्य कोऽर्थः। सान्तरस्याप्राप्तस्य ग्रहणं किम्वा सान्तरेण ग्रहणमिति। तत्र नाद्यः अप्राप्य कारि अप्राप्तग्रहणादिति प्रतिज्ञातार्थाविशेषात्। नद्वितीयः सान्तरेण ग्रहणमित्यत्रा न्तरपदार्थानिरुक्तेः आकाशादे रचाक्षुषत्वात् अभावस्य चास्वातन्त्र्यात् रूपवतो द्रव्यस्य व्यवधायकत्वात् नचा न्यागतिरिति रिक्तं वचः सान्तरग्रहणादिति। तस्मात् शरीरापेक्षया निरन्तरं सान्तरं च भवति। यच्छरीरेन्द्रियादिसंवद्धं तन्निरन्तरम् तदसंवद्धं तु सान्तरम् नेन्द्रियप्रात्यप्रातिनिमित्तके ते। यच्छ-

रीयेन्द्रियोभयसंवद्धं त न्निरन्तरं यत्तुशरीरासं-
वद्धं केवलेन्द्रियसंवद्धं त न्निरन्तरमिति । हेत्व-
न्तरयुक्तं सान्तरग्रहणं नाप्राप्यकारित्वे नियाम-
कमिति न चक्षुरप्राप्यकारि यदपि पृथुतरग्रहणा-
दिति तदप्यसंगतं संबन्धमात्रेण ह्रस्वस्य महतो वा
ग्रहणात् शरीरावधिनिमित्तत्वाद्द दिग्देशस्यान्य-
थोपपत्तीः शाखाचन्द्रमसो स्तुल्यकालग्रहणस्य
चानुभ्युपगमादेव निरासः । अतिसूक्ष्मतया क्षण
भेदस्यानाकलनं उत्पलपत्रशतव्यतिभेदनवदिति
मिथ्याप्रत्यय इतिविस्तर स्त्वन्यत्र द्रष्टव्यः । तस्मा
दप्राप्यकारि चक्षुरिन्द्रियत्वाद्द घ्राणादिवत् कस्य
चिदिन्द्रियस्य प्राप्यकारित्वानभ्युपगमे तु एव
मनुमानम् । सर्वमिन्द्रियं प्राप्यकारि करणत्वात्
वास्यादिवदिति वोध्यम् । चक्षुः प्राप्यकारि इन्द्रिय
त्वात्त्वगादिवत् ननु कृष्णसारस्य कर्णशष्कुल्य-
वच्छिन्नाकाशस्य च शरीरे एव दर्शनाद्द विषय-
देशप्राप्त्यनुमानं दृष्टविरुद्धत्वा न्नोत्पत्तुमर्हति
इति चेन्न आहंकारिकत्वादिन्द्रियाणा मतिसूक्ष्म

तया दर्शनानर्हत्वेन तादृशानुमानस्य प्रत्यक्ष विरुद्धत्वाभावात् इति सांख्याः। ननु गोलकादी नामेवेन्द्रियत्वं तत्रैव चिकित्सयात दुपकारदर्शनादिति न अधिष्ठेयस्येन्द्रियस्योपाच्चिकीर्षयाधिष्ठानोपचारकरणात् अत एव नेत्रोपकाराय चरणोपचारः संगच्छते। देशान्तरोपचारा द्देशान्तरे उपकारो न दृष्ट विरुद्ध इति भावः। तथाचाधिष्ठानावच्छिन्नस्यैवेन्द्रियस्य दीपप्रभावद्वहिर्गमनं सूपपादम्। शुद्धस्नेहदानेन प्रभागतातिशयवद धिष्ठानोपचारेण विषयगतेरस्येन्द्रियमरीचेः उपकारः सम्भवति। दीपप्रभावदेव निरन्तराधिक ग्रहणमपि समर्थनीयम्। यथास्वल्पो पिदीपः प्रभा द्वारा सेनावनादि स्वतोधिकपरिमाणं प्रकाशयति एवं लध्वपि गोलकं स्वमयूख सन्तानद्वारा स्वाधिक परिमाणं पश्यतीति किमत्रा नुपपन्नम्। नच वृत्तिनिर्गमनाङ्गीकारे सुदूरमपि गत्वा किन्नार्थं प्रकाशयति इति शंक्यम्। कार्यगम्यत्वा त्तदुपपत्तेः। दीपप्रभावत् ग्रहादिप्रत्यक्षे दूरगमनस्येष्टत्वाच्च।

प्रत्युत त्वन्मते एव एष दोषः इन्द्रियाणाम सं- बद्धानामेवार्थप्रकाशकत्वाङ्गीकाराद् दूरसूक्ष्मव्यव- हितविप्रकृष्टार्थानाम संबद्धत्वाविशेषात् अखिल प्रकाशापत्तेः। अधिष्ठाननाशे पि विषयगतेनेन्द्रि- येणार्थप्रकाशोद्भावनं तु मन्दमतेरेव शोभते। यथाप्रदीपप्रणाशे तत्प्रभा प्रासादोदरगता पि नश्यति तद्वदिन्द्रियनाशे तत्प्रभापीति न कश्चिद्वि शेषः। प्रदीपविधाने तद्रश्मिसंकोचाद् वहिर्देशा- प्रकाशवदिन्द्रियपिधाने ऽपि तद्रश्मिसंकोचा- त्तद्वारार्थोपनयाभावा न्न विषयप्रकाश इति समः समाधिः। नच तर्हि अधिष्ठानान्तर्गत मेवेन्द्रिय- मिति लोकानुभवविरोध इति वाच्यम्। सर्वगत- स्यात्मनः शरीरपरिच्छिन्नानुभवव देतस्यापि भ्र- मत्वाङ्गीकारात्। अतः शरीरपेक्षया गोलकापेक्षया वा विच्छिन्ने विच्छेदबुद्धिः शब्दे प्ययमेव न्यायः सांख्यानामिति। स्वमते शब्दस्य विभुद्रव्यत्वात् श्रोत्रदेशे एव तद्ग्रहणम् इन्द्रियाणामहंकारि- कत्वे तत्वान्तरत्वे वा न प्रमाणम्। किन्तु भौति-

कत्वमेवैषाम् तथा हि रूपप्रत्यक्षहेतुत्वादालोकवत्तैजसं चक्षुः दीपप्रभावदेव ह्रस्वदीर्घग्रहणमिति न शङ्कालेशः। एवं घ्राणादीनां भौतिकत्वं स्पष्टमन्यत्रेति नेह प्रतन्यते। श्रोत्रं दिङ्मयमिति शब्दाधिकरणे व्यक्तीभविष्यति ननु सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्मेति प्रत्यक्षलक्षणसूत्रे अव्यवहितान्वयानुरोधेन पुरुषस्य सम्प्रयोगे सति इन्द्रियाणां बुद्धिजन्मेत्यर्थः प्रतीयते। एवंचपुरुषसम्प्रयोगस्य प्रत्यक्षहेतुत्व मिन्द्रियेषु ज्ञानोत्पादश्चेतदुभयं न संगच्छते नित्यस्य विभोः पुरुषस्य सर्वदा सर्वविषयसम्प्रयोगा दव्यावर्तकतया विशेषणत्वासम्भवात् इन्द्रियाणा मपुनर चेतनतया तत्र बुद्ध्युत्पतेः शङ्कितुमशक्यत्वादित्यत आह सतीति। तथा च सतीन्द्रियार्थसम्प्रयोगे पुरुषस्य या बुद्धिरितिव्यवहितान्वय एव स्वीकार्यः ननु तथापि अहं गौर इत्यादिप्रतीतिसाक्षिकस्य लोकप्रसिद्धस्य शरीरस्य पुरुषपदेनग्रहणे तस्या चेतनतया तत्र बुद्धेरुत्पादासम्भवेन शङ्का तद-

वस्थैव चिद्रूपस्यात्मनो ग्रहणे तु ज्ञानजन्मना तस्य विकारित्वापत्तौ क्षीरादिवदनित्यत्वापत्तिः। तथा चोक्तं "बुद्धिजन्मनि पुंस श्च विकृति र्यद्यनित्यता। अथा ऽविकृति रात्मा यं प्रमा तेति न युज्यते" तथा वर्षातपाभ्यां किं व्योम्न श्चर्मण्यस्ति तयोः फलम् चर्मोपम श्चे त्सो ऽनित्यः खतुल्यश्चे दसत्समः इति चेन्न पुरुषस्य वक्ष्यमाणत्वात् ज्ञानक्रियादिविकारेणानित्यत्वस्य दृष्टान्ताभावेन वक्तुमशक्यत्वात्। प्रत्युत सुवर्णादि दृष्टान्तेन विकाराभ्युपगमेपि अनित्यत्वाभावः सुपरिहरः। बुद्धिजन्मेति किं बुद्धेरतिरिक्तं जन्म किम्वा अनतिरिक्तम् आद्ये वैशेषिकवत्कारणे कार्यसमवाय एव वाच्यः। तस्य नित्यतयेन्द्रियसम्प्रयोगजत्वाभावेना प्रत्यक्षत्वापत्तिः। अन्त्ये तदुपादानं पुनरुक्तमिति चे न्न जायमानतात्पर्येणा त्र जन्मशब्दप्रयोगात् जायमानाबुद्धिरित्यर्थः। ननू त्पत्तेः बुद्धिस्वरूपत्वे तदुपादानमफलमिति पुनः स एवाक्षेपः तदतिरिक्तत्वे तु सा

नित्या अनित्या वा आद्ये तन्नित्यतया बुद्धेर्नित्यत्वापत्तौ सत्सम्प्रयोगहेतुकत्वोपादानमसंगतम् स्यात् अन्त्ये तु तस्या अपि उत्पत्यन्तरकल्पनाप्रसक्तौ अनवस्थाप्रसङ्ग इति चेन्न कारणावस्थाविशेषरूपाया स्तस्याः स्वीकारेणादोषात् । यादृशकारणावस्थानन्तरं कार्योत्पादः तादृशोकारणावस्थोत्पत्तिरिति न तस्यानित्यत्वं मिति सत्सम्प्रयोगजत्वसिद्धिः । नन्वस्थिरत्वाद्बुद्धे र्व्यापारान्तरासत्वे नार्थप्रकाशनरूपकार्यकारणत्वं न संभवतोति चेन्न जन्मरूपव्यापारस्य सत्वेन तस्या निर्व्यापारत्वाभावात् करणत्वं प्रमाणत्वं च निर्वाधम् जायमानविशेषणा द्भूतादिव्यावृत्तिः तेन सत्सम्प्रयोगहेतुकभूतादि बुद्धे र्न प्रत्यक्षत्वम् वशेषिकमतानुसारेण कारण समवायात्मकोत्पत्तेरभिव्यक्तिस्वीकारेणातद्वारैव प्रमाणप्रमेयफलभावः शक्योपपादनः ।*

* बुद्धि र्वाजन्म वा सन्निकर्षो वेति नैषां कस्यचिदवधारणार्थं मेतत्सूत्रम् । सति इन्द्रियार्थसम्प्रयोगे ना-

सति इत्येतावदवधार्य्यते अनेकस्मि न्नवधार्यमाणे भिद्येत वाक्यम्।

बुद्धि र्वा सन्निकर्षो वेति भाष्यम्। अयमभि-प्रायः। बुद्धे र्जन्मनो तिरिक्तत्वमिति पक्षे बुद्ध्यु-पादानीभूतकारणसमवायस्य अनतिरिक्तत्वमिति पक्षे जायमानाया बुद्धेः सन्निकर्षस्य विषयेन्द्रि-यसंवन्धादे र्वा एषां मध्ये कस्यचिदवधारणार्थ-मेत त्सूत्रं न एतस्यैव प्रत्यक्षत्वं नापरस्येति प्र-माणत्वेनावधारणे वाक्यभेदापत्तेः। किन्तु धर्म-म्प्रत्यनिमित्तत्वमेवोच्यते। प्रत्यक्षत्वेनाभिम-तस्य सर्वस्य धर्मम्प्रति निमित्तत्वं न सम्भवति विद्यमानोपलंभनत्वात्प्रत्यक्षस्य धर्मस्त्र च भा-व्यत्वादित्यर्थः सूत्रे बुद्धिरित्युपलक्षणं न सत्सम्प्र-योगजबुद्धिमात्रस्य प्रत्यक्ष प्रमाणत्वम्। किन्तु इन्द्रिय संयोगादि रपि प्रत्यक्षं प्रमाणं तथा हि अर्थेन्द्रियसंयोगस्य इन्द्रियमनः संयोगस्य आ-त्ममनः संयोगस्य। आत्मा मनसा संप्रयुज्यते मन इन्द्रियेण इन्द्रियमर्थेनेत्येतत्त्रितय संयोगस्य

च मतभेदेन प्रमाणत्वं एतज्जनितस्य ज्ञानस्य फल भावः। यथापाककरणानां काष्ठानां पाकौपायिक- क्रियाश्रयत्वा त्करणत्वं तद्व्यापार साध्यत्वाच्चो- दनस्य फलत्वं तथा प्रमेयघटादिज्ञानोत्पत्यनुकूल व्यापाराश्रयत्वादेषां कारणत्वं प्रमेयज्ञानस्य च फलत्वं करणत्वादेव चैषां प्रमाणत्वम्। नन्विन्द्रि- यादीनाम प्रत्यक्षत्वा न्नैषां व्यापारवत्त्वं ज्ञातुं शक्यमितिचेन्न स्वप्नादौ असतीन्द्रियव्यापारे ज्ञानानुत्पादा त्सति चोन्मीलनादौ ज्ञानोदय- दर्शनादन्वयव्यतिरेकाभ्यां व्यापारवत्वस्यावगन्तुं शक्यत्वात् न चेन्द्रियार्थसन्निकर्षस्य प्रमाणत्वे स्पर्शवद्द्रव्यनिष्ठे रूपेऽपित्वक्संयुक्त स्पर्शवद्द्रव्य- समवायस्य सत्वा त्स्पर्शस्येव रूपस्यापि त्वाच- प्रत्यक्षापत्ति रितिवाच्यम् अर्थे तदिन्द्रियग्राह्य- योग्यातताया निवेशात् तथा च योग्यार्थेन्द्रिय स- न्निकर्षस्यैव हेतुत्वम् रूपे त्वक् योग्यताया विरह त्ताहशसन्निकर्षस्य सत्वेपि न क्षतिः। अत- एवेन्द्रियादि प्रमा लक्षणेऽपि रूपादौ नाति-

व्याप्तिः। अन्यथा तादृश संनिकर्षस्य रूपे सत्वात्
त्वाच प्रत्यक्षापत्ति र्दुवारा स्यात्। यत्तु एतद्दोष-
वारणाय ज्ञानमेव प्रमाणम् वाच्यमित्युक्तं तन्न
प्रमाणनिष्पत्ताविव फलनिष्पत्तावपि विषये तदि-
न्द्रियग्राह्ययोग्यताया निवेशाद् रूपे त्वगिन्द्रिय-
योग्यताया विरहेणैव क्षतिविरहात्। अन्यथा इ-
न्द्रियार्थ सम्बन्धस्य प्रमा करणत्व पक्षे प्ययं दोषः
स्यात्। पूर्वोक्तरीत्या त्वक् सम्बन्धस्य रूपे सत्वात्।
ननु प्रत्यक्षे अक्षाणा मिवार्थस्यापि हेतुत्वात्त
दुपभयनिमित्तकस्यान्यतरेण व्यपदेश सम्भवेऽपि
सत्संप्रयोग इति सूत्रे प्रत्यक्षशब्दवत्प्रत्यर्थस्या-
पि व्यपदेशः किं न सूत्रकृताकृतः। अन्यतरस्यैव
प्रयोगे वीजाभावादिति चेन्न अर्थस्य निखिलज्ञान
साधारणतयेन्द्रियस्य च तदसाधारणकारणत्वात्
असाधारण कारण हेतुकश्च व्यपदेशो न्याय्य इति
प्रत्यक्षशब्देन व्यपदेशः अथवा उभयो र्जायमानो
लभतेऽन्यतरतो व्यपदेशमिति न्यायेन प्रत्यक्ष-
प्रत्यर्थशब्दयोः प्रसक्तावपि प्रत्यक्षशब्देनैव सूत्रे

व्यवहारः नहि अशेषपर्यायशब्देनैकदा व्यवहारो युक्तियुक्तः। अर्थबोधमात्रप्रयोजनपरत्वाच्छब्दप्रयोगस्य एकेन शब्देनार्थे बोधिते प्रयोजनाभावादेव न पर्य्यायान्तरप्रयोगप्रसङ्गः। यथा डित्थडवित्थयो मातरं डित्थमातेति व्यपदिशन्नाभियुज्यते डवित्थमातेति किं नोच्यते तद्वत्प्रकृतेऽपि प्रत्यक्षप्रत्यर्थशब्दयोः प्रसक्तावपि प्रत्यक्षशब्देनैव व्यवहारे नाभियोगः कर्तुं शक्यते प्रत्यर्थशब्देन व्यवहारः सूत्रकृता किन्न कृत इति। अथवा प्रत्यक्षोपाधिनिबन्धनः प्रत्यक्षशब्दः तत्रासाधारणमिन्द्रियमेव नार्थस्तस्यज्ञानमात्रसाधारण्यादित्यभिप्रायेण प्रत्यक्षपदप्रयोग इति। तत्रेन्द्रियप्रमाणपक्षे प्रमाणफलयोर्विषयैक्यं स्पष्टमेव इन्द्रियाणि अर्थे व्याप्रियन्ते ज्ञानं च तं विषयीकरोति। नचात्ममनः संयोगस्यात्मसमवेतत्वेन ज्ञानस्य च विषयाश्रितत्वेन वैयधिकरण्यादात्ममनः सन्निकर्षप्रमाणपक्षो न युक्त इति वाच्यम्। ज्ञानस्य तादृशसंयोगस्य चात्मसमवेतत्वेन

वयधिकरण्याभावात् किन्तु कारणान्तराऽन्वया एकार्थसमवायित्वेन प्रकृष्टत्वादस्यैव प्रमाणत्वं न कारणान्तरस्येति। ननु तथापि इन्द्रियमनः संयोगादेः समानविषयत्वाभावा त्कथं प्रमाणत्व-मिति चेदित्थम्। फलकरणभावः। समानाधि-करणानामेवेति न नियमः अन्यथा पाक काष्ठयोः फलकरणभावो न स्यात् तयोर्वैयधिकरण्यस्य स्पष्ट त्वात् पाको हि तण्डुलमाश्रते काष्ठं च चुल्ही-मतो भिन्नाधिकरणयोरपिफलकरणभावः स्वो-कार्यः। न च काष्ठानि तण्डुले व्याप्रियन्ते पाक श्च तत्रैवेति व्यापारद्वारा पाककाष्ठयो रस्त्येव सामा-नाधिकरण्यमेवं तर्हीन्द्रियमनः संयोगादेरपि व्या पारद्वारासामानाधिकरण्यं न केनापि वारितमिति सन्तोष्टव्यमिति। इन्द्रियादि प्रमाणपक्षे फलं विषयैक्यं च समर्थितम् इदानीं ज्ञानप्रमाणपक्षे तदुपपाद्यते विशेष्यज्ञानं विशेषणज्ञानपूर्वकं भव-ति विशेष्यज्ञानं फलं विशेषण ज्ञानं प्रमाणं व्या-पार द्वारा विशेषणज्ञानं विशेष्ये वर्तते विशेष्यज्ञा-

र्मं तु तत्र विषयत्वेनेति-तयोः समानाधिकरण्यम्। यदा तु विशेषणमात्र प्रमिति स्तदा अनिश्चयात्मकम् पूर्वमालोचनात्मकं ज्ञानं जायते तदुत्तरं निश्चयात्मकं ज्ञानं जायते इति लोक प्रसिद्धानुभवेन निश्चयात्मकं ज्ञानं फलं अनिश्चयात्मकं प्रमाण मिति। यदा तु आलोचनमात्रं ज्ञानं जायते न तदुत्तरं निश्चयात्मकं ज्ञानं तदा अर्थप्रकाशसद्भावेऽपि उपेक्षाज्ञानवदालोचनस्य न प्रमाणत्वमिति न तत्र फलप्रमाणभावः। एवं यदाविशेष्यज्ञानमात्रं जायते न विशेषणादिज्ञानं तदा हानोपादानोपेक्षाज्ञानानि फलम्। उपकारादिस्मरणमेव वा फलमित्यत्राविशिष्यनाग्रहः। यत्तु बौद्ध विषयैक्यसमर्थनाय ज्ञानस्यैवेकस्य फल प्रमाणभावमाचक्षते। तदसत्। भेदे सत्येव फलकरणभावव्यवहारस्य लोके दर्शनेन तद्विरुद्धकल्पनायां प्रमाणाभावात्। नच भेदवद् विषयैक्यस्यापि लोकव्यवहारसिद्धतया सत्यपि भेदे तदाश्रययो लोकविरोध स्तदवस्थ

एवेत्यगत्या विषयैक्ये एव त दादरः समुचित अतएव खदिरव्यापारेण पलाशो नच्छिदे त्युपपद्यते इतिवाच्यम् । विनिगमका भावेन स्वरूपभेदे एव तत्कल्पनाया युक्तत्वात् । अतएव परशुना छिद्रेति लोकव्यवहारो न्यथा परशुच्छिदेत्यपि व्यवहारः स्यात् तथाच विषयैक्यस्वरूपभेदयो रन्यतराश्रयणे इन्द्रियादि प्रामाण्यरक्षणाय स्वरूपभेदस्वीकार एवोचितः । किञ्च यत्र परशुर्व्याप्रियते तत्रैवेच्छिदेति व्यापारद्वारा विषयैक्य समर्थना न्नातिप्रसक्तिरिति प्रमाण व्यवस्थापि सूपपद्यते अन्यथा एकस्यौपचारिकत्वंस्यादिति नैयायिकाः यदपि विषयाकार एवास्य प्रमाणं तेन मीयते स्वसंवित्तिः फलं चास्य तद्वयेहार्थनिश्चयः । अस्यार्थः इदं नीलमिदं पीतमित्यादि ज्ञानं सर्वानुभवसिद्धम् तत्र नीलादे रर्थस्य ज्ञानेन प्रकाशो न भवितुमर्हति प्रकाश्यप्रकाशकयो वैयधिकरण्यात् ज्ञानमान्तरं विषयो नीलादि र्वाह्य इति विषयप्रत्यक्षाय नीलादि विषयः ज्ञाने

स्वाकारमर्पयति विषयारोपितं स्वाकारं विज्ञानं गृह्णाति अत एव नीलाकारज्ञानमिति व्यवहारः। अन्यथा ज्ञानस्य निराकारतया विषयाकारव्यवहारो दुर्घटः स्यात्। एवं च नीलादिविषयारोपितो विज्ञानाकारो ऽर्थव्यवस्थापकत्वा त्प्रमाणं नीलादिज्ञानं च प्रमितिः नीलादिग्राह्यविषयः प्रमेयः तथा च स्वस्वाकारनिवन्धनः प्रमाणप्रमितिव्यवहार एकस्मिन् ज्ञाने उपपद्यते इति श्लोकार्थः अस्य ज्ञानस्य विषयाकारो विषयारोपिताकारः प्रमाणं यतः तेन विषयाकारेण नीलादिविषयः प्रमीयते ऽत स्तत्प्रमाणं नीलादिविषयसंवित्तिरस्य प्रमाणस्य फलम् तद्वये प्रमाणसंवित्तिद्वये अर्थनिश्चयः इतिसौगता आहु स्तदपि न संवित्तिरूपफलस्य ज्ञानविषयत्वेन प्रमाणस्य विषयाकारस्य नीलादिप्रमेयविषयकत्वेन फलप्रमाणयोर्विषयभेदापातात् स्वविषयकसम्वित्तेः शून्यवादे निराकरिष्यमाणत्वा च्च निखिलवाह्यपदार्थापलापिनो योगाचारा स्तु विनैव वाह्यपदार्थं स्वप्नादौ

यथा अनादिविश्ववासनावशाद् विविधविषया-
कारं ज्ञानं जायते तथा जाग्रदवस्थायामपि भिन्ना-
कारं ज्ञानं जायते इति न ज्ञानाकारभेदाय बाह्य-
विषयस्वीकारावश्यकतेति वाह्यविषयं विनैव वास-
नावशा ज्जायमाननीलपीतादि विषयाकारः प्रमेयम्
स्वाकारः प्रमाणं स्वसंवित्तिः फलम् यथाहुः "यदा-
भासं प्रमेयं तत्प्रमाणफलते पुनः ग्राहकाकारसंवि-
त्यो स्त्रयं नातः पृथक् कृतम्" इति तदसत् प्रमा-
णत्वेनाभिमतो यो ज्ञानाकारः स संवित्तेरन्यो न
वा आद्ये तदतिरिक्तपदार्थानभ्युपगमव्याघातः
विज्ञानातिरिक्तवस्तुनो ऽभावइति हि तेषां सि-
द्धान्तः। नातः पृथगित्युक्तिरसंगता च तद्वत्प-
दार्थान्तराभ्युपगमापत्ति श्च। अन्त्ये संवित्ति-
स्वाकारयोरभेदात्कथं फलप्रमाणभावव्यवस्था
किंच स्वाकारो ज्ञातः प्रमाणमज्ञातो वा आद्ये
न तावत्स्वयमात्मानं गृह्णाति एकत्र कर्तृकर्मवि-
रोधात् नहि यस्यां क्रियायां य त्कर्म तदेव तस्यां
क्रियायां कर्तृ इति संभवति स्वस्कन्धारोहणापत्तेः।

ज्ञानान्तरगम्यत्वकल्पनायां ज्ञानान्तरस्याप्यज्ञातस्य परिच्छेदकत्वासम्भवादेकत्र कर्तृकर्मविरोधेन स्वपरिच्छेदकत्वस्याप्यभावेन तत्परिच्छेदाय पुनर्ज्ञानान्तरकल्पनाया मनवस्थाधौव्यम्। किंच न त्वन्मते ज्ञान्तरेण ज्ञानग्रहणं सम्भवति ज्ञानस्य स्वाकारमात्रग्राहित्वनियमाङ्गीकारात् नच ज्ञानान्तरं ज्ञानान्तरस्याकारः सम्भवति इति प्रमाणस्वरूपासिद्धया प्रमेयस्य विषयाकारस्याप्यसिद्धिरेव ननु यथा भवन्मते ग्राहकाभावा त्सुखादीनां स्वसंवेद्यत्वं एवं मन्मते स्वाकारस्य स्वसंवेद्यत्वमेवेष्टमिति ग्राहकान्तरं विनापि तत्सिद्धिरिति चेन्न अस्मन्मते सुखादेः स्वसंवेद्यत्वानभ्युपगमात्। सुखं हि समवायेनात्मनि तत्र स्वसंयुक्तसमवायेन संनिकर्षेण मनसैव तद्गृह्यते इति न तत्सिद्धौ प्रमाणाभावो येन स्वसंवेद्यत्वकल्पना तत्र स्यात् इति। ननु वेदान्तिनां मते सामान्यविषयकमेव प्रत्यक्षं दृष्टस्वलक्षणसामान्यमिति वादिनां सौगतानां मते विशेषविषयकमेव प्रत्यक्ष-

मिति ग्राह्यविशेषस्य व्यवस्थितत्वादत्र सूत्रे तदनुपादाना ल्लक्षणंन्यूनमिति चेन्न ग्राह्यविशेषनिवेशप्रयोजनविरहेणात्र तदनुपादानात् । विशेषः सामान्यं वा यदि योग्यमिन्द्रयसिद्धं स्या त्तदा प्रत्यक्षमन्यथातुनेत्येतावन्मात्रेणाभीष्टसिद्धौ ग्राह्यविशेषप्रवेशस्यानौचित्यात् इति । सौगतानां मते कल्पनापोढ़मभ्रान्तं प्रत्यक्षं तच्च तुर्विधम् इन्द्रियजं । इन्द्रियजसमनन्तरप्रत्ययोद्भवं मानसं सर्वचित्तचैत्यानात्मसंवेदनं । योगिज्ञानं च भावनावलजं सर्वविषयकं तथा च योगिज्ञानस्य सर्वविषयकत्वे धर्मादि विषयकत्वमावश्यकमिति न प्रत्यक्षमात्रस्य धर्मप्रत्यनिमित्तत्वमिति शङ्कापिशाची तु पूर्वमेवनिरस्तेति नेह उत्तरान्तरमर्हति भावनावलजस्य ज्ञानस्य स्मरणात्मकतया प्रमाणत्वाभावेन प्रत्यक्षत्वस्य शङ्कितुमप्यशक्यत्वात् । साध्यसाधनेतिकर्तव्यताकलापज्ञानगम्यधर्मतायाः कल्पनापोढरूपनिर्विकल्पकज्ञानग्राह्यत्वासंम्भवाच्चे तिदिक् ॥ ननु माभूत्प्रत्यक्षगम्यो धर्मः ।

अनुमानादिगम्यः किं न्नेष्यत इत्यत आह।

* भा० प्रत्यक्षपूर्वकत्वाच्चानुमानोपमानार्थापत्तीनामप्य
कारणत्वमिति

प्रत्यक्षपूर्वकत्वा च्चानुमानेति। अयम्भावः प्रत्यक्षेण लिङ्गलिङ्गिनो रव्यभिचरितसहचारग्रहे लिङ्गेन पक्षे लिङ्गिज्ञानं जायते तदेवानुमानमुच्यते प्रकृते धर्मस्या प्रत्यक्षत्वा त्कस्यचि ल्लिङ्गस्यापित्त्राभावात् केन कस्य कुत्र सम्बन्धग्रहः स्यादिति प्रत्यक्षपूर्वकत्वादेषां न धर्मे निमित्तता इति भावः। अत्र केचित् प्रत्यक्षं तावद्द्विविधं निर्विकल्पकं सविकल्पकं च पूर्वं प्रमाणमुत्तरमाभासः। तथाहि पूर्वं हि निर्विकल्पकं अनेकाकारं वस्तुसम्मुग्धं गृह्णाति तत्र नामजात्यादिविवेको न भवति बालमूकादिविज्ञानसदृशं बालो यथा अपरिचितं तत्स्वभावत्वा त्केवलमिदं किञ्चिदस्तीत्येव जानाति विशिष्य वक्तुं न शक्नोति तथा धीमतामपि प्रथमोपजातं निर्विकल्पात्मकं ज्ञानं भवति इति लोकानुभवः। इदमेव प्रमाणं नामजात्यादि

विकल्पाभावात् एतदनन्तरं सविकल्पकं ज्ञानं जायते तच्च जातिद्रव्यगुणक्रियानामभिर्भेदेन-निर्विकल्पकगृहीतं वस्तु विकल्पयन्ति विविच्य गृह्णाति गौरयं शुक्लो यम् दण्ड्ययं गच्छत्ययं डित्थो यमिति गृहीते वस्तुनि नामादि विकल्प-यति नायं विकल्पः नामजात्यादिस्मरणं बिना सम्भवति नच स्मरणजनन सामर्थ्य मर्थस्ये-न्द्रियस्य वा सम्भवति इतिस्मृत्याकृष्टनाम जात्यादिविकल्पादि नामप्रमाणमेवेति एवं च यत्प्रत्यक्षं प्रमाणं निर्विकल्पकं तत्पूर्वक-मनुमानादि न संभवति लिङ्गलिङ्गिनोः संब-न्धस्य तेन ग्रहणा संभवात्। इदं लिङ्गं इदं लिङ्गि अयमनयोः सम्बन्ध इति विशिष्ट ग्रहणो तस्य निर्विकल्पकत्वमेव न स्यात्। यत्पू र्वक मनुमानं। तत्सविकल्पकं प्रमाणमेव न भवतीति कथमुच्यते प्रत्यक्षपूर्वक त्वादनुमानादि न धर्मे निमित्तम्। एवं गा सदृशो गवय इति श्रुतारण्यकवाक्यो वनं गतः गवयं दृष्ट्वा गो-

सदृशो गवय इति वाक्यं स्मरति गोसदृश-
तया गवयं विकल्प्य पश्चात्सादृशसंबन्धेन स्मृ-
तायां गवि गवयसादृश्यज्ञानमुपमानमिति नैत-
दपि निर्विकल्पक पूर्वकं भवितुमर्हतिनामजा-
त्यादि विकल्पात्। उपपाद्यान्यथा नुपपत्या
उपपादककल्पनारूपार्थपत्तिस्तु प्रत्यक्षागोचरेर्थे
प्रवर्त्तमाना न प्रत्यक्षपूर्विका नहि प्रत्यक्षगोचरेर्थे
अर्थापत्तिः प्रमाणम् यथा वह्नौदाहानुकूला शक्तिः
न प्रत्यक्षेण प्रमातु शक्यते इति तत्रार्थापत्ति
रेव प्रमाणं यदि दाहानुकूलाशक्ति वंह्नौ न स्या-
त्तदा ततः दाहो नस्यादिति दाहान्यथा नुपपत्या
सा शक्ति वंह्नौ इति नार्थापत्तेः प्रत्यक्षपूर्वकत्वं
ननु शक्तेरप्रत्यक्षत्वेऽपि तदुपपादकदाहस्य प्रत्य-
क्षतया प्रत्यक्ष पूर्वकत्वमेवार्थापत्तावितिचेन्न।
अनुपपद्यमानार्थ विकल्पेनैवग्रहणा त्तस्य च प्रत्य-
क्षत्व निरासादेव नास्याः प्रत्यक्षपूर्वकत्वम् इति
किंच यत्रदेशान्तर प्राप्त्या सूर्यगतिरनुमीयते
तया च गति कारणं तत्र गतिकरणानुमानं न

प्रत्यक्षपूर्वकम् तद्गते ऽप्रत्यक्षत्वादिति न द्वितीयानुमानस्य प्रत्यक्षपूर्बकत्व मित्यनयैव रीत्याप्रत्यक्षं बिनापि धर्मानुमानं स्यादिति ननु सूर्यस्य देशान्तरप्राप्ति र्न प्रत्यक्षेति कथमनया तद्गते ऽनुमानम् । देशान्तरं हि आकाशो वा दिग्वा तदुभयम प्रत्यक्षम् । नच प्राकारा-न्तरमस्तीत्येतदुदाहरणमसंगतमितिचेत्सत्यम् । नादित्यस्य देशान्तरप्राप्तिः प्रत्यक्षा किन्तु अनुमीयते तथाहि देशान्तरप्राप्तिमानादित्यः द्रव्यत्वे सति क्षयवृद्धि प्रत्यया विषयत्वे च प्राङ्मुखोपलभ्यत्वे च तदभिमुखदेशसम्बन्धाद-नुत्पन्न पादविहारस्य परिवृत्य तत्प्रत्ययविषय-त्वात् मणयांदावेत त्सर्वमस्ति सच देशान्तर-प्राप्तिमान् एवं चादित्यः तस्माद्देशान्तर प्राप्ति-मान् । पुरस्थित वृक्षादौ सोयं वृक्ष इति प्रत्य-भिज्ञाविषय त्वात्तत्रापि व्याप्ति परिहाराय परि-वृत्येति । प्रत्यभिज्ञाविषयत्वस्य तत्रातिव्याप्ति परिहाराय परिवृत्येति । प्रत्यभिज्ञाविषयत्वस्य-

गुणादावपि सत्वात्। तस्य च क्रियाकत्वादति व्याप्तिरतः। द्रव्यत्वे सतीत्युक्तम्। तथात्र क्रियानाकात्वादति व्याप्तिरतः। द्रव्यत्वे सतीत्युक्त तथा च तस्य द्रव्यत्वाभावान्नाति व्याप्तिः परितः प्रकाशशालिनः प्रदीपस्थ परिवृत्यापि सोऽयं प्रदीप इति प्रत्यभिज्ञाविषयत्वात् द्रव्यत्वाच्चात्र व्यभिचारःस्यादित्येतन्निवृत्यर्थं त्वयविद्धिप्रत्ययाविषयत्वेसतीति विशेषणमुपात्तं तथापि पृष्ठास्थितकुचादौ व्यभिचारस्यादिति तद्वारणाय प्राङ्मुखोपलभ्यत्वेसतीति विशेषणं कुरूपस्य प्राङ्मुखोपलभ्यत्वाभावा न्नदोषः उपलभ्यत्वेनोपग्धिकर्मता विवक्षिता साचातीता गृह्यते न वर्तमाना अन्यथा पूर्वापराक्षपारपारीणे न हिमगिरिणाव्यभिचारः स्यात् यद्यपि हिमगिरि पुरो निरीक्ष पश्चा त्परावृत्य तमेव निरिक्षमाणस्योपलब्धिकमना तत्रानीतैवेति न दोषपरिहार स्तथापि पुरुषान्तरस्य तथैव वर्तमानस्य पूर्वाभिमुखस्योपलभ्यकर्मभावः स्तत्र वर्तमान एव

मातण्डमण्डलन्तु अस्ताचलचूडावलम्बि न प्राच्यां कस्यचिदुपलम्भगोचर इति वैषम्यं तथापि दृष्टैव पुरोवस्थितस्य पश्चिमाभिमुखस्य प्रासादस्य स्वयमुपनिपत्य पृष्ठतो भवति तदोक्तलक्षणस्य हेतो रस्ति व्यभिचार स्तन्निवृत्यर्थ मनुत्पन्नपादविहारस्येति विशेषणम् तदभिमुखदेशसंवन्धादिति ल्यप् लोपे पञ्चमी स्वाभिमुखदेश मुद्दिश्य अनुत्पन्नः पादविहारो यस्येति स तथोक्तः तमुद्दिश्य खल्वयं पद्भ्यां संचरमाणः प्रासादस्य पृष्ठतो भवतीति भावः देशान्तरप्राप्तौ साधनान्तरमपि न्यायवार्तिके स्पष्टम् एवं रूपेण स्पर्शानुमानं शिंशपात्वेन श्रुतेन वृक्षत्वानुमानमित्यादि सामान्यतो दृष्टेन संगृहीतं वेदितव्यमिति न्यायवार्तिकतात्पर्यटीकायां स्पष्टम् । एवंचानुमितदेशान्तरप्राप्तया सूर्यगत्यनुमानस्य प्रत्यक्षपूर्वकत्वाभावेन अनुमानमात्रस्य प्रत्यक्षपूर्वकत्वायोगेन भविष्यत्यपि धर्मे अप्रत्यक्षपूर्वकमनुमानं सम्भवत्येव ।

किञ्च यदि प्रत्यक्षविषयस्यैवानुमेयत्वं तदा प्रत्यक्षाधिगत ग्राहकत्वेनानुमानस्यानुवादकतया प्रामाण्यमेव न स्यात् नच धारावाहिकज्ञानवद् पूर्वतत्तत्क्षणविषयकतया प्रामाण्यसमर्थनं युज्यते तथासति तत्तत्क्षणानां पूर्वप्रत्यक्षाविषयतया तदनुमाने प्रत्यक्षपूर्वकत्वनियमस्य त्यागप्रसङ्गात् अथ साध्ये न प्रत्यक्षपूर्वकत्वं विवक्ष्यते अपि तु हेतौ तथाच कस्मिंश्चिद्धेतौ प्रत्यक्षे इति पूर्वोक्तस्थले नानुपपत्ति रिति चेन्मैवम् धर्मस्य भविष्यत्वेनाप्रत्यक्षत्वेऽपि कस्यचिद्धेतोःप्रत्यक्षतया तदनुमानसंभवेन धर्मस्यानुमानविषयत्वाभावे प्रत्यक्षविरहस्याप्रयोजकत्वापत्तेः। अपिच शब्दस्यापि श्रावणप्रत्यक्षविषयतयैवार्थबोधकत्वमित्यस्यापि अनुमानवत्प्रत्यक्षपूर्वकत्वेन धर्मं प्रति हेतुत्वं न स्यादिति चेदत्रोच्यते। सविकल्पकं प्रत्यक्षं प्रमाणमेवेत्यग्रे स्पष्टीभविष्यति। ययोर्लिङ्गलिङ्गिनोः संबन्धः सामान्यतोवा विशेषतोवा प्रत्यक्षेण गृहीतः तयोरेकतरेण लिङ्गेन

लिंगिनो ज्ञानमनुमितिः संबन्धग्रहश्च न संबन्धिनोर्ग्रहणमन्तरेति संबन्धिनो धर्मस्य प्रत्यक्षाविषयतया तदीयसंबन्धग्रहासंभवेन तदनुमानासम्भवः स्फुट एव। एवमुपमान मपीह न संभवति गोसदृशत्वेन गवयग्रहणे उपमानं प्रवर्त्तते नच गवादीनामग्रहणे तत्सदृशतया गवयादिः प्रत्येतुं शक्यते संबन्धग्रहं प्रति संबन्धिग्रहस्य हेतुत्वात्। तथाच धर्मस्याप्रत्यक्षत्वेन तदविनाभूतस्य तत्सादृश्यस्य क्वचिदपि ज्ञातुमशक्यतया नानुमानोपमानगम्यत्वं तस्येति भावः एवमादित्यस्यानुमितया देशान्तरप्राप्त्या तदीयगत्यनुमानमपि प्रत्यक्षपूर्वकमेवेति न फलतः कश्चिद्विशेषः। कार्यकारणयो स्तत्संबन्धस्य च प्रत्यक्षं विना अनुमितगत्यापि तत्कारणानुमानासंभवः स्फुट एव। नच सततमरसादेरिव सर्वथाऽप्रमितस्य धर्मस्य सत्तानुमातुं शक्यते पक्षाप्रसिद्धेः नवाप्यस्य वसुधा शशविषाणोल्लिखितेतिवत्पक्षविशेषणतयाप्यनुमानाव-

काशः अप्रसिद्धपक्षविशेषणतापत्तेः अतएवाह तस्माददृष्टपूर्वत्वात्केनचिद्वस्तुना सह धर्मस्य नानुमेयत्व मसाधारणवस्तुवत् । अदृष्टसदृशत्वाच्च स्वयं चानुपलम्भनात् धर्मस्य नोपमेयत्व मसाधारणवद्भवेदिति । ननु प्रत्यक्षानुमानोपमानाविषयत्वेऽपि धर्मस्यार्थापत्तिविषयत्वमस्त्येव दृश्यते हि प्राणिनां सुखदुःखादिविविधफलभोगविशेषः नचासौदृष्टकारणमात्रभेदादुपपादयितुं शक्यः समानसाधनाना मपि फलभेद दर्शनात् समान मीहमानानां चाधीयानानां केचिदर्थैः युज्यन्ते नापर इत्यादि महाभाष्यकारोक्तेश्च एवंच जगद्वैचित्र्यान्यथानुपपत्या तद्वैचित्र्योपपादक मदृष्ट मस्तीतिसिद्ध मर्थापत्तिविषयत्वमस्येतिचेन्न यतः शुभाशुभकर्मणां शक्तिवैचित्र्यं यथा स्वाभाविकं तथा जगद्वैचित्र्य मपि स्वाभाविक मेवाङ्गीकार्यमिति कृतमदृष्टकल्पनाव्यसनेन नहि अश्वमेधब्रह्महत्यादिकर्मणां स्वर्गनरकादिजननशक्तिः

हेत्वन्तराधीना अपितु स्वाभाविक्येव तथा जगद्वै-
चित्र्यमपि स्वाभाविक मेवेति कार्थापत्तिविषय-
ता धर्मस्य। ननु कालभेदेन एकस्यैव पुरुषस्य
दारिद्र्यैश्वर्योपलब्ध्या व्यभिचारान्न जगद्वैचि-
त्र्यं स्वाभाविकं कर्मणां शक्तिवैचित्र्यं तु स्वाभा-
विकं भवितु मर्हति व्यभिचारादर्शनादितिचे-
त्सत्यम्। स्वर्गसाधन मग्निहोत्रादि नरक-
निपतननिदानं ब्रह्महत्यादीति विशेषरुपेण
ज्ञाने सामान्यतः किमप्यदृष्टमस्तीति ज्ञानं न
मानवानां प्रवृत्तिं प्रयोजयति नच सामान्यतो
दृष्टज्ञानस्य प्रवृत्तिप्रयोजकत्वाभावेऽपि तस्या-
र्थापत्तिज्ञानविषयत्व मक्षत मेवेतिचोदनैवेत्यव-
धारणासंगतिर्दुर्वारवेति वाच्यम्। प्रवृत्ति-
प्रयोजकीभूतविशिष्ट ज्ञाने चोदनैवेत्यवधारणा-
तात्पर्यात् ततश्चादृष्टसामान्यज्ञानस्यार्थापत्ति
जन्यत्वेऽपि न किञ्चिदपचीयते। सूत्रकारेणापि
प्रवृत्तिप्रयोजकधर्मज्ञानस्य जिज्ञासा सूत्रिता
न सामान्यस्य तस्य प्रवृत्त्यप्रयोजकत्वेन निष्फ-

त्वात्। ननु अर्थापत्त्या सामान्यस्य विशेषस्य चागमेन सिद्धे रुभयस्य च प्रमाणतया चोदनै-वेत्यवधारणासंगति स्तदवस्थैवेति चेन्न सामान्यसाधिकाया अर्थापत्तेर्विशेषसाधकत्वाभावेन विशेषसाधकागमेन विशेषस्येव तदविनाभूत-सामान्यस्यच सिद्धौ प्रमाणान्तरोपन्यास-वैयर्थ्यात्। येषांमते नार्थापत्तिः प्रमाणान्तरं किन्तु कार्यात्कारणानुमितिरूपैव सा तेषां मते ईदृश मानुमानमपि अनयैव रीत्या निराकरणीय मिति ध्येयम्। आगममूलानुमानाभ्युपगमेतु प्रकृते आगमएवास्तु मूल मलमन्यमुखापेक्षानुमान व्यसनेनेति कृतधियो विभावयन्तु। यत्तु यत्प्रमाण निर्विकल्पकं ज्ञानं न तल्लिङ्गग्राहि यच्च लिङ्ग-ग्राहि सविकल्पकं प्रत्यक्षं न तत्प्रमाणमिति तदसत् सविकल्पकस्यार्थोपकारिणः प्रामाण्या भ्युपगमात् यद्धि अन्यदीयरूपेणार्थं विकल्पयति यथा शुक्ताविदं रजतमिति तदेवाप्रमाणं न सविकल्पमात्रम् नहि पारमार्थिके रजते जायमा-

नमिदं रजतमिति ज्ञानमप्रामाणिकमिति केनाप्यविकलकरणेन शक्येत वक्तुम् बाधदोषयोरदर्शनात् सदसद्विषयव्यवस्थानापत्तेः सर्वानुभवसिद्धमपलपतः परीक्षकत्वानुपपत्तेश्च यत्तु न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते इत्यभियुक्तोक्त्या निर्विकल्पकज्ञानमेव नास्तीति क्व तत्प्रामाण्याशावकाश इति तत्तुच्छम् बालमूकादीनामिव व्युत्पन्नानामपि सविकल्पकज्ञानोत्पत्तेः प्राग् विषयेन्द्रियसंबन्धानन्तरं शुद्धवस्तुमात्रविषयकस्यालोचनज्ञानस्योत्पत्तेरावश्यकत्वादन्यथा विशेषणज्ञानाभावेन विशिष्टज्ञानस्योत्पत्तिरेव न स्यात् किञ्च निर्विकल्पकज्ञानानुत्पत्तौ शब्दविशेषस्मारकाभावेन शब्दानुवेध एव ज्ञाने दुर्लभः स्यात् तदिहानुवृत्तिव्यावृत्तिस्फुरणरहितजातिव्यक्त्याद्यनेकाकारं सम्मुग्धं वस्तु भातीत्यविवादमित्यन्यत्र विस्तरः। निर्विकल्पकज्ञानान्तरं जातिगुणक्रियादिविशिष्टं श्वेतोऽश्वो धावतीत्या-

दि ज्ञानं सविकल्पकं प्रत्यक्षं प्रमाणमेवेति। ननु निर्विकल्पकज्ञानजन्यस्य नामादिस्मृतिसहितस्य सविकल्पकस्य कथमैन्द्रियकत्वं विशेषणीभूतस्मृताविन्द्रियाणामसामर्थ्यादिति चेत्सत्यम् यद्यपि केवल मिन्द्रियं स्मृतावसमर्थम् तथापि स्मृतिसहितस्य तज्जननसामर्थ्ये बाधकाभावात् केवलस्य चक्षुषो रूपादिप्रकाशकत्वाभावेपि आलोकादिसहकृतस्य तस्य तत्प्रकाशकत्वात् केवलस्य मनसो बाह्यविषयप्रकाशकत्वाभावेपि चक्षुरादिसहकृतस्य तत्प्रकाशसामर्थ्यदर्शनाच्च नच नेदमिन्द्रियजं प्रत्यक्षं स्मृतिसहितेन्द्रियजन्यत्वेनेन्द्रियमात्रजन्यत्वाभावादिति वाच्यम्। अनुपरतेन्द्रियव्यापारस्यैव पुरुषस्येदृशज्ञानोत्पत्तिदर्शनेन प्रत्यक्षलक्षणे इन्द्रियमात्रजन्यत्वनिवेशानौचित्यात् इन्द्रियासंबद्धार्थविषयकज्ञानस्यास्माभिरपि प्रत्यक्षत्वानभ्युपगमात्। तथाचोक्तं भट्टपादैः स्मरणे चास्यसामर्थ्यं सन्धानादौच विद्यते तेनेन्द्रियार्थसंबन्धे विद्यमाने स्मरन्नपि विकल्पयन्

स्वधर्मेण वस्तुप्रत्यक्षवान् नर इति। ननु सविकल्पकस्येन्द्रियजन्यत्वाभ्युपगमे विषयेन्द्रियसंयोगे प्रथमत एव तदुत्पादापत्त्या तत्र निर्विकल्पकज्ञानपूर्वकत्वकथनासंगतिः विशिष्टज्ञाने विशेषणज्ञानकारणताव्यभिचारश्चेतिचेन्न। विकल्पज्ञानोत्पत्तौ नामजात्यादिस्मृतेः सहकारिकारणतया तदुद्बोधकत्वेन निर्विकल्पज्ञानस्यापेक्षिततया तदुत्पत्तेः पूर्वं तदुत्पत्त्यसम्भवात् कारणाभावे कार्यानुत्पत्तेः सर्वसम्मतत्वात् एतेन स्मृतिव्यवहितस्य सविकल्पस्येन्द्रियव्यापारसन्निधानमात्रेण प्रत्यक्षत्वस्वीकारे उन्मील्य निमील्य विकल्पयतोपि विकल्पः प्रत्यक्षं स्यादिति परास्तम् इन्द्रियव्यापारसन्निधानाभावेन तदाशङ्कानवसरात् सति व्यापारसंबन्धे निमीलनोक्तिवयर्थ्यात् नन्वेवमपि सविकल्पस्यानेककारणजन्यतया किमित्यक्षेणैव व्यपदिश्यते चाक्षुषं रासनं त्वाचमित्यादीति चेदुच्यते इन्द्रियासंबद्धवस्तुविकल्पे अनुमानादौ आत्मनः साधारणकारणतयाऽत्र-

विकल्पेऽप्यस्यैवासाधारणकारणत्वात् असाधारणेन कारणेन लोके व्यपदेशाः दृश्यन्ते शाल्यंकुरो यवांकुर इति न चेन्द्रियाणां निर्विकल्पं प्रत्येवासाधारणकारणत्वमिति युक्तं तत्रापि तदीयप्रागभावादेरेव तथात्वात् वस्तुतस्तु पङ्कजादिवत्तत्र तस्य योगरूढ़िरेवेति नातिप्रसंगः वृद्धव्यवहारानुरोधेन तत्र सविकल्पके तस्यरूढ़िरेवेति तु परमार्थसन्मार्गः यदि च विषयेन्द्रियसंवन्धजन्यनिर्विकल्पकज्ञानानन्तरमुत्पन्नस्य सविकल्पकस्य मनोजन्यतया प्रत्यक्षत्वं तर्हि गोत्वादावपि वाह्यविषये तस्य तथैव प्रत्यक्षत्वं स्यात् । अथ सम्विद आन्तरत्वेन मनोजन्यतया प्रत्यक्षत्वमस्तु वहिर्विषये तु मनसोऽस्वातन्त्र्याद् गोत्वादौ प्रत्यक्षं न संभवतीतिचेन्न संविदो वाह्यविषयकत्वेन तत्रेव विषयांशेऽपि मनोजन्यतया प्रत्यक्षत्वस्यलोकानाऽमिष्टत्वात् अत्रायं निष्कर्षः यदिहि वहिर्विषयेमनोनस्वतन्त्रं चक्षुरादिव्यापारस्य च स्मृत्यादिव्यवहितत्वं तदा तत्र तस्यरूढ़िरेवस्वी-

कार्या नत्वप्रत्यक्षत्वं लोकविरोधादिति श्लिष्यते। अथवा निर्विकल्पकसहकृतं मनो बहिर्विषये प्रवर्त्ततामिति सुखादीनामिव तस्यापि मानसप्रत्यक्षत्वमाञ्जसेनोपपद्यते। नच हेत्वन्तरसहकृतमनोजन्यज्ञानस्य प्रत्यक्षत्वाभ्युपगमे मनसो ज्ञानसामान्यं प्रति साधारणकारणतया अनुमानादेरपि तज्जन्यतया प्रत्यक्षत्वापत्तिरिति वाच्यम् भवन्मते यथा मनोजन्यत्वेन निर्विकल्पकं प्रत्यक्षमेव प्रमाणं न तादृशमपि सविकल्पकं तथा मन्मतेपि घटत्वादिज्ञानस्यैव प्रत्यक्षत्वं नानुमानादेरिति मयापि वक्तुं शक्यत्वात्। अयं घट इत्यादि सविकल्पकज्ञानस्य लिङ्गाद्यजन्यत्वेन पारिशेष्यात्प्रत्यक्षत्वं वाधानवतारादोषादर्शनाच्च तस्य प्रमाणत्वमेवेतिदिक्। ननु सविकल्पकज्ञानस्योपपत्तिरेव न संभवति तथाहि यदि रूपादिविशिष्टं रूपादिव्यतिरिक्तं किञ्चिद्वस्तु परमार्थसत्स्यात् तदा तद्ग्राहि प्रत्यक्षं प्रमाणंस्यादपि रूपादिसंघात एव घटस्तम्भादिबुद्धिगोचरो

नातिरिक्तः अनुपलम्भा दुपलम्भकारणाभावाच्च न घटादे रूपादिसंघातात्मकत्वे एको घट इत्यादि बुद्ध्यनुपपत्तिरितिवाच्यम् तिरोहिताव-यवभेदसमुदायापेक्षया वृक्षसमूहे वनमितिबुद्धि-वदत्रापि तदुपपत्तेः। कृत्स्नैकदेशविकल्पेन अव-यवेषु तदतिरिक्तावयविनो वृत्तेरसम्भवादित्यन्यत्र विस्तरः तथा चोक्तं सौगतैः। क्षीणानि चक्षुरा-दीनि रूपादिष्वेवपञ्चसु नषष्ठमिन्द्रियं तस्य ग्राहकं विद्यते बहि रिति। नच रूपादिव्यतिरिक्तग्राह-केन्द्रियाभावेऽपि मनसैव धर्मिणो ग्रहणमास्ता-मितिवाच्यम् बहिर्विषये मनसः स्वातन्त्र्यानंगी-कारात् तस्मादविद्याकल्पित एवावयवावयवि-भावादिः न वास्तविक इत्याहुः अत्रोच्यते उप-जनापायशीलासु पिण्डघटकपालाद्यवस्थासु अनु-गतं यदवस्थावत्तद्धर्मि अन्यथा तदेवेदमिति प्रत्यभिज्ञानं स्यात् अस्मन्मते धर्मधर्मिणोर्भेदा-भेदौ वैशेषिकादिमतेतयोरत्यन्तभेद इत्यस्य व्यवस्थिततया विकल्पस्य प्रामाण्यमक्षतमेव

बाधाभावाद्दोषादर्शनाच्च यदेवाद्राक्षं तदेवस्पृशा-
मीति प्रत्यभिज्ञयापि रूपादिविशिष्टतदतिरिक्त-
धर्मिसिद्धिः अन्यथा रूपस्य चाक्षुषतया स्पर्शस्य-
त्वाचतया रूपस्पर्शातिरिक्तधर्मिणोभावात्कस्यो-
भयेन्द्रियगोचरत्वं स्यात् नन्वेव मेकेन्द्रियगोचरे
तदपरेन्द्रियविषयत्वाभ्युपगमे एकेनैवेन्द्रियेण रू-
पादिसकलविषयकज्ञानोत्पत्तिसम्भवे इन्द्रिय-
पञ्चकत्वकल्पना वृथैव स्यादिति वाच्यम्। एके-
न्द्रियकल्पनाया विषयव्यवस्थानुपपत्तेः अन्धोहि
शृणोति रूपं न पश्यति वधिरो न शृणोति रूपं
तु पश्यत्येवेति व्यवस्था न संगच्छेत। इन्द्रियो-
पघाते सर्वविषयाणामग्रहणापत्ते रनुपघाते सर्व
विषयाणां ग्रहणापत्त्या ज्ञानयौगपद्यप्रसंग इत्यादि
बहुतरदूषणानि पतेयुरिति नकिञ्चिदेतत् ततश्च
द्रव्ये धर्मिणि इन्द्रियसांकर्य्येऽपि रूपादिधर्मे व्य-
वस्थैव नहि यदेकत्र दृष्टं तदन्यत्र वलादभ्युपेयते
रूपादिषु मनसःचक्षुरादिसहकार्य्यपेक्षणेऽपि सु-
खादौस्वत एवप्रवृत्तेः ननुकथमिदं व्यवस्थाप्यते-

श्रोत्रसहायेन मनसा शब्दाद्युपलब्धिः सुखाद्युपलब्धिश्च स्वत इति चेदित्थम् । बधिरस्य शब्दानुपलब्धिः सुखाद्युपलब्धिश्च स्पष्ट एव लोके दृश्यते यदि मनसैव सा यात्तदा बधिरस्यापि सा स्यान्नचैषा दृश्यते तस्माद्ध यथोक्तमेव रम्यम् नन्वेकमेवेन्द्रियमस्तु तत्रैव पञ्चप्रकाराःशक्तयः कल्प्यन्तां तावतैव विषयव्यवस्थोपपत्तिरिति कृतमिन्द्रियपञ्चत्वकल्पनेनेतिचेन्न तावतापि शक्तिपञ्चकत्वकल्पनासाम्येन लाघवाभावात् । पंचेंद्रियाणि कल्प्यानि पञ्चशक्तयोवेत्यत्र विशेषादर्शनात् । नच धर्मिकल्पनापेक्षया धर्मकल्पनाया लघुत्वा च्छक्तिकल्पनैव युक्तेति वाच्यम् । अत्र धर्मिणः क्लृप्तत्वेनोभयकल्पनाविरहात् भौतिकत्वादिन्द्रियाणां भूतानि पृथिव्यादीनि पंच क्लृप्तान्येव ननु तेषामपूर्वकल्पना प्रत्युत वायवीयस्य त्वचः अदृष्टं तादृशसामर्थ्यं कल्पनीयं स्यादिति अदृष्टकल्पनापेक्षयेन्द्रियपञ्चकत्वमेव युक्तम् ननु शब्दग्रहणे मनोव्यापारकल्पनमनावश्यकं श्रोत्रे

गाव तद्ग्रहणासम्भवादिति वाच्यम् । श्रोत्रोपघाते-ऽपि शब्दस्मरणादर्शना त्तत्रापि मनोव्यापारकल्पनाया आवश्यकत्वात् । ननु तर्हि मनसैव शब्द-ग्रहणमस्तु किंश्रोत्रव्यापारकल्पनेनेति चेन्न । शब्दग्रहणे मनसः स्वातन्त्र्येण व्यापारकल्पनायां वधिरस्यापि शब्दोपलब्ध्यापत्तेः । अपि च विषयान्तरव्यासक्तमनसः पुरुषस्य सत्यपि चक्षु-रादिसंयोगे रूपादौ ज्ञानानुत्पत्तिदर्शनाद् गम्यते ऽत्रापि मनोव्यापारस्य हेतुत्वम् । एवमेकेनेन्द्रिये-णैकस्य विषयस्यग्रहणवेलायामिन्द्रियान्तरग्राह्य-विषयस्य स्मरणाजननादवसीयते ग्रहणे एव मनो व्यापृतम् अन्यथाविषयान्तरस्मरणं स्यादिति म-नसः वहिर्विषये इन्द्रियापेक्षा विषयस्मरणे सुखा-द्युपलब्धौ च स्वातन्त्र्यमिति । ननु बोधस्वभावः पुरुषः स्वयमेव सर्वमान्तरं वाह्यं च विषयं जा-नीयात् किमान्तरेण वाह्येन चेन्द्रियेणेति चेन्न तथासति पुरुषस्य सार्वज्ञापत्ते रतो वाह्यविषय-ग्रहणे वाह्यमान्तरंचोभयमिन्द्रिय मान्तरे तु के-

वलं मनः अपेक्ष्यते इत्यन्वयव्यतिरेकाभ्यामवसीयते। वाह्यानीन्द्रियाणि चक्षुरादीनि आन्तरन्तु मनः तस्येन्द्रियत्वन्तु सुखादिसाक्षात्कारान्यथानुपपत्या वोध्यम्। एवं च ज्ञानरूपकार्यवशाद् ग्राह्यग्राहकशक्तयो नुमीयन्ते आसां च क्वचिद द्रव्यादौ सांकर्यं क्वचिच्च रूपादावसांकर्य्यमिति यथादृष्टमनुमीयते इति। नन्तु जात्यादिवाचकगवादिशब्दाः पूर्वं स्वाभिधेयगोत्वादिरूपमर्थं गवाद्यभेदेन विकल्प्य पश्चाद् गोशब्दाभेदोपहितजात्यादेरभेदं व्यक्तौ विकल्पयन्ति गौरयमिति। एवं च जातिव्यक्त्योर्भेदाभेदस्वीकारेण जातिव्यक्त्यभेदांशे प्रत्ययस्य प्रमात्वेऽपि शब्दस्य वस्त्वन्तरत्वा त्तदभेदस्य जात्यादावसत्वा त्तादृशशब्दाभेदविशिष्टजात्याद्यंशे प्रत्ययस्य मिथ्यात्वेन विकल्पस्य मिथ्यात्वम् दुर्वारमिति चेन्न। जात्याद्यंशे शब्दाभेदभानानभ्युपगमात्। शब्दोच्चारणात्प्राग् यादृशी बुद्धि जायते शब्दोच्चारणानन्तरमपि तादृशी एव बुद्धिर्भवति। नतु अन्यादृशी।

शब्दोच्चारणात्प्राग् यथा शब्दाभेदो न विकल्प्यते एवं शब्दोच्चारणानन्तरमपि इति न तस्य मिथ्यात्वम् । ननु शब्दार्थसंबन्धज्ञानात्प्राग्-गवादिषु गोत्वादिप्रतीति नं भवति यदि च जात्यादिस्वरूपमेव गोत्वादि स्यात् तदा शब्दार्थसम्बन्धज्ञाना त्प्रागपि स्यात् व्यक्ति-विशेषज्ञानवत् किन्तु शब्दार्थसंबन्धज्ञानोत्तर-मेव तादृशप्रतीति र्नियमे जायते इति तस्य शब्दा-त्मकत्वमेवेति चेन्न शब्दार्थसंबन्धज्ञानात्प्रागपि तादृशप्रतीते रभ्युपगमात् । इयान् परं विशेषः शब्दज्ञस्तु केवलं शब्दं स्मृत्वा अभिलपति गौरयमिति तादृशाभिलापोपलाभात् अश-ब्दज्ञस्तु नाभिलपति अयमसाविति प्रतीति स्तु द्वयोः समानैव जायते इति । केचित्तु अ-शब्दज्ञस्य गोत्वादिप्रतीतिरेव न जायते शब्द-ज्ञानाभावेन तदनुवेधस्याभावात् । शब्दाननुवि-द्धप्रत्ययस्तु अनङ्गीकारपराहतः । यथाहुः न सो ऽस्ति प्रत्ययो लोके यः शब्दानुगमा दृते अनु-

विद्धमिव ज्ञानं सर्वं शब्देन भासते इति तदसत्
अशब्दज्ञस्यापि तादृशप्रतीतेरनुभवसिद्धत्वात्।
अन्यथा वालमूकादीनां तादृशज्ञानमेव न स्यात्।
अपि च रसनया इक्षुक्षीरादिमाधुर्यं यादृशमुप-
लभ्यते तत्र न शब्दानुवेधगन्धोपि शब्दस्य
सामान्यार्थप्रत्यायकत्वात्। प्रातिशिवकविशेषा
श्च न शब्देनाभिधीयन्ते प्रत्यक्षादिना च तेषा-
मपिप्रतिपत्तिः। यदि स्वरूपारोपे शब्दस्य न
व्यापार स्तर्हि तदुपादानं किमर्थमिति चे दर्थ-
ज्ञानोपायत्वादेवतत्साथंक्यं। नहि प्रदीपः स्वप्र-
काश्ये घटादौ स्वस्वरूपमारोपयति। अनारोप-
यन्नपि घटादि प्रकाशयन् सप्रयोजनो भवति
तद्वत् शब्दोपि साथंक इति भावः। अपि च
व्यक्तौ जात्यादेरभेदभानवत् जात्यादौ शब्दा-
भेदभाने वाधकादर्शने च जात्यादीनां शब्दा-
त्मकत्वमेव स्यात्। प्रतीतिरेव भगवती पदार्थ-
व्यवस्थापने प्रमाणं नः इति यथा व्यक्तौ जा-
त्यादेरभेदो भासते वाधकश्च नोपलभ्यते इति

व्यक्ते जात्याद्यात्मकत्वमेवं शब्दाभेदभाने बाध-
काभावेच जात्यादेः शब्दात्मकत्वमेव सिद्धय-
तीति कथं तदवगाहिनो विकल्पस्य मिथ्या-
त्वमिति। वस्तुतस्तु शब्दार्थज्ञानेषु त्रिष्वपि
सामान्येन गौरितिशब्दः प्रयुज्यते गौरिति
शब्दो गौरिति ज्ञानं गौरित्यर्थः एवं च श्रोतु
र्भ्रान्तिर्भवति त्रयाणामभेदोऽन्यथा समाननिर्दे-
शासंगतिः स्यात्। वस्तुतस्तु त्रयाणां विलक्षणै-
व प्रतीतिः गोशब्दाभिधेयः सास्नादिमानर्थः।
अभिधायकं गवाद्यानुपूर्वीकं पदम् अभिधेयाभि-
धायकयो ज्ञानन्तु निराकारमित्येतेषां वैलक्षण्या
न्नाभेदः त्रिष्वपि समानशब्दप्रयोगं दृष्ट्वा भ्रमो
भवति एषामभेद इति अर्थेषु शब्दस्वरूपाभेदा-
रोपो भ्रान्तिनिबन्धन एव। एवमेव ज्ञानेषु शब्दा-
र्थयोरारोप इतिमतं निरसनीयम्। एकस्यार्थ-
स्यानेकैर्दर्शनाभावप्रसंगात्। विषयस्य स्थूल
त्वात् ज्ञानस्यातिसूक्ष्मत्वात्साहस्याद्यभावात्
ज्ञानेऽर्थारोपस्यात्यन्तमसंभव एवेति बोध्यम्।

केचित्तु शब्दस्यैव विपरिणामोऽर्थः न तत्वान्तरं क्षीरस्येव दधि यथाक्षीरमेवोपाधिवशाद्दधिरूपेण परिणमते न ततस्तत्त्वान्तरं यद्वा यथा मुखस्य प्रतिविम्बो दर्पणे जायते तत्र प्रतिविम्बो नोर्थान्तरमेवंमर्थोपि शब्दस्यैव बिपरिणामो विवर्तो वा स तत्वतोऽन्यथाभावो विपरिणामः अतत्वतोन्यथाभावो विवर्त्त इति आहु स्तन्न अमूर्तपरिणामविवर्त्तयोरदर्शनात् । सर्वत्र मूर्तस्यैव क्षीरादेः परिणामः मूर्तस्यैव मुखादे र्दर्पणादौप्रतिविम्बो दृश्यते शब्दस्य चामूर्तत्वा त्कथंमूर्तात्मना परिणामः कथं वा विवर्त्तः स्यात् । शब्दानां चतुष्टयी प्रवृत्तिः केचि ज्जातिवचना यथा गोघटादयः केचिद्गुणवचना यथा नीलादयः केचित् क्रियावचना यथापाचकादयः केचिद् यदृच्छाशब्दाः डित्थादय इति व्यवस्था असंगता स्यात् जात्यादीनामेतन्मतेऽसत्वात् । नीलोत्पलमित्यादौ विशेषणविशेष्यभावानुपपत्ति श्च घटपटयोरिव नीलोत्पलयोः

शब्दपरिणामात्मकतया भेदात् नहि घटपटयो विशेषणविशेष्यभावः कस्यचित्संमतः घटादेः पटादौ व्यावृत्तिबुद्धिजनकत्वाभावात् एवं विशेषणविशेष्यवाचकपदयोः सामानाधिकरण्यमपि न स्यात् भिन्नप्रकारेणैकार्थोपस्थितिजनकत्वस्यैव तत्वात् प्रकृते च प्रकारीभूतजात्यादेरनभ्युपगमेनैकार्थवाचकत्वाभावात् स्वस्वरूपस्यैव वाच्यत्वाङ्गीकारेण नीलोत्पलशब्दयोरिव तद्वाच्ययोरपि तदात्मकतया त्यन्तभेदात् न च जात्यादीनामेकव्यक्तिविषयकनिर्विकल्पकज्ञानजनकत्ववत् नीलोत्पलयोरपि एकव्यक्तिविषयकबोधजनकत्वा त्सामानाधिकरण्यमिति वाच्यम् नियामकाभावेनैकत्रैव बुद्धिजननस्याशक्यत्वात् अन्यथा घटपटयोरपि सामानाधिकरण्यं स्यात् अविशेषात् नच यत्र व्यक्तिविशेषे प्रयोगोदृष्टः तस्यैव नियामकत्वम् अपूर्वव्यक्तौ नियामकाभावेन प्रयोगानुपपत्तेः किंचैवं घटकलशयोरपि सामानाधिकरण्यं स्यात् तयोरपि एकव्यक्तावे-

वाध्यासात् स्वरूपवोधकत्वेन पौनरुक्त्यभावात् किंच शब्दसंकेतग्रहोत्तरं शब्दात्मकतयार्थः प्रतीयते ततः प्राक् कीदृशोर्थः प्रतीयते इति निरूपणमशक्यम् प्रतिव्यक्तिविशेषस्यानन्त्यात् सर्वत्र संबन्धग्रहणस्याशक्यत्वात् व्यभिचाराच्च अपूर्वव्यक्तिवोधस्याप्यंगीकारात् अगृहीतसंबन्धस्य शब्दस्य प्रत्यायकत्वे प्रथमश्रवणेपि प्रत्यायकत्वापत्तेः। शब्दार्थसंबन्धनित्यतावादिमते तु गृहीतसंबन्धस्यैव शब्दस्य प्रत्यायकत्वनियमांगीकारेण सतोऽपि सम्बन्धस्याग्रहणे नार्थप्रतीतिः। अस्य शब्दस्यायमर्थ इति विशिष्य सम्वन्धग्रहणाभावात् नचागृहीतसंबन्धाद् गृहीतशब्दादर्थवोधः अगृहीतशब्दादप्यर्थवोधापत्तेः तस्माद् गृहीतसंबन्धेन गृहीतशब्देनैवार्थवोध इति प्रामाणिकानामनुभव इति गृहीतसम्बन्धः शब्दः यथावस्थितमर्थं वोधयति इति नार्थः शब्दस्य परिणामो विवर्त्तोवेति सिद्धम् किंचा ध्यासस्य कारणद्वयं सादृश्यमुपरागश्च आद्ये

शुक्तिरजताध्यासे शौक्ल्यं द्वितीयं अरुणस्फटिकाध्यासे लाक्षोपरागः शब्दार्थाध्यासे नानयोरेकमपिकारणं शब्दार्थयोरत्यन्तभेदेन सादृश्यासंभवात् दूरस्थत्वाच्च नोपराग इत्यध्यासोऽसंगतः किंच सविकल्पकस्य मिथ्यात्वे सर्वेषामनुमानागमादीनामप्रामाण्यमेव स्यात् तत श्च लोकव्यवहारोच्छेदः स्यात् त्वदीयवाक्यस्यापि सविकल्पकज्ञानजनकत्वेनाप्रामाण्यमिति नाप्रामाणिकेन कस्यचि त्पदार्थस्य साधनं बाधनं वा भवति विपरीतस्यापि संभवादित्यलं स्वगृहे हुतवहज्वालाप्रक्षेपेण। नन्वध्यासानङ्गीकारेऽर्थोपस्थापकशक्तेः शब्दे विरहात्कथमर्थोपस्थितिः नचार्थोपस्थापकशक्तिः शब्दे शक्या भ्युपगन्तुम् पित्रादिसंकेतकरणं विनापि डित्थादिपदादर्थस्मृत्यापत्तेः पित्रादिः स्वेच्छया यत्र यादृशं शब्दं संकेतयति तेन तादृशार्थस्मरणं जायते नान्यथेति पित्रादिकृत एव संकेतो न नित्य इति चेन्न संकेतकरणा त्प्रागपि अर्थ-

स्मरणौपयिकयाया: शक्तेः चैत्रादिपदे स्थिता-
याः पित्रादिसंकेतेनाभिव्यक्तिरिति स्वीकारात्
संकेतोहि नापूर्वां शक्तिं करोति शक्त्याध्याने
पुरुषसामर्थ्याभावात् अन्यथा पुरुषेच्छया जलेऽ-
पि दाहानुकूलशक्तेराधानं स्यात् किन्तु वह्नि-
स्थितदाहानुकूलशक्तिज्ञापनवत् चैत्रादिपदेस्थि-
तामर्थस्मारकशक्तिं पित्रादि बोधयति एतत्प-
देनायं व्यवहर्तव्य इति नच तर्हि नियामकाभा-
वात् सर्वशब्दे सर्वार्थशक्तिः स्यादिति वाच्यम्
इष्टापत्तेः। अत एव सर्वे सर्वार्थवाचका इत्य-
भ्युपगमः संगच्छते नचैकेन घटादिपदेन घटा-
देरिव पटादेरपि बोधापत्तिः तस्योभयत्र शक्ति-
साम्यादिति वाच्यम्। शक्तिग्रहस्यैव नियाम-
कत्वात् वृद्धव्यवहारादिना यस्य पदस्य याद-
शार्थे शक्तिग्रहो जातः तेनतादृशार्थस्यैव बोधो
नान्यस्य तत्र शक्तेरग्रहात् एवंचैकत्र सर्वार्थ-
शक्तिसद्भावेपि समयेन शक्तीनामभिव्यक्ति-
स्वीकारादापत्तिपरिहारः सुकरः। नचायं देव-

दत्त इत्यभिधानस्थले देवदत्तपदस्मारितस्य चक्षुःसन्निकर्षात्प्रत्यक्षमपीत्येकत्र स्मृतिसंभिन्नप्रत्यक्षोत्पत्त्या कथमस्य प्रामाण्यम् कथं वा प्रत्यक्षत्वमपि संस्कारेणापिजननादितिवाच्यम् शब्दतदर्थयो स्स्मरणोऽपि पुरस्स्थस्य चक्षुःसंबन्धात्प्रत्यक्षत्वमेव मात्रपदनिवेशप्रयोजनाभावे सन्निकर्षजन्यत्वस्यैव लक्षणे निवेशस्य पूर्वमेवप्रतिपादनात् । यदंशे स्मरणं तदंशे मानू त्प्रत्यक्षमितरांशे तु बाधकाभावा त्प्रत्यक्षमेव एवं च संस्कारेन्द्रियाभ्यां जायमानमिदमेकमेव ज्ञानं । अर्थेप्रत्यक्षं शब्दतत्सम्बन्धयोः स्मरणम् नच स्मृतस्यैव गोत्वादेः प्रत्यक्षेण ग्रहणा त्कथं प्रामाण्यमगृहीतग्राहिण एव तत्त्वादिति वाच्यम्। गोत्वांशे गृहीतग्राहित्वेऽपि व्यक्त्यंशे अगृहीतग्राहित्वात् । अथपूर्वगृहीताया एवव्यक्ते र्यत्र प्रत्यक्षं यद्वा यत्र धारावाहिकं प्रत्यक्षं जायते तत्र कथमगृहीतग्राहित्वमिति चेदित्थम् । उत्तरोत्तरक्षणभावस्यावश्यकत्वेन

तदंशे अगृहीतग्राहित्वसत्वात् । नच स्मरणपूर्वकत्वाभावे सत्येव निर्विकल्पस्य प्रत्यक्षत्वं इष्टं सविकल्पकस्य तु स्मृतिपूर्वकत्वा त्कथं प्रत्यक्षत्वमिति चेन्न तादृशनियमे मानाभावात् । नहि एषा राज्ञः वेदस्य वा आज्ञा अस्मरणपूर्वकमेव प्रत्यक्षमिति । तस्मात्सविकल्पकमपि प्रत्यक्षम् प्रमाणमित्यनुमानादीनां प्रत्यक्षपूर्वकत्वा त्प्रत्यक्षस्य धर्मं प्रत्यनिमित्तत्वे सिद्धे अनुमानादीनां सुतरामनिमित्तत्वमिति सूक्तम् तत्पूर्वकत्वाच्चेति इति कल्पकलिकायांचतुर्थप्रत्यक्षसूत्रम् ।

ननु प्रत्यक्षपूर्वकत्वेनानुमानादेरिव शब्दस्यापिधर्मम्प्रत्यनिमित्तकत्वं स्यात् लोके सर्वत्र प्रत्यक्षादिप्रमाणपूर्वकस्यैव शब्दस्य प्रामाण्यदर्शनादिति सदुपलम्भकप्रमाणाभावादभावगम्यत्वमेवास्तु धर्मस्येत्याशंक्यां निराकर्तुमाह अभावोपीति ननु सदुपलम्भकेषु शब्दातिरिक्तप्रत्यक्षादिप्रमाणेषु निराकृतेषु यदि अभावप्रमा-

णकत्वेन धर्मस्प्रतिचोदनाप्रामाण्यावधारणम-
सङ्गतं भवेत्तदा तदवधारणाय धर्मं स्प्रतिअभा-
वप्रामाण्यनिरासः युज्येत तथात्विह नास्ति
लोकप्रसिद्धेरपि धर्मं स्प्रति निमित्तत्वात्। यथा
ह भगवान् वेदव्यासः इदं पुण्यमिदं पापमित्ये-
तस्मिन् पदद्वये आचण्डाल स्मनुष्याणामल्पं
शास्त्रप्रयोजनमिति इदं वाप्यारामतड़ादि पुण्यं
परोपकारकरणात् इदं परगृहदाहादि पापं परा-
पकारकरणात् तथाचोपकारापकारौपयिके कर्मणि
लोके धर्माधर्मशब्दप्रसिध्या एतदर्थं शास्त्रमल्प-
प्रयोजनमनुवादकत्वात्। शास्त्रं विनापि लोक-
प्रसिद्धेरेव धर्माधर्मयो ज्ञातुं शक्यत्वादित्यर्थः।
अत एव ब्राह्मणादिवर्णविवेकः सङ्गच्छते इति
चेत् सत्यं। लोकप्रसिद्धिरेवात्र समीक्ष्यते। कि-
मियं लोकप्रसिद्धिः भ्रान्तिमूला किं वा प्रत्य-
क्षादिप्रमाणमूला अथवा चोदानमूलेति तत्र
प्रत्यक्षादीनां निराकरणात् चोदना अभाव इत्ये-
तद्वयमवशिष्यते। अतः चोदनाप्रामाण्यावधा-

रणाय अभावप्रामाण्यनिराकरणं युज्यते एवेत्य-
भिप्रायः। नच प्रसिद्धेः स्वयं प्रमाणत्वमस्तु
किं मूलप्रमाणान्तरगवेषणयेतिवाच्यम्। प्रत्यक्षा-
द्यमूलकलोकप्रसिद्धेरप्रमाणत्वात् अव्यवस्थित-
त्वाच्च नास्तिका हिंसामेव धर्ममाहुः। केचित्
प्राजापत्यादिकं तपः अन्ये तु स्वपीड़ाकरत्वात्
परपीड़ावदधर्म एवेत्याहुः। वैदिकास्तु विधि-
निषेधप्रमाणकौ धर्माधर्मौ इत्यूचुः एवं भगव-
त्प्रीतिरेब धर्मः तदप्रीतिस्तु पापम् यत्त्वप्रियं
तदिह पुण्यमपुण्यमन्यदिति भागवताः प्राहुः
तस्मात् प्रसिद्धेर्न स्वतः प्रमाणत्वं। किन्तु प्र-
त्यक्षादिमूलकत्वेनैवेति मूलान्वेषणे चोदनाति-
रिक्तमूलं नोपलभ्यते इति भावः सम्बन्धानि-
त्यत्वशंकानिवृत्तये औत्पत्तिकपदार्थं व्याचष्टे
भाष्यकारः।

धर्मे वेदप्रामाण्यस्याधिकरणम्

सू० औत्पत्तिकस्तु शब्दस्यार्थेन
सम्बन्धः तस्यज्ञानमुपदेशोऽव्यतिरेकश्चा-

र्थेऽनुपलब्धे तत्प्रमाणं वादरायणस्यान-
पेक्षत्वात् ।

भा० औत्पत्तिक इति नित्यं ब्रूमः उत्पत्तिर्हि भाव उच्यते लक्षणया अवियुक्तः शब्दार्थयोर्भावः सम्बन्धः नोत्पन्नयोः पश्चात् सम्बन्धः, औत्पत्तिकः शब्दस्यार्थेन सम्बन्धः तस्य अग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तं प्रत्यक्षादिभिरनवगतस्य कथम् ? उपदेशोहि भवति उपदेश इति विशिष्टस्य शब्दस्य उच्चारणम् ।

नित्यमिति यद्यपि व्युत्पत्त्या नित्यत्वं नायाति तथापि लक्षणया तादृगर्थो लभ्य इत्याह लक्षणयेति अवियुक्तस्सदातन इत्यर्थः अस्य प्रयोजनमग्रे स्फुटीभविष्यति शब्दार्थयोः सम्बन्धो नित्य एवेति भावः सूत्रावयवार्थमाह तस्येति विशेष-स्वरूपनिर्देशाय आह अग्निहोत्रेति पूर्वसाधिता-

र्थमाह प्रत्यक्षादिभिरनवगतस्येति तथा च प्रत्यक्षाद्यनवगताग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तं ज्ञानं हि यस्मादयमुपदेशः। नच ज्ञानोपदेशयोर्भिन्नत्वात् कथं सामानाधिकरण्यं ज्ञानमर्थविषयकमात्मनिष्ठं उपदेशश्च शब्दात्मकः नहि ज्ञानं शब्दो भवति उपदेश इति विशिष्टस्य शब्दस्योच्चारणमिति भाष्योक्तेरिति वाच्यं भावसाधनज्ञानग्रहणे एतादृशदोषसंभवेपि करणसाधनज्ञानपदोपादाने दोषाभावात् तथाच ज्ञायतेऽनेनेति ज्ञानं ज्ञाननिमित्तं प्रमाणमिति यावत् तथा चेदृशस्य प्रमाणात्मकस्य ज्ञानस्योपदेशेन सम मभेदान्वयः उपदेशः विधिघटितं वाक्यं धर्मे ज्ञानं प्रमाणमितिभाष्यार्थः। विशिष्टस्येति विधिविशिष्टस्येत्यर्थः योग्यतादिविशिष्टप्रवर्तकवाक्यस्येतियावत्।अत्रोपदेशपदेनज्ञानानुत्पत्तिलक्षण मप्रामाण्यं निराकृतम् । औत्पत्तिकशब्देन च कारणदोषाधीनमप्रामाण्यं पराकृतम्। यदि संबन्धः कृतकः स्यात् तदा तद्द्वारापि पुरुषदोषा-

नुप्रवेशशङ्कया अप्रामाण्यं स्यात्। नत्वेतदस्ति शब्दार्थसम्बन्धस्य स्वाभाविकत्वेन पुरुषाधीनत्वाभावादिति भावः प्रमाणान्तरबाधशङ्कानिरासायाहाऽव्यतिरेकश्चेति बाधकप्रमाणाभावात् न विपर्ययः चकारेण च संशयस्य निरासः। अनुपलब्धेऽर्थे इत्यनेनानुवादलक्षणाप्रामाण्यनिरासः सूचितः। उपलब्धार्थज्ञापकं वाक्यमनुवादकत्वात् न प्रमाणं अग्निर्हिमस्य भेषजमितिवाक्यवत्। अत एव च स्मरणस्याप्रमाणत्वोपपादनं संगच्छते। तथा च असन्दिग्धाविपरीताग्रहीतग्राहिज्ञानं प्रमाणमिति प्रमाणलक्षणं सूचयन्नाह सूत्रे प्रमाणमिति। ननु पूर्वं प्रतिज्ञातं चोदनायाः प्रामाण्यमप्रसाध्य उपदेशस्य तत्साधनमनुचितं प्रतिज्ञाविरोधादिति चेन्न विध्युपदेशचोदनानामनर्थान्तरत्वात् नहि पर्यायपदोपादानप्रतिज्ञाविरोधः प्रतिज्ञाविपरीतसाधनाभावात् प्रतिज्ञातार्थस्यैव साधनात् ननु यजेत स्वर्गकाम इत्यादौ आख्यातेन भावनाया धातुना यागादेः स्वर्गादिपदेन स्वर्गा-

दिफलस्य चोपस्थित्या परस्परसमभिव्याहाराद् भावनायां साध्याकांक्षया स्वर्गादेः साधनाकांक्षायां समानपदोपात्तधात्वर्थयागादे रन्वयाभ्युपगमेन स्वर्गफलिका यागभावनेति बोधादेव स्वर्गार्थिनो यागादौ प्रवृत्त्युपपत्ते र्विध्याश्रयणमनर्थकम् । नच होमादेः स्वर्गसाधनभावप्रतोतावपि विधिं विना पुरुषप्रवृत्ति र्न भवतीति तदर्थं विध्याश्रयणमिति वाच्यम् । इष्टसाधनत्वबोधनमन्तरा वचनसहस्रेणापि पुरुषप्रवृत्तेर संभवेन तस्य च साध्यसाधनसमभिव्याहारादेव बोधा त्तदर्थिनः स्वत एव तत्र प्रवृत्त्युपपत्तेः । नच न ब्राह्मणं हन्यात् न सुरां पिबेदित्यादौ ब्राह्मणहनन सुरापानादेः पुरुषस्य निवृत्तये तदाश्रयणम् । तत्रापि प्रतिषेधादेव हननपानादेरनिष्टसाधनत्वबोधाद्द्वेषादेव निवृत्त्युपपत्तेरिति चेन्न यजेत इत्यादौ आख्यातोपात्तभावनायां साध्यत्वाकांक्षया समानपदोपात्तधात्वर्थयागादेरेवान्वयलाभेन तस्यचेष्टत्वाभावात्पुरुषप्रवृत्त्यभावापत्तेः ।

विधिस्वीकारे तु समानपदोपात्तयागादेरपि सन्नि-कृष्टतरेणैकप्रत्ययोपात्तेन लिङ्वाच्यविध्यर्थपुरुष-प्रवर्तनेन साध्याकांक्षया भावनायामन्वया त्तदंशे निराकांक्षत्वात्साधनाकांक्षायां समानपदोपात्त-यागादेरन्वयाद् यागादेः श्रेयःसाधनभावोलभ्यते इति विधिः स्वीकार आवश्यक इति एवं चोप-देशपदेनात्रचोदनैव विवक्षिता सा च धर्मे प्रमा-णमेव। असन्दिग्धाविपरीतप्रमाणान्तरानधिगत-धर्मज्ञानजनकत्वात्। विपर्ययादर्शनं प्रामाण्य-निश्चायकं न साक्षात् किन्तु सति विपर्यये प्रामा-ण्यापनोदः असति तु अपनोदकाभावा त्स्वतः प्राप्तस्य प्रामाण्यस्य स्थितिः। ननु लोकेप्रमा-णान्तरसंवादादेव प्रामाण्यं दृष्टम् इह तु अती-न्द्रियविषये प्रमाणान्तरसंवादासंभवा त्कथं तन्निर्णय इतिशंकानिवारणाय विपर्ययादर्शन-स्यैव प्रामाण्यनिश्चायकत्वमाह।

भा० यच्च नाम ज्ञानं न विपर्य्येति, न तत् शक्यते वक्तुं न एतदेवमिति

यथाविज्ञायते न तथा भवति यथैतन्न विज्ञायते तथैतदिति अन्यदस्य हृदये अन्यद्ग वाचि स्यात्, एवं वदतो विरुद्ध मिदं गम्यते अस्ति नास्त्तिवेति तस्मात् तत्प्रमाणमनपेक्षत्वात्। नहि एवं सति प्र-त्ययान्तरमपेक्षितव्यं पुरुषान्तरं वापि अयं प्रत्ययो ह्यसौ। वादरायणग्रहणं वादरायणस्येदं मतं कीर्त्यते वादरायणं पूजयितुं नात्मीयं मतं पर्युदसितुम्

यच्चेति संवादस्य प्रामाण्यावधारणहेतुता पूर्व-मेव निरस्ता। विपर्ययाद्दर्शनमेव तत्र हेतुरि-त्यपि सिद्धान्तितं प्रकृते च विपर्ययो न दृश्य-तेऽतः प्रमाणं चोदना पौरुषेयवाक्यन्तु पुरुष-दोषादप्रमाणमपि यथा शुक्ता विदं रजतम् अत्र यथा विज्ञायते पुरोवर्त्ति वस्तु रजतात्मना। न तथा न रजतात्मकं यथा न विज्ञायते शुक्तिशकलत्वेन

तथा शुक्तिशकलमेतत् । एवंच तत्र पुरुषस्य दोषः प्रतारकस्य हृदये अन्यत् स्वयमपि जानाति नेदं रजतं किन्तु परप्रतारणायेदं रजत मिति ब्रवीति इत्याह अन्यदिति एवं चानाप्तवाक्येऽयं सन्देहो भवति यथोच्यते तथास्ति नास्तिवेत्याह एवं वदत इति तथाच पुरुषदोषापराधाधीनम प्रामाण्यं पौरुषेयवाक्ये एव । अपौरुषेये तु वक्तुरभावात् निराश्रया दोषाः न प्रामाण्यं निघ्नन्ति इत्याह अनपेक्षत्वादिति एवं चापौरुषेयवाक्यप्रामाण्य-निर्णयाय न प्रत्ययान्तरं तन्मूलभूत प्रत्यक्षादि-प्रमाणान्तरं संवादकत्वेनापेक्षितव्यम् नत्रा अनाप्तपुरुषापेक्षया पुरुषान्तरमाप्तपुरुषःतदपेक्षया पौरुषेये वाक्ये वक्तृगुणावधारणाधीनं प्रामाण्यम् नत्वपौरुषेये वेदवाक्ये इत्यतोऽनपेक्षप्रामाण्यमस्य बादरायणग्रहणं पूजार्थं नत्वात्मनोननुमति-सूचनार्थम् । पूजा च ग्रन्थस्य बादरायणस्य च भवति धन्यो महर्षि र्बादरायणोऽतीन्द्रियज्ञान-निधिर्यस्य मतं मीमांसाशास्त्रेप्यस्ति इति प्रशंसा-

रूपापूजा वादरायणस्य प्रतीयते धन्यमिदमौत्
प्रामाणिकं मीमांसा शास्त्रं यस्मिन् वादरायण-
स्यापि महर्षेर्मतमस्तीति प्रकृतग्रन्थस्यापि प्रामा-
णिकार्थाभिधानरूपा स्तुतिः प्रतीयते एतदुभय-
स्तुत्या ग्रन्थे प्रामाणिकत्वनिश्चय स्ततः प्रेक्षा-
वतांमसन्दिग्धा प्रवृत्ति रिति युज्यत एव तदभि-
धानम् सूत्रेपीतिभावः इति कल्पकलिकायामौ-
त्पत्तिकं पञ्चमं सूत्रम् ।

वृत्तिकारस्तु अन्यथेमंग्रन्थं वर्णयाञ्चकार
तस्य निमित्तपरीष्टिरित्येवमादिं न परीक्षितव्यं
निमित्तं प्रत्यक्षादीनिहि प्रसिद्धानि प्रमाणानि
तदन्तर्गतञ्च शास्त्र मत स्तदपि न परीक्षितव्यम्
इत्येवमादिमिति इत्येवमादि र्यस्मिन्स-
इत्येवमादि ग्रन्थस्तं इत्येवमादिं ग्रन्थं वृत्तिकारो-
न्यथा वर्णयाञ्चकारेत्यर्थः विशेष्यग्रन्थस्य पुंलि-
ङ्गतया तद्विशेषणस्यापि तदेवयुक्तमितिमकारा-
न्तमित्येवमादिमिति पाठ एव समीचीनः ।
यत्तु सामान्येन नपुंसकत्वविवक्षया लुप्तमकारान्त

इत्येवमादि इति पाठः साधुरित्युक्तं तदसत् अनुक्तविशेष्ये सामान्यविवक्षणेन नपुंसकं भवतीत्येव तदर्थतया प्रकृते विशेष्यस्योपादानेन तदनुशासनाप्रवृत्तेः सत्यपि विशेष्ये शरदः कृता-र्थतेत्यादौ सामान्यविवक्षया नपुंसकप्रयोगोप पादनन्तु गत्यन्तरविरहादाश्रितं नचेहगतिविरह इति मकारान्त पाठ एव श्रेयान्। न परीक्षितव्य मिति नच नञः सूत्रेऽनुपादाना न्निमित्तपरी-क्षानिषेधपरतया व्याख्यानमयुक्तमिति वाच्यम् नञोऽध्याहारेणालाभसम्भवात् प्रसिद्धानीति सन्दिग्धे विचारःप्रवर्तते विचारस्य निर्णयफल-कत्वात्। प्रत्यक्षादीनि लोके प्रसिद्धानि प्रमाणा-नि। नहि केचित् प्रत्यक्षादिषु संशेरते इदं प्रमा-णं नवेति इति विचारफलस्य निर्णयस्य पूर्वमेव सिद्धत्वात् एतद्विचारो निष्फलत्वान्नकार्य्य इत्य-भिप्रायो वृत्तिकारस्य। तदेतद्वृत्तिकारव्याख्यानं दूषयति भाष्यकारः। अत्रोच्यते इत्यादिना।

भा० अत्रोच्यते व्यभिचारात्

परीक्षितव्यम् शुक्तिका हि रजतवत् प्रकाशते यतः तेन प्रत्यक्षं व्यभिचरति तन्मूलत्वाच्चानुमानादीन्यपि। तत्रा परीक्ष्य प्रवर्तमानोर्थाऽत् विहन्येत। अनर्थञ्चाप्नुयात् कदाचित्।

अयंभावः यदि प्रत्यक्षमात्रमभिचारि स्यात् तदा तत्परीक्षणमसंगतं स्यात्। परीक्षाफलस्य तत्प्रामाण्यनिर्णयस्य परीक्षातः पूर्वमेव जातत्वात्। किन्तु प्रत्यक्षं व्यभि चार्य्यपि दृश्यते इत्याह भाष्ये शुक्तिका हि रजतवत् प्रकाशते नचैतज्ज्ञानं प्रमाणमिति केनाप्यङ्गीक्रियते तथाच प्रत्यक्षेऽपिव्यभिचारदर्शनात्तत् प्रामाण्यं परीक्षणीयमेव। ननु शुक्तिरजताभास स्यायथार्थत्वलक्षणव्यभिचारेऽपि तद्भिन्नस्यप्रत्यक्षस्य न व्यभिचार इति प्रत्यक्षस्य व्यभिचारोद्भावनं भाष्कारस्य कथं सगच्छते इति चेदित्थम्। प्रत्यक्षतदाभासयोर्लक्षणभेदमज्ञात्वा द्वयोरिन्द्रियज-

न्यत्वाविशेषात्प्रत्यक्षत्वमेवेत्यभिमानेनाभास व्यभिचारः प्रत्यक्षव्यभिचारत्वेनोदाहृत इति व्येयम्। तस्मात् प्रत्यक्षंपरीक्षणीयमेव । अपरीक्ष्येति शुक्तौरजतबुद्ध्या प्रवर्त्तमानः पुरुषः शुक्तिमेव लभते न रजतमित्याभासितादर्थाद्रजता प्रच्यवते क्वचिच्च सर्परज्जुबुद्ध्या प्रवर्त्तमानः रज्जुं न लभते अनर्थं सर्पं लभते इति समोहितलाभाय परीक्षितव्यमेव प्रत्यक्षादीतिभावः । भवतु नाम यस्य प्रत्यक्षतदाभासयो र्विवेको नास्ति तदनुसारेण प्रत्यक्षातदाभासयोरविशेषादाभासव्यभिचारेण प्रत्यक्षपरीक्षणम्। यस्य तुपुनः प्रत्यक्ष तदाभासयो र्विवेकोऽस्ति तस्य सर्वत्राव्यभिचारित्वात्प्रत्यक्षमपरीक्षणीयमेव शुक्तिरजतादिज्ञानस्य तु न प्रत्यक्षत्वम् । किन्त्वाभासत्वमेवेति भवतु तस्य व्यभिचारः किमायातमेतेन प्रत्यक्षास्य ततो भिन्नस्येत्यभिप्रायेणाशंकते ।

भा० नैतदेवम् यत्प्रत्यक्षं न तद्

व्यभिचरति न तत् प्रत्यक्षम् किन्तर्हि प्रत्यक्षम् सत्सम्प्रयोगे पुरुषस्य इन्द्रियाणां बुद्धिजन्म तत् प्रत्यक्षम् यद्विषयं ज्ञानं, तेनैव सम्प्रयोगे इन्द्रियाणां पुरुषस्य बुद्धि-जन्म सत् प्रत्यक्षम् यदन्यविषयज्ञान मन्यसम्प्रयोगे भवति न तत् प्रत्यक्षम्। कथं पुनरिदमवगम्यते ? इदं तत्सम्प्रयोगे इदमन्य सम्प्रयोगे इति। यत् न अन्य-सम्प्रयोगेतत् तत्सम्प्रयोगे एतद्विपरीत मन्यसम्प्रयोग इति। कथं ज्ञेयम् यत् शुक्तिकायामपि रजतं मन्यमानो रजत-सन्निकृष्टं मे चक्षुरिति मन्यते।

नैतदेवमिति यत्प्रत्यक्षमदुष्टेन्द्रियजन्यंतन्न व्यभिचारि यच्च व्यभिचरति आभासं तन्न प्रत्यक्षमदुष्टेन्द्रियसनिकर्षजत्वाभावादिति आ-

भासव्यावृत्तं प्रत्यक्षलक्षणं पृच्छति किमिति उत्तरमाह सत्संप्रयोग इति यद्यपि विषयविशेषणोपादानविरहेण शुक्तिरजताद्याभासेऽतिव्याप्त्या भाष्यकृता सत्संप्रयोग इति सूत्रं लक्षणपरतया न व्याख्यातं किन्तु प्रत्यक्षानुवादकमिति व्यवस्थापितं तथापि वृत्तिकृता तत्सतो र्व्यत्यासं कृत्वा तत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षमिति सूत्रं मत्वा लक्षणपरतया व्याख्यातं तदेव दर्शयति भाष्यकारः तत्संप्रयोग इति एवं च येन विषयेणेन्द्रियसंप्रयोगः तद्विषयकमेव प्रत्यक्षम् शुक्तिरजताद्याभासे तु शुक्तिशकलेनेन्द्रियसंप्रयोगः ज्ञानं तु रजतस्य तेन सह नेन्द्रियसंप्रयोग इति न तत्रातिव्याप्तिरित्याह तेनैवेति। नच प्रत्यक्षलक्षणे ज्ञातेऽपि आभासपरिज्ञानाय तस्यापि लक्षणं वाच्यम् अन्यथा तदज्ञाने तद्विपरीतप्रत्यक्षविवेको न स्यादिति वाच्यम्। अर्थापत्त्यैवाभासज्ञानसम्भवा त्तदर्थलक्षणानावश्यकत्वात् । तथाहि तत्संप्रयोगजं प्रत्यक्ष-

मित्यभिधाने अर्थाद् ज्ञायते प्रत्यक्षविपरीत-
माभासं अन्यसंप्रयोगजमिति न सूत्रकृत स्तस्य-
विशिष्य लक्षणकरणावश्यकता इत्यभिप्रायेणाह
एतद्विपरीतमिति नन्वाभासदशायां तत्र तत्सं-
प्रयोगजत्वमेव प्रतीयते नान्यसंप्रयोगजत्वमत
एवाध्यासवान् रजतसंनिकृष्टं मे चक्षुरित्येव
जानाति तथा चाभासत्रिवेको दुर्घट इत्याशंका-
यामाह वाधकेति तथाच नेदं रजतमिति वाध-
क ज्ञाने जाते इदं रजतमितिज्ञानं न प्रत्यक्षं
रजतेन्द्रियसन्निकर्षजत्वाभावात् किन्त्वाभासम-
न्यसन्निकर्षजत्वात् यदेतत् विपरीतं तत्प्रत्यक्षम
तत्संप्रयोगजमिति प्रत्यक्षतदाभासयो विवेकः
वाधकज्ञानेन भवति। ननु शुक्तिशकले पूर्वमिदं
रजतमितिज्ञानं जायते ततोनेदंरजतमितिज्ञानं
जायते नेदं रजतमितिज्ञानं इदं रजतमितिज्ञानं
वाधते इत्येव कुतः इदंरजतमितिज्ञानमेव नेदं
रजतमितिज्ञानं कुतो न वाधते विशेषाभावादिति
वाच्यम्। पूर्वाभासज्ञानवाधनं विना उत्तरस्य

समीचो ज्ञानस्योत्पत्तिरेव न स्यादित्यात्मला-भाय उत्तरेण पूर्ववाधः स्वीक्रियते पूर्वज्ञानोत्पत्ति-वेलाया न्तु उत्तरज्ञानस्यासत्त्वादेव तद्बाधनं विनैव पूर्वज्ञानस्यात्मलाभ इतिविशेषदर्शनात् पूर्वस्योत्तरवाधकत्वमिति । नच पूर्वज्ञानस्य मिथ्यात्वे उत्तरज्ञानेन वाधः तद्बाधेन पूर्वज्ञानस्य मिथ्यात्वमित्यन्योन्याश्रय इति चेन्न उत्तरज्ञानेन पूर्वज्ञानमिथ्यात्वोत्पत्ते रनङ्गीकारात् । कारण-दोषा ज्जातस्य पूर्वज्ञानमिथ्यात्वस्यावगमोवाध-कज्ञानेनेत्येवस्वीकारात् । एवं सति न पूर्वज्ञान-मिथ्यात्वमाश्रित्योत्तरज्ञानसमुत्पादः तस्यानिर्दु-ष्टेन्द्रियजन्यत्वादिति क्वान्योन्याश्रय इति । नन्वेवं वाधकज्ञानोत्तरं मिथ्यात्वनिर्णयोपपा-दनेऽपि तदुत्पत्तेः प्राक् तन्निर्णयः कथमुपपद्य-ताम् । तदानीं समीचीनमिथ्याज्ञानयोर्विशेषा-नवधारणादित आह प्रागिति ।

भा० वाधकं हि यत्र ज्ञानमुत्पद्यते नैतदेवं, मिथ्याज्ञानमिति, तत् अन्यसम्प्र-

योगे विपरीतं तत्सम्प्रयोगे इति प्राक्बाधक-ज्ञानोत्पत्तेः कथमवगम्यते यदा न तत्काले सम्यग् ज्ञानस्य मिथ्याज्ञानस्य वा कश्चि-द्विशेषः। यदा हि चक्षुरादिभिरुपहतं मनो भवति तदिन्द्रियं वा तिमिरादिभिः सौक्ष्म्यादिभि र्वाह्यो वा विषयः ततो मिथ्याज्ञानम् अनुपहतेषु हि सम्यग् ज्ञानम्। इन्द्रियमनोऽर्थसंनिकर्षो हि सम्य ग्ज्ञानस्य हेतुः असति तस्मिन् मिथ्याज्ञानं तदुभयगतो दोषो मिथ्याज्ञानस्य हेतुः। दुष्टेषु हि ज्ञानं मिथ्या भवति।

तथा च मिथ्याज्ञानानुत्पत्तावपि कारणदोषज्ञाने-नैवतन्निर्णय इति मनोदोषं दर्शयति चक्षुरादि-भिरुपहतं मनोभवतीति तथाचेन्द्रियप्रवृत्तिनि-यामकस्य मनसो ऽनवस्थाना त्तत्र मिथ्याप्रत्यय स्समुत्पद्यते। इन्द्रियस्य वाह्यस्य दोषमाह तिमि-

रादिभिरिति तथाच तिमिरादिदोषदूषितलोच-
नस्य पुरःस्थस्थाणौ स्थाणु र्वा पुरुषोवेति मि-
थ्याज्ञानजननमिति। विषयदोषं दर्शयति सौ-
दृश्यादीनि आदिपदेन शुक्तिशकलगतश्वैत्यचा-
कचिक्यादयः तथाच दुष्टकारणनिवन्धनं मि-
थ्यात्वं दोषरहितकारणेन समीचीनमित्याह अ-
नुपहितेषुइति नचैवं दोषाभावोपि ज्ञानगतामि-
थ्यात्वे कारणमित्यायातं तथाच परतः प्रामाण्यं
स्यादित्याशंकानिवृत्तये समीचीनज्ञानकारणं
दर्शयति इन्द्रियेति यद्यपि इन्द्रियार्थसन्निकर्षोऽ
समीचीनज्ञानस्यापि कारणं तथापि ग्राह्येन्द्रि-
सन्निकर्ष स्तत्र नास्ति सन्निकर्षशब्देन ग्राह्य-
सन्निकर्षस्यैव प्रकृते विवक्षितत्वादिति भावः
ग्राह्येन्द्रियसन्निकर्षाभावेमिथ्याज्ञानमित्याह अ-
सतीति इंद्रियत्वेन वाह्यान्तरयोः संग्रह इत्यभि-
प्रायेणाह तदुभयेति विषयेन्द्रियोभयेत्यर्थः तथाच
विषयेन्द्रियोभयगतदोषोमिथ्याज्ञानहेतुः मिथ्या-
ज्ञानं प्रति दोषस्यान्वयं प्रदर्श्य व्यतिरेकं दर्श-
यितुं पृच्छति।

भा० कथमगम्यते दोषापगमे सम्प्रतिपत्तिदर्शनात् कथं दुष्टादुष्टावगमः इति चेत् प्रयत्नेनान्विच्छन्तो नचेद्दोषमवगच्छेमहि प्रमाणाभावाददुष्टमिति मन्येमहि । तस्माद् यस्यचदुष्टं करणं यत्र मिथ्येति प्रत्ययः स एवासमीचीनः प्रत्ययो नान्य इति ।

कथमिति दोषाशये समीचीनज्ञानदर्शनादन्वयव्यतिरेकाभ्यां दोषस्य मिथ्याज्ञानहेतुत्वमित्यभिप्रायेणाह दोषापगमे इति नन्विन्द्रियाणामतीन्द्रियतया तद्गतदोषाणां प्रत्यक्षत्वासम्भवात्तद्विशिष्टेन्द्रियादेरवगमो दुर्घटः संभावनामात्रेण दोषपरिज्ञानं तु समीचीनज्ञानेऽपि सुलभमित्याशयेनपृच्छति कथंदुष्टावगम इति सम्वादेन गुणावधारणेन वा दोषाभावः शक्यज्ञान इत्याह प्रयत्नेनेति नचैतावता परतः प्रामाण्यमाशङ्कनीयम् । दोषोत्सारणमात्रप्रयोजनत्वा

रसंवादगुणावधारणादेः ततश्च संवादादिना दो-
षाभावे निश्चिते अदुष्टेन्द्रियादिजन्यत्वेन ज्ञा-
नस्य स्वतः प्राप्तं प्रामाण्यमपनोदकाभावान्नि-
श्चीयते इति भावः मिथ्यात्वनिश्चयकारणमुपसं-
हरति तस्मादिति यस्य करणं दुष्ट मित्यनेन
दोषज्ञानस्य मिथ्यात्वनिश्चयहेतुत्वं बोध्यते यत्र
चेत्यादिना बाधकज्ञानस्यापि हेतुत्वं तत्र दर्शि-
तम् तथाच दोषज्ञानेन बाधकज्ञानेन वा मि-
थ्यात्वनिर्णयः पीतः शंखः इत्यादौ चन्द्रमण्डल-
परिमाणादौ च तदानीं विपरीतज्ञानानुदयोऽपि
दोषज्ञानादेव मिथ्यात्वनिर्णयो नान्यथा शुक्ति-
रजतादिस्थले तु नेदं रजतमिति विपरीतज्ञानात्
पूर्वज्ञानस्येदं रजतमितिज्ञानस्य मिथ्यात्वनिर्णय
इतिभावः नच विपर्ययज्ञानस्यैव मिथ्यात्वनिर्णा-
यकत्व मस्तु किन्दोषज्ञा नानुमानेनेति चेन्न
मिथ्याज्ञानोत्तरं सर्वत्र विपर्ययोत्पादे नियमाभा-
वात्। अत एव दूरत्वादि दोषावधारणेन चन्द्र-
मण्डलादिपरिमाणज्ञाने मिथ्यात्वसिद्धिः अन्यथा

तत्र विपर्ययज्ञानानुत्पादेन तदसिद्धिप्रसङ्गात् एवं पित्तादिदोषदूषितलोचनस्य पीतः शंख इतिभावदशायां विपर्ययज्ञानानुत्पादेऽपि कारणदोषावगमादेव तन्निर्णयः पुरुषान्तरविपर्ययज्ञानेन तत्रमिथ्यात्वोपपादनन्तु न युक्तिसहम् आम्नायार्थनिश्चयेऽपि नास्तिकादिविपर्ययेण मिथ्यात्वापत्तेः तत्तन्मताभ्युपगन्तृपुरुषविपर्ययापेक्षेण तु शाक्यादिसिद्धान्तस्यापि मिथ्यात्वं न स्यात् तेषां तत्र विपर्ययज्ञानानुदयात् एवं च यत्र बाधकज्ञानं नावतरति तत्र कारणदोषज्ञानेनैव मिथ्यात्वनिर्णयः तदवतारदशायां तु तेनेति बोध्यम्। यद्यपि विपर्ययस्थलेऽपि दोषोस्त्येव। तथापि पूर्वोपस्थितविपर्ययेण मिथ्यानिर्णये पश्चादनुमीयमानस्य दोषस्य तत्राप्रयोजकत्वमित्याशयात्। एवंच यज्जातीयज्ञाने क्वचिद्व्यभिचारो दृष्टः तज्जातीयज्ञाने जाते बाधकं विना तत्र संशयो जायते यथापित्तादिदोषदूषितलोचनः प्रथमं शङ्खं पीतं

पश्यन् सन्दिग्धे किमयं पीत उतपूर्वदृष्टवत् शुक्ल इति संशयेन निश्चये प्रतिबद्धे पश्चात् पित्तादि दोषज्ञाना त्तत्र मिथ्यात्वं निश्चिनोति। नच चन्द्रमण्डलादिपरिमाणज्ञाने स्वान्यत्रापि विना विपर्ययोदयं युक्तिमूलकानुमानेन प्रत्यक्षस्या-भासत्वं स्यादिति वाच्यम्। तथासति जात्या-दिज्ञानस्यापि धर्मिभेदाभेदविकल्पयुक्तिमूलके-नानुमानेनाभासीकरणत्वापत्त्या गोत्वाद्यनुभव-प्रामाण्यापलापापत्तेः। एवं च यादृशज्ञाने व्य-भिचारो दृष्ट स्तादृशज्ञाने एवं संशयो जायते नान्यत्रेति आलोकमध्यवर्त्तिघटादिप्रत्यक्षे क्व-चिदपि व्यभिचारादर्शना न्न तादृशज्ञाने तत्संदेह इति न तत्र कारणदोषानुमानेन मिथ्यात्वाव-गमः शक्यसम्पादन इति। जात्यादिज्ञानस्य मिथ्यात्वे तद्बाधः तद्बाधेन तु तस्य मिथ्यात्वाव-गम इत्यन्योन्याश्रयः स्यात्। नचभवन्मते-प्येष दोषः गोत्वादिज्ञानस्य बाधकादर्शनेऽमि-थ्यात्वं तदमिथ्यात्वे च बाधाभाव इति वाच्यम्

स्वतः प्रामाण्यवादिनां ज्ञानसत्यत्वस्य बाधका-नपेक्षितत्वेन स्वतएवोत्पत्या तद्विरोधादेव बाधकज्ञानानुदया न्नान्योन्याश्रय इति दिक् ॥

॥ इति कल्पकलिकायां वृत्तिकारव्याख्यानम् ॥

बौद्धा स्तु स्वप्ने यथा बाह्यार्थं विनैव अना-दिवासनावशात् विविधगजतुरङ्गादिज्ञानं जायते इति सर्वानुभवसिद्धमेवं प्रबोधसमयेऽपि बा-ह्यार्थं विनैव कुम्भोऽयं स्तम्भोयमित्यादि कुम्भ-स्तम्भादिर्विविधविषयकप्रतीति रुपपद्यते एवेति नैतत्प्रतीतिमात्रेण बाह्यार्थसद्भावः स्वीकर्तु मु-चितः। अन्यथा स्वाप्निकपदार्थाभ्युपगमोपि स्या त्प्रत्ययस्योभयत्र साम्यात्। नच प्रबोध-काले स्वाप्निकपदार्थानां बाधदर्शना त्तदानी-मर्थसद्भावोपपत्ति विरहा च्च तेषांमिथ्यात्वेऽपि प्रबोधकाले जायमानस्य स्तम्भादिप्रत्ययस्य तद्वैपरीत्या न्न मिथ्यात्वमिति वाच्यम् प्रबोधकाले प्रबोधकालिकप्रत्ययानामिव स्वप्नकाले तादृश-प्रत्ययानामपि बाधदर्शनाभावात्। प्रबोधकाले

स्वाप्निकप्रत्ययवाधनन्तु स्वप्नदशायां प्रबोधकालिकप्रत्ययवाधेन सममू नच तथार्थसद्भावोपपत्तिविरहात्स्वाप्निकप्रत्ययस्य मिथ्यात्वम्। प्रबोधकालेपि अर्थसद्भावोपपादकप्रमाणविरहेण दोषसाम्यात् कार्त्स्न्यैकदेशवृत्तिविकल्पादिपर्यनुयोगेनावयवातिरिक्तावयविनोविरहेण परमाणुपुञ्जात्मकस्य प्रत्यक्षविषयत्वासम्भवेन च तदुपपादकप्रमाणाभावात् ज्ञानस्यान्तरस्थत्वेन विषयाणां च वाह्यतया तयोः सम्बन्धाभावेन ग्राह्यग्राहकभावासम्भवात् ज्ञानस्य स्वाकारमात्रग्राहित्वनियमाच्च नच वाह्यार्थस्वीकाराभावे तद्विषयकव्यवहारानुपपत्तिः स्वप्नादिविषयव्यवहारवदेव तदुपपत्तेः विषयसद्भावेऽपि तदज्ञाने तद्व्यवहारो नदृश्यते तदभावेऽपि तद्ज्ञाने व्यवहारो दृश्यत इति अन्वयव्यतिरेकाभ्यां ज्ञानस्यैव व्यवहारहेतुत्वमङ्गीक्रियते नार्थस्यासम्भवात्। अत एवातीतानागतवस्तुविषयकव्यवहारः संगच्छते अन्यथा व्यवहारसमये विषयाणामसत्त्वात्तद्व्य-

वहारो न स्यात् नचातीतानागतानां कदाचित्स-
स्वस्वीकारेण तद्व्यवहारः सम्भवति सर्वदावाह्या-
र्थास्वीकारे तु खपुष्पादिव त्तद्व्यवहारो नैव स्या-
दिति वाच्यम्। व्यवहारदशायां विषयासद्भाव-
स्योभयत्रसाम्येन कालान्तरेऽर्थसत्वप्रयुक्तवैलच-
ण्यस्य प्रकृते अकिंचित्करत्वात्। नच वाह्यवि-
षयभेदानुपगमे ज्ञानभेदएव नस्या द्विषयभेद-
स्यैव ज्ञानभेदनियामकत्वादन्यथैकविषयेऽपि
ज्ञानभेदापत्तिरिति वाच्यम्। स्वप्नविज्ञानभेद-
वद्विनापि वाह्यविषय मनादिवासनाधीनविचित्र-
ज्ञानशक्तिभेदादेव तद्भेदोपपत्तेः। नचा नुभू-
तानामेव वाह्यविषयाणां निद्रादिदोषवशेन स्व-
प्नेऽन्यथाभानमिति विषयभेदप्रयुक्तस्यैव ज्ञान-
भेदस्य तत्रापि स्वीकार इति वाच्यम्। अननु-
भूतानामपि स्वशिरश्छेदनादीनां स्वप्नेभानद-
र्शना दनुभूतवाह्यार्थस्यैव स्वप्ने भानमिति निय-
मानंगीकारात्। जन्मान्तरानुभूतस्वशिरश्छेदना-
दीनामेव स्वप्नेभानं नाननुभूतानामिति वचन

न्तु अतित्रपाकरम्। तथासति जन्मान्तरानुभूत-जात्यादीनामपि स्मरणापत्तेः। नच वाह्यार्थभेदानंगीकारे ज्ञाननिष्ठशक्तिभेदनियामकवासनाभेद एव दुर्घट इतिवाच्यम् पूर्वपूर्ववासनाभेदस्योत्तरोत्तरज्ञानशक्तिभेदनियामकत्वोपगमात् नचेयमनवस्था क्षतिकरी वीजाङ्कुरवदेतस्या अदोषत्वात्। नच वाह्यार्थस्येव प्रत्ययस्यापि असत्वमेवास्तु किन्तदीयस्वत्वस्वीकाराभिनिवेशेनेति वाच्यम्। सर्वव्यवहारविलोपापत्या जगदान्ध्यप्रसंगादित्यर्थस्य सांवृत्तिकं सत्वमभ्युपेयते तथाचोक्तं वाह्यैः पररूपं स्वरूपेण यया सव्रियते धियेति। वाह्यार्थस्य असद्भावस्वरूपं स्वरूपेण पारमार्थिकसत्वेन संव्रियते आच्छाद्यते इति असन्नपि वाह्यार्थः विज्ञानेन तदसत्वसंवरणात् सन्निवोपलभ्यते एवंच सत्वं द्विविधं पारमार्थिकसत्वं सांवृत्तिकसत्वं च आद्यं विज्ञाने एव द्वितीयमर्थे इति अर्थस्यात्यन्तासत एव सर्वत्रभानात्। सर्वज्ञानानां मिथ्यात्वमिति

द्दोषवाधकज्ञानयोरेव मिथ्यात्वनिर्णायकत्वोक्ति- रयुक्ता एवं चोदना धर्मे प्रमाणमन्यदप्रमाणम् तत्संप्रयोगजं प्रत्यक्षमन्यसंप्रयोगजमाभासं अ- ग्निहोत्रादि पुण्यं तत्फलं स्वर्गादि सुरापानादि पापं तत्फलं दुखं विधेः प्रवर्त्तनमर्थः अर्थवादस्य प्ररोचनमर्थः स्मृत्याचारयोः प्रामाण्याप्रामाण्य- विचारः कारीर्य्यादीनामैहिकफलत्वं दर्शपूर्णमा- सादीनामामुष्मिकफलत्वमित्यादि सर्वोपि वि- चारः निष्फलः सर्वविधीनामप्रामाण्यादिति प्राहु स्तन्मतं दूषयितुमुपन्यस्यति ननु सर्वए- वेति।

भा० ननु सर्व एव निरालम्बनः स्वप्न वत् प्रत्ययः प्रत्ययस्य हि निरालम्बनता ह्यभाव उपलक्षितः स्वप्ने जाग्रतोऽपि स्तम्भ इति वा कुड्य इति वा प्रत्यय एव भवति तस्मात् सोपि निरालम्बनः।

निरालम्बनः बाह्यार्थशून्यः दृष्टान्तमाह स्वप्नइति निगमयति तस्मादिति तथाचायं प्रयोगः सर्वोपि प्रबोधकालिकः प्रत्ययोनिराल- म्बनः प्रत्ययत्वात् स्वाप्निकप्रत्ययवत् प्रत्ययश्चा सौ तस्मान्निरालम्बन इति। ननु तन्मते निखि- लप्रत्ययस्य निरालम्बनत्वमिष्टम् जाग्रतोपि स्त- म्भ इति भाष्येण प्रबोधकालिकप्रत्ययस्यैव पक्ष- ता प्रतीयते तदयुक्तमितिचेन्न निखिलप्रत्ययस्य पक्षीकरणे पक्षतावच्छेदकसामानाधिकरण्येना- नुमितौ स्वप्नेसिद्धसाधनता अवच्छेदकावच्छे- देनानुमितौ दृष्टान्ताभावः एवशब्दोपादानवै- यर्थ्यं च स्यात् स्वान्वयिप्रतियोगिव्यवच्छेदक- त्वादेवशब्दस्य स्वं एवशब्द स्तदन्वयि सर्वार्थ- साकल्यं तत्प्रतियोगिवैकल्यं तद्व्यवच्छेदबोधनं विफलं सर्वशब्देनैव तद्बोधनात्। जाग्रत्प्रत्यय- स्यैव पक्षीकरणे तु जाग्रत्प्रत्ययपरिग्रहार्थ एव शब्दः स्वाप्निकप्रत्ययस्य व्यवच्छेदकः एवं च यः कश्चिद् जाग्रत्प्रत्यय इत्यर्थो माभूत् किन्तु

सर्व एव जाग्रत्प्रत्यय इति लाभाय सर्वशब्दः एवं च तत्रत्य एवशब्दः सर्वशब्दस्य जाग्रत्प्रत्ययपरत्वं व्यवस्थापयति तदेतत् स्तम्भादीति भाष्येण स्फुटीकृतम् शुक्तिरजतादिजाग्रत्प्रत्ययस्य मिथ्यात्वस्वीकारा त्सिद्धसाधनमिति सर्वशब्दोपादानमेवं स्तम्भादिप्रत्ययस्य मिथ्यात्वानङ्गीकारा न्न सिद्धसाधनमिति भावः निरालम्बनमित्यनेन वाह्यार्थशून्यत्वं विवक्षितं अन्यथाबौद्धमते विज्ञानस्य स्वांशविषयकत्वस्वीकारेण सर्वथा निरालम्बनत्वाभावाद्विरोधः स्यादिति नचास्य भाष्यस्य वौद्धानुमाननिर्देशपरत्वेन व्याख्यानमयुक्त मत्रहेतोरनिर्देशादिति वाच्यम्। पंचम्यन्तेनैव हेतुनिर्देशः कार्य इति नियमाभावेन प्रत्ययस्य हीति भाष्येण स्वप्ने निरालम्बनत्वप्रत्ययत्वयोर्व्याप्तिं प्रदर्श्य जाग्रतोपीतिभाष्येणोदाहरणोपदर्शितव्याप्तिविशिष्टप्रत्ययत्वस्य जाग्रत्प्रत्यये उपसंहारा त्प्रत्ययत्वस्य स्पष्टमेव हेतुत्वबोधनात् । नच हेतो विपक्षव्यावृत्तत्वबोधनार्थं यन्न निरालम्बनं न तत्प्र-

त्यय इति व्यतिरेकोदाहरणमपि आवश्यकत्वा त्प्रदर्शयितुं युक्तमिति किमर्थं तदुपेक्षितम् । विज्ञानवादिनां तदतिरिक्तवस्तुनोऽभावेन विपक्षवृत्तित्वशङ्कायाः स्वतएवानुत्पत्त्या तन्निराकरणाय व्यतिरेकोदाहरणप्रदर्शनस्यानावश्यकत्वादिति। उत्तरमाह—

भा० उच्यते स्तम्भ इति जाग्रतो बुद्धिः सुपरिनिश्चिता कथं बिपर्यसिष्यतीति स्वप्ने प्य्येवमेव सुपरिनिश्चिता आसीत् प्राक् प्रबोधनात् न तत्र कश्चिद् विशेष इति ।

अत्रोच्यते इति सुपरिनिश्चिता बाधकप्रत्ययरहिता तथाच अबाधितवाह्यार्थविषयकप्रत्ययत्वादिप्रतीतिः वाह्यार्थं सुपरिनिश्चितं व्यवस्थापयन्तो तद्विरुद्धं निरालम्बनत्वानुमानं बाधते वह्नौ शैत्यानुमानवदिति न जाग्रत्प्रत्ययस्य मिथ्यात्वं यथाशुक्तिशकलादाविदं रजतमिति प्रत्ययस्य

नेदं रजतमिति वाधकप्रत्ययेन मिथ्यात्वमेवं स्तम्भादिप्रत्ययस्य नायं स्तम्भादिरिति वाधकप्रत्ययादर्शनेन न मिथ्यात्वमिति स्वाप्निकप्रत्ययानुरोधेन सुपरिनिश्चितस्य जाग्रत्प्रत्ययस्य मिथ्यात्वानुमानं कालात्ययापदिष्टमेवेति भावः। ननु सांवृत्तिकसत्वमादायैव वाह्यार्थसत्वावगाहिप्रत्ययत्वाद्युपपद्यमानं पारमार्थिकसत्वाभावतात्पर्येण वाह्यार्थसत्वाभावानुमानं बाधितुं नोत्सहते इति वाच्यम्। सत्यस्य परमार्थवाचकत्वेन मिथ्यापर्यायसांवृत्तिकशब्देन सामानाधिकरण्यासंभवात्। यदि चैकं सत्यत्वं पारमार्थिके सांवृत्तिके च स्यात्तदा एवं सत्यभेदः वक्तुं शक्येतापि। सांवृत्तिकस्य मिथ्यात्वेन तत्र सत्यत्वासम्भवात् यथा वृक्षत्वमेकं सिंहवृक्षत्वयो नानुगतमिति तेन तद्द्वैविध्यप्रतिपादनमयुक्तं तथा सत्यत्वमपि मृषापरमार्थयो र्नानुगतमिति सत्यत्वेन मृषापरमार्थभेदोपपादनमपि तेषां लोकवञ्चनार्थमेवेति। नच स्तम्भोयमित्यादि प्रत्ययः

स्तम्भादिविषयं गृह्णातीत्यविवादम् सच विषयः बाह्यो वा ज्ञानाकारोवेति विशिष्य नाभिनिवेशः तथा च स्वाकारमात्रग्राहितयोपपद्यमानं प्रत्यक्षादि अविरोधितया न बाह्यार्थसत्वाभावग्राहिणो ज्ञानस्य बाधाय प्रभवतीति वाच्यम् । स्वाकारग्राहित्वासम्भवे बाह्यार्थसत्वग्राहित्वस्यैव वक्तव्यतया तदसत्वग्राहिज्ञानविरोधस्य स्पष्टत्वात् । नहि अयं स्तम्भ इत्यादिप्रत्ययः स्वाकारं गृह्णाति तथासति अहं स्तम्भ इति प्रत्ययः स्यान्नत्वयं स्तम्भ इति बाह्यार्थग्राहित्वमेव तस्य वाच्यम् इति तदसत्वग्राहिज्ञानविरोधः स्पष्ट इति भावः । किंच स्तम्भादिप्रत्ययो निरालम्बनः प्रत्ययत्वादित्यनुमाने स्तम्भादिप्रत्ययस्य धर्मिणः निरालम्बनत्वरूपधर्मस्य च ग्राहकज्ञाने धर्मिधर्मोभयविषयकत्वरूपालम्बनत्वं स्वीक्रियते नवा आद्येनिरालम्बनत्वप्रतिज्ञाविरोधः। अन्ते अप्रसिद्धविशेषणत्वमप्रसिद्धविशेष्यत्वंचेति कुतो निरालम्बनत्वानुमानम् नहि अज्ञातस्य साध्यस्य

अज्ञाते धर्मिणि क्वचिदनुमानं दृष्टचरं कस्यापीति। अपि च एतादृशवाक्यप्रयोगे वक्तुः सम्बोध्यस्य च प्रत्ययनिरालम्बनत्वयोर्विशेष्यविशेषणयोः यज्ज्ञानं जायते तस्य निरालम्बनत्वे स्ववागविरोधः विशेष्यविशेषणयोः प्रत्ययनिरालम्बनत्वयो र्भेदाप्रतिभासे विशेष्यविशेषणभावानुपपत्तिः अभेदे तयोरभावात् भेदभानं त्वसम्भवि प्रत्ययस्य निरालम्बत्वात् भेदग्राहकत्वे सालम्बनत्वापत्तेरिति प्रतिज्ञातस्य प्रत्ययनिरालम्बनत्वस्य निरूपणमेवाशक्यमिति न निरालम्बनत्वं नाम किञ्छिद्वस्तु वोद्धुमर्हम्। अवस्तुत्वेन वोद्धुमनर्हतया परस्मै किं निरालम्बत्वेन वोधयसि कथं वा त्वमेव बुध्यसे कल्पयित्वा तद्बोधनमपि न असतः कल्पनानुपपत्तेः। ज्ञानविषयत्वस्य तुच्छेऽसम्भवात् असतोप्यभावस्य ज्ञानविषयत्वं दृष्टमिति चेन्न तस्य वस्तुत्वेनाङ्गीकारादेतच्चाग्रे निरूपयिष्यते किंच प्रत्ययपदस्य प्रतीतिः प्रत्यय इतिव्युत्पत्त्या भावार्थ-

कत्वम् प्रतीयते इतिव्युत्पत्त्याकर्मार्थकत्वं वा प्रत्येतीतिव्युत्पत्त्याकर्त्रर्थकत्वं वा प्रतीयतेऽनेनेति व्युत्पत्त्या करणार्थकत्व म्वा मन्यते नाद्यः भाव-व्युत्पन्नप्रत्ययस्योच्चारणमात्रेणैवार्थान्तरविषयक प्रकाशस्वभावताप्रतीत्या तद्विरुद्धनिरालम्बनत्व-रूपनिर्विषयकत्वप्रतिपादने स्ववागविरोधापत्तेः। न द्वितीयः प्रत्याख्यापरपर्यायस्य प्रत्ययस्य घटा-दिवदर्थप्रकाशकत्वानङ्गीकारेण तस्य निरालम्ब-नत्वसाधनेसिद्धसाधनत्वप्रसंगात्। न तृतीयच-तुर्थौ धर्मिधर्मप्रतिपादकयोः प्रत्ययसालम्बनत्व-पदयो रपिस्वार्थप्रतिपादनक्रियायां विवक्षाभेदेन कर्तृत्वकरणत्वसम्भवेन निरालम्बनत्वापत्तेः। शब्द-स्य निरालम्बनत्वमभिधेयशून्यत्व मेवेतिभङ्गय-न्तरेण पक्षस्यैवाभावः प्रतिज्ञातः स्यात् किं चात्मसमवेतप्रत्ययस्य निरालम्बनत्वं साध्यते उतातिरिक्तस्य नाद्य स्त्वन्मते विज्ञानातिरिक्त-स्यात्मनोऽभावेनाप्रसिद्धविशेष्यत्वापत्तेः। नान्त्यः आत्मसमवेतातिरिक्तप्रत्ययानङ्गीकारेणास्मन्मते-

ऽसिद्धविशेष्यत्वापत्तेरिति नन्वेवं शब्दोऽनित्य इत्यादावपि किमाकाशगुणः शब्द किम्वा वायुगुण इतिचोद्यस्य सम्भवेन तत्रापि अप्रसिद्धविशेष्यत्वं स्यात्। यदि चाकाशगुणत्वादिरूपविशेषधर्मेण न शब्दस्य पक्षत्वं किन्तु शब्दत्वाच्यत्वरूपविशेषधर्मेण तदुभयं च वादिप्रतिवादिनोः प्रसिद्धमेवेति नाप्रसिद्धविशेष्यत्वं तर्हि अत्रापि नात्मसमवेतत्वरूपविशेषधर्मेण प्रत्ययस्य पक्षीकरणं किन्तु प्रत्ययवाच्यत्वरूपसामान्यधर्मेणोभयप्रसिद्धेनेति तुल्यमेवेति चेन्न त्वन्मते वाह्यभेदाभावेनाभिमतप्रत्ययविशेषातिरिक्तसामान्याभावादित्यलं धर्मिदोषोपपादनेन सिषाधयिषितो निरालम्बनत्वादिरूपो धर्मोऽपि कीदृश इति विचार्यताम्। निरालम्बनत्वं किं भवत् सर्वथाविषयशून्यत्वं उत येन केन चित्प्रकारेणाभासमानत्वं विवक्षितम् नाद्यः निर्विषयकज्ञानासम्भवेन सर्वथाविषयशून्यत्वस्य क्वचिदप्यज्ञानेऽप्रसिद्ध्या तद्रूपनिरालम्बनत्वसाधने अप्रसिद्धविशेषणः पक्ष

स्स्यात् । दृष्टान्तस्य साध्यवैकल्यं च स्वाप्निकज्ञा-
नेऽपि देशकालान्तरदृष्टस्य कालान्तरे देशान्तरे
तत्संबन्धित्वेनानन्यथाभान मितिनसर्वथाविषय-
शून्यत्वं । नचाननुभूतस्य स्वशिरच्छेदनादेः
स्वप्ने भानं अजादेः शिरश्छेदनं दृष्टमिति तस्यैव
स्वसंबन्धित्वेन तत्रभानांगीकारात् । न द्वितीयः
रसज्ञानस्य रसालम्बनतया रूपाद्यालम्बनत्वाभा-
वेन सिद्धसाधनत्वापातात् । अथ अर्थानुरूपबु-
द्धयाकारस्वग्राह्यरूपालम्बनशून्यत्वमुच्यते तर्हि
स्वाभ्युपगमविरोधः । यदि तु बाह्यपदार्थान्
नालम्बते बुद्धिरिति बाह्यग्राह्यालम्बनशून्यत्वं
सिषाधयिषितं तत्रापि बाह्यत्वेन स्तम्भाद्यनालम्ब
नत्वं यदिबुद्धौ विवक्षितं तदासिद्धसाधनं । अयं
स्तम्भ इत्यादिप्रतीतेः स्वरूपेण स्तम्भाद्यालम्ब-
नत्वं न बाह्यत्वेन अयं स्तम्भ इति प्रतीतेरयंबाह्य
इत्याकारत्वाभावेन तेन रूपेण तदग्रहस्य तत्र
सत्वात् । स्तम्भादिस्वरूपेणानालम्बनत्वन्तु अ-
नुभवविरुद्धम् । अयं स्तम्भ इति बुद्धौ स्तम्भालं-

वनतायाः सर्वानुभवसिद्धत्वात्। ननु स्तम्भादि-
प्रत्ययस्य वाह्यत्वेन स्तम्भाद्यनालम्बनत्वं नोच्यते
येन वाह्य इत्येवमग्रहणातिसिद्धसाधनं स्यात्
किन्तु वस्तुतो योवाह्यः स्तम्भादि स्तदनालंब-
नत्वं साध्यते इति क्वासिद्धसाधनमिति वाच्यम्।
वाह्यपदार्थमनभ्युपगच्छतां विशिष्टसाधने भवता
मप्रसिद्धविशेषणपक्षत्वापत्तेः ननु पक्षविशेषणी-
भूतंयन्निरालम्बनत्वंतत्रवाह्यार्थोविशेष्यमितिवा-
ह्यार्थस्याप्रसिद्धावपि साक्षात्पक्षविशेषणनिराल-
म्बनत्वस्य प्रसिद्ध्या नाप्रसिद्धविशेषणत्वं पक्ष-
स्येति वाच्यम् यथाविशेषणाज्ञाने विशिष्टवा-
क्यार्थवोधः श्रोतु र्न जायते इत्यप्रसिद्धविशेष-
णत्वं दोषः तथाविशेषणे यद्विशेषणं तस्याप्य-
ज्ञाने तद्विशेषणविशिष्टस्य विशेषणस्य ज्ञानानु-
दयेन विशिष्टवाक्यार्थवोधाभावाद् विशेषणाप्र-
सिद्धेरिव तद्विशेषणाप्रसिद्धेरपि दूषणत्वात्।
वाक्यार्थज्ञाने पदार्थज्ञानस्य हेतुतया ग्राह्मवाह्या-
दिविशेषणपदार्थाज्ञाने तादृशविशेषणद्वयविशि-

ष्टप्रत्ययस्वरूपवाक्यार्थज्ञानमशक्यमेवेति भावः। यदि चाऽर्थातिरिक्तानालम्बनत्वं निरालंबनत्वेनाभिप्रेतं तथाच प्रत्ययोऽर्थातिरिक्तानालंबनः प्रत्ययत्वात् स्वाप्निकप्रत्ययवदिति तर्हि अर्थातिरिक्तानालम्बनत्वमित्यत्र पर्युदासः प्रतिषेधो वाभिमतः पक्षद्वयेऽपिसिद्धसाधनम् प्रमेयत्वेन सर्वार्थातिरेकस्य सर्वत्र सत्वेन स्वाकारालम्बनस्यापि प्रत्ययस्यार्थातिरिक्तालम्बनत्वेनास्माभिः स्वीकृतत्वात् र्थातिरिक्तं नालम्बते इति प्रतिषेधपक्षेऽपि प्रमेयत्वेन र्थातिरेकस्य क्वचिदपि अप्रसिद्ध्या व्यतिरिक्तानालंबनत्वस्य सर्वसम्मतत्वात् इति आत्यन्तिकव्यतिरेकविवक्षायान्तु प्रमेयत्वादिना अभेदस्य सर्वत्र सत्वेन तदभावादेव तदनालम्बनत्वं प्रत्ययस्येष्टमेवेति पुनः स एव सिद्धसाधनरूपो वेताल इति न किंचिदेतत्। यदि च कथंचिद्भिन्नं नालम्बते इत्यभिप्राय स्तदा नीलमिदमित्यादावेकस्मिन्नेव ज्ञाने प्रमाणप्रमेयाकारेण प्रमाणप्रमेयभावोपपा-

दनात् काल्पनिकभेदस्य तत्रापिसत्वेन स्वाभ्युपगमविरोधः। अथ पूर्वोक्तनिखिलप्रकारासंभवा न्निरालम्बनबुद्ध्युत्पत्तिमात्रमिष्यते तर्हि इष्यतामत्र नो न प्रद्वेषः किन्तु बाह्यविषयाऽपलाबुद्धिरियं मिथ्यैवेति केवलमस्माभि र्वक्तव्यम्। नचेयं समोचीनेति त्वयापि साधयितुं शक्यते सम्यक्त्वस्य स्वाकारातिरिक्तत्वेन तदालंबनत्वाभावात्। नहि प्रत्ययः स्वातिरिक्तमालम्बते इति भवतां सिद्धान्तात्। सम्भवेच तत्रैवानैकान्तिको हेतुरिति किंच प्रत्ययो निरालम्बनः प्रत्ययत्वादित्यनुमाने चैत्रादिबुद्धीनां निरालंबनत्वं साधयितुं भवता न शक्यते चैत्रादिबुद्धिवृत्तिनिरालम्बनत्वादेः त्वदीयनिरालम्बनत्वानुमितिव्यतिरिक्तत्वादिति निरालम्बनत्वासिद्ध्या त्सगतःप्राप्तं सालम्बनत्वमेवेति। यदि च निरालम्बनत्वेन ज्ञानानधिकरणत्वं प्रत्ययस्य साध्यते प्रत्ययो निरालंबनः अर्थान्न जानाति तर्हि सिद्धसाधनमेव शब्दस्याचेतनत्वेन ज्ञानानधिकरणत्वस्यास्माभिः स्वीकृत-

त्वादिति। यदि वा बुद्ध्यनुत्पादकत्वं निरालंब-
नत्वं साध्यते तदाप्रत्ययोनिरालंबनः बुद्ध्यनुत्पा-
दक इति तदाधर्मिणः प्रत्ययस्य स्वविषयकज्ञा-
नाजनकत्वापत्त्या प्रतिपत्तु र्ज्ञानाजनने साधनप्र-
योगासंगतेः साध्यासिद्धिप्रसंगादिति सर्व रिक्तम्।
अपिच वाक्यार्थभेदाग्रहणे प्रतिपाद्यप्रतिपा-
दकवाच्यवाचकसाध्यसाधनबुद्धेः सालंबनत्वं न
स्यात् तद्विना साध्यसाधनादिविवेकाभावा त्केन
किं साधयेत्। एवं प्रतिपाद्यपादकयो र्भेदानव-
गमे कस्मै किं वदेत् गुरुशिष्ययो र्भेदानवगमे
शिष्य म्प्रत्युपदेशानुपपत्तिरित्यादि कियत्कथये
सर्वोपि लौकिकवैदिकव्यवहारः पूतिकूष्माण्डायि-
तः स्यात्। किंच वाह्यार्थविषया बुद्धिः सत्या
वाधरहितत्वात् स्वप्नबुद्धिवाधकजाग्रद्बुद्धिवत्।
नच सर्वासां जाग्रद्बुद्धीनां निरालम्बनत्वेन मि-
थ्यात्वा न्न साधर्म्यदृष्टान्त इति वाच्यम्। त्वद-
भ्युपगतविज्ञानास्तित्वक्षणिकत्वादिबुद्धीनामेव दृ-
ष्टान्तत्वसम्भवात्। अपसिद्धान्तभयेन तासां

त्वया सत्यत्वाङ्गीकारात्। किंच क्षणिकत्वादिबुद्धीनां सत्यत्वेऽत्रैवहेतो र्व्यभिचारः। मिथ्यात्वे पक्षस्य प्रत्ययस्य तद्विशेषणाभेदादे श्च बाधः स्यात्तथा सति अद्वैतवादिनामिव तवापि बन्धमोक्षव्यवस्था न स्यादिति तव धर्मदेशना सिकताकूपवद् विदीर्येत। ननु न ज्ञानमात्रस्य निरालंबनत्वेन मिथ्यात्वं ब्रूमहे किन्तु सविकल्पकस्यैव निर्विकल्पकस्य प्रामाण्याङ्गीकारादिति चेन्न क्षणिकत्वसाधनप्रयासवैफल्यापत्तेः निर्विकल्पकज्ञानेन तत्साधनाऽसंभवात्। सविकल्पकस्य च मिथ्यात्वात्। मिथ्याज्ञानस्य वस्तुसाधनाक्षमत्वात्। अन्यथा सर्वत्र सर्वसिद्धिः स्यात् तस्य सर्वत्र सुलभत्वादतः बाधदर्शना त्स्वप्नबुद्धीनां मिथ्यात्वं जाग्रद् बुद्धीनां च सत्यत्वंबाधादर्शनादित्येव पन्था युक्तः नच योगिनामेव ज्ञानं जाग्रद्बुद्धिबाधकमस्तु। अयं स्तम्भ इत्यादिबुद्धिगोचरस्य स्तंभादेः नैतदेवमितितेषां बाधसंभवेन तदवस्थायां सर्वेषां पुंसां तथाविधबाधसंभवादिति वाच्यम्

इदानीं बाधानुपलम्भेन योग्यवस्थायां किं भवि-
ष्यतीति निर्णयोभावात्। तदानीमिदमित्थमे-
वेति तेषामपि बुद्धिसंभवेनैकशेषस्य कर्तुमश-
क्यत्वात्। तज्ज्ञानस्य जाग्रद्बुद्धिबाधकत्वाभावसा-
धने तु हालिकपरुषोपिदृष्टान्त इत्यबाधकत्वमेव
तज्ज्ञानस्य युक्तमिति दिक्। प्रत्ययत्वादिति हेतु
रपि विचारमर्हति। किं जाग्रत्प्रत्ययत्वं हेतुरुच्यते
उत स्वप्नप्रत्ययत्वमथवोभयानुगतं प्रत्ययत्वसा-
मान्यं आद्ये हेतोः पक्षमात्रवृत्तितया ऽसाधार-
णयापत्तिः द्वितीये हेतोरपक्षधर्मतया स्वरूपासिद्धिः
अन्त्ये सर्वप्रत्ययानुगतं सामान्यभावयोरसिद्धमे-
वेति हेत्वसिद्धिः। जातिव्यक्त्यो र्भेदाभेदस्य
भवद्भिरनङ्गीकारात्। अत्यन्तभेदस्तु आवयो-
रसिद्ध इति। ननु भाभूत्सामान्यमीदृक् सारूप्या-
न्यनिवृत्तिरूपं तु तद्विष्यते एव तत एव च जाति
निबन्धननिखिलव्यवहारारोपपत्तौ भावभूताति-
रिक्तसामान्यकल्पनायां प्रमाणविरहादिति चेन्न
जातिस्वीकारे विना सादृस्यस्यैव दुर्निरूपत्वापत्ते

रेतच्चाग्रे वक्ष्यते। नचैवं कस्यचिदपिज्ञानस्य निरालंवनत्वानङ्गीकारे लोकविरोधः स्यात् लोके हि शुक्तिरजतज्ञानस्य निरालम्बनत्वेन व्यवहारदर्शनादिति वाच्यम्। प्रकारान्तरेणार्थावगाहिनो ज्ञानस्यैव निरालम्बनत्वेन लोकेऽव्यवहारात्। यथा शुक्तिशकले इदंरजतमितिज्ञानं शुक्तिशकलत्वेन विद्यमानं रजतत्वेन गृह्णात् निरालंवनं कथ्यते नतु स्वाकारमात्रग्राहित्वेन तादृशव्यवहारस्य क्वचिदप्यदर्शनात् एवमिह घटो नास्ति घटो न पट इत्यभावग्राहिज्ञानं प्रकारान्तरेण भावमेवावगाहते भावान्तरमभावो हि कयाचित्तु व्यपेक्षयेति सिद्धान्तात्। नत्वभावाख्यं तुच्छं नामेति भ्रान्तिज्ञानमभावज्ञानं चोभयमन्यथावर्तमानमर्थं अन्यथा गृह्णात्निरालम्बनत्वेन व्यपदिश्यते इति न लोकविरोधः। विस्तरस्तु श्लोकवार्तिके द्रष्टव्यः एवं च यत्रस्वाप्निकज्ञाने बाधदर्शनं तस्य मिथ्यात्वं यत्र च प्रबोधकाले बाधदर्शनं तत्र जाग्रत्प्रत्ययस्य सत्यत्वमित्यभिप्रायेणोक्तं भाष्ये

सुपरिनिश्चितेति ननु यथाप्रबोधकाले वाधादर्शना त्तात्कालिकप्रत्ययस्य सत्यत्वमेवंस्वाप्निकप्रत्ययस्यापि तदानींबाधादर्शना त्सत्यत्वमेवास्तु स्वकालेहि बाधादर्शनमुभयोरविशेषः नच प्रबोधे स्वप्नप्रत्ययस्य वाधदर्शनं विशेषः प्रबोधप्रत्ययस्य स्वप्नेपि वाधदर्शनेनाविशेषादित्याशयेनाह न तत्र कश्चिद्विशेष इति ।

भा० न स्वप्नेविपर्ययदर्शनात् अविपर्ययदर्शनाच्चेतरस्मिन् ।

निराकरोति नेति विशेषं दर्शयति स्वप्ने इति अयंभावः स्वप्ने दृश्यमानो गजः क्षणेन मृगो भवति पुन र्वृको भवति पुनरन्य एव दृश्यते इत्येकस्यासकृदनेकाकारभवन मसम्भवमिति विपर्ययदर्शना त्तज्ज्ञानस्य मिथ्यात्वं निश्चीयते प्रबोधे तु आजन्मनिरीक्ष्यमाणो घटः स एवाहर्निशं दृश्यते न जातु चित्परो भवतीत्यविपर्ययर्शनादस्य सत्यत्वं यद्वा स्वप्नदशाया-

मपि कदाचिद् विपर्ययो दृश्यते स्वप्नदर्शिन एव इदं स्वप्नदर्शनं ममेति ज्ञाने सति तदानी-मेव तद्बाधः प्रतिसन्धीयत इदं मिथ्या स्वप्ने पश्यामि नानेनोपकारापकारौ मे प्रबोधकाले तु घटादिकं पश्यन् नकदाचिद् विपर्येति इदं मिथ्या नानेन किञ्चिन्नः इति स्वप्नप्रबोधयो र्वि-शेषदर्शनमस्तीति भावः वस्तुतस्तु स्वाप्निकप्र-त्ययस्य प्रबोधदशायां विपर्य्ययदर्शनात्तस्यमि-थ्यात्वं प्रबोधेतस्यतदर्शनात्तत्सत्यत्व मेवेतभावः प्रत्ययत्वसाधर्म्येण प्रबोधेऽपि विपर्य्ययदर्शनमा शंङ्कते तत्सामान्यादिति।

भा० तत्सामान्यादितरत्रापि भविष्यती-तिचेत् यदि प्रत्ययत्वा त्स्वप्नप्रत्ययस्य मिथ्याभावः जाग्रत्प्रत्ययस्यापि तथा भवि तुमर्हति अथ प्रतीति स्तथाभावस्य हेतुः

न शक्यते प्रत्ययत्वादयमन्य इति वक्तु म् अन्यत स्तु स्वप्नप्रत्ययस्य मिथ्याभावो विपर्ययादवगतः।

अयमभिप्रायः यथा स्वाप्निकः प्रत्ययो मिथ्या भवति एवं प्रबोधप्रत्ययस्यापिमिथ्यात्वं प्रत्ययत्वेनानुमीयते प्रबोधप्रत्ययो मिथ्या प्रत्ययत्वा त्स्वप्नप्रत्ययवदित्यनुमानेन मिथ्यात्वनिर्णये बाधोपि कदाचि त्स्यादेहात्मबाधवत् नहि तात्कालिकबाधस्यैव मिथ्यात्वनिर्णायकत्वं स्वीकर्तु मुचितं तथासति शक्ताविदं रजतमितिज्ञानस्य तदानीं बाधाभावेन सत्यत्वापत्ते रेवंदेहात्मविभ्रमादेरपीति कालान्तरबाधदर्शनमपि तन्निर्णायकमेवंच यथास्वप्ने कालान्तरबाधदर्शनं तथा प्रबोधेऽपि स्यादत्र बाधो न दृश्यते इति तुअसर्वज्ञै दुर्ज्ञेयमिति समाधत्ते यदीति स्यादेवं यदि प्रत्ययत्वं मिथ्या-

त्वप्रयोजकं स्यात् तदा प्रत्ययत्वाधीनं मिथ्यात्वं स्वप्नप्रत्ययस्येव प्रबोधप्रत्ययस्यापि भवेदेव तत्तु नस्वीक्रियते किन्तु अन्यदेव किंचि त्प्रयोजकं तच्च स्वप्नेऽस्ति न प्रबोधे इति भावः ननु तर्हि प्रत्ययस्वरूपमेवास्तु तस्यप्रयोजकमितिप्रत्यय-स्वभावाधीनंमिथ्यात्वं स्वप्नप्रत्ययस्येव प्रबोधप्रत्य-यस्यापि अविशिष्टं नहि प्रबोधप्रत्ययः प्रत्ययत्वा दन्यः अर्थात् प्रत्यय एव न भवति येन प्रत्ययस्व भावाधीनं मिथ्यात्वं तत्रत्रात्र नस्या त्किन्तु अ-यमपि प्रत्येय एवेति तद्वदस्यापि मिथ्यात्वमेवे-त्याह अथ प्रतीतिरिति उत्तर माह अन्यत इति इति एवं च मिथ्यात्वं न प्रत्ययत्वाधीनं न वा प्रत्ययस्वभावाधीनं किन्तु दोषाधीनं दोष-ज्ञानं क्वचिद् विपर्ययात् क्वचिदन्यतः प्रकृते स्वप्नज्ञानस्य मिथ्यात्वे प्रयोजको दोषो निद्रा तस्या दोषत्वं विपर्ययादवगम्यते प्रबोधकाले विपर्ययदर्शना त्स्वप्नप्रत्ययमिथ्यात्वप्रयोजको दोषो निद्रेति गम्यते दोषान्तरस्यानुपस्थितत्वा

दुपस्थितत्वाच्चैतस्याः दोषो हि कारणशक्तिं शिथिलीकरोति इन्द्रियान्तरस्य तदानीमुपरतत्वा पारतन्त्र्यान्मन एव स्वाप्निकप्रत्ययकारणं तस्य निद्रया दोषेण दौर्बल्यं स्वग्राह्यविषयविषयकसमीचीनज्ञानजननासामर्थ्यम्। तथाच निद्रादोषदूषितमनसा स्वप्ने मिथ्याज्ञानं जायते प्रबोधे तादृशदोषविरहात्समीचीनज्ञानं जायते इति न प्रबोधप्रत्ययस्य मिथ्यात्वमिति भावः विपर्यया-न्निद्राया दोषत्वं कथं ज्ञायते इत्यपेक्षायामाह॰

भा॰ कुत इति चेत्। सनिद्रस्य मनसो-दौर्बल्यान्निद्रा मिथ्याभावस्य हेतुःस्वप्नादौ स्वप्नान्ते च। सुषुप्तस्याभाव एव अचेतयन्नेव हि सुषुप्त इत्युच्यते तस्माज्जाग्रतः प्रत्ययो न मिथ्येति ननु जाग्रतोऽपि करणदोषः स्यात्। यदि स्यात् अवगम्येत

स्वप्नदर्शनकालेऽपि नावगम्यते इति चेत्। तत्र प्रबुद्धो ह्यवगच्छति। निद्राक्रान्तं मे मन आसोदिति।

स्वप्नादौ स्वप्नान्ते चेति एवंच स्वप्ने विपर्ययदर्शनाभावेन तदानीं तत्प्रयोजकत्वाज्ञानेऽपि तत्पूर्वं तदुत्तरंच तत्प्रयोजकत्वं तस्या अवगम्यते नन्वेतावता प्रबन्धेन स्वप्नज्ञानस्य दोषा न्मिथ्यात्वं प्रबोधप्रत्ययस्य तदभावाद् मिथ्यात्वमुपपादितं सौषुप्तज्ञानं न निरूपितं तत्पुनः कीदृशं भवती त्यपेक्षायामाह सुषुप्तस्याभाव इति सति कुड्ये चित्रमिति न्यायेन यदि तदा ज्ञानं स्या त्तदा तन्निरूपणं युज्येत ज्ञानमेव तु तदानीं न जायते इति कस्य सदसन्निरूपणं क्रियेत तदानीं ज्ञानानुत्पत्तौ प्रमाणमाह अचेतयन्निति उपसंहरति तस्मादिति नन्विन्द्रियाणामतीन्द्रियतया तद्गतदोषाणामप्रत्यक्षतया प्रबोधकाले कथं

तद्व्यतिरेकनिर्णय इत्यभिप्रायेण शङ्कते नन्विति उत्तरमाह यदीति अभावानामनुपलब्धिप्रमाण-गम्यतामाह यदीति यदि स्यादुपलभ्येत नोपल-भ्यते तस्मान्नास्तीत्यनुपलब्ध्या तद्व्यतिरेकनि-र्णयः कर्तुं शक्यत एव। नन्वेवं दोषाभावनि-र्णयः स्वप्ने पि कर्तुं शक्यते तदानीमपि दोषा नोपलभ्यन्ते इत्यदुष्टकारणजन्यत्वात् तज्ज्ञानस्य कथं मिथ्यात्वमित्यभिप्रायेणाह स्वप्नदर्शनेति उत्तरमाह तत्रेति नानुपलब्धिमात्रमभावसाधनं किन्तु योग्यानुपलब्धिः स्वप्नदशायामिन्द्रियस्य दुष्टतया दोषग्रहणसामर्थ्यं नास्तीति तदनुप-लम्भेपि न दोषाभावनिर्णयः। अत एव तमसि घटानुपलम्भेपि न तदभावनिर्णयः तदनुपलब्धे रयोग्यत्वात्। प्रबोधदशायान्तु दोषदर्शनमेव भवतीत्याह तत्रेति एवंच प्रबोधदशायां तत्र दोषदर्शिना स्वप्नज्ञानस्य मिथ्यात्वं न प्रत्यय-मात्रस्येति भावः।

भा० शून्यस्तु कथम् अर्थज्ञानयोराकार-
भेदं नोपलभामहे ।

शून्यस्तु इति । नन्वत्र विशेष्यानिर्देशात्कः शून्य इत्यपेक्षायां पूर्वप्रकृतप्रत्यय एव सम्बध्यते योग्यतावशात् तथाच प्रत्ययः शून्यः शून्यत्वं पुनरस्य अर्थानालिङ्गितत्वमेव नान्यदसम्भवात् तच्च निरालम्बनत्वानुमाननिराकरणादेव निराकृतमिति पुनरत्र विज्ञानवादिनः प्रत्यवस्थाने कोऽभिप्राय इति चेदयमभिप्रायः यदि प्रत्यक्षस्य वाह्यपदार्थग्रहणसामर्थ्यं स्यात्तदा तद्विरोधान्निरालम्बनत्वानुमानं न स्यात् यदि चास्य स्वाकारग्रहणमात्रसामर्थ्यं स्यात्तदा विषयभेदेन विरोधाभावान्नानुमानबाधकत्वं प्रत्यक्षस्येति प्रत्याशया प्रत्यक्षस्य वाह्यार्थग्रहणे सामर्थ्याभावं दर्शयितुं शून्यवादी प्रत्यवतिष्ठते शून्य स्तु इति नीलमिदमित्यादौ एकमेव नीलाकारं वस्तु प्रतीयते न वस्तुद्वयमिति

सर्वैरनुभूयतेइति नात्र विशिष्य वक्तव्यम् तद्व यदि ज्ञानाकारं स्यात् तदा ज्ञानस्य स्वयं प्रकाशतया अस्य प्रकाशनाय प्रकाशकान्तरं नापेक्षितव्यमिति लाघवम्। अर्थाकारत्वे तु तस्य जडतया स्वतः प्रकाशासम्भवेन तस्य प्रकाशनाय प्रकाशकं ज्ञानमपेक्षणीयं स्यादिति वस्तुद्वयकल्पनायां गौरवं स्फुटम्। नचैतावता ज्ञानस्येवार्थस्यापि स्वयं प्रकाशताऽभ्युपेयतामिति वाच्यम्। एकस्यैव स्वयं प्रकाशशीलस्य वस्तुनः स्वीकारेणार्थस्य स्वयं प्रकाशकत्वे ज्ञानपदार्थानङ्गीकारापत्त्या संज्ञामात्रे विवादात् एकमेव स्वयं प्रकाशं वस्तु ज्ञानपदेन अर्थपदेन वा अभिधीयतामिति न वस्तुनि विशेषः ग्राह्यग्राहकयोरैक्याभ्युपगमात् ननु ज्ञानार्थयोः कुतो न विशेषो ज्ञानस्यान्तरत्वं क्षणिकत्वं च अर्थस्य पुनर्बाह्यत्वं स्थिरत्वं चेति विशेष इति चेन्न सति द्वैते बाह्यान्तरभेदसम्भवेनाद्वैते तदभावात्। किमपेक्षया कस्यान्तरत्वं बाह्यत्वं वा स्यात्। पदार्थान्तराभावादितिभावः

क्षणिकत्वमप्यर्थस्यावश्यं स्वीकार्यं अन्यथा अर्थस्य स्वप्रकाशत्वाङ्गीकारा त्सुषुप्तावपि भानप्रसङ्गात्। ननु ग्राह्यग्राहकयो र्भेदानङ्गीकारे एकस्यैव निर्विशेषस्य वस्तुनः कदाचि न्नीलमिदमितिग्राह्याकारेण कदाचिदहमिति ग्राहकाकारेण भानं कथं स्यादिति वाच्यम्। अनादिग्राह्यग्राहकाकारानुभवाहितविविधवासनावशेनैकस्य निर्भेदवस्तुनो ग्राह्यग्राहकाकारेण प्रतीत्युपपत्तेः तथाचोक्तम्। अविभागोपि बुद्ध्यात्मा विपर्यासितदर्शनैः ग्राह्यग्राहकसंवित्तिः भेदवानिव लक्ष्यते तथा परिच्छेदान्तराच्चायंभावो बहिरवस्थितः ज्ञानस्याभेदिनो भेदप्रतिभासो ह्युपप्लवादिति उपप्लवो भ्रान्त्याकारसमारोपात्। नच ज्ञानवैचित्र्या द्वासनावैचित्र्यं वासनावैचित्र्या च्च ज्ञानवैचित्र्यमित्यन्योन्याश्रयः। पूर्वपूर्ववासनाभेदस्योत्तरोत्तरज्ञानभेदे एवं पूर्वपूर्वज्ञानभेदस्योत्तरोत्तरवासनाभेदे हेतुताया अभ्युपगमेन बीजाङ्कुरवदनवस्थाया अदोषत्वात्। यथावास-

नया यज्ज्ञानं जायते तज्ज्ञानस्य तद्वासनाहेतुत्वा नंगीकारात् । अनादित्वा त्संसारस्य प्रथमं ज्ञान-भेदोवा वासनाभेदोवेति पर्यनुयोगावसरोपि न नचार्थकल्पनापेक्षया वासनाकल्पनायां लाघवोभा वः । ममार्थस्येव तव वासनायाः कल्पनीयत्वात् वासनाया ज्ञाननिष्ठशक्तिरूपधर्मस्वरूपतया पदा-र्थकल्पनापेक्षया धर्मिकल्पनातो धर्मकल्पनावर-मिति न्यायेन ज्ञानधर्मवासनाकल्पनाया उचित-त्वादिति वस्तुतस्तु न ज्ञानवासनयो धर्मिधर्म-भावः कल्प्यते अन्यथा पदार्थद्वयकल्पनापत्तेः ज्ञानातिरिक्तवासनास्वीकारे ज्ञानातिरिक्तं न किंचिदिति नः सिद्धान्तो भज्येत किन्तु स्वत एव नीलपीतादिरूपाणि विचित्राणि कार्यकार-णरूपाणि ज्ञानानि अनादिसन्तानरूपेण प्रव-हन्ति न किंचिदपेक्षन्ते इत्येव नः सिद्धान्तः । एवं क्लृप्तार्थकल्पनापेक्षयोभयवादिसम्मतज्ञान-कल्पनैव लघीयसी अर्थकल्पनायामपि ज्ञानकल्प-नाया आवश्यकत्वात् । ज्ञानाकारकल्पनायां तु

तत एव व्यवहाराद्युपपत्ते र्नार्थकल्पनाप्रसंग इति ज्ञानाकार एव नीलादि र्नातिरिक्तः पदार्थ इति। नच नीलादे ज्ञानाकारत्वकल्पनं तत्राप्यधिकमिति वाच्यम् तत्तद्विषयाकारज्ञानकल्पनाया स्तत्राप्यावश्यकत्वात् नहि ज्ञानमात्रं नीलादिविषयविशेषं बोधयति तस्य पीतादिसाधारण्यात् किन्तु नीलाकारं ज्ञानं ज्ञानभेदादेव च विषयभेदो व्यवतिष्ठते नान्यथा ज्ञानभेद श्च तत्तद्विषयाकारभेदादिति विषयविशेषसिद्धये विषयाकारता ज्ञानस्यावश्यकी। अन्यथा विषयविशेषसिद्धि र्न स्यात् तथाचोक्तं नहि संवित्तिसत्तयैव तद्वेदनायुक्ता तस्याः सर्वत्राविशेषात्। तां सारूप्यमाविश त्सरूपयितुं घटयेदिति। तथा तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मनः भाव्यन्ते नात्मना येन प्रतिकर्म विभज्यते इति। यद्यपि ज्ञानानां क्षणिकत्वा त्स्वत एव भेदः। तथापि नासौ विषयविशेषाकारमन्तरा सुज्ञानः नचाज्ञानभेदः विषयविशेषमुपस्थापयति ज्ञानमात्रस्य

निखिलविषयसाधारणयात् । नहि येन केनापि ज्ञानेन नीलाद्यवधारणमपितु नीलाकारेण ज्ञानेनेति सिद्धं नीलादे र्ज्ञानाकारत्वमिति किंच नीलादि र्यदिज्ञानाकारो न स्या त्तर्हि नीलादिज्ञानयो र्भेदा न्नीलादिप्रत्यक्षमेव न स्यात् ज्ञानाकारत्वे तु तयोरभेदा त्प्रत्यक्षत्वं सूपपद्यते तथाचैवं प्रयोगः नीलादि नीलसंवेदनाभिन्नं तदुत्पत्तौ संवेद्यमानत्वात् तत्स्वरूपवत् भिन्नत्वेनासंवेद्यमानत्वाद्वा तत्स्वरूपवत् । भेदे संवेद्यता न स्या त्पीतादिवत् । किंच ज्ञानग्राह्यत्वादपि नीलतज्ज्ञानयोरभेदः भेदे तु प्रकाश्यप्रकाशकयोरसंबन्धा न्नीलादिप्रकाश एव न स्यात् असंबद्धस्यापि प्रकाशकत्वे सर्वः सर्वज्ञः स्यात् असंबद्धत्वाविशेषात् नीलादेरिवार्थान्तरस्यापि नीलज्ञानेनैव प्रकाशसम्भवात् । अस्मन्मते तु तादात्म्यमेव प्रकाश्यप्रकाशकयोः संबन्धः स च न सर्वत्रेति न सार्वज्ञापत्तिः । नच तादात्म्यातिरिक्तः ज्ञानार्थयोः कश्चन संबन्धः येन ज्ञानग्राह्यत्वमर्थस्य

स्यात्। नच हेतुत्वं ग्राह्यत्वं चक्षुरादेरपि ज्ञान-हेतुतया ग्राह्यत्वापत्तेः ज्ञानाकारार्पणक्षमत्वं हेतु-त्वमिति चेन्न प्रमाणाभावात् नहि नीलादिज्ञाने आकारमर्पयतीत्यत्र किंचित्प्रमाणमस्ति सारू-प्यं ग्राह्यमिति चेन्न असंनिहितस्यापि नीलादेः सारूप्यान्नीलज्ञानग्राह्यतापत्तेः अपिच सारूप्यं येन केनचिद्रूपेण विवक्ष्यते सर्वात्मना वा आद्ये क्षणिकत्वेन सर्वेषां सारूप्यात्सर्वविषया-णां ग्राह्यत्वापत्त्या सर्वस्य सार्वज्ञं स्यात्। अन्ते अर्थवद् ज्ञानस्यापि जडत्वापत्तेः। तथाचोक्तं तैरेव एकदेशेन सारूप्ये सर्वः स्यात्सर्ववेदकः सर्वात्मना तु सारूप्ये ज्ञानमज्ञानतां व्रजेदिति सारूप्यतदुत्पत्तिभ्यां ग्राह्यत्वमित्यपि न धारावा-हिकज्ञाने पूर्वस्योत्तरज्ञानग्राह्यत्वापत्तेः अतः सर्वा बुद्धयः स्वात्मानमनुभवन्ति नान्यं स्वयमेवानु-भूयन्ते न ज्ञानान्तरेण यथा नान्यो नुभाव्यो बुद्ध्यास्ति तस्यानानुभवो परः ग्राह्यग्राहकवैधुर्या-त्स्वयं सैव प्रकाशते इति तदिह ज्ञानं प्रकाशक-

मित्यावयोः सम्मतमेव प्रकाश्ये तावद्विमतिः । अर्थः प्रकाश्य इति भवन्तः स्वाकारः प्रकाश्य इति वयम् । तदिदं तावद्विचार्यताम् कस्य प्रकाश्यत्वं घटते प्रकाशकस्य ज्ञानस्योत्पत्तिः अर्थप्रकाशा त्प्रागेव वाच्या अनुत्पन्नस्य प्रकाशकत्वा संभवात् उत्पन्नस्यापि अग्रहणदशायां प्रकाशकत्वं न संभवतीति प्रदीपप्रभावद् गृहीतस्यैव प्रकाशकत्वमास्थेयम् । तथा च प्रकाशकं ज्ञानं स्वोत्पत्त्यनन्तरमेव प्रकाशयति अपेक्षणीयान्तराभावात् । यथान्धकारावृतः कुड्यान्तरितो वा घटादिः स्वप्रकाशाय आलोकं प्रकाशकं स्वसंवन्धार्थम् अव्यवधानं चापेक्षते नैवं ज्ञानं किंचिदपेक्षते स्वप्रकाशत्वादव्यवधाना च्च यदि च तथापि नगृह्येत तर्हि द्वितीयादिक्षणेपि विशेषाभावा त्कदापि नगृह्येतानचज्ञानान्तरेण गृह्येत इति वाच्यम् स्वयंप्रकाशस्य ज्ञानस्य स्वसजातीयप्रकाशान्तरापेक्षाविरहात् । नहि प्रदीपः स्वस्वरूपप्रकाशनाय प्रदीपान्तरमपेक्षते तथासति

अनवस्थापत्तेः । नच ज्ञानस्वरूपप्रकाश एव न भवतीति विवदितव्यम् । ज्ञानस्मरणादर्शनात् नचाननुभूतस्यस्मरणं घटते अपिच ज्ञानग्रहणाय ज्ञानान्तरापेक्षाया मुत्तरोत्तरज्ञानग्रहणायोत्तरोत्तरज्ञानापेक्षाप्रवाहस्याविरामादेकज्ञानग्रहणे एव सर्वस्यायुषः क्षयाद् विषयान्तरसंचारो न स्यात् । तथाचोक्तम् । ज्ञानान्तरेणानुभवे हीष्टा तत्रापिच स्मृतिः विषयान्तरसंचारः तथा न स्यात्स चेष्यते इति । एवं च स्वोत्पत्यनन्तरं प्रकाशयद् ज्ञानं स्वाकारमेव नीलादि प्रकाशयति नार्थान्तरमिति नीलादे ज्ञानाकारत्वसिद्धिरिति । अपिच ज्ञानपूर्वकस्यैव नीलादेः सर्वत्रोपलम्भा न्नीलादे ज्ञानाकारत्वमेव । तथाहि यदि घटो ज्ञानातिरिक्तः स्यात् ज्ञानं विनापि गृह्येत न तु तथा गृह्यते सर्वत्र ज्ञानपूर्वक एवार्थो गृह्यते अर्थस्य ज्ञानाकारत्वानभ्युपगमे अतीतानागतस्थले अर्थस्य तदानीमसत्त्वा त्तदुपरक्ता धी र्न स्यादिति । ननु ज्ञानपूर्वकार्थभानेऽपि कथं तस्य ज्ञा-

नाकारतेति चेदित्थम् इदं नीलमित्यादौ नीला-
कारं किञ्चिदेकं वस्तु प्रथते स चाकारो ज्ञानस्य
वा अर्थस्यवेति विवेचनायां ज्ञानस्यैवायमिति
निश्चीयते नार्थस्य विप्रकृष्टत्वात् नचागृहीतमेव
ज्ञानं विषयं प्रकाशयति येनार्थाकार एव स्या न्न
ज्ञानाकारः। अत्र केचित् यद्यपि नीलमिदमि-
त्यादौ नीलाकारं वस्तु प्रतीयते तथापि नायं
ज्ञानाकारः किन्तु अर्थाकार एव ज्ञानमाश्रित्य
भासते इति तन्न अर्थगताकारस्य ज्ञानाश्रयणा-
सम्भवात्। नहि गोत्वमश्वमाश्रित्य भासते इत्यत्र
कस्यापि संप्रतिपत्तिरस्ति यत्रासौ भासते तस्य
नायं धर्मः यत्र च न भासते तस्यायं धर्म इत्यत्र
प्रमाणाभावः। नचादर्शे ग्रीवास्थितमुखमिव
अर्थस्थितः आकारो ज्ञाने प्रतिबिम्बते इति
वाच्यम्। प्रमाणाभावात् मूर्तस्यैव मूर्ते प्रति-
बिम्बदर्शनात् अर्थस्य कस्यचि न्मूर्तत्वेऽपि ज्ञा-
नस्य मूर्तत्वाभावात्। शब्दगन्धरसादीनां प्रति-
बिम्बासम्भवाच्च। अथ मास्तु बिम्बप्रतिबिम्ब-

भावः ज्ञानार्थौ तप्तायःपिण्डवदतिसंसृष्टौ इति वह्निगतस्य दाहकत्वादे रयसोवार्थधर्मस्याकारस्य ज्ञाने परस्पराविवेकनिबन्धनोऽध्यास एवेति वाच्यं सर्वस्य जगतः संमोहकल्पनाया अनुचितत्वा त्प्रमाणाभावाच्च बाह्याभ्यन्तरवर्तिनो र्थज्ञानयो रतिसंसर्गासम्भवाच्च । अन्ये तु नीलाद्याकारो न ज्ञानधर्मः नाप्यर्थधर्मः उभयो र्निराकारत्वात् । किन्तु निराकारयो र्ज्ञानार्थयोः संयोगादाकार उत्पद्यते मधुसर्पिषोः संयोगाद्ध विषमिवेति तन्न ज्ञानस्यामूर्तत्वेनार्थस्य च बाह्यतया तप्तायःपिण्डवत्तयोः संयोगासम्भवात् । मूर्तयोरेव संयोगदर्शनात् नचदैशिकसंयोगाभावेऽपि कालिकसंयोग स्तयोः सुलभ इति वाच्यम् । ईदृशसंयोगस्य सर्वत्र सुलभतया एकस्मिन् ज्ञाने निखिलाकारभानापत्तेः । नच ज्ञानसंमुखस्थितस्यैवाकार उपलभ्यते इति नियमः ज्ञानस्य मुखाभावात् । किंच ज्ञाने ऽर्थसंयोगो नियामकाभावा त्सर्वात्मना स्यात् तत श्च तद्गतगन्धादयः पर-

माणवश्चोपलभ्येरन् नियामकाभावात्। स्ववि-षयत्वेनावस्थानं संसर्ग इत्यपि न विषयत्वसंस-र्गादाकारोत्पत्तिः आकारोत्पत्तौ उपलभ्यमानत्व-रूपं विषयत्वमित्यन्योन्याश्रयादिति दिक्। सौत्रान्तिकास्तु विचित्रज्ञानोदयानुरोधेन नील-पीतादिविचित्राकारं प्रमेयं सर्वं रूपेयमेव ग्राह्य-त्वलक्षणं स्वाकारार्पणक्षमत्वे सति हेतुत्वं वाच्य-म्। यत्प्रमेयं यद्ज्ञानं जनयत्स्वाकारं तत्रार्प-यति तत्तज्ज्ञानग्राह्यम् इति नग्राह्यत्वलक्षणानि-रुक्तिरपि। ननु प्रमेयस्य क्षणिकत्वात् ज्ञाने स्वाकारार्पणानन्तरं विनाशात् कथमुत्तरक्षणव-र्तिना ज्ञानेन ग्राह्यं तदितिचेत्सत्यम् विषयस्या तीतत्वेन वर्तमानाकारेण प्रत्यक्षज्ञाने भानमस्य न भवति अपितु ज्ञानाकार एव तेन रूपेण प्रथते ज्ञानाकारेण च तदाकारार्पणक्षमो हेतुर तीतो विषयः कल्प्यते नन्वेवमपि नीलादे विष-यस्य प्रत्यक्षज्ञानेवर्तमानत्वेनावभासमानत्वाभावा त्प्रत्यक्षत्वं नोपपद्यते इति वाच्यम्। साक्षा

त्साकारविज्ञानजनकत्वस्यैव प्रत्यक्षज्ञाने वर्तमानत्वेन भासमानत्वस्य बाह्यविषयेऽनङ्गीकारात्। यच्च परंपरया ज्ञानजनकं तदनुमेयं यथा वह्निमान् धूमादित्यादौ वह्न्यादिः वह्निस्वलक्षणं धूमस्वलक्षणमित्यादि परंपरया वह्निज्ञानं जायते इति तस्यानुमेयत्वम् यच्च साक्षात्परंपरया वा न ज्ञानजनकं तत् न प्रमेयमिति प्रमाणं द्विविधं प्रत्यक्षमनुमानं च इतश्च नीलादेः ज्ञानाकारत्वं स्वप्नादावसत्यपि विषये विविधाकारं ज्ञानं जायते सत्यपिच विषयेऽज्ञानदशायां तदाकारं ज्ञानं न जायते इत्यन्वयव्यतिरेकाभ्यां ज्ञानाकार एव प्रत्यक्षज्ञाने प्रथते न बाह्यः। यत्तु नीलमिदमित्यादौ ज्ञानाकारः अर्थाकारश्चैतदुभयं पृथगेव भासते किन्तु सौसादृश्यात् जलमध्यपतितोदबिन्दुवत् भेदानवगम इति। तन्न तयो र्भेदाग्रहे सादृश्यग्रहासम्भवात्। सादृश्यस्य भेदघटितत्वात्। इदमनेन सदृशमिति सादृश्यग्रहो भेदेऽवगते युज्यते नान्यथेति। इतरे तु

शुक्तिशकलादौ इदं रजतमितिज्ञानं जायते अत्र भासमानो रजताकारो न पुरोवर्तिनः शुक्तिशकलस्य भवितुमर्हतीतिज्ञानाकारत्वमेव विषयस्यास्थेयम् एवं नक्षत्रतारादिष्वपि नपुंसकत्वस्त्रीत्वपुंस्त्वविपरीतसंख्यादेरर्थधर्मत्वाभावाद् ज्ञानाकारत्वमेवेष्टव्यम् । अपि चैकस्मिन्नेव वनिताशरीरे कामिनामियं कमनीया कामिनी वीतरागाणां विण्मूत्रपुरीषादिसंकुलमस्पृश्यं मांसपिण्डं व्याघ्रादीनां पुनरनुत्तमं भक्ष्यमिदमित्यनेकविध विकल्पो न ग्राह्याकारनिबन्धनः तस्यैकाकारत्वात् । अनेकाकारत्वे तु सर्वेषामनेकविधोविकल्पः स्यात् नचैवं दृश्यते अतः स्ववासनानिबन्धनमेवैतद् विकल्पत्रयमिति नार्थस्य ज्ञानेऽवभासः । किन्तु स्वाकारस्यैति दिक् इत्याहुः अत्रोच्यते एकमेव ज्ञानं ग्राह्यं ग्राहकं चेति य द्भवतोच्यते तत् किं क्रियाकर्माभेदाभिप्रायक मुत कर्मकरणाभेदाभिप्रायकं किम्वा कर्तृकर्माभेदाभिप्रायकं तत्र नाद्यः क्रियायां कर्मताऽयव-

हारस्य क्वचिदप्यदर्शनात् । नहि पाकः पच्यते छिदा छिद्यते इति व्यवहारः कस्यापि सचेतसः समीक्ष्यते किन्तु तण्डुलः पच्यत इत्यादीति स्पष्टमेव भेदे। एवं क्रियाकर्मभावः प्रकृते तु भेदाभावा त्तदुभयव्यवहारो ऽसंगत एव। नापि द्वितीयः एकस्यैकर्मकरणाभावासम्भवात् । नहि असिधारया सैव छिद्यते नचाङ्गुल्यग्रेण तदेव स्पृश्यते किन्तु ततो र्थान्तरमिति नापि तृतीयः एकक्रियायामेकस्य कर्तृकर्मभावाभावात् क्वच सुशिक्षितोऽपि नटवटुः स्वस्कन्धमारोहति तस्मादेकत्रज्ञाने ग्राह्यग्राहकभावकल्पना भवतां दृष्टविरुद्धत्वादसंगतैव नतु नैकस्य कर्तृकर्मभावो मया प्युच्यते किन्तु ज्ञानं स्वयमेव प्रकाशते न पुनः स्वप्रकाशक्रियायां वस्त्वन्तरमपेक्षते इत्येव ब्रूमः न स्वस्य कर्मत्वमपीति चेन्न प्रकाशक्रियायाः प्रकाश्यसापेक्षतया त्वन्मते प्रकाश्यानां नीलपीतादीनामभावात् प्रकाशकत्वानुपपत्तेः नहि दाह्यमन्तरा प्रकाश्यमन्तरा च वह्नि र्दहति

प्रकाशयतीति केनाप्युच्यते स्वस्वरूपस्य प्रका-
श्यत्वे तु एकस्यैव कर्तृकर्मभावापत्तिः साचायु-
क्तेति निरूपितम्। अपि च तथासति अहं
नील इतिप्रतीतिः स्यात् इदं नीलमित्याकार स्तु
वाह्यपदार्थविषयकप्रत्यक्षस्यैवेति नैकस्यग्राह्यग्रा-
हकभाव इति ननु प्रदीपादिः घटादि प्रकाशय
न्नात्मानमपि प्रकाशयति इत्येकस्यैव प्रदीपादेरे
कस्यामेव प्रकाशनक्रियायां कर्तृकर्मभावो दृश्यते
तद्वद् ज्ञानस्यापि किन्न स्यादिति चेन्न घटादि
प्रकाशकत्वस्यैव प्रदीपादावभ्युपगमेन स्वरूपप्र-
काशकत्वानङ्गीकारात्। घटादिप्रकाशे इवप्रदीप-
प्रकाशे आलोकापेक्षाविरहात्। प्रदीपप्रकाश
स्तर्हि केन भवति नहि अप्रकाशितस्वस्वरूपः
प्रदीपः परं प्रकाशयितुमीष्टे इति चेत्चक्षुरादि-
नेति गृहाण चक्षुष स्तर्हि केन प्रकाश इति-
मावोचः अप्रकाशितस्वस्वरूपस्यैव तस्य विषय-
प्रत्यक्षजननस्वभावाङ्गीकारात् नच तत्र प्रमाण-
विरहः अर्थापत्तेरनुमानस्य च तत्र प्रमाणस्य

सत्वात्। नचार्थापत्यादेः कथमवगमः अर्थाप-
त्यन्तरेणेति नैकस्यैकक्रियापेक्षया कर्तृकर्मभाव
इति किमनुरोधेन ज्ञानस्यापि तथा स्यात एतदे-
वाभिप्रेत्य ज्ञाते त्वनुमानादावावगच्छामीति भा-
ष्यकारेणोक्तम्। नचात्मानं जानामीत्यादावेकस्यां
ज्ञानक्रियायामेकस्यैवात्मनः कर्तृकर्मभाव इति
भवतामपि कथं संगच्छते इति चेदित्थम्। भे-
दाभेदवादिनामस्माकं ज्ञानत्वेन ग्राहकत्वं द्रव्य-
त्वादिना ग्राह्यत्वमित्येकस्याप्यात्मनः धर्मभेदेन
भेदात्तदुभयव्यवस्थोपपत्तेः। नचैवं ग्राह्यापह्नववा-
दिनां भवतां संभवति ज्ञेयाभावेनौपाधिकभेद-
स्यापि तत्राभावत्। नचौपाधिकभेदाभ्युपगमेऽपि
कर्तृकर्मणोरत्यन्तभेदो नसिद्ध्यतीति वाच्यम्
सर्वत्र प्रमेयत्वादिना अभेदसंभवेनात्यन्तभेदस्य
कुत्राप्यनङ्गीकारात्। नच ग्राह्यग्राहकभावो भेदे
एवेति नियमाभ्युपगमे आत्मवादे आत्मनि चै-
तद्भवतीतिभाष्येणाहं प्रत्ययस्य प्रत्यगात्मवृत्ति-
त्वोक्ति विरुद्ध्येत इति वाच्यम्। ज्ञानमात्रस्य

ग्राहकत्वायोगेन तद्विशिष्टस्यात्मनो ग्राहकतया द्रव्यत्वादिना च ग्राह्यतयोपाधिभेदेऽपि तादृशोपाधिद्वयविशिष्टस्य कर्तुः कर्मणश्चैक्यादहं प्रत्ययस्य प्रत्यगात्मवृत्तित्वोपपत्तेरिति। किंच यदि ग्राह्यग्राहकयोरभेदः स्यात् तर्हि ग्राह्याकारग्रहणवेलायां ग्राहकाकारोऽप्यनुभूयेत किंवाग्राहकाकारास्फुरणवद् ग्राह्याकारोपि न स्फुरेत् नह्यस्ति सम्भवः सत्यभेदे ग्राह्याकारः स्फुरे न्न ग्राहकाकारः एकस्यैकदा ग्रहणाग्रहणयोर्विरोधात्। एवं ग्राहकानुभवसमये ग्राह्याकारोऽप्यनुभूयेत नवा तद्वदेव ग्राहकाकारोपि नचैवं दृश्यते किन्तु कदाचिद्ग्राह्याकारोऽनुभूयते न ग्राहकाकारः कदाचि च्च ग्राहकाकार एवानुभूयते न ग्राह्याकारः एवमेकानुभवदशायां द्वयोरपिभानं न स्यात् अभेदात् ग्राहकाकारानुभवं विनापि ग्राह्याकारानुभवो भवतीत्येतत्प्रदर्शनाय वहिर्देशसंवद्धः प्रत्यक्षमुपलभ्यते इत्यभिदधता भाष्यकृता ग्राहकाकारात् पृथक् ग्राह्याकारव्यवतिष्ठापयिषया प्रत्यक्षादिप्रमाण-

वेद्यं नीलादि तच्छब्देन निर्दिश्योदाहृतम् स एव प्रत्यक्षादिप्रमाणवेद्यो नीलादिः वहिर्देशसंवद्धो नान्तरः अतोज्ञानाकारादतिरिच्यते इतिभावो-भाष्यकर्तुः। केचित्तु नीलादेरर्थाकारत्वसिद्धये वहिर्देशसंवद्धत्वं हेतुत्वेनाभिप्रेतं भाष्यकृतः। तथा च नीलादिरर्थाकारो वहिर्देशसंवद्धत्वादिति न्यायाकारः। नच वहिर्देशसंवद्धत्वं ज्ञानाकारस्य सम्भवति इति बलादर्थाकार एव नीलादिः सिद्ध्यतीत्याहु; तदयुक्तम् विज्ञानवादिनां वहिर्दे-शतत्संबन्धयोरभावेन विशिष्टहेतोरेवासिद्धेः। नचस्वमतासिद्धहेतुभावेन साधनेन परो वोधयितुं शक्यते अतिप्रसंगात् तस्मात्पूर्वोक्त एव भाष्या-र्थः एवं ग्राह्यज्ञानं बिनापि ग्राहकज्ञानं भवति इत्येतत्प्रदर्शयितुं सत्यं पूर्वं बुद्धिरुत्पद्यते नतु पूर्वं ज्ञायते भवति हि कदाचिदेतत्। यज्ज्ञातो-प्यर्थः सन्नज्ञात इति उच्यते इति वच्यते भाष्य-कृता यथाऽस्मिन्देशे कोपि पुरुषो मया नुभूतः स परमिदानी स्मृतिपथं नायातीति ग्राह्यास्मरणेऽपि

ग्राहकज्ञानस्मरणं भवति तथाच यदिग्राह्यग्राहकयोरभेदः स्यात्तदा ग्राहकस्येव ग्राह्यस्यापि स्मरणं स्यात् किंवा ग्राह्यस्येव ग्राहकस्यापि स्मरणं न स्यात् भवत स्तु एकतरस्य स्मरणास्मरणे इति ग्राह्यग्राहकयो र्भेदः। ननु ग्राहकसद्भावाद् ग्राह्यस्य ग्रहणमस्तु ग्राहकस्य तु ग्राहकान्तराभावा देवाग्रहणमित्येकस्य ग्रहणेऽपरग्रहणापादनमयुक्तम्। नच ग्राहकेण ग्राह्यस्येव ग्राह्येन ग्राहकस्यापि ग्रहणमस्तु इति वाच्यम्। तस्य ग्राह्यस्वभावतया ग्राहकशक्तेरयोगादिति चे न्न एवं सति ग्राह्यग्राहकभावरूपोभयधर्मव्यवस्थापनासंगतिप्रसंगात्। एवं ग्राहके ग्राह्यस्वभावानभ्युपगमेपि बोध्यम्। अस्तु तर्हि एकस्वभावमेवेति चे न्न ग्राह्यग्राहकयोः परस्परसापेक्षतया एकस्यासिद्धौ तदुभयासिद्धिप्रसंगात्। तथा च ज्ञानाभाव एव स्यात्। नच ग्राह्यग्राहकभावयो रुभयत्र सत्त्वेऽपि सूक्ष्मद्रव्ये गन्धरसयोरिवोद्भवाभिभवाभ्यामुपलम्भानुपलम्भौस्यातामिति वाच्यम्।

गन्धरूपयो र्भेदादुद्भवाभिभवयोः समर्थनेऽपि प्रकृते भेदाभावेन तदसंभवात्। नच भेदाभेदवादिन स्तव शब्दनित्यत्वयोरप्यभेदात् शब्दग्रहणेऽपि नित्यत्वादेरिव एकस्य ग्रहणेऽपि अपरस्याग्रहणं ममापि किं न स्यादिति वाच्यम्। मन्मते तयोर्भेदस्यापि स्वीकारात्। अन्यतरग्रहणाग्रहणयो रुपपत्तिः। नचैष प्रकार स्त्वन्मते सम्भवति भेदास्वीकारात्। एकस्य युगपदुद्भवाभिभवकल्पनायाः सम्भवाभावात् नच शब्दनित्यत्वयो र्भेदे प्रमाणविरहः मूर्द्धाभिषिक्तस्य बुद्धिभेदस्यैव प्रमाणत्वात्। देशपरिमाणभेदस्यैव वस्तुभेदप्रयोजकत्वमितिनियमे तु न किंचित्प्रमाणम्। अन्यथा वाच्यत्वप्रमेयत्वादेरभेदापत्तेरिति दिक्। वैभाषिकाः पुनराहुः। सत्यं ग्राह्याद् ग्राहकमतिरिच्यते परन्तु तज्ज्ञानमेव नार्थान्तरं निलादि अक्लृप्तकल्पनापेक्षयोभयवादिसिद्धज्ञानाभ्युपगम एव श्रेयान्। लाघवादिति तदयुक्तं स्वलक्षणातिरिक्तस्य सामान्यस्य तन्मतेऽभावादु-

भयत्र ज्ञानव्यपदेशासंगतेः अथातिरिक्तं सामान्यं स्वीक्रियते तर्हि तदतिरिक्तमनतिरिक्तं वा आद्ये तस्यैव ज्ञानपदार्थतया ग्राह्यग्राहकयोरज्ञानत्वापत्तेः। किंच तत्रापि ग्राह्यग्राहकभावविरहादज्ञानत्वप्रसंगः। अतिरिक्तसामान्यस्य ग्राह्यग्राहकाभ्यां सम्बन्धे रूपरसादिवदनेकत्वापत्तिः एवं अव्यतिरेके ग्राह्यग्राहकयो र्भेदा त्तदभिन्नस्य सामान्यस्यापि भेदापत्तिः तद्भिन्नाभिन्नस्य तद्भिन्नत्वनियमात्। ननु न जातिरूपं सामान्यं स्वीक्रियते येन वैशेषिकस्येव ममाप्येते दोषाः स्युः किन्तु सादृश्यरूपमपोहरूपं वा सामान्यमिहास्ति इत्यपि न विज्ञानातिरिक्तमनिच्छतां भेदघटितसादृश्यस्यापोह्याभावादपोहस्य च निरूपयितुमशक्यत्वात्। एवं च सामान्यासिद्ध्या ग्राह्यग्राहकयो र्ज्ञानत्वेनैकत्वोपपादनमयुक्तम्। अतीतस्य ज्ञानस्य प्रत्यक्षालम्बनत्वं च वक्तुमशक्यम्। विद्यमानग्राहित्वात्प्रत्यक्षस्य। मास्तु तर्हि अतीतस्यालम्बनत्वं

युगपज्जायमानयोरेव ग्राह्यग्राहकभावो स्तु मैवं मन्मते कारणस्यैव ग्राह्यतया युगपज्जायमानयोः परस्परनिरपेक्षयोः सव्येतरविषाणयोरिव कार्य-कारणभावासम्भवात् सिद्धस्य हि कारणत्वम-सिद्धस्य च कार्यत्वं नचैकमेकदासिद्धमसिद्धं च भवति विरोधात् इति नग्राह्यग्राहकभाव स्तयोः। अस्मन्मते ग्राहकमेव कारणं ग्राह्यं च कार्यं विषयेन्द्रियसन्निकर्षजन्या हि प्रत्यक्षप्रमितिः तज्जन्यज्ञाततारूपफलसमवायित्वादर्थस्य कर्मं-त्वं तदेव चग्राह्यत्वं तेन रूपेणार्थस्य कार्यत्वम्। एतस्यां क्रियायां यद्बुद्धेः कारणत्वं तदेव तस्याः कारणत्वं ग्राहकत्वं च एवं च विषयसम-वेतस्य ज्ञाततारूपफलस्य तज्जनकबुद्धे श्च पौर्वापर्यसद्भावा त्कार्यकारणभावः सूपपद्यते। त्वन्मते तु युगपज्जायमानयोः ज्ञानयोः पौर्वाप-र्याभावात् कार्यकारणभाव एव दुर्घटः किंकार्यं किं कारणमित्यविवेक श्च द्वयोरविशेषात् ननु न नियतपूर्ववर्त्तित्वं कारणत्वमस्माभिरुच्यते किंतु

तद्भावभावाव्यभिचारित्वं तच्च युगपज्जन्मनोपि भवति तथाचोक्तं प्रत्ययोऽव्यभिचारित्वा त्सहेति प्रत्ययः कारणं सहजन्मनोऽ व्यभिचारित्वात् कारणत्वमित्यर्थः इति चेन्न सहजायमानयोरूपरसयोरपि मिथःकार्यकारणभावापत्ते रतः पौर्वापर्यघटितमेव तद्वाच्यम्। नच प्रदीपप्रभायां व्यभिचारः। तत्रापि पूर्वपूर्व प्रभाया उत्तरोत्तरप्रभाहेतुत्वाङ्गीकारात् कालस्यातिसूक्ष्मतया यौगपद्यभ्रम स्तत्र उत्पलपत्रशतव्यतिभेदनवत्। तुल्योन्नमनानमनयोः परस्परकार्यकारणभावाभावा तुसकृदुत्पत्तावपि न क्षतिरिति। अस्तु तर्हि पूर्वज्ञानस्योत्तरणज्ञानेन ग्रहणम्। नचातीतस्यप्रत्यक्षालम्बनत्वं नेति पूर्वमेव निराकृतमिति सत्यं निराकृतं किन्तु तदयुक्तम्। पूर्वज्ञानमुत्तरज्ञाने तादृशीं शक्तिमादधाति यथा पूर्वज्ञानमुत्तरस्यालम्बनं भवति स्मरणस्येवानुभवः तथाचोक्तं शक्त्यपर्णा क्रमादिति। अत्रोच्यते अतीतस्य वर्तमानत्वेन ग्रहणे भ्रमत्वापत्तिः। वर्तमानत्वेन

गृह्यमाणस्यार्थस्यातीतत्वमप्रामाणिकं च दृष्टान्तोपि विषमः अनुभवो हि अतीतत्वेन स्मरणस्यालम्बनं न बर्तमानत्वेन स्वप्ने तु अतीतस्य वर्तमानत्वेन ग्रहणमुचितमेव। तस्यभ्रमत्वात् भ्रमत्वं पुनरस्य वाधकज्ञानादवसीयते प्रकृते च वाधादर्शना न्न भ्रमकल्पनेति नातीतस्य वर्तमानत्वेन ग्रहणं युज्यते तथाचैवं प्रयोगो विधेयः अतीतो न प्रत्यक्षविषयः अवर्तमानत्वादनागतवत्। अपिचातीतस्यापि प्रत्यक्षालम्बनत्वे अर्थस्यैवालम्बनत्वमुचितमविशेषादिति सौगतमताविशेषः किंच शक्त्यर्पकमतीतं यद्ज्ञानं तत् किंग्राह्यैकस्वभावमुतग्राहकैकस्वभावमथवोभयस्वभावम्। आद्ये गृहीतमेव ज्ञानं वासनामर्पयितुमर्हति नागृहीतमिति स्वोत्तरज्ञानोत्पत्तेः प्राग् ग्राह्यैकस्वभावं ज्ञानमगृहीतमेवेत्यनागतज्ञानवन्नोतरत्र वासनार्पणाय प्रभवति शक्त्यर्पणाभावे तु पूर्वविषयत्वेनोत्तरज्ञानं कथमुत्पद्येतापि तथा चायं प्रयोगः अतीतज्ञानम् न वासनार्पकम् अज्ञातत्वादनागतज्ञानवत् सन्ताना-

न्तरवर्तिज्ञानवद्देति द्वितीये कल्पे ग्राह्यस्वभावत्वा-
नभ्युपगमेन पूर्वज्ञानस्योत्तरज्ञानालम्बनत्वानुपप-
त्तिःग्राह्याभावेन ग्राहकस्याप्यसिद्धिप्रसंगः।नच पू-
र्वज्ञानं ग्राह्यं तस्याप्येवं रीत्या ग्राहकस्वभावत्वात्।
तृतीये कल्पे तु स्वोत्पत्तिवेलायामेव स्वग्रहणा-
पत्तिः। उत्तरज्ञानप्रतीक्षाविरहात्। ननु यथा
त्वन्मते विषयापेक्षया ज्ञानस्य ग्राहकत्वं ज्ञानान्त-
रापेक्षया च ग्राह्यत्वमित्येकस्यैव ज्ञानस्य ग्राह्य-
ग्राहकत्वोभयं स्वीक्रियते तथास्मन्मतेऽपि पूर्व-
ज्ञानापेक्षया ग्राहकत्वमुत्तरज्ञानापेक्षया ग्राह्यत्व-
मिति तदुभयमेकत्र किं न स्यात् कः पुनरत्रावयो-
र्विशेष इति चेदयंविशेषः । भवन्मते पूर्वज्ञानमु-
त्तरज्ञाने शक्तिमर्पय स्वयमुत्तरस्य विषयो भवति
शक्त्यर्पणं चानाविज्ञातं कर्तु मर्हतीति तज्ज्ञान-
मपेक्ष्यते ज्ञानं च पुनः ग्राहकं विना न ग्राहकं च
न शक्त्यर्पणं विनेति उत्तरस्मिन् शक्त्यर्पणाय
स्वज्ञानमावश्यकमित्युत्पत्तिवेलायामेव स्वग्रहणा-
पत्तिः। साचायुक्तेति दर्शितम् अस्मन्मतेतु न

ज्ञानं स्वस्मिन् वासनां जनयति अपि तु अर्थे अर्थविषयकस्मरणमेव तेन जन्यते इति न स्वोत्पत्तिवेलायां स्वग्रहणापेक्षा एवंच ग्राहकरूपत्वं ग्राह्याकारत्वं च पूर्वज्ञानस्य न सम्भवति किन्तु ग्राह्याकारत्वमेवेति भङ्ग्यन्तरेणार्थएवाभिहित इति एवमुत्तरमपि ज्ञानं ग्राहकस्वभावमुतग्राह्यस्वभावं किंवा उभयस्वभावमिति विकल्प्य निरसनीयमिति। किंच क्षणिकज्ञाने व्यापाराभावात् शक्त्यर्पकत्वमयुक्तम्। अत्रायं प्रयोगः। एकसन्तानपतितोनां ज्ञानानां न मिथः कार्यकारणभावः। ज्ञानत्वा त्सन्तानान्तर्वर्तिज्ञानवत्। ग्राह्यग्राहकयो र्भेदे चानुमानम्। रूपं तद्ग्राहकं च मिथोभिन्नं परस्परपरिहारेण परामर्शविषयत्वात् रूपरसवत् ज्ञानं स्वांशं न गृह्णाति नापि स्वांशेन गृह्यते ज्ञानादुत्पद्यमानत्वात्। वासनावत्। ग्राह्यग्राहकशक्तिद्वयनिराकरणाय चेदृशः प्रयोगः। ज्ञानं न द्विशक्तिकं ज्ञानोत्पत्तेःवासनावदिति। नचैवं ज्ञाने इव आत्मनि अपि ग्राह्यग्राहकोभयशक्तिशून्यानु

मानं स्यात्। तथाहि आत्मा न ग्राह्यग्राहकोभयशक्तिमान् वस्तुत्वात् घटवदिति वाच्यम् आत्मनि तदुभयग्राहकमानसप्रत्यक्षविरोधेन तादृशानुमानानुदयात्। ज्ञानस्य तदुभयशक्तौ तु न किंचित्प्रमाणमत स्तत्रानुमानं भवत्येवेति तथाच नीलादेः ज्ञानाकारत्वे प्रमाणाभावादतिरिक्तत्वसिद्धिरेवंचोभयवादिसिद्धत्वात् ज्ञानस्य तस्यैवाकारकल्पना युक्ता लाघवमेवंसति भवतीति तदुक्तिर्हेया प्रमाणसिद्धस्यापलापायोगात्। यदपि नाप्रकाशितस्वस्वरूपोर्थं प्रकाशयितुमर्हतीति अर्थग्रहणा त्प्रागेव ज्ञानग्रहणं तदप्यसंगतमेवेन्द्रियादौव्यभिचारात्। निलीनान्येवेन्द्रियाणि अर्थं प्रकाशन्ति नार्थग्रहणा त्प्राक् तेषामुपलम्भ इत्यलमतिविस्तरेण प्रकृतमनुसरामः ननु इदं नीलं कुतः यतो नीलाकारात्रबुद्धि र्नोजायते इति व्यवहारदर्शना द्बुद्धेः साकारत्वमेवेति चेन्न बुद्धेः साकारत्वतात्पर्येणेदृशप्रयोगाभावात्। नहि वक्तारः साकारां बुद्धिमधिगम्य तदाकारमर्थं व्यव-

स्थापयन्ति किन्तु ग्राहकं ज्ञानं याद्दशाकारं सम-र्थयते ताद्दशाकारोऽयमिति तात्पर्येण तथोक्तिः। यदपि ज्ञानपूर्वकार्थग्रहणा त्तदाकारत्वं तदपि न ज्ञानस्य तदुपायत्वात्। नहि उपाये परित्यज्य उपेयाधिगतिः क्वचिद्दृष्टा एवं यत्र नीलाकारं ज्ञानं पीताकारं ज्ञानमित्युच्यते तत्रापि न ज्ञानस्य विषयाकारत्वे तात्पर्यं किन्तु तत्राकारपदं विषया र्थकमेवंच नोलविषयकं पीतविषयकं ज्ञानमित्ये-वार्थ इति नार्थो ज्ञानाकारः किन्त्वतिरिक्त एवेति संक्षेपेण विज्ञानवादिमतं तत्खण्डनं च प्रदर्शित मथभाष्यं व्याख्यायते शून्य इति एतद्व्याख्या-तमेवप्रत्ययपदानुवृत्तिप्रदर्शनेन पूर्वम् अत्रोपपत्तिं पृच्छतिकुत इति विज्ञानवादो उपपादयति अर्थ इति अयं भावः इदं नीलमित्यादिप्रत्यक्षे नाका-रद्वयं भासते येनैकोवाह्यार्थस्य स्या दपरश्च ज्ञानस्य किन्तु एक एवाकारः स्फुरति सच वाह्यस्य न संभवति वाह्यस्य विप्रकृष्टतया न्तर-ज्ञानसंबन्धायोग्यत्वात्। असंबद्धार्थभाने अति

प्रसंगादुभयवादिसिद्धज्ञानाश्रयणेनैवोपपत्तौ तद्
तिरिक्तार्थकल्पनायां गौरवंचेति ज्ञानाकार एव
स्फुरति नच तयोरभेदे न स्फुरणमित्याह अर्थं
नोपलभामह इति। ज्ञानस्य स्वाकारग्राहित्वा
त्प्रत्यक्षत्वं 'अर्थस्यज्ञानाकारार्थकत्वेनोपक्षीणत्वा-
दतीतत्वादसत्याच्च नप्रत्यक्षग्राह्यत्वमित्यभि-
प्रायेणाह विज्ञानवादी प्रत्यक्षेति*

भा० प्रत्यक्षा च नो बुद्धिः अतस्तद्भिन्नमर्थरूपं नाम न किञ्चिदस्तीति पश्यामः। स्यादेतदेवं यद्यर्थाकाराबुद्धिः स्यात्। निराकारातु नो बुद्धिः आकारवान् बाह्योऽर्थः। स हि बहिर्देशसंबद्धः प्रत्यक्षमुपलभ्यते। अर्थविषया हि प्रत्यक्षबुद्धिः न बुद्ध्यन्तरविषया। क्षणिका हिसा न बुद्ध्यन्तरंकालमवस्थास्यते इति। उत्पद्यमाने-

वासौ ज्ञायते ज्ञापयति च अर्थान्तरम् प्रदीपवदिति यदुच्येत। तन्न

नः अस्माकं विज्ञानवादिनाम् अर्थरूपं बाह्यं नीलादि न किंचिदस्तीति अर्थस्य जड़त्वेन स्वतः प्रकाशासम्भवात् प्रमाणाधीनसत्ताकत्वमेवेति प्रमाणाभावा न्न तत्सिद्धि रन्यथा सप्तमरसादेरपि स्वीकारापत्ते-रिति। पूर्वोक्तरीत्या बुद्धेः साकारत्व निराकरणादिदं नीलमित्यादि प्रत्यक्षे वर्तमानत्वेन भासमान आकारोऽर्थस्यैव न ज्ञानस्य निराकारत्वादित्याह स्यादेतदिति आकारवान् बाह्योऽर्थ इति प्रतिज्ञातस्य समर्थनाय ग्राहकांशाद् विविच्य ग्राह्यांशं दर्शयंति स हीति स हि नीलाद्याकारः प्रत्यक्षग्राह्यः बहिर्देशसंबद्धः प्रतीयते न बुद्धिरित्यर्थः। अर्थान्तर न्त्वस्यनिराकृत मितिनेह पुनरुच्यते। यदपि पूर्वज्ञानविषयकत्व-मुत्तरज्ञानस्याभिहितं। तदपि न युक्त मित्याह

अर्थविषयेति नबुद्ध्यन्तरविषयेत्यत्र युक्तिमाह क्षणिकाहीति अयं भावः पूर्वज्ञानमुत्तरस्य विष-यो न भवितुमर्हति उत्तरज्ञानोत्पत्तिसमये पूर्वज्ञा-नस्य क्षणिकत्वेनासत्वात्। यदा चातीतं न प्रत्य-क्षस्यालम्बनं तदा अर्थएव नीलादिः तदालम्ब-नमिति वाह्यार्थः सिद्ध्यत्येवेति। उत्पद्यमानैवेति यथाप्रदीपः स्वस्वरूपं प्रकाशयन् घटादि प्रका-शयति एवं ज्ञानमपि तदानीमात्मस्वस्वरूपं प्र-काशयदर्थं प्रकाशयतीति द्वयोरेकदैव भानमि-त्यर्थोऽस्य भाष्यस्य प्रतीयते स च न युक्तः शून्यवादिनामर्थज्ञानयोरेकदाभानस्याभिमतत्वे ज्ञानवदर्थस्यापि स्वीकारापत्तौ पूवपक्षोच्छेदापत्तेः अर्थनिराकरणाय प्रवृत्तानां शून्यबादिनामर्थस्यैव सिद्ध्याऽर्थान्तरत्वापत्तेश्चेति चेन्न यतो नेदं भाष्यं विज्ञानवादिनां स्वपक्षोत्थापनपरं ते स्व-मतेन इदं न ब्रुवते किन्तु वाह्यार्थवादिनम्प्रति ब्रुवन्ति प्रत्यक्षोत्पत्तिवेलायां स्वस्वरूपप्रत्यक्षस्य प्रतिवन्धकं किंचिदिच्छन्ति भवन्तो नवा आद्ये

अप्रकाशितस्वस्वरूपः प्रदीप इव कथमर्थं प्रकाशय त्प्रत्यक्षम्। अन्त्ये प्रकाशमान आकारोज्ञानस्यैवास्तु आवश्यकत्वादलमथस्वीकारव्यसनेनेत्यर्थाभावः सिद्ध्यतीत्यभिप्रायोऽस्यभाष्यस्येति नासंगतिरिति। पूर्वपक्षं निराकरोति ❀

भा० तन्न नहि अज्ञातेऽर्थे कश्चिद्बुद्धिमुपलभते ज्ञाते तु अनुमानादवगच्छति। तत्र यौगपद्यमनुपपन्नम्

नचेति। अयमभिप्रायः प्रत्यक्षोत्पत्तिवेलायामेतद्ग्रहणप्रतिबन्धकं नकिञ्चिदिति यदुक्तं तत्सत्यम्। किन्तु ग्राहकाभावा त्तदा नैतद्गृह्यते एकत्र कर्तृकर्मविरोधेन स्वयं न गृह्यते ग्राहकान्तराभावादन्येनापि नेत्यगृहीतमेव ज्ञानमर्थंप्रकाशयतीन्द्रियवत्। कथं ग्राहकाभावो निश्चीयत इत्यत आह नहीति ज्ञातत्वमेवैतज्ग्राहकं तच्च तदानीं नास्ति व्यतिरेकमुक्त्वा न्वयमाह ज्ञात इति तथाचान्वयव्यतिरेकाभ्यां ज्ञातत्वमेवैत-

ज्ग्राहकमिति निश्चीयते घटेऽवगते पश्चात् घटो विषयतासंबन्धेन ज्ञानवान् ज्ञाततावत्त्वादित्याद्यनुमानेन ज्ञानं गृह्यत इतिभावः ये तु वाह्यार्थवादिनो वैशेषिका उत्पत्तिसमये एव ज्ञानं गृह्यत इति मन्यन्ते तेषां निराकारस्य ज्ञानस्य प्रत्यक्षत्वासंभवा त्साकारत्वमेव वाच्यं स्यात् तथा सति प्रत्यक्षे भासमानः आकारो ज्ञानस्यैवेत्यर्थसिद्धिरेव न स्यादत उत्पत्तिसमये ज्ञानग्रहणं स्वगृहे अन्तकावाहनमिवानुचितमित्येतदनेन बोध्यते इति ⊛

भा० ननु उत्पन्नायामेव वुद्धौ ज्ञातोऽर्थ इत्युच्यते नानुत्पन्नायाम् अतः पूर्वं वुद्धिरुत्पद्यते पश्चाज्ज्ञातोऽर्थः सत्यम् पूर्वं वुद्धिरुत्पद्यते नतु पूर्वं ज्ञायते।

उत्पन्नायामेवेति ननु शून्यवादिनोऽ यमाक्षेपो न युज्यते परस्येष्टापादनात्। स्वस्य चा-

निष्टापादनात् । तथाहि पूर्वं बुद्धिरुत्पद्यते पश्चादर्थ उपलभ्यते इत्येतत्परस्येष्टमेवेति न किंचिदनिष्टमापादितमनेन । स्वस्य तु अत्यन्तं प्रतिकूलं स्वमते वाह्यार्थाभावात् । पश्चादर्थ उपलभ्यते इत्येतदङ्गीकर्तुमनर्हं तथाप्येतदंगीकारे स्वपक्षव्याघातः परपक्षाभ्युपगमश्चेति किंच उत्पद्यमानैवासौ ज्ञायते ज्ञापयति चेत्यादिना ज्ञानज्ञानयो यौगपद्यमभिहितमिह तु पौर्वापर्यमभिधीयते इति स्वपूर्वोक्तिविरोधोपीति चेन्न अत्रापि यौगपद्यस्यैवाभिधानात् । पूर्वं बुद्धिरुत्पद्यते पश्चाद्द ज्ञातोर्थ इत्युक्त्या बुद्ध्युत्पत्तिवेलायामेवार्थज्ञानमिष्टमत एव पूर्वं बुद्धेरुत्पत्तिमभिधाय पश्चाद्द अर्थोज्ञात इति भूतार्थकप्रत्ययेनार्थज्ञानस्य भूतत्वमुक्तं यदि बुद्ध्युत्पत्तिवेलायामर्थज्ञानं न जायते तदा तदनन्तरमर्थज्ञानस्य भूतत्वं न घटेत इति अर्थज्ञानस्य भूतत्वाभिधानादवगम्यते । बुद्ध्युत्पत्तिवेलायामर्थज्ञानमिष्टम् । अपि च यदि ज्ञानो-

त्पत्तिसमये अर्थज्ञानं न स्यात्तदा अर्थस्य क्षणि-
कत्वादुत्तरकाले तदवस्थानाभावा त्प्रत्यक्षेणा-
ग्रहणं न स्यात् वर्तमानमात्रग्राहित्वा त्प्रत्यक्षस्ये-
ति यौगपद्यमिहापि तयोरभिधित्सितमिति न
विरोधः। नचयौगपद्यं पूर्वमेवाभिहितमिति पुन
स्तदभिधानं व्यर्थमेवेति वाच्यम्। पूर्ववदत्रापि
स्वपक्षाभिधाने तात्पर्यविरहात् ज्ञातेत्वनुमानाद-
वगच्छतीति सिद्धान्तवचनाद्‌ भ्रान्तः शून्यवादी
सिद्धान्तपक्षमन्यथा गृहीत्वाऽऽ शङ्कितवान्।
ननूत्पन्नायामिति ज्ञानस्योत्पत्तिरुपलब्धिश्चयुग-
पदेवेत्यत्र न कश्चिद्विवादः। विवादभूमिः पुन-
रियम् तदर्थोपलब्धेः पूर्वं पश्चाद्‌ युगपद्वेति ज्ञाते
त्वनुमानादवगच्छतीतिभाष्योक्त्या मीमांस-
का अर्थज्ञानानन्तरं ज्ञानग्रहणमिच्छन्ति अर्थज्ञा-
नानन्तरं ज्ञानग्रहणं भवतीति श्रुत्वा शून्यवादी
भ्रान्तः यदि अर्थज्ञानानन्तरं ज्ञानग्रहणं तर्हि
ज्ञानोत्पत्तिरपि ग्रहणोत्पत्तिवदर्थज्ञानानन्तरमे-
वेष्टा स्यात् तच्चानिष्टमिति ज्ञानोत्पत्तिः अर्थ-

२०

ज्ञाना त्प्रागपकृष्या इत्यभिप्रायेणाह ननूत्पन्नाया मिति अर्थज्ञाना त्प्राग् यदि ज्ञानोत्पत्ति स्तदा तद्ग्रहणमपि प्रागेव सिद्ध्यतीत्यभिप्रायः अस्तु ज्ञानसंवित्तिरपि पूर्वं तावता प्रकृते किमायात-मिति चेदिदमायातम् । निराकारज्ञानस्योपल-ब्धिरशक्येति साकारं वाच्यमिति प्रत्यक्षज्ञाने आकारद्वयभानाभावाद् भासमान एक आकारो ज्ञानस्यैवेति नार्थसिद्धिरिति स्वपक्षानुकूलोऽयमा क्षेपो न प्रतिकूल इति भावः । एवं पूर्वमुत्पद्यमा-नवासौ ज्ञायते ज्ञापयति चार्थान्तरमिति यद्यौ-गपद्य मुक्तं तस्यापि ज्ञानाकारसिद्धावेव तात्प-र्यमिति सत्यं पूर्वं बुद्धिरुत्पद्यते नतु पूर्वं ज्ञायत इति सिद्धान्तवादिनो ऽयमभिप्रायः यदि अर्थ-ज्ञाना त्प्राग्ज्ञानसंवित्तिः स्या त्तदा प्रत्यक्षे भास-मान आकारो ज्ञानस्यैव भवेदित्यर्थाकारो न सिद्ध्येत् । तत्तु न पूर्वं बुद्धेरुत्पत्तावपि तद्ग्र-हाभावा न्न तदाकारः प्रत्यक्षे भासितुमर्हति इत्यर्थाकार एव बलादनिच्छता पि स्वीकार्य इति

अर्थस्यैव पूर्वं ज्ञानं न बुद्धेरित्येतत्प्रदर्शयितु-
माह—

भा० भवति हि कदाचिदेतत् यज् ज्ञातोऽप्यर्थः सन् अज्ञात इत्युच्यते। न चार्थव्यपदेशमन्तरेण बुद्धेः स्वरूपोपलम्भनम्। तस्मान्न व्यपदेश्या बुद्धिः अव्यपदेश्यं च न प्रत्यक्षम्। तस्माद् प्रत्यक्षा बुद्धिः।

भवति हि कदाचिदेतद् यज्ज्ञातोऽप्यर्थः सन्नज्ञात इत्युच्यते इति इह देशे कोपि पुरुषो मयाऽनुभूत इत्युक्त्या पूर्वमेवेदं व्याख्यातमिति न भूयो व्याख्यानमर्हतीति। तथापि संक्षिप्योच्यते यदि अर्थज्ञानयोरेकदाऽनुभवः स्यात्तदैकानुभवगोचरतैव स्यादिति तादृशानुभवाहितसंस्कारः ज्ञानमिवार्थमपिस्मारयेत् संस्कारोपधानाक्षमत्वे तु अर्थमिव ज्ञानमपि न स्मारयेत् अविशेषात्। नहि अस्ति संभवः स एवानुभवः

संस्कारमुपदधाति नोपदधाति च मिथोविरोधात्। भिन्नानुभवकल्पनायां तु ज्ञानविषयकानुभवस्य संस्काराधानसामर्थ्यं कल्प्यते अर्थविषयकानुभवस्य तु नाथस्मरणाभावादित्यर्थविस्मरणेऽपि ज्ञानमात्रस्मरणमुपपद्यते इति नार्थसंवित्योरेकदानुभव इति। वस्तुतस्तु नायं भाष्यार्थः एकस्यैवानुभवस्य ज्ञानांशे संस्कारोपधायकत्वं अर्थांशे तु तदभावः कल्प्यते फलवत्त्वादित्यवच्छेदकभेदेन संस्कारोपधायकत्वानुपधायकत्वयोरेकत्र समावेशसम्भवेनानुभवभेदकल्पनायां वीजाभावात् सहानुभूतयोः सहैव स्मरणमिति नियमे मानाभावादुद्बुद्धसंस्कारस्यैव स्मारकतया यदंशस्मरणं न भवति तदंशे संस्कारोद्बोधाभावकल्पनमेवोचितमिति न ज्ञानस्मरणेऽपि अर्थविस्मरणेनार्थसंवित्तिसमये ज्ञानसंवित्तिनिराकरणं युज्यते तस्मान्नेदं भाष्यं अर्थसंवित्तियौगपद्यनिराकरणपरं किन्तु अर्थोपलब्धेः पूर्वं ज्ञानसंवितिसाधनस्य यत्फलं अर्थस्यज्ञानाकारत्वं

तदेवानेन भाष्येण निराक्रियते यदि ज्ञानं नीला कारं स्या त्तर्हि नीलाकारविनिर्मुक्तं न स्मर्य्येत स्मर्य्यते च तदाकारविनिर्मुक्तमिति न तदाकारमित्यर्थः। अर्थस्य जड़त्वात् ज्ञानोत्पत्तेः प्राग् न ज्ञातुं शक्यमिति न पूर्वं ज्ञायते इति। नचार्थव्यपदेशमिति स्वच्छचिन्मात्रं केवलं ज्ञानमेवावशिष्यते ऽन्यत्किमपि नास्ति जगतीति शून्यवादिनां भवतां मतं तथाच त्वन्मते अनादिवासनावशादपारमार्थिकनीलपीताद्याकारेण ज्ञानमेव स्फुरति नतु कश्चिदपरः पारमार्थिक स्तत्र प्रकाशते तदिदमसंगतम् मृगतोयादिज्ञानस्येव नीलादिज्ञानस्यापि भ्रमत्वापत्तेः सर्वथा ऽसतो विषयस्य भानासम्भवा च्च ज्ञानस्य सविषयकस्यैव दर्शनात् निर्विषयकज्ञानानङ्गीकारात्। स्वप्नादावपि कदाचिदनुभूतस्यैवान्यथाभानं नतु सर्वथा असत इति विषयद्वारैव बुद्धेः प्रत्यक्षत्वं न स्वरूपत इति विषयानङ्गीकारे अप्रत्यक्षैवबुद्धिरित्याह तस्मादप्रत्यक्षा बुद्धिरिति दोषान्तरमाह—

भा० अपिच काममेकरूपत्वे बुद्धेरभावः नार्थस्य प्रत्यक्षस्य सतः। नचैकरूप्यम् अनाकारमेव हि बुद्धिमनुमीमहे साकारं चार्थं प्रत्यक्षमेवावगच्छामः। तस्मादर्थालम्बनः प्रत्ययः। अपिच नियतनिमित्तः तन्तुष्वेव उपादीयमानेषु पटप्रत्ययःइतरथा तन्तूपादानेऽपि कदाचित् घटबुद्धिरविकलेन्द्रियस्य स्यात्। नचैवमस्ति अतो न निरालम्बनः प्रत्ययः अतो न व्यभिचरति प्रत्यक्षम्।

अपिचेति विषयानभ्युपगमे तन्तुष्वेव पटप्रत्ययो भवति न मृत्पिण्डेषु इति नियमो न स्यात् पटस्यासत्त्वाविशेषात् तन्तुष्विव मृत्पिण्डेष्वपि पटप्रत्ययोऽदूषितेन्द्रियस्यापि स्या न्नचैवं दृश्यते तस्मात्सालम्बन एव प्रत्ययो वाच्य इति

न व्यभिचारि प्रत्यक्षमिति ननु बाह्यपदार्थस्वी-
कारेऽपि कस्मात्तन्तुभ्य एव पटोत्पत्ति र्न मृत्पि-
ण्डेभ्यः बाह्यार्थस्योभयत्र साम्यात्। नच यत्का-
र्यजननशक्ति र्यत्र तत एव तत्कार्यमिति नियम
स्तथाच पटजननशक्ति स्तन्तुष्वेवेति तत एव
पटोत्पत्ति र्न मृत्पिण्डेभ्य स्तत्र तादृक्शक्तिविर-
हादितिवाच्यम्। तन्तुज्ञाने एव पटज्ञानजननसा-
मर्थ्यं न मृत्पिण्डज्ञाने इति तन्तुज्ञानमेव पटज्ञानं
जनयति न मृत्पिण्डज्ञानमिति व्यवस्थाया अ-
न्यत्रापि वक्तुं शक्यत्वात्। तथाचोभयत्र शङ्का-
समाधानयो स्तुल्यत्वादेकत्रैव विशिष्य पर्यनु-
योगो नोचितः उक्तं च यथाविधं घटं दृष्ट्वा
द्वैतवादी विचेष्टते ज्ञात्वा तथाविधं ज्ञानं अद्वैती
किं न चेष्टते इति चे न्न शून्यवादिनां शक्तेरप्य
भावादीदृशव्यवस्थोपपादनासम्भवात्। शक्ता-
दपिकारणात् सततकार्योत्पत्त्यदर्शनात्। शक्त्य-
भिव्यञ्जकं सहकारिकारणं वाच्यम्। तच्चास्म-
न्मते सम्भवति देशकालनिमित्ततन्तुवायादीनां

सत्वात् त्वन्मते सहकारिणोप्यभावा त्तद्व्यवस्था दुरूपपादैव। नच संवृतिरूपया शक्त्या व्यवस्था तस्या मिथ्यात्वेन कार्यौपयिकत्वाभावात् सत्यत्वे च द्वैतापत्तिः। तद्वत्पदार्थान्तरस्यापि स्वीकारापत्ति श्चेति वासनारूपैव शक्ति र्भवद्भि र्वाच्या तस्या श्च नियामकाभावात् सर्वत्र ज्ञाने प्रसक्तौ किंचिदेवज्ञानं कस्यचि द्ज्ञानस्य निमित्तमिति नियमो न स्यादिति। अपिच यदिवासनामात्रापेक्षया तन्तुज्ञानं पटज्ञानं जनये त्तदा कारणान्तरापेक्षाकृतविलम्बाभावा त्सर्वदैव पटज्ञानं जनयेत् नैव वा कदाचित् जनयेत् नचैवमस्ति तस्मा त्कारणान्तरमेष्टव्यम्। यत्सत्वासत्वाभ्यां पटज्ञानस्य कादाचित्कत्वमुपपद्येत। किंच वीजज्ञानं विनापि अंकुरज्ञानदर्शना न्नोपादानज्ञानं कार्यज्ञानजनकं व्यभिचारादिति कार्यज्ञाननियामकमन्यदेव वाच्यमिति भाष्यमतमेव युक्तम् तदेवं वाह्यार्थग्रहणसामर्थ्या त्प्रत्यक्षं वाह्यार्थे प्रमाणं निरालम्बनत्वानुमानमपि वाह्यार्थाभावसा-

धनाय नोत्पत्तुमर्हति प्रत्यक्षविरोधादिति प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयेन न बाह्यार्थाभावसिद्धिः। नेह नानास्ति किञ्चनेत्याद्यागमस्यात्मप्रशंसापरत्वे नौपचारिकत्वा न्न स्ववाच्यार्थे प्रामाण्यमिति न बाह्यार्थबाधनाय सामर्थ्यम् प्रत्युतविविधसाध्यसाधनाधिकारिबोधकवाक्यानि बाह्यार्थमेव साधयन्ति न तदभावमिति एवमुपमानार्थापत्योरपि द्वैते एव संभवा न्ना द्वैतसाधकत्वमित्यलमतिप्रपञ्चनेन इति।

इति कल्पकलिकायां शून्यवादः

पूर्वं निमित्तसूत्रे लोकप्रसिद्धत्वा त्प्रत्यक्षादीनि प्रमाणानि न परीक्षितव्यानीत्युक्तं ततः शुक्तिरजतादिज्ञाने प्रत्यक्षस्य व्यभिचारदर्शनात्तत्पूर्वकत्वाच्चानुमानादे र्व्यभिचार इति तानि परीक्षितव्यानीत्युक्तं तदनन्तरं यद् व्यभिचारि त न्न त्प्रत्यक्षं यत् प्रत्यक्षं त न्न व्यभिचारि कीदृशं त त्प्रत्यक्षं य न्न व्यभिचारीत्यपेक्षायां सत्संप्रयोग इत्यादिलक्षणमभिहितं तदव्यभिचा-

रसमथनाय बौद्धमतं च निराकृतमित्येतावता प्रबन्धेन प्रत्यक्षस्याऽव्यभिचारित्वं समर्थितं तत्पूर्वकत्वाच्चानुमानादेर्व्यभिचारसन्देहो निराकृतः। इदानीं स्वलक्षणेनाप्यनुमानस्याऽव्यभिचारित्वादपरीक्ष्यत्वमुच्यते—

भा० अनुमानं ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिः।

अनुमानमिति। एवंलक्षणकमनुमानं न परीक्षितव्यं एवंलक्षणकत्वादव्यभिचारिप्रत्यक्षपूर्वकत्वाच्चेत्याशयः ज्ञातसंबन्धस्येति ज्ञातः निश्चितः संबन्धः व्याप्तिरूपः साध्यसाधनयोर्येन स ज्ञातसंबन्ध स्तस्य साध्यसाधनव्याप्तिनिश्चयवतः पुरुषस्येतियावत् एकदेशस्य संबन्धिनोरेकतरस्य संबन्धानुयोगिनो हेतोः पक्षे दर्शनादेकदेशान्तरे तादृशसंबन्धप्रतियोगिनिचक्षुराद्यसन्निकृष्टे साध्येऽर्थे विषयित्वं सप्तम्यर्थः तद्विषयिणी या बुद्धि स्तदनुमानमित्यर्थः। अथवा

षष्ठ्यर्थे वहुव्रीहिः ज्ञातः संवन्धो यस्य स ज्ञात-
संवन्धः सपक्षो महानसादिः तस्य य एकदेशः
हेतु धूमादि स्तस्य पर्वतादौ दर्शनादेकदेशा-
न्तरे तत्रैव वह्निबुद्धिः सपक्षे हि साध्यसाधनयो
र्व्याप्तिनिश्चयो भवतीति भाव; । ज्ञात श्चासौ
सम्वन्धश्चेति कर्मधारयो वा सवन्धिद्वयनिरू-
पितः सम्वन्धः एकदेशी तस्य य एकदेशः संव-
न्धानुयोगी हेतु धूमादिः तस्य पर्वतादौ दर्शना-
देकदेशे तादृशसंवन्धप्रतियोगिनि वह्न्यादौ सा-
ध्ये या वुद्धिरित्यर्थः। अथवा ज्ञातः संवन्धो यस्य
साध्यसाधनद्वयस्य तत्ज्ञातसंवन्धं साध्यसाधनो-
भयं तस्य य एकदेशः साधनं तस्येत्यर्थः पूर्ववत् ।
अत्र समुदायिवाचकावेकदेशशब्दौ नच पुरुषै-
कदेशसमुदायानां अत्रानिर्देशा न्नान्यपदार्थत्वं
युक्तम् एकदेशस्य तु लक्षणवाक्ये निर्देशा त्त-
स्यैवान्यपदार्थत्वं युक्तमिति वाच्यम्। निर्दिष्टस्यै
वान्यपदार्थत्वं भवतीति नियमे मानाभावादा-
कांक्षानिवर्तनक्षमस्यानिर्दिष्टस्यापि अन्यपदार्थ-

त्वेन बहुब्रीहावाश्रयणात् । अत एव स्वर्गकामो यजेत इत्यादौ बहुब्रीहिपक्षे पुरुषस्य लाभः अन्यथा तस्यानिर्दिष्टत्वेनान्यपदार्थत्वेनाग्रहणे तत्र बहुब्रीहि र्न स्यात् । एकदेशशब्दस्य समस्ततया गुणत्वेन विशेष्यतया न्वययोग्यताविरहात् । अन्यत्रान्वयाभ्युपगमे साकांक्षत्वेनासमर्थत्वापत्या समासाभावप्रसंगाच्च । नच तथापि ज्ञातसंबन्ध स्यैकदेशिपरत्वे तदपेक्षस्यैकदेशशब्दस्यासमर्थत्वापत्या दर्शनशब्देन सह समासानुपपत्ति स्तदवस्थैवेति वाच्यम् । देवदत्तस्य गुरुकुलमितिवन्नित्यसापेक्षस्य समासाङ्गीकारात् । न खलु एकदेशः कश्चित् स्वतन्त्रः पदार्थः किन्तु कस्यचि त्कश्चिदेकदेशो भवति इत्येकदेश इत्युक्तौ कस्यैकदेश इतिनियमेनैकदेशिनः आकाङ्क्षा भवति अतः नित्यसापेक्षत्वस्य सामर्थ्यविघातकत्वं नास्तीति न समासानुपपत्तिरिति स्पष्टमन्यत्र । कः पुनः संबन्धो व्याप्तिः येन केनापि सम्बन्धेन यो नियमः स एव संबन्धो व्याप्ति न

तु संयोगसमवायादिरूपसंबन्धविशेषनियतः क्त्तिकारोहिण्युदयादौ व्यभिचारात्। व्याप्यत्वं पुनः यो यस्य देशकालाभ्यां न्यूनः समो वा स तस्य व्याप्यः व्यापकश्च यो यस्य देशकालाभ्यामधिकः समो वा स तस्य व्यापकः। एवंच व्याप्यस्य व्यापकापेक्षयासमन्यूनदेशकालत्वाद्व्याप्ये ऽवगते यदि व्यापको ऽत्र न स्या त्तर्हि व्यापकत्वमेव तस्य भज्येतेति व्याप्यो व्यापकमवगमयति। व्यापकस्य तु व्याप्यापेक्षया समाधिकदेशकालत्वाद्व्याप्यदेशकालातिक्रमणे ऽपि व्यापकत्वाक्षते र्न व्याप्यावगमकत्वमिति। ननु घटो गन्धवान् पृथिवीत्वादित्यादौ व्यापकेना पि व्याप्यानुमानं दृश्यते दृश्यतां। किन्तु तत्रापि गन्धत्वावच्छिन्नापेक्षया पृथिवीत्वस्य व्याप्यत्वमप्यवगतमिति तत्र व्यापकत्वव्याप्यत्वयोः सत्वेऽपि गमकत्वं व्याप्यत्वेनैव न तु व्यापकत्वेन विषमव्याप्तिके वह्निमान् धूमादित्यादौ व्याप्यत्वस्यैव गमकत्वदर्शनात् अत्रापि तस्यैव

गमकत्वाङ्गीकारौचित्यात् अन्यथा विषाणित्वेन गोत्वानुमानमपि स्यादिति । ननु निखिलसाध्यसाधनाधिकरणीभूतदेशकालयो र्वागदृशः प्रत्यक्षीकर्तु मशक्यतया यत्र क्वचन देशेकाले च समानाधिकरण्यमात्रदर्शनेन व्याप्त्यवगमे वैपरीत्यस्यापि सम्भवाद् व्याप्यत्वावधारणमेव दुर्घटमिति गतमनुमानप्रत्याशया । महानसादिगत वह्निधूमयोरेव व्याप्त्यवधारणेतु तादृशव्यक्तेः पक्षे पर्वतादौ विरहाद नुमानस्यैवासम्भवोपत्तेः नच नैयायिकानामिव भवतां सामान्यलक्षणाप्रत्यासत्तिरस्ति यया सर्वसाध्यसाधनयोः सकृदेव प्रत्यक्षीकरणाद् व्याप्त्यवगमः शक्यसंपादनः स्यादिति चेन्न व्यभिचारदर्शनासहकृतः यत्र क्वचन देशे काले वा साध्यसाधनसहचारग्रहस्य सामान्यतः व्याप्तिनिर्णायकत्वाभ्युपगमा न्न दोषः । नहि व्याप्यत्वावगमायनिखिलसाध्यसाधनतदधिकरणादर्शनापेक्षा अन्यथा व्याप्त्यवगमवेलायामेव पक्षस्यापि साध्यवत्वे-

नावगमादनुमानवैयर्थ्यापत्तेः। नचैकत्रसामानाधिकरण्यदर्शनेऽपि परत्र साध्याऽव्यधिकरणे हेत्वभावपरिच्छेदो न स्यादिति वाच्यम् माभूत्परिच्छेदः किन्तु साध्याभावाधिकरणे हेतुदर्शनं नाभूदितिऽव्यभिचारदर्शनाभावसहकृतं भूयः सहचारदर्शनं सामान्यतः व्याप्तिनिर्णायकमित्येवाङ्गीकारान्न दोषः। नन्वेवंऽव्याप्येन व्यापकावगमाङ्गीकारे ब्रह्महत्यायामधर्मत्वेन हिंसात्वस्य व्याप्यत्वावगमाद् अग्नीषोमीयहिंसायामधर्मत्वानुमानं स्यादिति चेन्न हिंसात्वहेतोः सोपाधिकत्वात्। तथाहि निषिद्धत्वं हि हिंसात्वं विनापि सुरापानादावधर्मप्रयोजकत्वेन दृष्टं हिंसात्वं तु निषिद्धत्वं विना नक्वचिदधर्मप्रयोजकत्वेन दृष्टमिति ब्रह्महत्यादावपि प्रयोजकत्वेन निषिद्धत्वस्यैवाधर्मत्वव्याप्यत्वंस्वीकर्तुमुचितं न हिंसात्वस्येति निषिद्धत्वं हिंसात्वे स्वगतां व्याप्तिं सान्निध्यादुपदधाति स्फटिके आरुण्यं जपाकुसुममिवेति ध्येयम्। किंच सत्प्रति-

पक्षितो ऽपिहेतुः तथाहि अग्नीषोमीयहिंसा धर्मः विहितत्वादग्निहोत्रादिवत्। अग्नीषोमीयादि हिंसायामधर्मत्वानुमाने आगमविरोधोऽपि तस्या अधर्मत्वे स्वर्गादिफलं न स्यात्। नहि अधर्मेण स्वर्गो भवतीति कस्यचिदभिमतं एवमव्यवस्थित-हेतुनानुमाने यागोऽधर्मः क्रियात्वाद् हिंसादि-क्रियावदित्यपि स्यात्। इति सर्व एव व्यवहारो ऽधर्मेणोपप्लुत इति न किंचित्परित्राणाय स्या-दिति प्रमाणान्तरेण साध्यवत्त्वात्मना पक्षे प्रमिते सिद्धसाधनदोषादनुमितिरेव न भवतीति प्रमा-णान्तरेण साध्यवत्त्वेनाप्रमितस्य पक्षस्यानुमेयत्वं हेतुमत्वेन दृष्टान्ताप्रमितौ व्याप्त्यवगमासम्भवा त्प्रमाणान्तरेण हेतुमत्वेन प्रमितस्य गमकत्वम्। प्रतिज्ञावाक्ये वह्निमान् धूमादिति सामानाधि-करण्येन पर्वते वह्निरिति वैयधिकरण्येन वा धम-धर्मिणो निर्देशः कर्त्तव्यः। तत्र सामानाधिकरण्य-वैयधिकरण्ययोरन्यतरत्र विशिष्याग्रह एवमेव-निर्देष्टव्यं नैवमिति। साध्यपक्षयोरेकैकस्य

त्वेन तस्यैवाप्रमाणत्वात्। नच गवयं पश्यतोऽतिदेशवाक्यस्मरणोत्तरं जायमानगोसादृश्यविशिष्टज्ञानं स्मरणव्यवहितेन्द्रियव्यापारजन्यत्वान्न प्रत्यक्षम् इति वाच्यम् प्रत्यक्षसूत्रे इन्द्रियसंबद्धमात्रस्य प्रत्यक्षत्वाभिधानात्। स्मरणात्पूर्वमेव प्रत्यक्षमिति निवेशाभावात् स्मरणात्पूर्वमुत्तरं च प्रत्यक्षं निर्बाधम्। नच तथापि गोसादृश्यविशिष्टगवयप्रत्यक्षस्य गवांशे स्मर्यमाणविषयत्वा त्कथं प्रत्यक्षमिति वाच्यम्। एकस्यापि ज्ञानस्य विषयभेदेन प्रामाण्याप्रामाण्योभयस्वीकारात्। तथा च गवांशे स्मर्यमाणविषयत्वादप्रामाण्यं विशिष्टगवयांशे तु प्रामाण्यमेवागृहीतग्राहित्वात्। श्रुतातिदेशवाक्येति विशेषणमपि व्यर्थम्। अश्रुतातिदेशवाक्यस्यापि गोदर्शिनो वनं गतस्य गवयं पश्यतः गोसादृश्यविशिष्टगवयज्ञानदर्शनात्। नचाश्रुतातिदेशवाक्यस्य सादृश्यज्ञानेपि संज्ञासंज्ञिसंवन्धपरिच्छेदो न भवतीति वाच्यम्। सादृश-

संबन्धपरिच्छेदाभावेऽपि विशिष्टज्ञानजननादे-वोपमानफलोपपत्तेः। नच तन्मते संज्ञासंज्ञिसंब-न्धपरिच्छेद एव फलं न सादृश्यविशिष्टज्ञान-मिति तदर्थं तद्विशेषणमावश्यकमितिवाच्यम् गोसदृशो गवय इति वनेचरवाक्यस्य तदानीं गवयस्याप्रत्यक्षत्वेन कश्चिद्‌ गोसदृशो यस्य गव-यसंज्ञेत्येतावन्मात्रबोधकत्वेनापर्यवसिततया गव-यदर्शनानन्तर मयंगोसदृशो गवयपदवाच्य इत्येतत्पर्यन्तं व्यापारोपगमादेव तदुपपत्तेरिति। नच वाक्येनावगतो प्यर्थः पुनरुपमानेन प्रत्य-भिज्ञेयः। वनेचरवाक्यबोधितातिरिक्तभानाभा-वेन प्रत्यभिज्ञासम्भवात्। वाच्यवाचकशक्ते-श्चातीन्द्रियतया तद्वाक्यबोधितदेशेपि स्मरणक-ल्पनाया एवौचित्यात्। नचोपमानेनातीन्द्रि-यार्थप्रत्यभिज्ञानमपिकल्प्यते इतिवाच्यम्। तथापि देशकालादेरधिकस्य भानाभावेन तत्क-ल्पनानवकाशात्। नचाश्रुतारण्यकवाक्यस्य गोसादृश्यज्ञानं शब्दजनितताहृशप्रत्ययानुपर-

ञ्जितं श्रुतातिदेशवाक्यस्य तु तत्तदुपरञ्जित-मिति वैलक्षण्या त्तद्विशेषणमावश्यकम् । वि-शेषणविशिष्टस्य प्रत्यक्षत्वोपपादना त्तादृशोप-रञ्जनानुपरञ्जनकृतविशेषस्याकिंचित्करत्वात् । तस्मा त्प्रत्यक्षाद्यनवगतप्रमेयाभावा न्नोपमानं प्रमाणान्तरमित्याशङ्क्योपमानं प्रमाणान्तरमि-त्येतत्प्रदर्शनाय तत्स्वरूपमाह उपमानमपीति-भाष्यम् पूर्वानुभूतगोः वनं गतवतो गोसदृशं गवयं पश्यतो सन्निकृष्टे गवि यत्स्मरणमनेन गवयेन सदृशो मदीयो गौरिति तत्सदृशस्मर-णमुपमानमिति । नचगोप्रतियोगिकसादृश्य-विशिष्टगवयप्रत्यक्षजनितं गवयप्रतियोगिक-गवानुयोगिक सादृश्यस्मरणं स्मरणत्वादेव न प्रमाणमिति कथ मुपमानं प्रमाणान्तरम् । नच पूर्वानुभूतार्थविषयकप्रत्यभिज्ञावदस्याधि प्रामाण्यम् तत्र पूर्वाननुभूततद्देशकालादेरधि-कस्य भानेन प्रामाण्योपपादनेपि अत्रानु-भूतार्थाधिकभानाभावेन तदुपपादनासंभवात्

साद्दश्यं गवयश्चेति द्वयमुपमानस्य विषयः। तत्र साद्दश्यस्य स्मरणं गवयस्य प्रत्यक्षं जायत इति । किमपरं प्रमेयमवशिष्यते यत्रोपमानं प्रमाणं भवेदिति चे न्मैवम् । गवयप्रतियोगिकगोनिष्ठसाद्दश्यस्य केनाप्यग्रहणात् गोरिन्द्रियसंनिकर्षाभावा न्न तन्निष्ठं साद्दश्यं प्रत्यक्षेण ग्राह्यं साद्दश्यप्रतियोगिनो गवयस्याननुभूतत्वा न्न स्मरणेनापि साद्दश्यविशिष्टगवयदर्शनानन्तरं तु उपमानेन गवि गवयसाद्दश्यं गृह्यते इत्येतत्प्रमाणान्तरम् । यथा पर्वते प्रत्यक्षे अग्नौ च स्मर्यमाणेऽपि अग्निविशिष्टं पर्वतं गमयदनुमानं प्रमाणं तथैकैकस्य ज्ञानान्तरविषयत्वेऽपि विशिष्टं ग्राहयदुपमानमपि प्रमाणमेव तदयं भाष्यार्थः य त्साद्दश्यं द्दश्यमानमसन्निकृष्टे ऽर्थे बुद्धिमुत्पादयति तदुपमानं प्रमेयबुद्धिजनकमेव साद्दश्यमिन्द्रियप्रत्यक्षमुपमानं यथागवयदर्शनमिति साद्दश्यविशिष्टगवयदर्शनं गोस्मरणस्य जनकमिति । अत्र

बौद्धाः। ननु सादृश्यं नाम न किंचिद्वस्तु तद्धि धर्मिणोऽव्यतिरिक्तं व्यतिरिक्तं वा नाद्यः धर्मिमात्रबुद्ध्यापत्तेः नान्त्यः गवाश्ववद्भेदेन प्रतीत्यापत्तेः किं च सादृश्यस्य वस्तुत्वे प्रतियोगिज्ञानं विनापि जातिवद्गृह्येत प्रतियोगिसापेक्षमेव सादृश्यमित्यपि न सापेक्षत्वं हि उत्पत्तौ ज्ञप्तौ वा नचोभयत्र संभवति देवदत्त इव यज्ञदत्त आसीदित्यादौ मृतेऽपि यज्ञदत्ते देवदत्तसादृश्यस्योत्पत्तेः ज्ञप्तेश्च दर्शनात्। तस्मा त्स्ववासनाविलसितमेव सादृश्यं न किंचित्प्रमेयमिति तज्ज्ञानमाभास एवेति अत्रोच्यते। सादृश्यमस्तिप्रमेयम् सर्वेषामिदमनेन सदृशमित्यबाधितासन्दिग्धबुद्धिदर्शना ज्जातिवत्। यच्चोक्तं सादृश्यस्य वस्तुत्वे जातिव त्प्रतियोग्यपेक्षा न स्यादिति तदयुक्तम्। संबन्धिद्वयनिरूपितत्वा त्सादृश्यं संबन्धवत् यथासंबन्धग्रहे सम्बन्धिनोरपेक्षा तथा सादृश्यग्रहेऽपि भूयोवयवसामान्ययोगो हि जात्यन्तरस्य

जात्यन्तरे सादृश्यम् । नच प्रतियोगि असमर्थ्यमाणो तत्संबन्धितया सादृश्यं शक्यग्रहमिति प्रतियोगिग्रहः सादृश्यग्रहे ऽपेक्ष्यते । यदप्युक्तम् मृतेऽपि सादृश्यबुद्ध्युत्पत्तिदर्शनात् । नोत्पत्तौ ज्ञप्तौ वा प्रतियोग्य ऽपेक्षेति तदसत्यं । नवयमुत्पत्तौ ज्ञप्तौ वा सत्तया प्रतियोगिनो ऽपेक्षेति ब्रूमः किन्तु स्वज्ञाने स्वसंबन्धितया स्मर्यमाणस्य प्रतियोगिनोऽपेक्षेत्येव ब्रूमः । एवं च प्रतियोगिनोऽ सत्वेपि तदीयस्मरणा न्नतदनुपपत्तिः । यदपि तत्र धर्मिणो भेदाभेद विकल्पस्तदपि न सर्वत्र धर्मधर्मिणो र्भेदाभेदोभयस्वीकारात् । अत्रावयवग्रहणां संबन्धान्तरस्य जातिग्रहणां धर्मान्तरस्योपलक्षणार्थम् तदयं निष्कर्षः वस्त्वन्तरस्य स्वाश्रयवेषु गुणेषु कर्मसु वा यैः सामान्यैः येन प्रकारेण योग स्तेनैव प्रकारेण वस्त्वन्तरस्य योगः सादृश्यमिति न तत्वान्तरं नाप्यवस्तु । अत एवानयो रल्पसादृश्यमनयो श्चातिसादृश्यमित्यवधवसामा-

न्ययोगाल्पभूयस्त्वनिबन्धनः। सादृस्याल्पभूयस्त्वव्यवहारः सूपपद्यते तत्त्वान्तरत्वे तु जात्यादिव न्नन स्यात् अवयविनोः सादृश्यं गौरिव गवयः अवयवयोः पद्मदलाक्षीत्याद्युदाहरणानि बोध्यानि सादृश्यं पुनरनित्यं जातिवन्नित्यत्वा नङ्गीकारात् संबन्धिनो रुत्पत्तिविना शाभ्यांतदुत्पत्तिविनाशस्वीकाराद थवा नित्यमेव जातिवदेकाश्रयविनाशे ऽपि अपराश्रयासद्भावात् ननु व्यासज्यवर्तमानं सादृश्यं द्वित्वादिव त्कथमेकाश्रयग्रहणेन गृह्यते नैवं व्यासज्यवृत्तित्वानङ्गीकारात् जातिव त्प्रत्येकाश्रयपरिसमाप्तत्वमेवेति गवयग्रहणेऽपि गोसादश्यं गृह्यते गवि स्मर्यमाणे। पूर्वं गवयप्रत्यक्षं ततो गोस्मरणं ततः सादृश्यविशिष्टगवयप्रत्यक्षं नच स्मरणोऽयवहितेन्द्रियव्यापारजन्यत्वा त्कथं प्रत्यक्षत्वं तदानीमपि इन्द्रियव्यापारोपरमाभावाद्गवयद्वारेन्द्रियसन्निकर्षसत्त्वेन तत्वे बाधकाभावात् शाक्यवैशेषिकादय स्तू-

पमानमनुमाने ऽन्तर्भावयन्ति तदयुक्तम् प्रमेयो गौ स्तद्गतं सादृश्यं नलिङ्गं प्रागुपमानात्त दग्रहणात् गोप्रतियोगिकगवयगतसादृश्यस्य पक्षे गवि असत्वात्। अत एव सादृश्यविशिष्ट गवयस्यापि न लिङ्गत्वम् पक्षवृत्तित्वाभावात्। नच गौर्गवयसदृशः गोप्रतियोगिकगवयनिष्ठ-सादृश्यप्रतियोगित्वात् यत् यन्निष्ठसादृश्य-प्रतियोगि तत्ते त्सदृशं यथायुगपद्दृश्यमानयोः सदृशयोः परस्परमेकैकं सदृशमिति। मैवं युगपत्सदृशद्वयवस्तुनो दर्शनाभावेपि केवलं गामवलोक्य वनं गतस्य गवयं पश्यतः गवय-सदृशो गौरिति प्रत्ययो भवति नचे दमनुमा-नमतः प्रमाणान्तरमुपमानमितिसिद्धम्। प्रयोजनं च सौर्यं चरुं निर्वपेदाग्नेयवदित्यादौ बोध्यमत्राग्नेयभावना सौर्यभावनया गृह्यते एवं व्रीह्यपचारे तत्सादृश्यान्नीवाराणां तत्प्रतिनि-धित्वेन लाभ इति दिक् इति कल्पकलिकायामु-पमाननिरूपणम् समाप्तम्।

भा० अर्थापत्तिरपि दृष्टः श्रुतोवाऽर्थोऽन्यथा नोपपद्यते इत्यर्थकल्पना। यथा जीवति देवदत्ते गृहाभावदर्शनेन बहिर्भावस्य अदृष्टस्य कल्पना।

अथार्थापत्तिनिरूपणम्। अर्थापत्तिरपीति भाष्यम् प्रमाणेनावगतस्याप्यर्थस्य येनार्थेन विनोपपत्तिर्नभवति तादृशार्थान्तरकल्पनार्थापत्तिः। अङ्गुल्यग्रे करियूथशतमित्याद्युपपत्तयेऽर्थान्तरकल्पनामाभूदिति प्रमाणेनेत्युक्तम्। उदाहरणं यथा पीनो देवदत्तो दिवा न भुङ्क्ते। अत्रभोजनं विना श्रुतमपि पीनत्वं नोपपद्यते इति पीनत्वोपपत्तये दिवाभोजनप्रतिषेधाद्द रात्रिभोजनं कल्प्यते। इयं द्विधा श्रुतार्थापत्ति दृष्टार्थापत्तिश्च आद्या प्रमाणविषया अन्त्या तु प्रमेयविषयेति श्रुतस्य दृष्टान्तर्भावेऽपि नानयोरभेदः। श्रुतातिरिक्तप्रमाणपूर्विका अर्थापत्तिः षोढा तत्र प्रत्यक्षप्रमाणपूर्विका यथा प्रत्यक्षदृष्टदाहान्यथा-

नुपपत्त्या वह्नौ दाहानुकूलशक्तिकल्पना । देशान्तरप्राप्तिलिङ्गानुमितादित्यगत्या सूर्यगतिशक्तिकल्पना अनुमानपूर्विका शब्दपूर्विका तु श्रुतार्थापत्तिरेव सा चोदाहृता उपमानान्यथानुपपत्त्योपमानं प्रति ग्राह्यशक्तिकल्पनोपमानपूर्विका अभिधायकत्वान्यथानुपपत्त्या पूर्वं शब्दे वाचकत्वकल्पना ततः प्रत्युच्चारणं शब्दानां भेदे सर्वत्रशक्तिग्रहासंभवात् वाचकत्वानुपपत्तिः शब्दसाम्येन वाचकत्वाभ्युपगमे लिङ्गाभासजज्ञानवदप्रमाणत्वापत्तिरित्यनुपपत्तिमालोच्य पुनः शब्दानित्यत्वकल्पना या सार्थापत्तिपूर्विकार्थापत्तिः अभावपूर्विकार्थापत्तिरिहैव भाष्यकारेणोदाहृता जीवति देवदत्तो गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्यकल्पनेति भाष्येऽभावपूर्विकार्थापत्तेरुदाहरणमन्यासामप्यर्थापत्तीनां सूचनाय न त्वियमेवेति सूचनाय । केचित्तु नार्थापत्तिः प्रमाणान्तरं किन्त्वनुमानमेव । यथाधूमो वह्निं विना नुपपद्यमानो वह्निं गमयति एवं जीविनो गृहासत्त्वं

वहिःसत्वं विना नुपपद्यमानं वहिस्सत्वं गमयतीति त न्न गृहासत्वस्य हेतो श्चैत्रे वहिर्देशे वा विरहात्। असत्वविशिष्टस्य गृहस्य च कस्य चिद्धर्मत्वाभावात्। तदानीं गृहमेव प्रतीयते न चैत्रो न वा बहिर्देश इति न चाप्रतीयमानस्य धर्मो गृहासत्वम्। नच चैत्रादर्शनहेतुः गृहादर्शननिमित्तकाभावनिश्चयोत्तरजायमानबहिः सत्वबुद्धे स्तद्धे तुकत्वाभावेन तस्य लिङ्गत्वायोगात्। तावतापि पक्षधर्मत्वाभावाच्च देवदत्तस्य बहिर्देशस्यच प्रत्यक्षत्वाभावेन नानुमेयत्वमपि नचगृहनिष्ठाभावप्रतियोगित्वं हेतुः तत श्च चैत्रो वहिरस्ति गृहनिष्ठाभावप्रतियोगित्वा दहमिव यथाहं यदा न गृहे तदा बहिरेवेति वाच्यम्। मृते व्यभिचारात्। अस्तु तर्हि विद्यमानत्वे सतीति हेतौ विशेषणम् विद्यमानत्वस्यानिर्णाया द्धेतोः सन्दिग्धासिद्धेः कार्यकारणबुद्ध्यो यौगपद्यासंभवा न्नहेतुनिर्णयकाले साध्यनिर्णयः किन्तु पूर्वं हेतुनिश्चय स्ततः साध्यानुमितिः। एवं च प्रकृते

बिद्यमानत्वं गृहासत्वं च बहिःसत्वज्ञानमन्तरा संबद्धं न बोद्धुमर्हं मिथोबिरोधात्। विद्यमानो- गृहे वा बहिर्वा स्तीत्यविवादम् बहिःसत्वमन्तर्भाव्य विद्यमानत्व गृहासत्व समुच्चयस्य प्रतिपत्तौ तु विद्यमानश्चैत्रो गृहेऽसन् गृहेवा बहिर्वेति बुद्धिः स्यात् सा च न संभवति एकस्मिन् चैत्रे एकदैव गृहसत्वतदभावयोः समुच्चयासंभवात्। तत श्च बहि र्देशमन्तर्भाव्य सत्वासत्वसमुच्चयो वाच्यः तथा च विद्यमानत्वसंसृष्टगृहासत्वरूपलिङ्गावगमसमये एव बहिःसत्वस्य ज्ञातत्वात् किमपरं ज्ञातव्यमवशिष्यते यदर्थमनुमानमत्रस्यात्। ननु अर्थापत्तेः प्रमाणान्तरत्वेप्ययं दोषः बिद्यमानत्वगृहासत्वयोरेकैकस्य व्यभिचारेण वहिर्देशज्ञापकत्वायोगा त्संसृष्टोभयमेव गमकं भवतापि वाच्यं तत श्च पूर्वोक्तरीत्या तदुभयसंसर्गज्ञानेनैव बहि;सत्वस्यावगमा त्प्रमेयाभावा त्कथमर्थापत्तिरपीति चेदुच्यते। इयमेव संसृष्टधीरर्थापत्तिशब्देन व्यवह्रियते प्र-

माणप्रमितपदार्थद्वयस्यैकत्र मिथो विरोधः कारणमस्याः। अविरोधाय देशभेदेनोभयव्यवस्थापनं फलम् यथा प्रकृते विद्यमाने चैत्रे गृहावच्छेदेनासत्वं बहिर्देशावच्छेदेन सत्वमित्येकस्मिन्नेव भावाभावयोः समावेशः प्रमाणद्वयस्य परस्परमविरोधः। अन्यथा ज्योतिःशास्त्रात् शतवर्षजीवित्वमवगतं प्रत्यक्षेण च तदभावो दृश्यते नचा न्यतरस्मिन् बलाबलभावावगमः नचोभयमेकत्र युगपद्युज्यते मिथोविरोधात् तथा च नद्यास्तीरे पञ्च फलानि सन्ति न सन्तीति वाक्यवद् विरोधो ऽसमाधेयः स्यादित्यर्थापत्तिरनुमाना प्रमाणान्तरमेवेति सिद्धम्। केचित्तु अनुमानादर्थापत्तेः प्रमाणान्तरत्वे कारणमिदं यस्य प्रायः गृहे एव दर्शनं जायते तस्य तत्रादर्शने तदीयजीवने सन्देहो भवति जीवति नवेति संदिग्धं जीवनं कथं बहिःसत्वं गमयेत्केवलमसत्वं मृतेपि सम्भवाद् व्यभिचारिविशिष्ट श्चहेतुः संन्दिग्धः सन्दिग्धेन हेतुना

नानुमानं किन्तु निश्चितेनैव अर्थापत्तिः पुनः सन्दिग्धेनापि लिङ्गेन भवतीत्यर्थापत्त्या वहिःसत्वकल्पनेन तदीयजीवनसन्देहः समुच्छिद्यते इत्याहुस्तन्न गृहादर्शनजन्यतदीयजीवनसंशयस्य वहिर्भावकल्पनयोच्छेदासम्भवात् संशयोच्छेदो हि द्विधा भवति संशयनिमित्तोच्छेदाद्वा तदीयैकतरकोटिनिर्णयाद्वा अत्र च गृहासत्वदर्शनं तदीयजीवनसंशयनिदानमुक्तम्। तच्च न वहिःसत्वकल्पनया च्छेतुमर्हं जीवनसन्देहे वहिर्भावकल्पनानुपपत्तेः नहि चैत्रो जीवति नवेति संशयानः स वहिरस्तीति कश्चित् कल्पयति तत्कस्य हेतोस्तावतापि तदीयजीवनसंशयनिदानगृहासत्वदर्शनस्योच्छेदासंभवात् प्रत्युत वहिःसत्वकल्पने गृहासत्वदर्शनमतोवसुदृढं भवति नाप्येकतरकोटिनिर्णयः जीवति नवेति संशयस्य हि कोटिद्वयं जीवनं तदभावश्च नचैतयोरन्यतरद्वहिःसत्वं किन्तु ततो भिन्नमेवेति कथं गृहासत्वनिमित्तार्थापत्त्या चैत्रोजीवतीति निश्चेतुं

शक्यते क एवं ब्रूयाद् यतः चैत्रो गृहे नास्ति ततो जीवतीति मृतोपि गृहेनास्ति नचासौ जीवतीति प्रत्युतगृहाभावदर्शनेन सन्दिग्धं तदीयं जीवनमिति न तत एव निश्चेतुं शक्यं संशायकस्य निश्चायकत्वायोगा दतः सन्दिग्धं जीवनं कारणान्तरेण निर्णीय वहिर्भावेन संवन्धयितव्यं। यस्मादसौ जीवति नच गृहेवर्तते तस्माद्वहिरस्तीति वहिःसत्वनियतं जीवनसहितं गृहासत्वमवगम्यैव बहिर्भावः कल्पनीय इति निश्चितलिङ्गमूलकत्वादर्थापत्तेर्नैदृशरीत्या नुमाना द्भेदः साधयितुं शक्यते तस्मा त्पूर्वोक्तरीत्यैव तयोर्भेदोऽवगन्तव्य इति। नन्वस्तु तर्हि अर्थापत्तिः प्रमाणमनुमानं पुनरस्यामेवान्तर्भावनीयं पृथक् प्रमाणकल्पने प्रयोजनाभावात्। यो यो धूमवान् स स वह्निमानिति व्याप्तिग्राहक प्रमाणेनाविशेषा त्सर्वेषां धूमवतामग्निमत्त्वमधिगतं पर्वतस्य धूमवत्वं च प्रत्यक्षेणावगम्यते तद्यदि पर्वतो वह्निमान् न स्या त्तदा सर्वधूमवदग्निग्राहकं प्रमाणं वा मिथ्या स्यात्।

पर्वतो धूमवानिति प्रत्यक्षं वा मिथ्या स्यात्
नचोभयं समीचीनं स्यात् मिथोविरोधादित्युभ-
यप्रमाणस्यामिथ्यात्वसिद्धयेऽर्थापत्त्या पर्वत-
स्याग्निमत्त्वं कल्प्यते इति न तदर्थमनुमाना-
पेक्षेतिचे न्मैवम् अनुमानं विना सर्वधूमवता-
मग्निग्रहासम्भवात् । सामान्यलक्षणप्रत्या-
सत्तिसद्भावे प्रमाणाभावात् । दृष्टान्तधर्मिषु
वह्निधूमयो र्दर्शना त्सामान्यरूपेण व्या-
प्तिग्रहः सूपपद्यते इति नैतदर्थं निखिलवह्नि-
धूमाधिकरणावगमापेक्षा तथाच व्याप्तिग्राहक-
प्रमाणेन दृष्टान्तस्यैव साध्यसाधनवत्वेन ग्रहा
त्पर्वतस्याग्निमत्त्वं विना न तस्य मिथ्यात्वं नत्रा
पर्वतो धूमवानिति प्रत्यक्षस्येति विरोधाभावेन
नार्थापत्ते रवकाश इति भिन्नविषयत्वाद नुमा-
नमर्थापत्ति श्चे तिपृथगेव प्रमाणमेवं च य-
स्यानुमानेन निखिलधूमवतामग्निमत्त्वज्ञानमस्ति
तस्य पर्वते ऽग्निज्ञानं द्विधा भवति महानसादौ
गृहीतव्याप्तिस्मरणेनानुमानात् प्रमाणद्वयस्या-

मिथ्यात्वान्यथानुपपत्या र्थापत्याचेति प्रमाणान्तरमेवार्थापत्तिर्नानुमानमितिदिक् इतिकल्पकलिकायामर्थापत्तिप्रकरणम् ।

भा० अभावोऽपि प्रमाणाभावो नास्ति इत्यस्य अर्थस्या सन्निकृष्टस्य । तस्मात् प्रसिद्धत्वात् न परीक्षितव्यं निमित्तम् ।

अभावोऽपि प्रमाणाभावो नास्तीत्यर्थस्यासन्निकृष्टस्येति ननु न प्रमाणाभावः प्रमाणं सम्भवति विपरीतत्वात् नहि स्वभावः स्वं भवति भावाभावयोरविरोधप्रसङ्गात् । सत्यमत्र प्रमाणाभावो न प्रमाणसामान्याभावाभिप्रायकः । किन्तु पूर्वोक्तसदुपलम्भकप्रमाणपञ्चकाभावाभिप्रायकः तथाच सत्यपि स्वस्वसामग्रीसन्निधाने यत्र पूर्वोक्तं प्रमाणपञ्चकं न प्रवर्तते तत्राभावस्य प्रामाण्यम् । यथा घटे पूर्वोक्तप्रमाणपञ्चकाप्रसक्तौ अभावस्यैव प्रामाण्यम् नचाप्रमीयमाणे घटे कथमस्य प्रामाण्यं प्रमितिकारणस्यैव

तत्वात् प्रमेयाभावे प्रमितेरयोगादिति वाच्यम् । पूर्वोक्तसदुपलम्भकप्रमाणतो ऽप्रमीयमाणस्य घटादेरभावेनासद्रूपतया प्रमीयमाणत्वा त्प्रमेयसत्वेन प्रामाण्योपपत्तेः सद्रूपासद्रूपाभ्यां घटादेः प्रमेयत्वात् । असद्रूपो ऽभावः स चतुर्विधः प्रागभावध्वंसाभावान्योन्याभावात्यन्ताभावभेदात् । प्रागभावो यथा क्षीरे दध्यभावः प्रध्वंसाभावः दध्नि क्षीराभावः अन्योन्याभावो गवि अश्वाभावः शृङ्गस्य यदसद्रूपं शशमूर्द्धावयवसमवेतं सोत्यन्ताभावः । एतत्प्रामाण्यानङ्गीकारे क्षीरादौ दध्यादेरिव दध्यादौ क्षीरादिसद्भावः स्यादिति वस्तुसांकर्यं स्यादिति । तथाच यद्भूत्वा भवति तत्कार्यं दध्यादि यच्च तदुत्पत्तेः प्रागेवास्ति तत्कारणमित्यभावनिबन्धनः कार्यकारणभावोऽभावस्यावस्तुत्वेन स्यादेवं घटः पटो न शशे शृंगं नास्तीत्यादिव्यवहारोपि प्रामाणिको न स्यात् । अपिचाभावो भावान्तरमेव क्षीरात्मैव दध्यभावो नापरः नचासौ क्षीरवृत्ति

र्त्वीरम् । त्वीरवृत्तित्वेऽपि त्वोरात्मत्वमेव धर्मधर्मिणोरभेदात् किंच गन्धादिवद्भावस्याप्यनुवृत्तिव्यावृत्तिदर्शना त्तस्य वस्तुत्वमे वाभावोपि प्रागभावादिस्वरूपेण व्यावर्तते अभावस्वरूपेण चानुवर्त्तते इत्यभावस्य प्रमेयस्य सत्वा न्न प्रमेयाभावादस्याप्रमाणत्वं । नच प्रमाणान्तरेणाप्रमितत्वा न्नास्य प्रमेयं तर्हि प्रत्यक्षप्रमेयस्यापि प्रमाणान्तरेणाप्रमितत्वा त्तेषामप्यसत्वापत्तिः । नच तानि प्रत्यक्षादिभिरेव प्रमितानि तर्हि अभावोपि स्वप्रमाणेन प्रमित एवेति तुल्यम् । नचाभावस्यानुवृत्तिव्यावृत्तिप्रतीति र्मिथ्यैवौपचारिकत्वादिति वाच्यम् । कारणदोषादिज्ञानंविनास्वेच्छयैवौपचारिकत्वाभ्युपगमे प्रत्यक्षादिष्वप्येवं वक्तुं शक्यत्वात् । तस्माद्विषयेन्द्रियसन्निकर्षादात्मनोघटादिलक्षणो ज्ञानपरिणाम स्तदनुत्पत्तिरूपो ऽभाव इन्द्रियादिवत्प्रमाणं नास्तीति बुद्धिः फलम् नास्तीति बुद्धेः प्रमाणत्वपक्षे हानादिबुद्धिः फलं तदयं

भाष्यार्थः। योनास्तीत्यस्यार्थस्यबोधकः प्रत्यत्ताद्यभावः स एष अभावो नाम प्रमाणमिति। ननु घटादिभावातिरिक्तमभावाख्यं न किंचिद् वस्तु अत एव भावान्तरमभावोन्यो न कश्चिदिति भवतामुक्तिरपि संगच्छते भावरूपस्य प्रमेयस्य प्रत्यत्तादिभिरेव प्रमितत्वा त्तदतिरिक्तस्य प्रमेयस्याभावा त्कथमभावस्य प्रमाणान्तरत्वमिति चेदुच्यते योयमनुभवो घटे पटो नास्ति तस्य किमालम्बनं किं घटस्वरूपमात्रमुतान्यदपि किंचित् नाद्यः तथासति तत्र पटसत्वदशायामपि पटो नास्तीति प्रत्ययापत्तेः घटस्वरूपस्य तदानीमपि सत्वात् नच केवलघटस्वरूपं तदालम्बनं पटसत्वदशायां केवलघटस्वरूपाभावा न्न तादृशप्रत्ययापत्तिरिति वाच्यम्। घटे फलसद्भावदशायामपि तत्र पटासत्वे पटोनास्तीति प्रत्ययानुत्पत्तिप्रसङ्गात्। फलस्यापि तत्र सत्वेन केवलघटस्वरूपाभावात्। द्वितीये अभाव एव नान्योतिप्रसंगात्। नच यद्भव-

तामभावप्रत्यक्षकारणं तदेव न त्वेतादृशाभावव्यव-
हारकारणमिति वाच्यम्। घटादावपि यद्भ-
वतां प्रत्यक्षकारणं तदेव न त्वेतादृशव्यवहार-
कारणमित्युक्तिसंभवेन तेषामप्यपलापापत्तेः
योग्यप्रतियोगिदर्शनाभावस्याभावप्रत्यक्षकारण-
तया तदङ्गीकारे तत्राभावाङ्गीकारापत्तेश्च
तथा चप्रमाणाभाववत्प्रमेयाभावोपि स्वीकार्यः
विनिगमनाविरहात्। नचाभावप्रमाणवादिनापि
अभावविशिष्टाधिकरणग्रहणात् प्राक् यादृशाधि-
करणं गृह्यते तादृशाधिकरणग्रहणमेवाभावव्यव-
हारकारणमस्तु कृतमभावस्वीकारेणेतिवाच्यम्।
प्रतियोगितदभावज्ञानशून्याधिकरणग्रहणस्या-
स्माभि रेतदानीं स्वीकारा त्तत्रापि तथास्वीकारे
ऽभावाङ्गीकारापत्तेः तस्मा त्सर्वं वस्तु सदसदा-
त्मकं स्वीकार्यं यथा घटः स्वरूपेण निरूप्यमाणः
सन् यदा स एव पटादिस्वरूपेण निरूप्यते तदाऽ
सन् भवति एवं परो पि स्वात्मना निरूप्यमाणः
सन् घटात्मना निरूप्यमाणो ऽसन्निति घटोऽसद्

रूपेण पटे समवेतः पटश्च तद्वद्घटे समवेत इति स एवान्योन्याभावः एवमत्यन्ताभावः संयोगेन भूतले निरूप्यमाण स्तत्र सत् संयोगाभावात्मना भूतलादौ समवेतः स्वीयासद्रूपाकारं ज्ञानं जनयन्नत्यन्ताभाव उच्यते एवं प्रागभाववप्रध्वंसाभावौ बोध्यौ। तदेवं सदसदात्मके वस्तुनि केन चित्कदाचित्किंचिद्रूपं किंचिच्च कदाचिद् गृह्यते इति नप्रमाणान्तरस्यानवकाशइनि त- तथाचोक्तं स्वरूपपररूपाभ्यां नित्यं सदसदात्मके वस्तुनि ज्ञायते कैश्चिद् रूपं किंचि त्कदाचन इति। वस्तुनः सदसदात्मकत्वेऽपि यदा सदंशस्योद्भवो जिघृक्षा वा तदा सदात्मनानुभवो व्यपदेश श्च घटोऽस्तीत्यनुभवो घटज्ञानमितिव्यपदेशः। यदाचा सदात्मनोद्भवो जिघृक्षा वा तदा नास्ति घट इति प्रत्ययः घटाभावज्ञानमिति व्यपदेशश्च भवति। एकैकांशस्यानुभवे व्यवहारे च अपरापरांशः तिरोहितो भवति कदाचिद् भावग्रहणेपि अभावां-

शो विशेषणतया नुवृत्तः प्रतीयते। यथा चैत्र एवायं नान्यः अत्र चैत्रनिर्णयः वस्त्वन्तराभावानुवृत्त एव। नच निर्णयस्य वस्त्वन्तराभावानुविद्धत्वे प्रत्यक्षादीनामनपेक्षत्वलक्षणं प्रामाण्यं न स्यात्। अयमेवेतिपदार्थनिर्णयः प्रत्यक्षादिप्रमाणानां फलं सच प्रत्यक्षेण भवितुं नार्हति वस्त्वन्तराभावस्य विशेषणस्य अभावप्रमाणगम्यत्वेन प्रत्यक्षग्राह्यत्वाभावात्। अभावप्रमाणसापेक्षप्रत्यक्षस्य निर्णायकत्वाभ्युपगमेपि अनपेक्षत्वलक्षणं प्रमाणं व्याहतमेवेति। मैवम् अभावानुविद्धत्वस्य निर्णयलक्षणत्वाभावात्। अभावानुविद्धेपि संशयदर्शनात्। किं चैत्र एवास्ति किम्वा अन्योपीति अत्राभावानुबेधेपि चैत्रस्य सन्दिह्यमानत्वात्। कुतस्तर्हि भावान्तरानुविद्धत्वं निर्णयलक्षणमुक्तं। केनोक्तम्। मया तु कश्चिन्निर्णयः वस्त्वन्तराभावानुवृत्तो भवति यथा अयमेव नान्य इत्येतावन्मात्रमुक्तं नतु निर्णयमात्रस्य लक्षणाभिधित्सया तथोक्त-

मिति। निर्णय स्तु ज्ञानविशेषः सर्वजनप्रसिद्धो न घटादिवल्लक्षणमपेक्षते तथा च भावज्ञानं क्वचिदभावानुविद्धं क्वचि न्न अभावज्ञानं तु सर्वं भावानुविद्धमेव इदमिदं न भवति इदमिह नास्तीति प्रतियोगिज्ञानं विना भावज्ञानासंभवादिति भावः। नैयायिका स्तु अभावस्य प्रत्यक्षेणैव ग्रहणमिति निरूपयन्ति तन्मते षोढा इन्द्रियसन्निकर्षः। संयुक्तसंयुक्तसमवेतसंयुक्तसमवेतसमवायसमवायसमवेतसमवायविशेषणविशेष्यभावभेदात्। संयोगेन द्रव्यस्य संयुक्तसमवायेन गुणादेः संयुक्तसमवेतसमवायेन गुणत्वादेः समवायेन शब्दस्य समवेतसमवायेन शब्दत्वादेः विशेषणविशेष्यभावेन चाभावस्य प्रत्यक्षं जायते इति। तदयुक्तं सदसतोः सम्बन्धानर्हत्वात् नहि भावैरिवाभावैः सहेन्द्रियसंयोगो भवितुमर्हति असदात्मनो भावस्येन्द्रियसंयोगाधारत्वासंभवात्। नच त्वन्मते धर्मधर्मिणोरभेदादस्त्येवसंयोगः भेदस्यापि स्वी-

कारेण तदंशेन संयोगाभावात्। नचसंयुक्त-समवायेन ग्रहणमस्तु समवायानङ्गीकारात् अङ्गीकारेऽपि तस्यैन्द्रियकत्वानभ्युपगमात् त्व-न्मते ऽभावधर्मिणोः समवायाभावा च्च अत एव न संयुक्तविशेषणतयापि सबन्धाभावेन विशेषण-तायोगात् नन्विन्द्रियसन्निकर्षान्वयव्यतिरे-कोनुविधायित्वाद्रूपारूपादिबुद्धेरिवाभावबुद्धे-रपि प्रत्यक्षत्वमेवान्यथा अन्धस्यापि घटाभा-वग्रहणापत्तेः नहि विस्फारिताक्ष इव निमी-लिताक्षो घटाभावं प्रत्येतुमर्हति तत्कस्य हेतोरभावेन सहेन्द्रियसन्निकर्षाभावात् उन्मी-लिताक्षस्याभावेन सहेन्द्रियसन्निकर्षादभाव बुद्धिरुपपद्यते इत्यन्वयव्यतिरेकाभ्यामभावस्यै-न्द्रियकत्वमेव युक्तम्। अत एवाभावविशिष्टा-धिकरणबुद्धे र्विशिष्टबुद्धित्वमपरोक्षावभासत्वंचो-पपद्यते अन्यथाऽधिकरणस्य चक्षुषाभावस्य चानुपलब्ध्या ग्रहणे रूपरसादिबुद्धे रिव विशिष्ट-बुद्धित्वानुपपत्तिः अभावस्येन्द्रियेणाग्रहणादपरो

त्वानुपपत्तिश्च । मैवं । इन्द्रियान्वयव्यतिरे-
कयोरधिकरणग्रहणांशे एव स्वीकारेणाभावांशे त-
दनङ्गीकारा न्नान्धस्य भूतलादौ घटाभावोप-
लब्धिः तस्य चक्षुषा धिकरणग्रहणाभावात् प्रति-
योगितद्व्याप्येतरयावत्प्रतियोगिग्रहणसामग्री-
समवधाने सति दृश्यादर्शनमभावे प्रमाणं ना-
दर्शनमात्रं तथाचालोकादिसामग्रीसमवधाने
भूतलादौ सति घटे य श्चक्षुषातमवधारयितुं-
क्षम स्तस्यैव भूतलादौ घटाद्यभावग्रहणं नान्य-
स्येत्यधिकरणग्रहणायैवेन्द्रियोपयोगोनाभावग्रह-
णाय चक्षुषा गृहीते भूतले स्मृते च प्रतियोगिनि
घटे ऽनुपलब्धिसध्रीचीनमनसा भावज्ञानोत्पत्तेर्नै-
न्द्रियस्याभावग्रहणसामर्थ्यं कल्पनीयं प्रमाणा-
भावात् अन्यथा सिद्धत्वाच्चेन्द्रियस्य अभावांशे
ऽपरोक्षत्वं त्वनङ्गीकारपराहतं भावांशे एवापरो-
क्षत्वाभ्युपगमात् । मनसा तत्तायाः चक्षुषेदन्ता-
या भाना त्प्रत्यभिज्ञाया यथा विशिष्टबोधकत्वं
तथानुपलंभसहकृतमनसा भावस्येन्द्रियेण

भूतलस्य ग्रहणेन प्रमाणद्वयसंपाता द्विशिष्ट-बोधकत्वमुपपद्यते दृश्यादर्शनमिन्द्रियंचसहितम-भावविशिष्टं भूतलादि प्रमापयति तत्राधिकरणां शे चक्षुरादि व्याप्रियते अभावांशतत्संबन्धयो-श्चानुपलब्धिः यथा जिह्वागतेक्षुक्षीरादिद्रव्यं त्वगिन्द्रियेण गृह्यते माधुर्यतद्द्रव्यसंबन्ध श्च रस-नेनेतीन्द्रियद्वयेनमाधुर्य विशिष्टेक्षुक्षीरादिबुद्धि-रिति संक्षेपः। नन्विन्द्रियेऽभावबुद्धिजननसाम-र्थ्यकल्पनापेक्षया दृश्यादर्शने तादृशसामर्थ्यक-ल्पनायां लाघवाभावः। तत्रापि तादृशसामर्थ्यस्य क्लृप्तत्वेन कल्पनाभावात्। तथाहि कश्चित्प्रातः चत्वरं दृष्ट्वा तत्र गजमपश्यन् गजस्मरणाभावा त्तदभावमप्यगृहीत्वा केवलं देशमवद्धानो गृह-मागतः मध्याह्नसमये तत्र गज आसीदिति केन-चित्पृष्टः ज्ञात्वा चांदेशं स्मरन्नपि तत्र पूर्वमगृ-हीतं गजाभावं तदैव गृह्णाति नचेदमभावग्रहण मिन्द्रियेण सम्भवति प्रातःकालिकाभावे ऽसन्नि-कृष्टे इन्द्रियसन्निकर्षाभावात्। इन्द्रियस्य स-

न्निकृष्टग्राहित्वात् । नचानुपलब्धिजन्याभाव-
प्रत्यक्षेऽप्यधिकरणेन्द्रियसन्निकर्षस्य हेतुत्वे
न व्यवस्थापनादसन्निकृष्टप्रातःकालिकचत्वरेण
सममिन्द्रियसन्निकर्षासंभवादनुपलब्धेरयोग्यत्वा
त्कथमनया प्यभावग्रहणमितिचेत्सत्यम् । प्रत्य-
क्षयोग्यताविरहेऽपिस्मृतियोग्यता तत्राक्षतैव ।
यदि प्रातःकाले चत्वरे गजः स्या त्तदा तदानीं
चत्वरवद्गृह्येत तथामध्याह्नसमये स्मरणेच्छायां
सत्यां चत्वरवत्स्मर्य्येतापि । तदिदं प्रातःकालि-
कचत्वराधिकरणकगजास्मरणं मध्याह्नसमये प्रा
तःकालिकचत्वराधिकरणकगजाभावं बोधयती-
त्यनुपलब्धेरभावग्रहणसामर्थ्यं स्पष्टमेवेति नाक्लृ-
सकल्पना ।नच प्रमाणाभावः प्रमाणमितिभाष्यो-
क्तिः स्मरणाभावस्याप्यभावप्रमापकत्वकल्पनायां
व्याकुप्येतेति वाच्यम् । गजस्मरणाभावस्यापि
प्रातःकालिकचत्वराधिकरणकगजाभावस्मारकत
या फलतः प्रमाणाभावत्वात् । स्मरणस्य प्रमा-
णफलत्वात् । प्रमाणेनाधिगतं वस्तु यथा का-

लान्तरे स्मर्यते तथा स्मरणाभावेन प्रातःकाले चत्वरे गजाभावो मध्याह्नसमये स्मर्य्यत इति प्रमाणसादृश्या ऽप्रमाणत्वमिति भावः। ननु-प्रमाणान्तरकल्पनापेक्षया ऽनुमेयत्वमेवास्ताम-भावस्येतिचेन्न लिङ्गाभावात्। न तावत्प्रति-योगिनोघटादेर्भावस्यलिङ्गत्वं तद्ग्रहणे एवाभा-वबुद्ध्युत्पत्ते रगृहीतस्यलिङ्गत्वायोगात्। तद्ग्र-हणे च तदभावबुद्धेरभावात्। नच विरुद्धयो र्भावाभावयोरेकत्रैकदावस्थानं विरोधस्यैव भ-ङ्गापत्तेः नवाधिकरणस्य भूतलादे लिंगत्वमभा-वाग्रहणे तद्धर्मतया भूतलस्य ग्रहणासंभवा-देव तस्य तद्धर्मित्वानुपपत्तेः। तद्धर्मतया ग्रहणे पुनरनुमेयाभावादेवानुमानाप्रवृत्तेः लिंगग्रहणे-नैवाभावविशिष्टाधिकरणावगतेरुत्पादात्। घट-तदभावोभयानुगतस्य भूतलस्यानैकान्तिकत्वाच्च कस्यचिद् भावस्य केनचि दभावेन सह दर्शनाद-भावसामान्येन संबन्धावधारणे तु सर्वाभावानु-मानं स्यात्। कतिपयाभावेन सह दृष्टसंबन्धस्या-

पि भूतलस्य न सर्वाभावानुमापकत्वं भावान्तरै-
रपि सहदर्शनेनानैकान्तिकत्वात्। किंचाभाव-
ग्रहणं विना तत्संबन्धो भूतलादौ नावगन्तुं
शक्यते संबन्धग्रहं प्रति संबन्धिग्रहस्य हेतुत्वा-
त्। नचासौ प्रत्यक्षः पूर्वोक्तयुक्तेः नाप्यनुमाने-
नास्य ग्रहणं संभवति अन्योन्याश्रयात् अनुमा-
नेनाभावग्रहणे संबन्धग्रहणं संबन्धग्रहणे चानु-
मानमिति तस्मादभावग्रहणं प्रमाणान्तरेणैव-
वाच्यं तच्चानुपलब्धिरेवेति। ननु अनुपलब्धि
र्ज्ञाताभावधीहेतु रज्ञातावा सत्तामात्रेणेन्द्रिय-
वत्। आद्ये भूतलेघटाभावो ऽनुपलब्ध्याग्रा-
ह्यः अनुपलब्धिरपि उपलब्ध्यभाव एव इत्यभावा-
त्मकतया ऽनुपलब्ध्यन्तरेण ग्राह्या तदपि स
इति पुनरन्यापेक्षायामनवस्थाप्रौऽयम्। अन्त्ये
व्यभिचारःसत्यामनुपलब्धावनिश्चितायां नाभा-
वधीः यथा पुस्तकमध्यनिहितपत्रबुभुत्सया पु-
स्तकमित स्ततः परावर्त्यावलोकितमपि नोपल-
ब्धम्। तथापि कियत्पृष्ठमनवलोकितं भवेदि-

ति संशयानः तदभावं न निश्चिनोति। क्वचि-
च्चासत्यामपि योग्यानुपलब्धौ तन्निश्चयादभा-
वमधिगच्छति यथातत्रैव सम्यगनवलोकितमिति
प्रतिपत्रं सम्यगवलोकितं पुस्तकं नच पत्रं प्रा-
प्तमिति योग्यानुपलब्धिभ्रमेण तदभावमवधार-
यति तस्मादनुपलब्धिलिङ्गकानुमानेनैवाभावग्रह-
णमित्येव युक्तम्। नचानिश्चिताया अनुपल-
ब्धे र्लिङ्गत्वायोगात्तन्निश्चयावश्यकत्वेन पुनः
सैवानवस्थेति चेद्‌ भ्रान्तो सि नानुपलब्धिरुप-
लब्ध्यभावरूपा किन्तु एकज्ञानसंसर्गिणोरन्य-
तरस्योपलब्धिरेवकतरस्यानुपलब्धि र्नतूपलब्ध्य-
भावः यथाघटभूतलयो र्घटवद्भूतलमितिज्ञान-
संसर्गिणो र्यदा भूतलमात्रस्यैवोपलब्धि र्भवति
तदा सा भूतलमात्रोपलब्धिरेव घटानुपलब्धिः।
साच स्वयंप्रकाशा इति न तत्प्रकाशनायोपलब्ध्य-
न्तरापेक्षा येनानवस्थाशङ्काकलङ्कादिः सम्भा-
व्येतापि भूतलमात्रस्वरूपोपलब्धि श्च चक्षुरा-
दिनेतीयमेव घटप्रत्यक्षानुत्पत्ति र्घटाभावस्य

लिङ्गम् प्रयोगश्चैवं बोध्यः दृश्यं सत् यद् यत्र नोपलभ्यते तत्तत्र नास्ति यथा बुद्धिसत्त्वे पुरुषः । अथवा दृश्यस्य सत्ता दर्शनव्याप्ता व्यापकस्य दर्शनस्य निवृत्तौ तद्व्याप्यदृश्यसत्तापि निवर्तते यथा धूमव्यापकस्याग्नेर्जलह्रदादौ निवृत्तौ धूमस्यापि निवृत्तिरेवं दर्शननिवृत्तौ दृश्यनिवृत्ति र्बोध्येति सौगताः । अत्रोच्यते अनुपलब्धिलिङ्गकानुमानेनाभावग्रहणमिच्छतां भवतां किमनुपलम्भसामान्येन घटाभावानुमानमिष्टं किम्वा अनुपलम्भविशेषेण नाद्यो ऽसंभवात् नहि सामान्यव्याप्त्या घटाभावविशेषो ऽनुमातुं शक्यः विशेषेणासंबन्धाग्रहणात् न चाभावसामान्ये घटाभावबुद्धिरस्ति अभावविशेषे तु सा बुद्धिः नचेयमनुपलम्भसामान्येनानुमेया व्यभिचारात् सत्यपि घटे वस्त्वन्तरानुपलम्भस्यसत्वात् द्वितीये कोयमनुपलम्भविशेषः घटानुपलम्भ इतिचेत् सत्यमेवं जानामि किन्तु घटानुपलम्भः भूतलस्व-

रूपोपलब्धिरन्यतरस्वरूपोपलब्धि घटोपलम्भाभावो वा विवक्ष्यत इति पृच्छामि तत्र नाद्यः तस्याः साधारणत्वात् घटवत्यपि भूतले भूतलस्वरूपोपलब्धि र्भवति न च घटाभावबुद्धिस्तत्रेति न द्वितीयः घटवद्भूतलबुद्धे रपि भूतलस्वरूपावगाहितया तस्यां सत्यामपि घटाभावबुद्धिप्रसंगात्। नचान्यतरमात्रबुद्धि र्विवक्षितेति नोभयबुद्धावतिप्रसंगः मात्रपदार्थनिर्वचनासंभवस्य पूर्वमेव प्रदर्शितत्वात्। अन्त्ये तस्या अप्युपलब्ध्यन्तरगम्यतया त्वदुक्तै वानवस्था त्वयि आपतेत्। एवं यत्र यन्नोपलभ्यत इति पूर्वोक्तो हेतु र्निरसनीयः। दर्शननिवृत्त्या दृश्यस्य घटादे र्निवृत्ति रनुमीयते दर्शननिवृत्तिरप्यभावस्वरूपेति सापि दर्शननिवृत्त्यन्तरेणैवानुमेयेत्यनवस्थापिशाची तदवस्थैव तस्मादभावग्राहकः प्रमाणाभावः प्रमाणान्तरमेव इत्येव युक्तः पन्थाः। ननु प्रमाणानुत्पत्तिरूपस्य प्रमाणाभावस्य तुच्छतया कथमस्य प्रमाण-

त्वं युज्यते किन्न युज्यते यादृशी शीतला देवी तादृशः खरवाहन इतिन्यायेन यादृशं प्रमेयमभावाख्यं तादृशमेवाभावाख्यं प्रमाणमपि । प्रत्युतास्य भावरूपत्वे प्रमाणप्रमेययो र्विरूपत्वापत्त्या ऽनौचित्यं स्यात् । नच सर्वत्र भावभूतस्यैव प्रमाणत्वं दृष्टमिति कुतोऽत्र तद्विपरीतस्य प्रमाणत्वं तर्हि सर्वत्र भावस्यैव लिङ्गत्वमपिदृष्टमिति लिङ्गत्वमस्य कथमित्यत्रापि दृष्टि र्दीयताम् । एवं प्रमाणत्ववत्प्रमेयत्वमपि न स्या त्तथाच इदमिह नास्ति इदमिदं न भवतीत्यादिव्यवहारोच्छेदः स्यादिति बलादभावस्य वस्तुत्वं स्वीकार्य्यं न तुच्छत्वमिति प्रमाणत्वमपि सम्यगेवेति संक्षेपः । अभावप्रमाणस्येह स्वतन्त्रोपयोगस्तु दर्शपूर्णमासाभ्यां यजेत स्वर्गकाम इत्यादौ श्रुत्युक्ताङ्गफलातिरिक्ताङ्गफलाभावे आगमाभाव एव प्रमाणं नान्यत् प्रयोग श्च प्रमाणाभावः प्रत्यक्षादिप्रमाणभिन्नः । अभावशब्दवाच्यत्वा त्प्रमेया-

भाववत् । तथा प्रमेयाभावः स्वानुरूपेण प्रमाणेन प्रमेयः प्रमेयत्वाद्भावाख्यप्रमेयवदिति ।
ननु केचित्पौराणिकाः सम्भवैतिह्याख्यं प्रमाणद्वयमधिकं स्वीकुर्वन्ति भाष्यकारेण तत्किमर्थं न लक्षितमिति चेदयं भावः सम्भवो हि व्याप्यसंख्यापरिमाणाभ्यां व्यापकसंख्यापरिमाणावगमः यथा संभवति सहस्रे शतं प्रस्थे च कुडवमिति सहस्रेण तदन्तर्गतसंख्यायाः प्रस्थेन परिमाणेन तदन्तर्गतकुडवपरिमाणस्य च ज्ञानं व्याप्तिमूलकत्वादनुमानमेव । अनिर्दिष्टप्रवक्तृकवचनपरंपरा ऐतिह्यम् तद्यदि प्रमाणं तर्हि आगमेष्वेवान्तर्भूतं नोचेदप्रमाणमेव यथेह वटे यक्ष इति नैयायिकाभिमतं प्रातिभाख्यं प्रमाणं पूर्वमेव निरस्तम् । लोकप्रसिद्धिरपि प्रत्यक्षादौ अन्तर्गतैवेति षडेव प्रमाणानि न न्यूनानि नाधिकानि तथा च भगवद्रामायणे रामषड्युक्तयो लोके याभिः सर्वोऽनुदृश्यत इति ॥

इतिकल्पकलिकायामभावप्रामाण्यपरिच्छेदः ।

लोकप्रसिद्धस्वतःप्रमाणभावप्रत्यक्षाद्यन्तर्गतशब्दस्यापि स्वतः प्रामाण्याङ्गीकारेण प्रतिज्ञाते धर्मं प्रति चोदनाप्रामाण्ये साधितेऽपि ऐहिकपश्वादिफलकानां चित्रादिचोदनानामनुष्ठानोत्तरफलोत्पादे प्रत्यक्षादिभिरसंवादविसंवादाभ्यां पुनरप्रामाण्यं शङ्कते ननुप्रत्यक्षादीन्यन्यानीति भाष्यम्। ननु अतथाभूतमप्यर्थं ब्रूयाच्चोदना यथा किंचन लौकिकं वाक्यं नद्यास्तीरे पञ्चफलानि सन्तीति तत्तथ्यमपि भवति वितथमपि भवतीति पूर्वभाष्येणैव चोदनाप्रामाण्यस्याक्षिप्तत्वा त्पुन स्तदाक्षेपे पौनरुक्त्यमिति वाच्यम्। आक्षेपहेतुविषयभेदात्। पूर्वत्र प्रत्यक्षादि प्रमाणान्तराधिगतार्थे एव शब्दप्रामाण्यं न स्वातन्त्र्येण अतीन्द्रियेषु स्वर्गाद्यर्थेषु प्रत्यक्षादीनां प्रवृत्यसम्भवा न्न चोदनाप्रामाण्यमित्याक्षेपः। अत्र तु ऐहिकपश्वादिफलासु चित्रादिचोदनासु यदि अनुष्ठानानन्तरं पश्वादयः फलानि उपलभ्येरन् तर्हि प्रत्यक्षादिसंवा-

दात्प्रामाण्यं नो चेत्प्रमाणान्तरविसंवादादेवा-
प्रामाण्यमुपपादितुं शक्यते कृतं शब्दपार-
तन्त्र्यविचाराडम्बरेण तस्मा त्पूर्वाक्षेपः पार-
लौकिकफलविषयः अयन्तु ऐहलौकिकफल-
विषयःप्रत्यक्षादिविसंवादनिमित्तकः प्रमाणान्त-
रयोग्यार्थप्रतिपादकं वचनं तदसंवादविसंवादा-
भ्यामप्रमाणं भवति प्रमाणान्तरायोग्यार्थप्रति-
पादकन्तु स्वार्थे अविश्वासमात्रमुत्पादयति
नार्थं व्यतिरेकं स्वप्नदृष्टद्वीपान्तरार्थवचनवदिति
भेदः। अथवा सूत्राणि व्याचक्षाणो भाष्य-
कारः सूत्रोक्तमाक्षेपं पूर्वं मदर्शयत् इदानीं वृत्ति-
कारमतेन तमेवाक्षेपं दर्शयति तदाक्षेपाभेदे-
ऽपि व्याख्यातृभेदा न्न पौनरुक्त्यम्। अनिमित्तं
विद्यमानोपलम्भनत्वादितिवदता सूत्रकृता पि
प्रमाणान्तरासंवादविसंवादाभ्यां प्रामाण्यमाक्षि-
प्यते नतु शब्दस्य प्रत्यक्षादिपारतन्त्र्येणेति
पूर्वं भाष्यकृत आक्षेपः सूत्रकारेण तु
अत्रैव प्रथममाक्षिप्यते इति न पौनरुक्त्यमि-

ति प्रमाणान्तरसंवादात्प्रत्यक्षादीनामस्तु प्रामा-
ण्यमित्याह प्रत्यक्षादीनीति प्रत्यक्षादिप्रमा-
णासंवादविसंवादाभ्यांशब्दस्य न प्रामाण्य-
मित्याशयेनाह—

भा०ननु प्रत्यक्षादीनि अन्यानि भवन्तु नाम-
प्रमाणानि शब्दस्तु न प्रमाणम्। कुतः अनि-
मित्तं विद्यमानोपलम्भनत्वात् आनिमित्तमप्रमा-
णं शब्दः योहि उपलम्भनविषयः नोपलभ्यते
स नास्ति यथा शशस्य विषाणम्। उपलम्भ-
कानि चेन्द्रियाणि पश्वादीनाम् नच पशुकामे-
ष्ट्यनन्तरं पशवः उपलभ्यन्ते। अतो नेष्टिः
पशुफला। कर्मकालेच फलेन भवितव्यम् य-
त्कालेहि मर्दनं तत्काले मर्दनसुखम्। कालान्त-
रे फलं दास्यतीतिचेन्न न कालान्तरे फलमि-
ष्टेरित्यवगच्छामः कुतः यदा तावदसौ विद्य-
माना आसीत् तदा फलं न दत्तवती यदा
फलमुत्पद्यते तदासौ नास्तीति असती कथं
दास्यति।

शब्दस्त्विति अनिमित्तशब्दार्थमाह अप्रमाणमिति विसंवादं दर्शयितुमाह यो हीति प्रमाणाभावः प्रमेयाभावसाधक इत्याह यथा शशस्य विषाणमिति नचोपलम्भकाभावादनुपलम्भ इत्याह उपलम्भकानिचेन्द्रियाणीति तथाचोपलंभकसामग्रीसमवधाने योग्यं यन्नोपलभ्यते तन्नास्त्येव यथा शशस्य विषाणमिति निगमयति अतोनेष्टिरिति तथाचायंप्रयोगः चित्रादिवाक्यमप्रमाणं प्रत्यक्षादिप्रमेयार्थकत्वे सति तद्विसंवादात् विप्रलम्भकवाक्यवत् तथा चित्रा न पशुफला स्वकाले तदजनकत्वात् भुजिक्रियावदिति ननु कालान्तरे पशुफलसम्भवान्नाप्रामाण्यमित्याशङ्क्य निषेधति कर्मकाल इति अत्रैव दृष्टान्तमाह यत्काले हि मर्दनं तत्काले मर्दनसुखमिति अयं भावः यद् यस्य साधनं तत्स्वकाले एव जनयति यथा मर्दनं तत्सुखं तथा यद् यस्य साध्यं तत्तदुत्पत्तावेव भवति यथा मर्दनसुखं तद्धि मर्दनसमये एव भवति एवं च यदि चित्रा

पशुसाधनं स्या त्तर्हि चित्रोत्पत्तिसमये एव पशु-
फलं स्या न्नान्यदा एवं यदि पशूफलं चित्रा-
साध्यं स्या त्तदा चित्रोत्पत्तिसमये एव स्या न्न
कालान्तरे नचैतद्दृश्यते तस्मान्न पशुफलेति
पूर्वोक्तानुमाने भाष्योक्त मर्दनं तत्सुखं चेति
वैधर्म्योदाहरणं बोध्यमिति। ननु साध्यसाधनतत्सं-
न्धस्यैवविधिबोधितत्वेनानन्तर्यस्य विध्यर्थत्वा-
भावादनन्तरं प्रत्यक्षादियोग्यस्य पश्वादिफल-
स्यानुपलम्भेऽपि न तदप्रामाण्यम् कालान्तरे फ-
लोत्पत्यापि तत्साध्यसाधनबोधकविधेः प्रामाण्य-
मक्षतमेवेत्याशङ्क्य निराकुरुते नकालान्तर इति
अयं भावः विधिवाक्ये यद्यपि आनन्तर्यस्योपा-
दानं नास्ति तथापि कालान्तरस्यापि उपादानं
नास्ति अथचित्रादिकर्मणा पशुफलोत्पादं बोध-
यतीति कर्मस्वभावादानन्तर्यं लभ्यते विनष्टस्य
हेतुत्वासम्भवात् तथाचानन्तरफलोपलम्भाभावेन
प्रत्यक्षादिबाधः स्फुट इति। नच स्वर्गादिफलबो-
धकवाक्यस्येव चित्रादिवाक्यस्यापि अपूर्वद्वारा-

कर्मफलयोरानन्तर्यमादायोपपत्तिः तेन स्वार्थ-बोधवेलायामेव देहान्तरोपभोगयोग्यस्य काला-न्तरभाविनः स्वर्गादिफलस्य तदानीमुत्पत्त्यसंभ-वेनापूर्वमन्तर्भाव्यैव तयोः साध्यसाधनभावो बो-ध्यते चित्रादिवाक्येन तु पश्वादिफलस्यानन्तर-कालेऽपि संभवेनापूर्वमनन्तर्भाव्यैव तयोः साध्य-साधनभावो बोध्यते इतिसामर्थ्यादानन्तर्यलाभ इत्याशयात् । सामर्थ्यस्यशब्दैकदेशत्वा त्तद्बा-धः शब्दबाध एव तथा चोक्त मर्थाद्वाकल्पनैक-देशत्वादिति जै०सू०अ०१पा० ४ सू०३०। कर्म-स्वभावलब्धमानन्तर्यं तत्र शब्दविशेषणं न भवति यत्रानन्तर्य्यविपरीतं कालान्तरमुपादीयते तत्रापूर्वद्वारासाध्यसाधनयोरानन्तर्यं गम्यते यत्र तु न तथा यथा चित्रादिवाक्ये तत्रानन्तर्यं श-ब्दविशेषणमेवेति चित्रानन्तरमेव पशुफलं बोध्यते तत्रानन्तरफलानुपलब्ध्या प्रत्यक्षादिविरोधः स्पष्ट एवेति । एवं यत्रापि कालान्तरेपश्वादिकं दृश्यते तत्रापि दृष्टस्य प्रतिग्रहादेरेव कारणत्वं

युक्तं स्वीकर्तुम्। अदृष्ट कारणत्वकल्पनापेक्षया दृष्टकारणत्वस्यैवौचित्यादित्याह—

भा० प्रत्यक्षं च फलकारणमन्यत् उपलभामहे नच दृष्टे कारणे सति अदृष्टं कल्पयितुं शक्यते प्रमाणाभावात्। एवं दृष्टापचारस्य वेदस्य स्वर्गाद्यपि फलं न भवतीति मन्यामहे। दृष्टविरुद्धमपि भवति किञ्चिद्वचनम् पात्रचयनं निधाय आह स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति इति प्रत्यक्षं शरीरकं व्यपदिशति नच तत् स्वर्गं लोकं यातीति प्रत्यक्षं हि तत् दह्यते। नचैष याति इति विधिशब्दः एवञ्जातीयकं प्रमाणविरुद्धं वचनमप्रमाणम्। अम्बुनि मज्जति अलावुनि ग्रावाणः प्लवन्ते इति यथा तस्मादग्निहोत्रादिचोदनासु अपि अनाश्वासः तस्मा न्न चोदनालक्षणोर्थोधर्मः।

प्रत्यक्षं च फलकारणमन्यदुपलभामहे अन्यत्-चित्रादिभ्यः प्रतिग्रहादि नचैहिकफलानामप्रामाणिकत्वेऽप्यामुष्मिकफलानां प्रामाण्यमेवेत्याश-

क्त्य निराचष्टेऽप्येवं दृष्टापचारस्येति। दृष्टफल-
कस्य वेदस्याप्रामाण्ये तज्जातीयस्यादृष्टफलक-
स्याप्यप्रामाण्यमेव। तथाचैवं प्रयोगः स्वर्गादि-
फलबोधकोवेदो ऽप्रमाणं वेदत्वाद् दृष्टफलबोध-
कवेदवदितिप्रत्यक्षाद्यनुपलब्धिविरोधेनाप्रामाण्यं
प्रदर्श्य प्रत्यक्षादिविरोधादप्रामाण्यं प्रदर्शयितु-
माह दृष्टविरुद्धमिति। मृतस्याग्निहोत्रिणः सह-
पात्रै र्दाहो भवति चितायां पात्राणि निधाय दा-
हसमये एषोक्तिः। एष यज्ञायुधी यजमानो ऽञ्ज
सा स्वर्गं लोकं यातीति। नचात्मनः स्वर्गगमने
कथं प्रत्यक्षादिविरोधः प्रत्यक्षविषयत्वादात्मन
इत्यत आह शरीरकं व्यपदिशतीति तस्यैव यज्ञा-
युधसंबन्धो नात्मनः एवं यजमानत्वमपिशरीर-
स्यैव वर्णविभागयोग्यत्वा त्कर्तृत्वाच्च न त्वा-
त्मनः विभुत्वेन कर्तृत्वायोगात् वर्णविभागाभा-
वाच्च तदानींतत्सद्भावे प्रमाणाभावाच्च तस्मात्
शरीरस्यैव स्वर्गगमनमभिधीयते तत्र प्रत्यक्षवि-
रोधोऽस्त्येव चित्राद्युदाहरणापेक्षया ऽत्रवैलक्षण्यं

प्रदर्शयितुमाह। नचैषयाति इति विधिशब्द इति।
अयं भावः विधौ सति भविष्यत्तापि फलस्य स्यात्
तथा च प्रत्यक्षादिभि र्नसाक्षात्प्रतिरोधो भवेत्
किन्तु चित्रादिवास्यव कर्मस्वभावाधीनमान-
न्तर्यं प्रत्यक्षाद्यसंवादेन बाध्येत इति प्रमाणा-
न्तरसंवादाभावमूलक एवात्रापि प्रामाण्याक्षेपो
नतु प्रत्यक्षादिविसम्वादमूलक स्तथाच तस्यपू-
र्वमेवोदाहृतत्वा त्पुन स्तदुदाहरणं निष्फलं
स्यात् विध्यभावे तु तस्मिन् काले स्वर्गगमनं
बोध्यते। एष यातीति वर्त्तमानापदेशा त्तथाच
शरीरस्य चितायामेव भस्मीभावा त्तस्य स्वर्ग-
गमनं प्रत्यक्षविरुद्धमिति प्रत्यक्षविसंवादेनाय-
मप्रामाण्याक्षेप इतिपूर्वोत्तरयो राक्षेपयो र्वैल-
क्षण्यं साधूपपद्यते। ननुविधिस्वीकारेपि विरोधोऽ-
स्त्येव कालान्तरे फलमपि सत एव भविष्यति
नासतः शरीरदाह स्तु प्रत्यक्षेणैवाधिगत इति
भस्मीभूतस्य शरीरस्य कथं कालान्तरेऽपि स्वर्ग-
फलभोक्तृत्व मिति चेत्सत्यम्। यदि विधिः

स्यात्तर्हि तत्प्रामाण्यान्यथानुपपत्त्या शरीराति-
रिक्तात्मकल्पनया प्रत्यक्षादिविरोधपरिहारः
स्यादपि । अनुवादकत्वे तु तस्य स्वार्थप्रामाण्या-
भावा न्न स्वार्थोपपादनायार्थान्तरकल्पकत्वमिति
शरीरस्वर्गगमनबोधकत्वमेव तत्र च प्रत्यक्षविरोधः
प्रदर्शित एवेति । एवमदिति द्यौ रदितिरन्त-
रिक्षम् वनस्पतयः सत्रमासतेत्येवं जातीयका म-
न्त्रार्थवादाः प्रत्यक्षादिप्रमाणविरुद्धार्था एव ।
अतःसर्वेषु अप्रामाण्यं साधनीयम् प्रयोगश्च
यज्ञायुधीयवाक्यमप्रमाणं प्रत्यक्षविरुद्धार्थप्रति-
पादकत्वात् ग्रावाण स्तरन्तीत्यादि वाक्यवत् ।
अग्निहोत्रादिवाक्यं मृषा वेदवाक्यैकदेशत्वात्
चित्रादिवाक्यवदिति तदाह तत्सामान्याद-
ग्निहोत्रचोदनासु अपि अनाश्वास इति धर्मे
चोदनाया अप्रामाण्यमुपसंहरति तस्मादिति ।

इतिकल्पकलिकायां चित्राक्षेपवादः ।

—❀—

भा० औत्पत्तिक स्तु शब्दस्यार्थेन सम्बन्ध स्तस्य ज्ञानं तु शब्दः पक्षं व्यावर्तयति। अपौरुषेयः शब्दस्यार्थेन सम्बन्धः । तस्य अग्निहोत्रादिलक्षणस्यार्थस्य ज्ञानं प्रत्यक्षादिभि रनवगम्यमानस्य तथाच चोदनालक्षणः सम्यक् प्रत्यय इति पौरुषेये हि शब्दे यः प्रत्ययः तस्य मिथ्याभाव आशङ्क्येत। परप्रत्ययो हि तदा स्यात् । अथ शब्दे ब्रुवति कथं मिथ्येति नहि तदानीमन्यतः पुरुषादवगति मिच्छामः । ब्रवीत्युच्यते बोधयति । बुद्ध्यमानस्य निमित्तं भवति इति शब्दे च निमित्ते स्वयं बुद्ध्यते । कथं विप्रलब्धं ब्रूया न्नैतदेवमिति नचास्य चोदना स्याद्वा न वा इति सांशयिकं प्रत्यय मुत्पादयति नच मिथ्यैतत् इति कालान्तरे देशान्तरे अवस्थान्तरे पुरुषान्तरे वा पुन रव्यपदेश्यप्रत्ययो भवति योप्यस्य प्रत्ययविपर्य्यासं दृष्ट्वा अत्रापि विपर्य्यंसिष्यति इत्यानुमानिकः प्रत्ययः उत्पद्यते सोप्यनेन प्रत्यक्षेण प्रत्ययेन विरुद्ध्यमानो बाध्यते । तस्माच्चोदनालक्षण एव धर्मः । स्यादे-

तदेवम् नैव शब्दस्यार्थेन सम्बन्धः कुतोऽस्य पौरुषेयता अपौरुषेयतावेति कथं स्याच्चेदर्थेन सम्बन्धः क्षुरमोदकशब्दोच्चारणे मुखस्य पाटनपूरणे स्याताम्। यदि संश्लेषलक्षणं सम्बन्धमभिप्रेत्योच्यते। कार्यकारणनिमित्तनैमित्तिकाश्रयाश्रयिभावसंयोगादय स्तु सम्बन्धाः शब्दस्यानुपपन्ना एवेति।

सिद्धान्तवादी वेदप्रामाण्यं साधयति औत्पत्तिकस्त्वित्यादिना ननुपूर्वोक्तानाक्षेपाननुद्धृत्य स्वपक्षसाधनाय कीदृशोऽवसर इति चेत्सत्यम्। अयमभिप्रायः वेदप्रामाण्ये साधिते सति तत एव सर्वाक्षेपपरिहारः सुकर इति वेदप्रामाण्यमेव पूर्वं साधनीयम्। तथा चैवं प्रयोगः वेदवाक्यं प्रमाणं स्वार्थे वक्तृनपेक्षत्वात् पदार्थपदबुद्धिवत्। वेदवाक्यजन्यः प्रत्ययः समीचीनः नित्यवाक्योत्पन्नत्वाद् वाक्यबुद्धिवत्। निर्दोषकरणाजन्यत्वाद्वा तद्वदिति। अत्रत्यं भाष्यं द्वितीयसूत्रोक्तार्थप्रायं नापूर्वं किंचिदुच्यते इति तद्-

व्याख्यानेनैवेदमपि व्याख्यातप्रायमितिपुनर्व्याख्यानमुपेक्षितं । सिद्धान्तवादिना संबन्धनित्यत्वमंगीकृत्य चोदनाया स्वतः प्रामाण्ये स्थापिते संबन्ध एव नास्ति शब्दार्थयोः कुत स्तन्नित्यत्वमित्यभिप्रायेण पूर्वपक्षी प्रत्यवतिष्ठते स्यादेतदेवमिति । नैव शब्दस्यार्थेनेति । तथा च शब्देनार्थप्रत्ययो ऽनियतनिमित्तक इतिवेदार्थस्य ज्ञानमप्रमाणमित्याशयः सति संबन्धे ऽनिष्टमाह क्षुरमोदकेति नन्विदमयुक्तं संबन्धिनोरेकस्याधिकरणे ऽवश्यमपरेण स्थातव्यमितिनियमाभावात् । पितापुत्रादिषु समानदेशताया अदर्शनादिति न मुखादिषु क्षुरादिशब्दसद्भावेऽपि पाटनादिरितिचेन्न सम्बन्धान्तराणामग्रे निराकरिष्यमाणतया शब्दार्थयोः संश्लेषस्यैव सिद्धौ तन्निराकरणाय वैतद्भाष्यप्रवृत्तेः । तथाचसंश्लेषे सति भाष्योक्तं दूषणं स्यादिति न सोपि संबन्ध इति तथाचैवं प्रयोगः शब्दो ऽर्थेन न संयुज्यते अर्थदेशान-

न्तरमदर्शनाद्व विन्ध्यो हिमवता यथा यस्तु शब्दार्थयोः संश्लेषं मत्वा भिन्नदेशत्वं नाङ्गीकुरुते स भाष्योक्तक्षुरपाटनादिदोषप्रदर्शनद्वारा समाधेय इति संबन्धान्तरं निराकुरुते कार्यकारणेति न तावत् शब्दार्थयोः कार्यकारणभावः संबन्ध उभयो र्नित्यत्वात्। ननु वर्णपदवाक्यादिस्फोटविकल्पा च्छब्दो ऽव्यवस्थितो र्थोपि व्यक्त्याकृतिविकल्पाद्व्यवस्थित एवेति गवाद्याकारं ज्ञानं गवादिशब्दः तज्जनितं च गवाद्याकारं ज्ञानं गवाद्यर्थ इति ज्ञानस्वरूपयोः शब्दार्थयोः कार्यकारणभावसंबन्धः किन्नोपपद्यते न असंभवेन निरालम्बनज्ञानस्य पूर्वमेव निरासात् नित्यविभुत्वादपि शब्दस्य नसंयोगादयः युतसिद्धत्वा च्च न समवायः भिन्नदेशत्वा न्नाश्रयाश्रयिभावोपि इति सिद्धान्तमाह

भा० उच्यते योहि अत्र व्यपदेश्यः सम्बन्धः तमेकं न व्यपदिशति भवान् प्रत्याय्यस्य प्रत्यायकस्य च यः सङ्केतलक्षण इति।

आह यदि प्रत्यायकः शब्दः प्रथमश्रुतः किन्न प्रत्याययति । उच्यते सर्वत्र नो दर्शनं प्रमाणं प्रत्यायकः इति हि प्रत्ययं दृष्ट्वा अवगच्छामः न प्रथमश्रुतः इति प्रथमश्रवणे प्रत्यय मदृष्ट्वा यावत्कृत्वः श्रुतेन इयं संज्ञा अयं सञ्ज्ञीत्यवधारितं भवति तावत्कृत्वःश्रुतादर्थावगम इति।

उच्यते इति यदि शब्दार्थयोः सर्वथा ऽसंबन्धः स्या त्तदा त्वदीयासंबन्धसाधकानुमानप्रयोगो विफलः स्यात्। परप्रतिपत्तये शब्दः प्रयुज्यते यदि च त्वदीयानुमानप्रयोगा त्परो र्थं प्रतिपद्यते तदा प्रतिज्ञाविरोधः। असंबद्धार्थस्य प्रतीत्यसंभवेन संबन्धस्वीकारात् अथ न प्रतिपद्यते तदा प्रयोगवैयर्थ्यं लोकानुभवविरोध श्च शब्दतो व्युत्पन्नस्य सर्वस्य बोधदर्शनात् तस्माच्छब्दार्थयोः संबन्धः स्वीकार्यः ननु सुहृद्भावेन भवत एव पृच्छामि शब्दार्थयोः कः संबन्ध इति साधु पृच्छयते अवहितः शृणोतु भवान्। प्रत्यायप्रत्यायकभाव एव तयोः

संबन्ध इति। ननु एतदपि तादृगेव सति संबन्धे हि प्रत्याय्यप्रत्यायकभावो भवेन्नासति। शब्दादर्थप्रतीतौ सत्यां तस्य प्रत्यायकत्वं सति प्रत्यायकत्वे ततो ऽर्थप्रतिपत्तिरिति प्रत्यायकत्वेनैव प्रत्यायकत्वसंबन्धं साधयन् भवान् कथं नात्माश्रयदोषा दपत्रपते। वाच्यवाचकभावः संबन्ध इति चेत् अलं पर्यायशब्दोपादानाडम्बरेण। कः पुनरसाविति पृष्टो न शक्नोति तदपि निर्वक्तुम्। ननु अलमावेगेन अवधाय शृणोतु यावन्निर्णयम्। वाचकत्वमभिधायकत्वं वाच्यत्वमभिधेयत्वं घटादिशब्दोच्चारणानन्तरं घटाद्यर्थावबोधो भवतीति ताव न्निर्विवादम् अत्र घटाद्यर्थावबोधफलको व्यापारःअभिधानक्रिया तच्च शब्दज्ञानमेव नतु परिस्पन्दादिः नित्यविभौ तदसंभवात्। तदेवार्थावबोधफलतया निरूप्यमाणमभिधानक्रियेति कथ्यते तस्यामेव क्रियायां तादृशबोधविषयतया ऽर्थस्य यत्कर्मत्वं तदेवाभिधेयत्वं इदमेव वाच्यत्वमपि

तस्यामेवाभिधानक्रियायां शब्देनार्थः प्रतीयते शब्दो ऽर्थं प्रत्याययतीति द्विविधविवक्षादर्शनात् शब्दस्य यत्करणत्वं कर्तृत्वं वा तदेव वाचकत्वमिति नचैवं देवदत्तः पटं घटं चानयतीत्यादौ पटघटयोरेकानयनक्रियान्वयेन तयोरपि मिथः सम्बन्धः स्या न्नचैतद्भवतीति एकाभिधानक्रियायां कर्मतया र्थस्य कर्तृतया शब्दस्यान्वयेऽपि कथं मिथः सम्बन्धः सिध्येदित्यलं समययापनेनेति वाच्यम्। परस्परमनपेक्ष्य क्रियान्वयिनामुद्देश्यानां मिथः सम्बन्धाभावेऽपि परस्परमपेक्ष्यैव क्रियान्वयिनां तूपादेयानां क्रियाद्वारा मिथो नियमसंबन्धस्वीकारात्। तथोद्देशोपादेययो रप्यस्ति मिथः संबन्धः उद्देशो हि घटाद्यर्थः स्वावबोधायाभिधाव्यापारमुपादत्ते तं विना शब्देनार्थावबोधासंभवात्। व्यापार श्च स्वांशभूतं शब्दमित्यस्ति शब्दार्थयोरेकाभिधानक्रियानियमा त्सम्बन्धः नियम श्च यस्यामभिधानक्रियायां घटादिः करणं कर्ता वा त-

स्यामेव क्रियायां पृथुबुध्नोदरादिरर्थः कर्म यस्यां पुनरसौ कर्म तस्यामेव घटादिपदं करणं कर्तृ-वेति नन्वेवमपि एकस्यामभिधानक्रियायां कर्म-तयार्थस्य करणतया शब्दस्य संबन्धेन कर्म-करणकारकयोः शब्दार्थयोः कथंमिथः संबन्धः। सत्यं न कारकाणां साक्षान्मिथः संबन्धः क्रियायामेव साक्षादन्वयात् तथापि पश्चात्तेषा-मपि क्रियाद्वारा संबन्धः स्वीक्रियते स एवाने-नोच्यते। यथा यजेत स्वर्गकाम इत्यादौ भावनायां साध्यतया स्वर्गस्य साधनतया या-गस्यान्वये पश्चाद् यागः उपकारकः स्वर्गः उपकार्य इति तयोरुपकार्योपकारकभावः संब-न्धः प्रतीयते तथाभिधानक्रियायां शब्दस्य करणतयार्थस्य कर्मतयान्वये जाते पश्चाद् व्यवहारोपयोगिनोऽर्थस्यावबोधसंस्कारं कुर्वन् शब्दः उपकारको भवति अर्थश्चोपकार्य इत्युप-कार्योपकारकभावः स एव नियमापरपर्यायो वाच्यवाचकभावलक्षणः सम्बन्ध इति। नन्वेवं

तर्हि शब्दस्य नियमाधीनत्वा दनुमानत्वापत्तिः ; वैषम्यात्। महानसादौ वह्निधूमयोः प्रत्यक्षेण साहचर्यनियमे गृहीते पश्चा त्तद्द्वारा धूमस्य गमकत्वं गृह्यते नत्वादौ गमकत्वमेव गृह्यते। शब्दे तु प्रयोजकव्यवहारेण गमकत्वमेव गृह्यते न संबन्धान्तरमित्यन एव शब्दस्य गमकत्वं सिध्यति। नचैवं ततो ऽर्थावगमे तस्य गमकत्वं गमकत्वे गृहीते ततो र्थावगम इत्यन्योन्याश्रयः। पूर्वपूर्वप्रयोजकद्वारा उत्तरोत्तरस्यग्रहणे ऽन्योन्याश्रयाभावात्। नच प्रयोजकव्यवहारेण शक्तिग्रहोपगमे वाक्ये एव शक्तिः सिध्येन्न पदे इति पदस्य वाचकत्वानुपपत्तिः स्यादिति वाच्यम् अयं शब्दो ऽस्यार्थस्य वाचकः अयमर्थो ऽस्यशब्दस्य वाच्य इति शक्तिग्राहकव्यवहारेण तदुपपत्तेः। नच यत्र प्रयोजकवृद्धोच्चारितवाक्या त्तदर्थे प्रयोज्यप्रवृत्तिमुपलभ्यानुमानेन शक्तिग्रहोभवति तत्र वाक्ये एव शक्तिग्रहः स्या

न्तपदे इति तस्य वाचकत्वानुपपत्ति स्तत्राप्यन्व-
यव्यतिरेकाभ्यां गवादिशब्दस्य गोत्वादिवाच-
कत्वनिर्णयात् । नच लोके जात्याकृतिविशिष्टे
गवादिशब्दप्रयोगा द्विशिष्टवाचकत्वमेव गवा-
दिशब्दस्य न गोत्वादिवाचकत्वं तत्कथमुच्यते
निष्कृष्य गोत्वादिवाचकत्वं तस्य । अनेकजाति-
गुणद्रव्यकर्मभेदविशिष्टगवाद्यर्थे व्यवजीहीर्षया
गवादिशब्दो लोकैः प्रयुज्यते तेषां शक्यलक्ष-
णविवेकाभावेऽपि सामान्यतो व्यवहारासिद्धे र्न
तद्विवेकः शास्त्रे तु तत्प्रयोजनोपलम्भा द्विदुषां
तद्विचार आवश्यक इति । प्रयोजनं च बला-
बलसिद्धिः सामान्यवाचकानां विशेषाभिधित्सया
प्रयोगो लक्षणयैव यथागोशब्दस्य हलवहनयोग्ये
गवि यथा वा आहवनीये जुहोतीत्यत्र होम-
सामान्यवचनो जुहोतिशब्दः पत्नीसंयाजेषु लक्ष-
णया प्रवर्तते । तत्र विशेषवाचकेन गार्हपत्येन
बाध्यते । सामान्यवाची शब्दः पूर्वं स्वार्थं
सामान्यमभिधाय पश्चा त्तद्द्वारेण विशेषे लक्ष-

णया प्रवर्त्तते इति विशेषापेक्षया पश्चात्प्रवृत्तिशीलस्य दुर्बलत्वं विशेष स्तु शीघ्रमेव स्वार्थं प्रत्याययतीति सामान्यापेक्षया प्रबल इति। जातिमात्रवाचकत्वनिर्णयोपाय स्त्वन्वयव्यतिरेकविवेकः गोत्वशून्ये ऽश्वादौ द्रव्यत्वसत्त्वादेः सत्वेऽपि गोशब्दो न प्रयुज्यते शावलेयादिव्यावृत्तेषु अपि वाहुलेयादिषु गो शब्दः प्रयुज्यते इति गोत्वसत्वासत्त्वाभ्यां गोशब्दप्रयोगसत्वासत्वदर्शनाद्गोशब्दस्य गोत्ववाचकत्वनिर्णय इति। अर्थम्प्रति शब्दस्य गमकत्वे सिद्धे तत एव तद्विशेषो भिधायकत्वमपि सिद्धयति। यत्सत्तामात्रेण स्वसंबद्धं वर्तमानमर्थं गृह्णाति तदिन्द्रियम्। यत्तु व्याप्यतया ज्ञायमानं व्यापकं गमयति तल्लिङ्गम् यत्तु गमकत्वावगमादेव गमयति तदभिधायकमिति गमकविशेषा एव इन्द्रियलिङ्गशब्दा इति शब्दस्य गमकत्वमेवाभिधायकत्वमेतदेव च संज्ञासंज्ञिसंबन्ध इति तदाह भाष्ये संज्ञासंज्ञिलक्षण

इति ननु शब्दस्य स्वाभाविकप्रत्यायकत्वशक्ति-
स्वीकारे प्रथमश्रवणे ऽर्थप्रत्ययापत्तिः नचैवं
दृश्यते किन्तु अस्यार्थस्येयं संज्ञेति पुरुषान्तरे-
ण संबन्धे कृते ऽर्थबोधो भवतीति देवदत्तादिसं-
ज्ञाशब्दवत्पौरुषेयत्वमेव वेदस्यापि तथाचैवं
प्रयोगः गवादिशब्दो न गोत्वादिवाचकशक्ति-
मान् संबन्धग्रहणात्पूर्वमप्रतिपादकत्वात्। देव-
दत्तादिशब्दवदिति तदेतदाशंकते यदि प्रत्या-
यक इति उत्तरमाह सर्वत्रेति यथा शब्दार्थ-
व्यवहारदर्शनादर्थबोधौपयिकशक्तिः स्वीक्रियते
तथा तज्ज्ञानादेव शाब्दबोधदर्शनात् शक्तिज्ञा-
नस्य सहकारित्वमपि इत्यभिप्रायेणाह सर्वत्र
नोदर्शनमिति। अन्वयव्यतिरेकाभ्यां शक्ति-
ज्ञानस्य सहकारित्वप्रदर्शनायान्वयमाह प्रत्यायक
इति हीति व्यतिरेकमाह प्रत्ययमदृष्ट्वेति नाव-
श्यमिहैव किन्तु अन्यत्रापीत्याह—

——

भा० यथा चक्षुः द्रष्टृ न वाह्येन प्रकाशेन विना प्रकाशयतीति अद्रष्ट्र न भवति यदि प्रथमश्रुतो न प्रत्याययति कृतक स्तर्हि शब्दस्यार्थेन सम्बन्धः। कुतः स्वभावतो ह्यसम्बन्धावेतौ शब्दार्थौ मुखे हि शब्द-मुपलभामहे भूमावर्थं शब्दोऽयं नत्वर्थः अर्थोयं न शब्द इति च व्यपदिशन्ति रूप-भेदोऽपि भवति। गौरितीमंशब्दमुच्चारयन्ति सास्नादिमन्तमर्थं मवबुद्ध्यन्ते इति। पृथ-ग्भूतयोश्च यः सम्बन्धः सकृतको दृष्टःयथा रज्जुघटयोरिति।

यथाचक्षुरिन्द्रियरूपादिसाक्षात्कारे चक्षुषः कारण-त्वे आलोकं विना न चाक्षुषप्रत्यक्षमिति तत्रालो कस्य सहकारित्वमेवं शाब्दबोधे शब्दस्य सहका-रिशक्तिज्ञानमिति नैतद्विना प्रत्यायकत्वमिति न

सहकारिणा कारणशक्तिविघातः किन्तु तदुपका
र एव। ननु कारणत्वाविशेषे कथं तद्विभागः य
त्फलं प्रति प्रत्यासन्नं तत्कारणमितरत्तु सहकारि
चक्षुषः प्रत्यासन्नत्वा त्प्रत्यक्षं प्रति कारणत्वं
बाह्यालोकस्य सहकारित्वं तदपेक्षया प्रत्यास-
न्नत्वाभावात्। क्वचि त्तु विवक्षया बाह्यालोक-
स्यापि करणत्वं यथोक्तम्। उद्विग्नोह्यन्धकारेण
कश्चिदेवं ब्रवीत्यपि किं चक्षुषा ममैतेन दृष्टं
दीपेन यन्मयेति। ननु चक्षुरपेक्षया पि प्रत्यास-
न्नस्या त्मनः संयोगादेरेव करणत्वं युज्यते न
चक्षुषः न सर्वज्ञानसाधारणकारणात्मनः संयो-
गाद्यपेक्षया तदसाधारणकारणस्य चक्षुषो भ्य-
र्हितत्वात्। एवं लोकप्रसिद्ध्या शब्दस्य कार-
णत्वं शक्तिज्ञानस्य सहकारित्वं बोध्यम्।
संबन्धस्य पौरुषेयत्वसाधने देवदत्तादिदृष्टान्तो-
पि साध्यविफलः तत्राप्यव्यक्तरूपेणशक्तेः स्वी-
कारात् केवलं पुरुषेण ज्ञाप्यते नतूत्पाद्यते श-
क्त्युत्पादने पुरुषसामर्थ्याभावादिति भावः।

अस्तु शब्दार्थयोः संबन्धः स तु कृतक एव न नित्यः । यदि संज्ञात्वातिरिक्तः कश्चन शब्दा-र्थयोः संबन्धः स्या त्तदा स नित्योभवे दपि स तु नास्तीत्या ह स्वभावतो हीतिसर्व स्यहिसंबन्धोऽभिन्नदेशकालत्वे संभवति नचान-योः कथंचिद्भेदः देशभेदं दर्शयति मुखेहिशब्दमु पलभामहे भूमावर्थम् स्वरूपतोपि भेदं दर्शयति श-ब्दोयंनत्वर्थः अर्थोऽयंनशब्दइतिशब्दार्थयोविशे-षभेदंदर्शयति गौरितीमंशब्दमुच्चारयन्ति सास्ना-दिमन्तमर्थमवबुध्यन्ते इतिसम्बन्धोहिमीमांस-कमते कथंचिदभिन्नयोरेव ययोस्तुसर्वात्मनाभेद-स्वप्रतीयते तयोर्नस्वाभाविकःसंबन्धःकिन्तुकृ-तकः तद्दर्शयति यथारज्जुघटयोरिति तथा-च स्वाभाविकसंबन्धाभावात् शब्दार्थयोःपौरुषेय एव संबन्धःस्यादिति नातीन्द्रियार्थे शब्दस्या-पिप्रामाण्यमित्याचार्यस्याभिप्रायः इतिकल्पक-लिकायां संबन्धाक्षेपवादः ।

भ० अथ गौरित्यत्र कः शब्दः गकारौ-
कारविसर्जनीया इतिभगवानुपवर्षः । श्रो-
त्रग्रहणोहि अर्थे लोकेशब्दशब्दः प्रसिद्धः
ते च श्रोत्रग्रहणाः ।

शब्दस्वरूपनिरूपणाय पृच्छति अथगौरित्य-
त्र कः शब्द इति नन्ववसरप्राप्तं शब्दसंबन्ध-
नित्यत्वनिरूपणमुपेक्ष्य शब्दस्वरूपनिरूपणं
किमर्थं क्रियते तस्येदानीमजिज्ञासितत्वा-
दिति चेत्सत्यम् संबन्धनिरूपणं संबन्धिनिरू-
पणाधीन मसति संबन्धिनि संबन्धायोगात् सं-
गिरन्ते हि वैयाकरणा वर्णातिरिक्तं स्फोटं
नाम शब्दं स च न प्रत्यक्षेणोपलभ्यते अनुपल-
भ्यमानं च शशविषाणव न्नास्तीति कथंसम्बन्धः
स्यात्कथं च तस्य नित्यत्वमिति संबन्धनित्यत्व-
प्रतिपिपादयिषया सुखावबोधाय वर्णात्मकस्यैव
शब्दत्वं वृद्धसंमतया दर्शयति गकारौकारविस-
र्जनीया इति । भगवानुपवर्ष इति उपवर्षग्रहण-
मादरार्थं नतु परमतमिदमिति सूचनार्थमिति ।
ये तु वैयाकरणा दृष्टविरुद्धं वर्णातिरिक्तं स्फोटं

कल्पयन्ति तेभ्यः कः स्वयमुत्तरं दातुमर्हति नच तैरपि शब्दं कुरु शब्दं मा कार्षीः शब्दकार्यं-माणवक इत्यादिलोकप्रत्यक्षानुसारेण पूर्वं वर्णा एव शब्द इति स्वीकृत्य पश्चा त्तेभ्यो ऽर्थाव-बोधो न संभवतीत्यालोच्य स्फोटात्मकः शब्दः कल्पितः। तथैव मीमांसकैरपि व्याख्येयं किं प्रत्यक्षपरीक्षयेति चेन्न शब्दस्वरूपनिर्णयाय प्र-त्यक्षस्य समर्थत्वात् बलवत्प्रमाणान्तराभावा च्च यदि प्रत्यक्षमत्रासमर्थं स्याद् यदि वा बलवत्का-रणान्तरं स्या त्तदा वर्णातिरिक्तः शब्दः सिद्ध्ये-त्तच्च प्रकृते नास्तीति वर्णात्मकस्यैव शब्दत्वं प्रत्यक्षतो लभ्यते तथाच श्रोत्रग्राहकत्वमेव शब्द-सामान्यलक्षणं न प्रत्यायकत्वं तस्य धूमादावपि सत्वेन व्यभिचारित्वा त्तदाह श्रोत्रग्रहणो हीति श्रोत्रग्रहणा इति श्रोत्रे णगृह्यन्ते इति, यद्वा गृह्यते ऽनेनेति ग्रहणं श्रोत्रं ग्रहणं येषामिति बहुव्रीहि-रिति बोध्यम्। वर्णा श्च निरवयवा सावयवत्वे प्रमाणाभावात्। नच घटादौ प्रत्यक्षत्वस्य सा-

वयवत्वेन व्याप्तत्वाद् वर्णानामपि प्रत्यक्षत्वेन सावयवत्वानुमानं स्यादिति वाच्यम् प्रत्यक्षत्वस्य गुणादौ व्यभिचारात् एतेन वर्णेषु पुद्गलाख्यानवयवानिच्छन्तः सौगता पराबभूवुरिति। अनेकदेशगतत्वेपि स एवायं गकार इत्यबाधितप्रत्यभिज्ञया तस्यैकव्यक्तित्वमेव व्योमवदतो न गत्वादिजातयोपि ननु व्यक्तिभेदाभावे अयं द्रुतो गकारः अयं विलम्बित इति बुद्धिभेदो न स्यादिति चेन्न व्यञ्जकध्वनिभेदनिबन्धनानां द्रुतविलम्बादिधर्माणां भेदाद् वर्णभेदोपपत्तेः सौर्यादिधर्मभेदनिबन्धनदेवदत्तादिधर्मिभेदवत् नच द्रुतादिविरुद्धधर्मभेदेन धर्मिभेद एव किन्न स्वीक्रियते नीलादिभेदेन घटादिव्यक्तिभेदवत् त्वन्मतेऽपि गत्वादिषु द्रुतविलम्बितत्वादिभेदभानेपि गत्वादिभेदानङ्गीकारव न्ममापि व्यञ्जकव्यक्तिभेदानङ्गीकारात्। एतावान् परं विशेषः त्वन्मते व्यञ्जकगकारव्यक्तिभेदा द्गत्वे भेदभानं मन्मते व्यञ्जकध्वनिभेदाद् गकारव्यक्तौ भेदा-

वभास इति गत्वादिजातिकल्पनागौरवं नवाधिकं नित्यत्वं सर्वगतत्वमेकत्वंचास्माभि र्व्यक्तौ कल्प्यं त्वया तु एतत्सर्वं जातिं प्रकल्प्य तत्र कल्पनीयंस्यादिति धर्मिकल्पनापेक्षया धर्मकल्पनैव लघीयसी धर्मस्य प्रत्येकसमवायित्वकल्पनापि नास्माकमित्यपरमनुकूलम्। ननु गकारानुवृत्तव्यावृत्तबुद्धेः श्रोत्रेन्द्रियजन्यत्वाद् श्रोत्रग्राह्य एव विषयो वाच्यः मन्मते गत्वजाते गंकारव्यक्ते श्च श्रौत्रत्वा त्सा बुद्धिरुपपद्यते त्वन्मते नादस्य वायवीयत्वे भातीन्द्रियत्वा त्कथमेतदुपपत्तिरिति चे न्न नादसंस्कृतश्रोत्रे ण तत्प्रत्यक्षत्वोपगमात् अयं भावः नादो न वायुः नवातत्स संयोगविभागात्मा। अपि तु वायुगुणः शब्दविशेषो नादः स च द्विविधः परिस्फुटवर्णात्मा अपरिस्फुट वर्णात्माच आद्यो मनुष्यशब्दः यत्र गकारादयः स्फुटमुपलभ्यन्ते द्वितीयः शङ्खवीणादिनादस्तत्र वर्णानां स्फुटमनुपलंभात्। शब्दत्वं पुन रुभय त्रानुगतं लक्ष्यते ध्वन्यात्मकः शब्दः गका

रादीनामभिव्यञ्जकःप्रभारूपमिव भावान्तराणा-म्। सच नादः श्रोत्र देशमागत्य श्रोत्रेन्द्रियं संस्करोति संस्कृतेन श्रोत्रेण कदाचिदसौ वर्णानभिव्यञ्जयन् तैः सह गृह्यते। कदाचिद्वर्णरहितः स्वयमेव केवलं गृह्यते यथा वीणादिध्वनौ शब्दोच्चारणे नादोपलब्धिः सर्वानुभवसिद्धा दूरोच्चारितशब्दे वर्णरहितः केवलनादः एव प्रतीयते तथा दूराद्वापणादिशब्दश्रवणेपीति न तिरोहितं सचेतसाम् । अथवा अयं महान् शब्दः अयमल्प इत्यादिप्रतीत्या महत्वाल्पत्वयोरपि शब्दे भानं दृश्यते तेच गुणस्वरूपे इति न साक्षाच्छब्देवर्तितु महतः। गुणे न गुण इति तेषां सिद्धान्तात्। तथाच वैशेषिकैरपि शब्दे ऽविद्यमानमेव महत्वादि नादसंस्कारानुरूपया धिया गृह्यते इत्येव वाच्यं। तथा स्माभिरपि श्रोत्रं प्राप्य क्षिप्रमन्यतो ऽपसृतेषु नादेषु तत्संस्कारस्य श्रोत्रे स्वल्पकालमवस्थाना च्छब्दोपि क्षणमाविर्भूय तिरोभवन्नुत इतिगृह्यते इति व्यञ्जक-

धर्माणां द्रुतादीनां व्यञ्जयेशब्दे भ्रान्त्यारोप इति सर्वं चतुरस्रम् । तथाचोक्तं मधुरं तिक्तरूपेण श्वेतं पीततया तथा गृह्णन्ति पित्तदोषेण विषयं भ्रान्तचेतसः मण्डूकवसयाक्ताक्षा वंशानुरगबुद्धिभि र्व्यक्तचल्पत्वमहत्वाभ्यां सामान्यं च तदाश्रयमिति । अथा स्तु नादधर्मोद्रुतादिः ह्रस्वत्वादि स्त्वकारादिधर्म एवाङ्गीकर्तव्यो न्यथालिङ्गाभासजानुमानवत्तन्निमित्तकबुद्धिरपि अगमनमागमनमित्यादौ भ्रान्तिः स्यात् । तथाच ह्रस्वदीर्घाद्यकारानुवृत्तप्रत्ययानुरोधेनात्वजातिस्वीकार आवश्यक इति वर्णभेदः स्फुट इति चेन्न उच्चारणधर्मस्य ह्रस्वत्वादे र्वर्णधर्मतया भानस्य भ्रमत्वात् वर्णानां नित्यत्वे न स्वतो ह्रस्वत्वादि भेदस्य विरोधादेव वक्तुमशक्यत्वात् । वृद्धव्यवहारेणारोपितह्रस्वत्वादिविशिष्टे एव संबन्ध ग्रहा न्न अगमनमागमनमित्यादौ तज्जनितबुद्धे र्भ्रमत्वम् । आरोपितस्फटिकारुण्यानुमितजपाकुसुमसान्नि-

ध्यबुद्धिवत्। तत्रारोपिते एव संबन्धग्रहणात् एवमिहापि उच्चारणधर्मह्रस्वत्वाद्यारोपविशिष्टे एव संबन्धग्रहो न तज्जनितबुद्धे र्भ्रमत्वं। लिङ्गाभासे तु न तेनरूपेण सबन्धग्रहः इति युक्तं तज्जनितबुद्धे र्भ्रमत्वम्। अत एव ह्रस्वदीर्घयोरेक एवायमकारः उच्चारणप्रयत्नगताल्पत्वमहत्त्वाभ्यां भिन्न एव प्रतीयते इति प्रत्यभिज्ञापि संगच्छते। एवमुदात्तादिरपि दीर्घादि वन्न वर्णधर्मा इति न तद्भेदादपि वर्णभेदः नच वर्णान्तराभिव्यञ्जकध्वनिभेदवत् द्रुतादिह्रस्वादयुदात्ताद्यभिव्यञ्जकध्वनिभेदः कल्पनीयः स्यात्तथाच तदपेक्षया वर्णभेद एव किन्न कल्प्यते इति वाच्यम्। एकजातीयवर्णाभिव्यक्तये एकजातीयध्वनीनामेवा भिव्यञ्जकत्वस्वीकारेण तद्गतमृदुत्वतीव्रत्वादिवशादेव द्रुतत्वादिभेदोपपत्ते स्तदर्थं व्यञ्जकध्वनिभेदानङ्गीकारात्। नच वर्णानित्यत्वाभिधानं स्वपक्षाभिनिवेशेन किन्तु न्यायत्वादेवमभिहितं। गकारौका रविस-

र्जनीया इतिभाष्यस्य गत्वादितात्पर्येणापि व्याख्यातुं शक्यत्वादिति दिक्। वर्णातिरिक्तशब्दानभ्युपगमे ऽर्थप्रत्ययानुपपत्तिमाशङ्कते यद्येवमिति भाष्यम्।

भा० यद्येवं अर्थप्रत्ययो नोपपद्यते, कथम्, एकैकाक्षरविज्ञाने अर्थो नोपलभ्यते।

अयंभावः न तावत्क्रमेणाभिव्यक्तै र्गकारादिभिरवयवै रवयवी गोशब्द आरब्धुं शक्यते तावतामवयवानामेकदाभिव्यक्त्यभावेन साहित्यानुपलब्धेः। सत्तया तदारम्भकत्वे तु सर्वदा तदारम्भः स्यात् वर्णानां नित्यत्वाद्विभुत्वाच्च यथा अनित्यत्ववादिनां क्रमेणोच्चरितापवर्गिणां वर्णानामेकदावस्थानाभावेन साहित्याभावान्नावयव्यारम्भकत्वं तथा नित्यत्ववादिनामपि अनभिव्यक्तानामारम्भकत्वे सर्वदा तदारम्भापत्त्या ऽभिव्यक्तानामेवारम्भकत्वं वाच्यमित्येकदा तेषामभिव्यक्त्यभावेनोपलब्धिकृतसाहित्याभावादनारंभकत्वमेव वर्णाना-

मिति भावः । किंचावयविनः सर्वत्रावयवप-
रिमाणाधिकपरिमाणादर्शनाद्द् विभूनां वर्णानां
परिमाणादाधिक्यं न कस्यापि परिमाणस्य सं-
भवतीति नावयविनः समारम्भोवर्णैरिति ।
अवयविनिरासादेव गोशब्दत्वमपि गत्वव-
न्निरस्तं वेदितव्यम् । धर्मिणोऽभावे तद्धर्मसम्भ-
वाभावात् । नच गोशब्दत्वसामान्यानभ्युपगमे-
ऽवयविनो गोशब्दस्य प्रत्युच्चारणं भेदा त्पूर्वोत्त-
रदिनोच्चरितगोशब्दयो र्गोशब्दत्वनिबन्धनानु-
वृत्तप्रत्ययो न स्यादिति वाच्यम् । इष्टत्वात् ।
अत्रगोशब्दद्वये समानक्रमाभिव्यक्तगकारादिव-
र्णैरेवानुवृत्तप्रत्ययोपपत्तेरिति । अवयवित्रवद्वर्णा-
तिरिक्तः समुदायोपि निरसनीयः । एकार्थप्रति-
पादकत्वरूपोपाध्यवच्छिन्नस्य तावद्वर्णसमूहस्य
गौरित्येकः शब्द इत्यादिव्यवहारसंपादनक्षम-
त्वात् । ननु न वर्णानामर्थप्रत्यायकत्वं संभ-
वति । तथाहि कि न्ते प्रत्येकमर्थं प्रत्याय-
यन्ति संहत्य वा नाद्यः प्रत्येकमथबोधादर्शनात् ।

नान्यः क्रमेणाभिव्यक्तानां तेषां साहित्यासम्भवात् क्रमेण व्युत्क्रमेण चोच्चरितेभ्यः तावद्वर्णेभ्यो जराराजेत्यादौ समानबोधापत्ते श्चेति चेन्न यादृशक्रमानुपूर्वीविशेषविशिष्टेषु वृद्धव्यवहारादिनार्थप्रत्यायनसामर्थ्यमुपलब्धं तादृशक्रमादिविशिष्टानामेव वाचकत्वस्वीकारेण क्षतिविरहात्। नहि कश्चिदेकदा तावद्वर्णानुच्चारयितुं क्षमते इत्यवश्यभावी क्रमो विवक्ष्यते वाचकत्वग्रहे इति तादृशक्रमस्यापि शब्दादर्थप्रत्ययेऽङ्गत्वमिति नव्युत्क्रमोच्चरितस्थले समानबोधापत्तिः। नच क्रमसाहित्ययोर्मिथोविरोधा त्साहित्यलाभाय यौगपद्याश्रयणमेव युज्यते इति वाच्यम्। असम्भवेन साहित्यत्यागात् क्रमवतां संहत्यकारित्वमाग्नेयादिषु दृष्टमिति न दृष्टविरुद्धं तत्। नच तत्र भिन्नकालवर्तिनामाग्नेयानां क्रमवतामपूर्वावान्तरव्यापारद्वारा परमापूर्वसाधने साहित्यमस्त्येव न तदभावः वर्णेषु तादृशावान्तरव्यापारादर्शना न्न साहित्य-

मिति वैषम्यात्कथमाग्नेयवदेषां संहत्यकारित्व-
मिति वाच्यं फलानुमेयानामतीन्द्रियव्यापाराणां
तत्रापि सत्वात्। यथा क्षीरपानादिजन्यसंस्का-
राणां स्वरूपतोऽदर्शनेपि पुष्टिकार्यदर्शनेन स-
द्भावो नुमीयते एवमर्थावबोधदर्शनेन वर्णावा-
न्तरव्यापाराणामपीति। नचवर्णावान्तरव्यापा-
राणां बोधाख्यफलानुमेयत्वे बोधात्प्राक् तदनु-
मानज्ञानाभावादुगामभिधत्ते चैत्र इत्यादौ
वर्तमानतया कथं तद्व्यपदेशः फलोत्पत्तेः प्राक्
सत्वेपि तदज्ञानात्फलोत्पत्त्यनन्तरमतीतत्वादि-
ति वाच्यम्। फलदर्शनेन वर्तमानत्वानुमाना-
त्। तदेतत्सर्वमभिप्रेत्याह भाष्ये यद्येवमिति।
प्रत्येकं वर्णानां नार्थबोधकत्वमनुपलम्भात् स-
मुदायस्य वाचकत्वन्तु दूरपराहतं वर्णातिरि-
क्तसमुदायाभावादित्याह।

भा० नचाक्षरव्यतिरिक्तोऽन्यः कश्चिद-
स्ति समुदायो नाम। यतोर्थप्रतिपत्तिः
स्यात्। यदा गकारः न तदा औकार विस-

र्जनीयौ यदा औकारविसर्जनीयौ न तदा गकारः। अतो गकारादिव्यतिरिक्तोऽन्यो गोशब्दोऽस्ति यतोऽर्थप्रतिपत्तिः स्यात्।

नचाक्षरेति तथाचासत्वादेव न ततोऽर्थप्रत्ययश्चेत्याह यतइति नच माभूदवयवातिरिक्तः समुदायः संहत्यैववर्णा अर्थप्रत्ययं कुर्वन्तु ग्रावाण इव पिठरधारणमित्याशङ्क्य क्रमेणाभिव्यक्तिशालिनां वर्णानां न संघात इतिनिराकुरुते यद्वागकार इति तथाचार्थप्रत्ययानुरोधेन वर्णातिरिक्तः कश्चन स्फोटाख्यः शब्दः स्वीकार्यः यतोऽर्थप्रतीतिरुपपद्यतेत्याह अतोगकारेति ननु स्फोटकल्पनायामपि न निस्तार स्तत्रापि एकैकस्यवर्णस्य स्फोटाभिव्यञ्जकत्वं समुदायस्य वेति विकल्पप्रसक्तेः आद्य एकेनैव वर्णेन स्फोटस्याभिव्यक्तत्वाद्वर्णान्तरवैयर्थ्यम् नान्त्यः तावत्समुदायस्यैकदाऽसम्भवात्। ननु एकैकस्य नादस्य स्फोटाभिव्यञ्जकत्वेऽपि नोत्तरनादवैयर्थ्यम्। पूर्वनादैर-

स्फुटोऽभिव्यक्तः तदुत्तरेणास्फुटतर स्तदुत्तरेणापि स्फुटतम इत्येवं विशेषतो भिव्यक्तये तत्सार्थक्यात्। मैवं तथासति यैर्नादैः स्फुटतमो भवति स एव क्रियासमभिहारेणावर्तनीयः। किमस्फुटाभिव्यञ्जकनादानुवर्तनक्लेशेन। नच न केनाप्येकेन नादेन स्फुटो भिव्यज्यते किन्तु प्रत्येकं सर्वैरभिव्यज्यमान स्तथापि न सहसा प्रथमं स्फुटो भवति अपितु पुनः पुनः श्रूयमाणो यथा दूराद्दृष्टः स्थितः सहकारः प्रथमं हस्तिपलालकूटादिसाधारणरूपेण प्रतिभाति। पुनरालोच्यमानोवृक्षात्मना प्रकाशते पुनस्सहकारात्मना स्फुटो भवति तद्वदेव द्रष्टव्यम्। मैवं प्रत्यक्षविषये ईदृशी गति भवति दूरादिदोषेणागृहीतविशेषस्योत्तरोत्तरप्रत्यक्षेण विशेषग्रहणात् प्रकृते तु स्फोटे विशेषाभावाद्य एव एकेनना-देना भिव्यक्तः स एवापरेणापीति शतकृत्वोऽप्यभ्यासे विशेषग्रहणासंभवादिति दिक्। ननु क्रमेणाभिव्यक्तानां वर्णानां युगपदवस्था-

नाभावा न्मास्तु वाचकत्वं तावद् वर्णविषय-
कस्मृतेरेव वाचकत्वमस्तु तत एवार्थप्रतीतिरि-
त्याशंक्य निराकुरुते अन्तर्हित इति

भा० अन्तर्हिते शब्दे स्मरणादर्थप्रति-
पत्तिश्चेत् न स्मृतेरपि क्षणिकत्वादक्षरैस्तु
ल्यता। पूर्वपूर्ववर्णजनितसंस्कारसहितोऽ
न्त्यो वर्णः प्रत्यायक इत्यदोषः

येनैव क्रमेण वर्णा अनुभूता स्तेनैव क्रमेण स्म-
रणं जनयन्तीति नियमात्प्रत्येकवर्णानुभवाहित-
संस्कारजन्यानां तावत्स्मृतीनामपि क्षणिकत्वेन
समाहारासम्भव स्तुल्य इत्याह अक्षरै स्तुल्यतेति
सिद्धान्तमाह पूर्ववर्णजनितसंस्कारसहितोऽन्त्योव-
र्णःप्रत्यायकइति । ननु सर्वेषां वर्णानां प्रत्यायक-
त्वे सिद्धे साक्षात्साहित्याभावा त्परंपरया तत्स-
म्पादनाय संस्कारकल्पना स्यादपि तत्तु नाऽयव-
धानादन्तिमवर्णस्यैव वाचकत्वस्वीकारादिति चे
न्न । अन्तिमस्यैव प्रत्यायकत्वे तत एवार्थ-

बोधसम्भवादितरोच्चारणवैयर्थ्यापत्ते रतः सर्वेषां प्रत्यायकत्वमानन्तर्यन्तु वहुषु एकस्यावर्जनीयमितरेषां च व्यवधानमिति न व्यवहितस्याहेतुत्वमथवा ह्र्येकान्तरितयो र्गकारौकारयो रव्यवहितस्य च विसर्गस्यार्थप्रत्यायनसामर्थ्यं नान्यथेति व्यवधानं विवक्षितमेव। ननु यथा एकस्यां सिकतायां तैलजननसामर्थ्यं नास्ति तत्समुदायस्य खारीशतस्यापि तन्नास्ति एको ऽन्धः दर्शनासमर्थ स्तच्छतमप्यसमर्थमितिवदेकैकस्य वर्णस्यार्थप्रत्यायनसामर्थ्यविरहे स एव समुदाय इति कथं तत्र तत्सामर्थ्यम् न एकैकस्य पुरुषस्य शिविकावहनसामर्थ्यविरहेपि तत्समुदायस्य पुरुषचतुष्टयस्यतत्र सामर्थ्यमिव वर्णसमुदायस्य तदङ्गीकारात् न तत्रापिकिंचित्किंचित्सामर्थ्यमस्त्येव प्रकृतेपि तदङ्गीकारे बाधकाभावात्। स्फोटवादिनामपि एते दोषाः समाः अत एव शब्दकल्पनायां सा च शब्दकल्पनाचेति भाष्य उक्तमिति। नच यदिस्फोटवदत्रापिदोषः तर्हि तत्प-

रित्यागे किं बीजम्। स्फोटसाधकप्रमाणविरहः वर्णातिरिक्तकल्पना पदस्य सावयवत्वेन प्रतीतस्य विपरीतेननिरवयवत्वकल्पना च तस्मा स्फोटाभिव्यक्तयेऽपेक्षितांशो र्थप्रत्ययार्थं एवाश्रयणीय इति भाष्ये संस्कारशब्देन प्रोच्चरणजन्यनिष्ठातिशयवत् पूर्वपूर्ववर्णोच्चारणजन्यान्तिमवर्णनिष्ठोऽतिशयविशेषो विवक्षितः। तथाच तादृशातिशयं विना न्तिमो वर्णो नार्थबोधाय प्रभवतीति तदर्थं पूर्ववर्णानां सार्थक्यम्। अथवा न्तिमवर्णनिष्ठं पूर्ववर्णानन्तरवृत्तित्वमेव भाष्ये संस्कारशब्देन विवक्षितं तेनैवान्तिमस्यानुग्रहाख्यं सामर्थ्यं पूर्ववर्णैः कृतमित्यदृष्टसंस्कारकल्पना न कार्या। वस्तुतस्तु भाष्ये संस्कारशब्देन वासनारूप एवार्थो गृह्यते तस्य तत्रैवरूढेः अनुभवजन्यः संस्कारो भवतीत्यत्र न कस्यचिद्विवादः। यथाहुः वस्तुधर्मो ह्येष यदनुभवः पटीयान् स्मृतिबीजमाधत्ते इति तथाच संस्कारस्वरूपे न कस्यचिद्विमतिः तस्यार्थप्रत्य-

यहेतुत्वे परं विवादः। तत्र स्मृतिजननसामर्थ्य-मिव स्मृतिकारणीभूतानुभवजननसामर्थ्यं न दुर्वचं। ननु स्मृतिहेतोः संस्कारस्य कथमर्थप्रत्ययसामर्थ्यम्। एकस्मिन्नप्यनेकसामर्थ्यस्य कर्मवत् संयोगविभागयोरित्यत्र वदन्यमाणत्वात्। नच संस्कारेऽदृष्टस्यार्थप्रत्ययहेतुत्वस्य कल्पना तवाधिका तवापि संस्कारस्य स्फोटाभिव्यक्तिं प्रति सामर्थ्यकल्पनाधिक्येन अपिच यथा मया संस्कारस्यार्थप्रत्ययहेतुत्वं कल्प्यते तथा भवता स्फोटस्यार्थप्रत्ययहेतुत्वं कल्प्यते इत्यदृष्टांशकल्पना समा स्फोटाभिव्यक्तिं प्रति संस्कारहेतुत्वकल्पना परं तवातिरिच्यते। एवं च संस्कारस्य भवत्पक्षेऽआवश्यकतया तत एवार्थप्रतीत्युपपत्तौ स्फोटकल्पनागौरवान्नादर्तव्या नच स्फोटाभिव्यञ्जकैः संस्कारैरेवार्थप्रत्ययमङ्गीकृत्य स्फोटप्रत्याख्यानवद्वर्णाभिव्यञ्जकनादैरेवार्थं प्रतीत्य वर्णानामपिप्रत्याख्यानं स्यादिति वाच्यम् किन्न स्यात् नादा अपि यदि वर्णवत्प्रत्यक्षाः स्युः वर्णा

वा स्फोटवदप्रत्यक्षाः तदेतदुभयं नास्ति नादानामप्रत्यक्षत्वा द्वर्णानां च प्रत्यक्षत्वा दत एव गकारादीन्येव प्रत्यक्षाणीति भाष्येउक्तमिति यद्वा मास्तु अन्तिमवर्णो ब्रीह्यादिनिष्टातिशयवत्संस्कारान्तरं संस्कारस्य स्मृतिव्यतिरिक्तहेतुत्वं च वर्णा एव यौगपद्येनार्थं प्रत्याययन्ति इत्येवाभ्युपगमः श्रेयान्। नच क्रमेणाभिव्यक्तानां कथमेकत्र ज्ञाने यौगपद्यं। प्रत्यक्षज्ञाने तेषां यौगपद्यविरहे पि तावद्वर्णविषयकप्रत्यक्षानन्तरजायमानस्मरणे तद्यौगपद्यसत्त्वात्। प्रत्यक्षगृहीतयौगपद्यस्यैवार्थप्रत्ययाङ्गत्वे मानाभावात्। तावद्वर्णविषयकस्मृति श्च द्विधा सदसद्वर्णगोचरा चित्ररूपा समस्तवर्णविषया चाद्या चरमवर्णश्रवणवेलायां पूर्वपूर्व वर्णानामुपलब्धत्वेन स्मरणाभ्युपगमा त्पूर्वपूर्ववर्णस्मृतिस्वरूपचरमवर्णोपलब्धिः चरमवर्णविषये सद्रूपापूर्ववर्णानामतीतत्वेन तद्विषये ऽसद्रूपेति चित्राबुद्धिः सदसद्वर्णगोचरत्वेनोभयरूपा। अपरा च चरम-

वर्णोपलब्ध्यनन्तरतावद्वर्णविषयकस्मृति रि
यंच चरमवर्णविषयेऽपि स्मृतिरूपैवेति भेदः।
ननु येन क्रमेणानुभव स्तेनैव क्रमेण स्मरणस्यौ-
चित्यात्क्रमेणानुभूतानां तावतामक्षराणां कथं
युगपत्स्मरणमिति चेन्न तथा नियमे भानाभा-
वा दन्यथा अयमेकोयमेकइत्यपेक्षाबुद्ध्याक्रमे-
णगृहीतानामेकदास्मरणाभावा च्छतादिसंख्या-
परिच्छेदो न स्यादिति येन क्रमेण वर्णा
उच्चार्यन्ते तेनैव क्रमेणोपलभ्यन्ते तेनैव च
स्मर्य्यन्ते युगपदप्रतीतिनियमा द्वर्णानां नित्य-
विभूनां स्वतः क्रमाभावेऽपि उपलब्धिक्रमारो-
पात्क्रमवत्त्वमिति स्मरणेऽपि तदारोपात् तादृश-
क्रमशालिन एव प्रतीयन्ते तथैव प्रतीयमाना-
श्चार्थप्रत्यायका इति नव्युत्क्रमोच्चरितेभ्यो
र्थप्रत्ययप्रसङ्ग इति। अस्मिंश्च पक्षे शब्दा-
दर्थं प्रतिपद्यामहे इति लौकिकं वचनमुपप-
न्नतरं स्मृतिस्थितानामेव वर्णानामर्थप्रत्यायक-
चरमवर्णांशे प्रत्यक्षरूपया ऽनया-

चित्रबुद्ध्या भ्रान्ता वैयाकरणाः गौरित्येकं पद-मिति व्यवहारसिद्धये गकारादिवर्णव्यतिरिक्तः प्रत्यक्षगोचरः स्फोटः शब्द इति कल्पयामासुः तच्चित्रबुद्ध्यनुरूपमेव तैः कल्पितमिति नाति-चित्रीयते अस्या अरमवर्णांशे प्रत्यक्षत्वदर्शनमेव तेषां स्फोटप्रत्यक्षत्वकल्पनायां बीजम्। नचा-तिरिक्तस्फोटकल्पनाभावे गौरित्येकं पदमिति-व्यवहारो न स्यात् व्यवहारे विषयस्य हेतुतया-वयवेषु एकत्वाभावादिति वाच्यम्। एकार्थवा-चकत्वैकबुद्धिविषयत्वादिनैव तादृशव्यवहारो-पपत्तिसम्भवे दृश्यादर्शनबाधितार्थान्तरकल्पना-या अन्याय्यत्वात्। नचेदं न व्यवहारमात्रं येन धर्मान्तरेणाप्युपपाद्येत किन्तु एकव्यक्ति-विषयिणी हीयं बुद्धि व्यक्त्यैक्यमेवावगाहते इति वाच्यम्। गौरित्यत्राऽज्झलोः सम्भेदादेक-त्वबुद्धे भ्रमत्वाद् विदुषां वर्णभेदप्रतीतेः देवद-त्तादिपदे सर्वेषां वर्णभेदावगमाच्चेति भावः

——

भा० नन्वेवं शब्दादर्थं प्रतिपद्यामहे इति लौकिकं वचनमनुपपन्नं स्यात्। उच्यते यदि नोपपद्यते अनुपपन्नं नाम न हि लौकिकं वचन मनुपपन्नमित्येतावता प्रत्यक्षादिभि रनवगम्यमानो ऽर्थः शक्नोत्युपगन्तुम् लौकिकानि वचनानि उपपन्नार्थानि अनुपपन्ना र्थानि च दृश्यन्ते यथा देवदत्त गाम भ्याज इत्येवमादीनि दशदाडिमानि षड् अपूपाः इत्येवमादीनि च।

स्फोटवादीशंकते नन्वेवं शब्दादिति स्फोटानभ्युपगमशब्दादर्थं प्रतिपद्यामह इतिनोपपद्यते किन्तु चरमवर्णादर्थंप्रतिपद्यामहेइतिस्यान्नचैतद् दृश्यते तस्मा ल्लोकवचनानुरोधेन स्फोटकल्पनमेव श्रेय इति उत्तरमाह सिद्धान्ती उच्यत

इति अप्रामाणिकार्थकल्पनापेक्षया लोकवचनानुपपत्तिरेव श्रेयसी त्यभिप्रायेणाह यदीति लोकवचनानुरोधेनार्थकल्पनायां महती दुरवस्था स्यात् तदाह नहीति उभयविधानि लोकवचनानि दृश्यन्त इति सोदाहरणमाह यथा देवदत्त इति इदमुपपन्नार्थम्। अनुपपन्नार्थ माह दश-दाडिमानीति यद्यपीदमेकैकं नानुपपन्नार्थकं दशदाडिमानि षडपूपेति वाक्यद्वयस्य पृथगुपपन्नार्थत्वात्। तथापि मिलितमनुपपन्नार्थमेवैकवाक्यार्थाभावात् तदिदं अर्थवत्सूत्र महाभाष्यकारोक्तानर्थकवाक्यैकदेशभूतमित्याह इत्येवमादीनीति। जरद्गवः कम्बलपादुकाभ्यां द्वारिस्थितो गायति मंगलानि। तं ब्राह्मणी पृच्छति पुत्रकामा राज न्नुमायां लसुनस्य कोऽथ इत्यादीन्यपि बोध्यानीति। लौकिकवचनानादरेऽपि शास्त्रीयवचनोपपत्तये स्फोटकल्पनावश्यकीत्यभिमानेन पूर्वपक्षी शंकते ननुचेति

भा० ननुच शास्त्रकारा अप्येवमाहुः पूर्वापरीभूतं भाव माख्यातेना चष्टे ब्रजति पचति इत्युपक्रमप्रभृति अपवर्गपर्यन्त- मिति यथा न शास्त्रकार वचनमपि अल मिममर्थ मप्रमाणकमुपपादयितुम् ।

आख्यातेन तिवादिना केवलस्य तस्य प्रयो- गाभावादाख्यातघटितमुदाहरति ब्रजति पचतीति उपक्रमापवर्गशब्दौ पाकारम्भपाकसमाप्तिपरौ त- था च पाकमारभ्य तत्समाप्तिपर्यन्तं यावान् क्रियाकलाप स्तावान् सर्वोप्याख्यातार्थः तावद- न्तर्गते कियत्यपि व्यापारे सति पचतीतिप्रयो- गदर्शनाद्वर्णमात्रस्याख्यातत्वाभावात् । तस्मा त्स्फोट एवाख्यातपदेन ग्राह्य इति तदेतन्निरा- चष्टे नेति शास्त्रकारस्यापि प्रमाणाविरुद्धार्थक- ल्पना सामर्थ्याभावात् । प्रमाणविरोधे शास्त्र- वचनमपि अन्यपरत्वेनैव नेयमादित्योयूपइत्या- दिवत् । ननुआपाततस्तदनुरोधेन दृष्टविरु-

द्वार्थकल्पनाकार्येति भावः वस्तुतस्तु वर्णेभ्यः संस्काराः संस्कारेभ्य श्चार्थप्रतिपत्तिरिति स्वीकारा न्न वर्णेषु निमित्तत्वबाधः व्यापारेण व्यापारिणो व्यवधानाभावात् सर्वत्र व्यापारव्यवहितस्यैव निमित्तत्वमुपलभ्यते । प्रज्वलनादिव्यापारद्वारैव वह्ने र्दाहनिमित्तभावः सन्निकर्षादिव्यापारद्वारा चक्षुरादेः प्रत्यक्षादिप्रमितिकरणभावश्चेत्याशये नाह अपिचेति ।

भा० अपि च नैव एतत् अनुपपन्नार्थम् । अक्षरेभ्यः संस्काराः संस्कारादर्थप्रतिपत्तिरिति सम्भवति अर्थप्रतिपत्तौ अक्षराणि निमित्तम् । गौण एवार्थप्रतिपत्तौ शब्द इति चेत् न गौणोऽक्षरेषु निमित्तभावः तद्भावे भावात् तदभावे चाभावात् । ननु अर्थप्रतिपत्तिवेलायां क्रमाभिव्यक्तवर्णानामसत्वान्न तत्र निमित्तभावः किन्तु संस्काराणामेव तेषा न्तदानीं सत्वात् बहिश्चक्षुरादिदृष्टा-

न्तस्तु विषमः। कार्योत्पादसमयेपि तेषां सत्वादिति वर्णेषु अर्थप्रतिपत्तिनिमित्तभावो गौण एव न मुख्योऽसम्भवादित्या शयेनाह गौण एवार्थ इति। समाधत्ते न गौण इति यद्यपि शब्देषु गौणत्वाशंकायां तत्रैव मुख्यत्वव्यवस्थापनेन समाधानं कर्त्तव्यमत्रतु तादृशाक्षेपेऽक्षरेषु निमित्तभावस्य मुख्यत्वमुच्यते न गौणोऽक्षरेषु निमित्तभाव स्तद्भावादिति भाष्यसंबद्धं प्रतीयते तथापि न गौण इति भाष्यं पूर्वभाष्येणैव योजनीयम् एवं च गौण एवार्थप्रतिपत्तौ शब्द इतिचेत्। न गौण इत्येतत्पर्यन्तमेकं भाष्यम्। गौणत्वाभावसाधनाय हेतुं दर्शयति अक्षरेषु निमित्तभाव स्तद्भावे भावादिति अयं भावः शब्दादर्थं प्रतिपद्यामहे इति लौकिकवचने पञ्चम्या शब्दस्यार्थप्रतिपत्तौ निमित्तत्व मुच्यते त च व्यवहितस्यापि सम्भवत्येव अव्यवधाननिवेशे मानप्रयोजनयोरभावादिति संस्कारस्य व्यवधायकत्वेपि शब्दे उपपद्यते

ऽन्यथात्वन्मतेऽपि अज्ञातस्यस्फोटस्यार्थप्रतिपत्तिहेतुत्वाभावाद् ज्ञातस्यैव तद्वाच्यं। तथा च ज्ञानव्यवधानं सममिति व्यवहितस्यापि हेतुत्वं स्वीकार्य्यं तथाच संस्कारस्य व्यवधायकत्वेऽपि न शब्दस्यनिमित्तत्वानुपपत्तिः व्यापारस्य न व्यवधायकत्वमित्युक्तमेव। ननु संस्कारस्यापि शब्दजन्यत्वात्कुतो लोके न तथाव्यवहारः अर्थप्रतीतिमुद्दिश्य शब्दप्रयोगा त्तत्फलतया तत्र जन्यत्वव्यपदेशः न संस्कारे तदुद्देश्येन शब्दप्रयोगाभावात् समुच्चयज्ञानपक्षे यथा न व्यवधानं तथोक्तमेव। स्फोटस्य प्रत्यायकत्व न्तु न युक्तं तदभिव्यञ्जकाभावात् तथाचैवं प्रयोगः पदवाक्ययो वर्तमाना वर्णा ध्वनयो वा न स्फोटाभिव्यञ्जका व्यञ्जकत्वा त्प्रदीपवत्। यद्वा तस्मिन्नेव साध्ये सत्वाद्घटवत्। नच धर्मिप्रसिद्ध्यप्रसिद्धिभ्यां व्याघातः। अविद्यमाने ऽपि स्फोटे वाचकत्वाभावस्य दर्शयितुं शक्यत्वात्। नच बुद्धावनारूढः कथमभावे-

नापि शक्यो विशेषयितुम्। वैयाकरणैर्वाचकत्वेन यः कल्पितः स नास्तीत्याकारेण बुद्धावारोहयितुं शक्यतया सर्वथाबुद्ध्यनारूढत्वानभ्युपगमात् वीणादिध्वनीनां स्फोटानभिव्यञ्जकत्वस्य परेषामिष्टत्वात्तदंशे सिद्धसाधनतापरिहाराय ध्वनौ पदवाक्ययोरिति विशेषणमुपात्तम्। तथा स्फोटो नार्थवाचकः वर्णातिरिक्तत्वात् घटवदिति। नचैवं वर्णो न वाचकः सत्वाद्घटवदित्यपि स्यादिति वाच्यम्। वर्णोच्चारणानन्तरमर्थप्रत्ययदर्शनेन हेतोरनैकान्तिकत्वात्। अग्नावनुष्णत्वानुमानवद् दृष्टविरुद्धत्वाच्च। वर्णानामेवार्थप्रत्यायकत्वे ऽनुमानं यथा अनन्यथासिद्धार्थकप्रतीतिः वर्णजन्या वर्णप्रतिपत्त्यनन्तरमुत्पद्यमानत्वात् धूमादग्निज्ञानवत्। गकारौकारविसर्गाः गोत्वप्रतिपादकाः गोत्वप्रतिपादनात्पूर्वं ध्रुवं प्रतीयमानत्वाद् रूपे प्रदीपवत् यत्पूर्वं हि यत्प्रतिपाद्यते तत्तस्य प्रतिपादकं यथा दीपारोपणं प्रतिपद्य-

मानस्य घटस्य प्रतिपादकं वर्णोच्चारणापूर्वोऽर्थः प्रतिपाद्यते अतो वर्णाः प्रतिपादक इति संक्षेपः ॥

भा० अथापि गौणः स्यात् । न गौणः शब्दो माभूदिति प्रत्यक्षादिभि रनवगम्यमानोऽर्थः शक्यः परिकल्पयितुम् । नहि अग्निर्माणवक इत्युक्ते अग्निशब्दो गौणो माभूदिति ज्वलन एव माणवक इत्यध्यवसीयते । नच प्रत्यक्षो गकारादिभ्यो ऽन्यो गोशब्द इति भेददर्शनाभावात् अभेददर्शनाच्च । गकारादीनि हि प्रत्यक्षाणि । तस्माद् गौरिति गकारादिविसर्जनीयान्तं पदमक्षराणि एव । अतो न तेभ्यो व्यतिरिक्तमन्यत्पदं नामेति । ननु संस्कारकल्पनायामप्यदृष्टकल्पना । उच्यते शब्द-

कल्पनायां सा च शब्दकल्पनाच। तस्माद-न्तराण्येव पदम्।

अभ्युपेत्याह अथापि गौण इति दृष्टवि-रुद्धार्थकल्पनापेक्षया गौणत्वस्वीकार एव युक्ति-युक्त इत्याशयेनाह माभूदिति अत्रैव दृष्टान्त-माह अग्निर्माणवक इति तेजस्वित्वादिना अ-ग्निशब्दो ऽग्निसदृशार्थकत्वेन गौण एव सर्वैः स्वीक्रियते। ननु मुख्यत्वाय स एवाग्निरिति तत्कस्य हेतोः तथासति दृष्टविरोधः स्यादिति तस्य गौणत्वमेवं प्रकृतेऽपि स्फोटकल्पनापेक्षया शब्दस्य गौणत्वमेव वरम्। साधकप्रमाणा-भावा न्नस्फोटोऽभ्युपगमो युक्त इत्याह नच प्रत्य-क्षेति प्रत्यक्षपूर्वकत्वा च्चेतरेषां तन्निवृत्त्यैव निवृत्तिरिति भेदेतिशब्दभिन्नतया स्फोटस्या नुपलम्भा न्न तदतिरिक्तसिद्धिरितिभावः स्व-पक्षसाधकं हेतुमाह अभेददर्शनाच्चेति गकारा-दिवर्णैः शब्दस्याभेददर्शनाद् गकाराद्यात्मक

एव शब्द इत्याह तस्मादिति प्रत्यक्षाणीति श्रावणप्रत्यक्षमेव वर्णात्मकशब्दसद्भावे प्रमाणं सिद्धमर्थं प्रदर्शयति अतोनेति ननुसंस्कार इतिप्रागेव व्याख्यातं स्फोटवादिनां मते कल्पनागौरवमुद्भावयति सा चेति एतदपि पूर्वं निरूपितं उपसंहरति तस्माद्दिति ❀ ❀ ❀

इति कल्पकलिकायांस्फोटवादः ॥

शब्दार्थसंबन्धनित्यत्वसाधनाय वाचकस्वरूपं निरूप्य वाच्यस्वरूपं निर्दिधारयिषुः पृच्छति

❀ भा० अथ गौः इत्यस्य शब्दस्य कोऽर्थः ? । सास्नादिविशिष्टाकृतिः इति ब्रूमः । ननु आकृतिः साध्याऽस्ति वा नवा इति ? । न प्रत्यक्षा सती साध्या भवितु मर्हति ; रुचकः, स्वस्तिको, वर्धमानकः इति हि प्रत्यक्षं दृश्यते । व्यामोहः इतिचेत् । न । न असति विपर्यासे व्यामोहः इति शक्यते वक्तुम् । असत्यप्यर्था-

न्तरे एवं जातीयको भवति प्रत्ययः। पंक्तिः, यूथम्, वनमिति यथा इति चेत्। न, असम्बद्ध-मिदं वचन मुपन्यस्तम्। किं असति वने वन-प्रत्ययो भवति इति। प्रत्यक्तमेवाक्षिप्यते वृक्षा अपि न सन्ति इति। यद्येवं, प्रत्युक्तः स महा-थानिकः पक्षः।

अथगौरिति। यदि व्यक्तयः शक्याः स्यु स्तर्हि आनन्त्या द्व्यभिचारा च्च तासु संवन्ध एव न सिद्ध्ये द्दूरे तस्य नित्यत्व माकृते स्तु शब्दार्थत्वे तस्या एकत्वान्नित्यत्वा च्च क्वचि त्साक्षा त्क्वचि त्तद्वारा र्थेषु संबन्ध स्तन्नित्यत्वं च सिद्ध्यतीति प्रयोजनमनुसंन्धायाकृतेः शब्द वाच्यत्वं निरूपयति। नचाकृतिस्तु क्रियार्थ-त्वादितिसूत्रे आकृतिसद्भावम् सूत्रकारः स्वयं व्यवस्थापयिष्यतीति किमर्थमत्र भाष्यकारप्रवृ-त्तिः। सत्यं व्यवस्थापयिष्यति किन्तु प्रकार-भेदेन आकृतेः शब्दार्थत्वाभावो द्विधा। अ-

सत्वादनुपयोगा द्वा तत्र द्वितीयं प्रकारमा-
श्रित्य व्यक्त्या सह बलाबलसिद्ध्यर्थ मुपयोग-
प्रदर्शनद्वारा सूत्रकारो ऽस्याः शब्दार्थत्वं व्य-
वस्थापयिष्यति भाष्यकार स्तु असद्भावपक्षं
निराकृत्य तस्याः सद्भावं प्रतिपादयतीति
न विषयपौनरुक्त्यम्। निराकरणप्रकारभेदात्।
ननु जात्याकृतिव्यक्तय इतिसूत्रे जातिपदो-
पादाना त्तदतिरिक्तावयवसंस्थानपराया आकृते
रनित्यत्वा त्तद् द्वारा कथं शब्दार्थसंबन्धनित्य-
त्वम्। व्यक्तिराक्रियते निरूप्यते ययेति व्युत्पत्या
आकृति शब्दस्य सामान्यपरत्वात्। भिन्ने-
ष्वभिन्नं छिन्नेष्वच्छिन्नमिति महाभाष्यकारो-
क्तिदिशा समान्यं न प्रतिपिण्डं भिन्नं किन्तु
व्यक्तिविशेषेषु व्यावर्त्तमानेष्वपि व्यक्त्यन्त-
रे ऽनुवर्त्तते इति अनुवृत्तप्रत्ययासाधारणं
कारणमिति लक्षणमपि तस्या निर्वहति गौतम-
सूत्रे आक्रियते उत्पाद्यते ऽवयवो ययेति व्युत्प-
त्या ऽऽकृतिपदमवयवसंस्थानपरं तथाचावयवा-

र्थभेदविवक्षया ऽऽकृतिपदमुभयार्थकं प्रकृते तु सामान्यार्थकमेव तस्यैवात्रोपयोगादितिभावः अत्र सौगताः पृथक्त्वे व्यक्तितो जाति र्दृश्येत पृथगेव सा अभेदे व्यक्तिमात्रं स्याद् द्वेधाचे न्नविरोधतः। अयमर्थः जाति र्व्यक्ते भिन्ना अभिन्ना उभयात्मा वा नाद्यः गवाश्ववद्भेदेनोपलब्धिप्रसङ्गात्। किंच भेदेपि सा सर्वगता असर्वगता वा आद्ये गोत्वादे र्गवादाविवाश्वादावप्युपलब्धिः स्यात् तत श्चाव्यावर्त्तकत्वं स्यात् अन्त्ये क्वचिद् गवादावपि नोपलभ्येत। नचासर्वगतत्वेऽपि व्यक्तिमात्रगतत्वाङ्गीकाराददोष इति वाच्यम्। व्यक्त्युत्पत्तेः पूर्वं तत्रदेशेऽवर्त्तमानाया जातेरुत्पन्नायां व्यक्तौ सम्बन्धासंभवात्। नच व्यक्त्यासह तत्र जातिरुत्पद्यत इति शक्यं वक्तुं तस्या नित्यत्वाभ्युपगमात्। नच तद्व्यक्तिसंबन्धाय व्यक्त्यन्तरादायाति अमूर्तत्वेन क्रियाशून्यत्वात् यत आयाति तत्र तदनुपलम्भापत्ते श्च नचांशभेदेन पूर्वोत्तरव्यक्तिसद्भावसमर्थनं

निरंशत्वात् अपि च व्यक्तिनाशे का गतिः नहि सहैव व्यक्त्या नश्यति तस्या नित्यत्वाङ्गीकारात् नापि व्यक्तिनाशोत्तरं तत्राश्रये वर्तितुमर्हति व्यक्तिमात्रसमवेतत्वस्वीकारात् व्यक्ताविव तत्रोपलब्धिप्रसङ्गाच्च नचाश्रये विनश्यति विहंगमादिव दन्यत्र प्रयाति अक्रियत्वात् अन्यत्र प्रयाणेऽपि यत्रव्यक्तौ समवेता तत्रैव पुनः समवैतीति स्वीकारे द्विरुपलब्ध्यापत्तेः अन्यत्र समवाये तत्रापि तदुपलंभापत्तेः तत आव्यावर्तकत्वापत्या तदङ्गीकारवैयर्थ्यम् । नापि द्वितीयः । व्यक्तिमात्रस्यैव सत्वप्रसंगात् तच्चास्माभिरपीष्यत एवेति न विवादः । नापि तृतीयः तमःप्रकाशयोरिवात्यन्तविरुद्धयो र्भावाभावयोरेकत्र समुच्चयासम्भवात् । नहि स एव चैत्रः स्वस्माद्भिन्नो भिन्नश्चेति केनाप्यविकलकरणेन वक्तुं शक्येत नच प्रकारान्तरसम्भव इति जातिस्वीकारोऽविद्याविजृम्भित एव तथाचोक्तं तैरेव "नायाति नच तत्रासी दस्ति पश्चा न्नचांशवत् । जहाति

पूर्वं नाधारमहोऽव्यसनसन्ततिरिति'। किंच प्रतिव्यक्ति जातिः किं कात्स्न्र्येन वर्तते उतैकदेशेन न तावदाद्यः एकत्रैव व्यक्तौ कात्स्न्र्येन वर्तमानाया व्यक्त्यन्तरे ऽसत्वापत्तेः नहि एकैव जातिरनेकत्र कात्स्न्र्येन वर्तितुं शक्नोति। असम्भवात् नाप्यन्त्यः अनवयवाया अंशासंभवेनैकांशेनेत्युक्तेरेवासंभवात्। आरम्भकावयवस्यैकांशपदार्थत्वात् जातेश्चानित्यत्वेनावयवानभ्युपगमात्। किञ्च व्यक्तिभिन्नाया जाते व्यक्तौ वृत्तिस्वीकारे कुण्डे वदरमितिवत् गविगोत्वमितिप्रभेदोल्लेखिप्रत्ययःस्या न्नचैष कस्यचिदानुभविकः किन्तु अयं गौरित्यभेदोल्लेखिप्रत्यय एव। अथ व्यक्त्यात्मैव जाति र्न ततो वस्तुतो भिन्नेति तदभेदोल्लेखि प्रत्ययो युज्यत एवेति मैवं अत्यन्तभिन्नयो जातिव्यक्त्यो स्तमःप्रकाशयोरिवाभेदासंभवात्। अन्यथा व्यक्तेरिव जातेरपि जन्यत्वानित्यत्वानेकत्वाद्यापत्तेः। नापि जातौ प्रमाणम्। तथाहि न तावत्प्रत्यक्षम्। जाते र्नित्यत्वात् नित्यंहि न

कस्मैचि त्कायार्थं प्रभवति तच्चेच्छक्तस्वभावं स्या त्तदा सततंकार्योत्पादः स्या दशक्तस्वभावत्वे तु न कदाचित्कार्योत्पाद इति नचाजनकस्य विषयत्वं तज्ज्ञानजनकत्वस्यैव तद्विषयत्वात्। तस्मा त्स्ववासनानिर्मितविकल्पाकारमात्रं सामान्यं न वस्तुसदिति। नच यथा ज्ञानभेदसिद्धये व्यक्तिपदार्थः स्वीक्रियते तथा घटपटादिव्यावृत्तिबुद्धये सामान्यपदार्थोपि स्वीक्रियतामिति वाच्यम्। सामान्यं विनापि व्यक्तिज्ञान सामर्थ्यादेव तद्व्यवहारोपपत्तेः। नच विषयं विना कथं तद्व्यवहारः। व्यवहारे विषयसत्तापेक्षाभावात्। सत्यपि विषये तदज्ञाने न तद्व्यवहारः। असत्यपि तस्मिन् ज्ञानदशायां तद्व्यवहार इत्यन्वयव्यतिरेकाभ्यां ज्ञानमात्रस्यैव व्यवहाराङ्गत्वोपगमात् अत एवातीतानागतवस्तुव्यवहारः प्रत्यक्षव्यवहारोपि शुक्तिरजतादौ बाधकज्ञानानुदये दृश्यत एव अत्रबाधकज्ञानं नोदेष्यतीत्यत्र मानाभावः।

अविसंवादिव्यवहारोपि विकल्पमात्रादेव मणि-
प्रभायां मणिबुद्ध्या प्रवर्तमानस्य मणिलाभा-
दुपपद्यते। तस्मा न्न जातौ प्रत्यक्षं लिङ्गाभा-
वा च्च नानुमानमपि व्यावृत्तेषु अनुवृत्तप्रत्य-
यान्यथानुपपत्तिः प्रमाणमिति चेन्न अन्यथैवो-
पपत्तिप्रदर्शनात्। अपिच व्यावृत्तेषु समाना-
कारमुल्लि खन्ती धीः स्वकारणमात्रमाक्षिपे न्न
सामान्यमेव कारणं च यदनन्तरं सा जायते
तदेव। जायते पुनरियं स्वलक्षणविषयदर्शनान-
न्तरं तत स्तासामेव व्यक्तीनांस्वविषयज्ञानजन-
नद्वारा सामान्याकारप्रत्ययजननसामर्थ्यं कल्प-
नीयं नेत्रालोकमनःप्रभृतीनामेकज्ञानजननसा-
मर्थ्यव न्न किमपि दृष्टविरुद्धम्। किंच सत्याश्रये
सामान्यं स्या दाश्रय एव तु निरूप्यमाणः
सिकताकूपव त्स्वयं निपततीति क्व तत् तथाहि।
किं पृथिव्यादिचतुर्विधपरमाणव स्तदाश्रयः
किम्वा तद्व्यतिरिक्तः कश्चनावयवी नाद्यः अती-
न्द्रियेषु परमाणुषु कस्यचिदनुवृत्ताकारप्रत्यया-

सम्भवा तत्र तदङ्गीकारप्रयोजनाभावात् । न द्वितीयः तदारम्भानुपपत्तेःआरम्भका हि परमाणवः एकैकं मिथः संयुज्यारभेरन् तत्रैकः परमाणु रपरेण संयुज्य द्व्यणुकमारभेत तथा सति तदीयसंयोगः परमाण्वन्तरे सर्वात्मना भवति एकदेशेन वा प्रकारान्तराभावात् । आद्ये अणुः परमाण्वन्तरे गुप्तावसिवल्लीनः स्याद-न्यथा सर्वात्मना संयोग एव दुर्घटः । तथा च द्व्यणुकोत्पत्ति र्न स्यात् तदनुत्पत्त्या परंपरयाऽवयविनो नुत्पत्तिरेव कारणानुत्पादात् न द्वितीयः निरवयवत्वेनारम्भकावयवानिबन्धनैकदेशाभावात् । किंचावयविनः स्वावयवेषु वृत्तिरपि दुर्वचा तथाहि अवयवेषु अवयवी किमेकदेशेन वर्तते सर्वात्मना वा नाद्यः आरम्भकावयवातिरिक्तावयवाभावात् । नापि कार्त्स्न्येन अवयवान्तरे तदभावप्रसङ्गात् । एकावयवदर्शने तदुपलब्धिप्रसंगात् । एकस्यावयवस्य कम्परागाभ्यामवयविनोपि कम्परागापत्तिः । तथाऽ वय-

वान्तरे कम्परागाभावा त्तस्मि न्कात्स्न्येन समवे-
तस्य तस्य कम्परागाभावापत्तिश्चेति युगपदे-
कस्मिन् विरुद्धधर्मद्वयसमावेशासम्भवेन तदस-
त्वस्वीकार एव युक्तः नचावयविनो ऽभावे एकः
स्थूलो महानिति बुद्धि र्नस्यात् परमाणूनां तद-
सत्वादिति वाच्यम्। पूर्वोत्तरभावेन निरंतर-
समुत्पन्नपरमाणुपुञ्जस्यैव तादृशबुद्धिविषयत्वा
त्। वृक्षसमुदायो वनमितिवदेकत्वोपपत्तेः एवं
चावयव्यभावा न्न सामान्यं। नच स्वलक्षणा-
न्तरमेव सामान्याकारप्रत्ययजनकत्वे तेषामति-
विलक्षणत्वा त्कानिचि द्घटाकारविकल्पं जनयंति
कानिचित्पटाकारविकल्पं जनयन्ति इत्यत्र
नियामकाभावा त्सर्वस्मा त्सर्वविकल्पापत्त्या तद्-
व्यवस्था न स्यादिति वाच्यम्। सत्यं सामान्यस्वी-
कारेऽपि अत्यन्तविलक्षणासु घटव्यक्तिषु घटत्व-
संबन्धो न पटव्यक्तिषु इत्यत्र नियामकाभावः।
एवं घटसंस्थानस्यैव तद्व्यञ्जकत्वं न पटसंस्था-
नस्येत्यत्रापि नियामकाभावः। अथ स्वभावा-

देव कासांचिद् व्यक्तीनां केनचित्सामान्येन संबन्ध इति नानुपपत्तिस्तर्हि स स्वभाववादो मत्पक्षेऽपि न दण्डवारित इति सममन्यत्राभिनिवेशादिति। यदि घटादिव्यक्तिषु घटत्वादिसंबन्धसिद्ध्यर्थं सामान्यान्तरमनुश्रित्य तदवच्छेदेन घटत्वादिसम्बन्धो व्यवस्थाप्यते तस्य च घटादौ विरहं स्वीकृत्य तद्व्यवहारवारणेन व्यवस्थोपपाद्यते। तर्हि घटत्वादिसम्बन्धव्यवस्थापनाय कल्पितसामान्यान्तरस्य घटादिव्यक्तावेव संबन्धो नपटादिव्यक्तावित्यत्र नियामकाभावात् पटादिव्यक्तौ अपि स्वीकारापत्त्या तत्रापि पुनः घटत्वादिसंबन्धाङ्गीकारापत्त्या संदाऽव्यवस्था। तदर्थं पुनः सामान्यान्तरस्वीकारे तु तदर्थं पुनः पुनः सामान्यान्तरस्वीकरापत्तावनवस्था तस्मात्सामान्यं नकिंचिद्वस्तु किन्तु विकल्पमात्रमित्येव युक्तमिति अत्रोच्यते बुद्धिरेव भगवतो नः पदार्थसदसद्भावे प्रमाणम् नान्यत् तदिह घटादिषु अश्वादिषु

चानुवृत्तव्यावृत्ताकारा बुद्धि र्जायते सर्वस्य दोष-बाधकज्ञानाभावा न्नेयं भ्रान्तिः नचास्याः प्र-त्यक्षधियो बाधनायानुमानादि प्रभवति। प्रत्य-क्षपूर्वकत्वादनुमानादेः। प्रत्यक्षबाधे कारणा-बाधादनुमानादेरुत्पत्तिरेव न स्यात्। तस्माद्घ-टपटादिषु अनुवृत्तव्यावृत्ताकारं जायमानं प्रत्यक्षं द्व्याकारं वस्तु ग्राहयति सामान्याकारं विशेषाकारं च सामान्याकारं ग्राहयन् प्रत्ययो-ऽनुवृत्तः विशेषाकारं ग्राहयन् व्यावृत्त इति निरूप्यते सामान्याकारमात्रग्रहणे घटज्ञाना त्पटेऽपि प्रवृत्त्यापत्तेः पटभेदस्य तेनाग्रहणा-दथवा पटे इव घटे ऽपि तत्प्रवृत्ति र्न स्या-द्विशेषमात्रग्रहणे तु अनुवृत्तप्रत्ययाभावेन तज्जा-तीयत्वाज्ञानादिष्टसाधनतानुमित्यनुत्पत्त्या तज्जा-तीये प्रवृत्त्यनुपपत्ति रनुमानाद्युच्छेदापत्ति श्च तथाच यद्वस्तु तद्भिन्न मभिन्नं वा सामान्यमपि यदि वस्तु स्या त्ततो ऽनेनापि भिन्नेना भिन्नेन वा भवितव्यमिति त्वदुक्तिरपि कथं सङ्गच्छेत

वस्तुत्वस्य सामान्यधर्मस्य त्वया नङ्गीकृतत्वा-त्तत्र भेदाभेदोभयव्याप्तत्वावधारणस्या-शक्यतया व्यापकीभूतभेदाभेदोभयनिवृत्त्या व्याप्यस्य वस्तुत्वस्य निवृत्ति र्दुरुपपादा स्यात्। तस्मा त्सामान्यं त्वया पि स्वीकार्य-म्। नच वस्तुत्वस्योपाधिरूपस्य स्वीकारेऽपि न जातिस्वीकार स्तद्भिन्नत्वादिति वाच्यम्। स्वलक्षणमात्रवादिनां जातिवदुपाधेरप्यनिष्ट-त्वात्। उपाधिस्वीकारे तद्वज्जातिस्वीकारापत्तेः तयो र्मूलस्यैक्यात्। तस्मा त्सर्वानुभवसिद्धं सामान्यमनिच्छतापि सौगतेनाभ्युपेयमेवेति। नन्वस्तु सामान्यं भेदाभेदविकल्पस्य तु किं समाधानं न किमपि कथं तर्हि तत्सिद्धिः दृष्ट-त्वादेव नहि दृष्टे किंचिदनुपपन्नं नाम यद्‌ यथा दृश्यते तदसति बाधके यथादृष्टमेव म-न्तव्यम्! ननु किं शुक्तिरजतज्ञानमपि यथा-दृष्टमेव मन्तव्यं न विशेषात् तत्र हि नेदं रजतमिति बाधधी र्जायते। अत्र तु भेदाभे-

दसद्भावे न किमपि बाधकं दृश्यते। ननु किं भावाभावयो र्विरोध एव नास्ति। न नास्ति किन्तु अपेक्षाभेदेनोभयोरत्र समावेशः। गवादिसामान्यरूपणाभेदः प्रतीयते गौरयं शावलेयः यदा तु जाति र्व्यक्त्यन्तरात्मना निरूप्यते तदेयं व्यक्ति स्ततो भिन्नरूपा प्रतीयते योसौ बाहुलेयो गौः सोयं शावलेयो न भवतीति। एवं द्रव्यगुणयोरपि भेदाभेदौ बोध्यौ। द्रव्यस्य गन्धादिगुणान्तरेण रूपादिभ्यो भेदो द्रव्येण चाभेदः। तथा वयविनः स्वरूपेणावयवैरभेदो ऽवयवान्तरेणावयवान्तरै र्भेदः। यथा दीर्घह्रस्वादीनां विरुद्धस्वभावानामप्यपेक्षाभेदा देकत्राप्यविरुद्धत्वं प्रतीतिबलादङ्गीक्रियते तथाभेदाभेदयोरपि द्रष्टव्यं। प्रतीत्यविशेषादिति शास्त्रदीपिका। जाते र्व्यक्त्यात्मकत्वनिरूपणेन सर्वगतत्वाद्याक्षेपोपि समाहितः कथम् सर्वगतापि जाति र्न सर्वत्रोपलभ्यते तद्व्यञ्जकाभावात् व्यञ्जिका व्यक्तिः यथा गोत्वव्यञ्जिका सास्ना-

दिमद्व्यक्तिस्तत्रैव गोत्वप्रतीतिः संयुक्तसमवायस्य जात्युपलम्भकसंसर्गस्य तत्रैव सत्वात् अन्यत्र व्यञ्जकसंयुक्तसमवायसन्निकर्षाभावान्न तत्प्रत्यक्षापत्तिः नच विरुद्धमिदमभिधीयते जातिः सर्वगतापि व्यक्त्यभिन्ना यदि व्यक्त्यभिन्ना न तर्हि सर्वगता व्यक्तेरसर्वगतत्वात्। अथ सर्वगता न तर्हि व्यक्त्यभिन्ना अन्यथा व्यक्तेरपि सर्वगतत्वापत्तेस्तथाच सर्वगता व्यक्त्यभिन्नेति मिथो विरुद्धम् न भेदस्यापि स्वीकारात् यदि एकान्ततोऽभेदः स्यात्तदाऽयमाक्षेपः स्यादपि भेदांशमादाय सर्वगतत्वादेः समर्थनात्। यच्च जातिर्व्यक्तौ कार्त्स्न्येनैकदेशेनवा वर्त्तते इति विकल्पः सोऽप्यसंगतः। एतत्प्रश्नावकाशाभावात्। अयं प्रश्नः सावयवेषु युज्यते यत्र कार्त्स्न्यैकदेशयोः सम्भवः। निरवयवजातौ तु कार्त्स्न्यैकदेशाभावादीदृशः प्रश्नो नाविकलस्य सुधियः शोभते। नच निरवयवेप्याकाशे प्रदेशव्यपदेशो भवति यथा

इह प्रदेशे आकाशे शब्द इति न तस्य काल्प-निकत्वाद् बुद्ध्या काशे प्रदेशं परिकल्प्य तथा व्यपदेशः। नच काल्पनिकप्रदेशे न वस्तु-स्थितिः कल्पनाया निरंकुशत्वात्। तस्माद् व्यक्तौ जाति वंर्तते एतावन्मात्रं प्रमाणविषयः तावन्मात्रं व्यक्तव्यं प्रामाणिकेन यथा प्रमा-णावगतं चस्त्रीकार्यम् नतु कात्स्न्यादिविशेषः। तस्य तत्रासत्वेन प्रमाणागोचरत्वात्। यदपि आश्रयाभावा त्क सामान्य मित्युक्तं तदति-स्थवीयः अवयविन एकत्वात् बहुषु अवयवेषु एकोऽवयवी व्यासज्य वर्तते। अपि च एकोव-यवी अनेकेषु अवयवेषु वर्त्तते इति ब्रुवाणो न कात्स्न्यैकदेशानुयोगमर्हति विरुद्धत्वात्। यदि एको वयवी बहुषु कात्स्न्येन वर्तेत तर्हि नैकमने-कत्र वर्तेत। किन्तु अनेकमनेकत्र वर्तेत इति स्या त्तच्च विरुद्धम्। अधिकरणस्यैव व्याघा-तात्। एवमनेकवृत्तेः प्रत्यवयवमेकदेशेन वृत्ति-रित्यनुयोगे प्यनेकस्यानेकत्र वृत्तिरित्येवाप-

न्नम् । ननु एकस्यानेकत्र वृत्तिरित्यनुयोगाधिकरणाबाधकत्वादयं प्रश्नः सर्वथा नुचित एवेति । किं यथाजाति र्व्यक्तौ वर्त्तते तथैवावयवी अवयवेषु ? न तथैव किन्तु जातिः प्रत्येकं वर्तते अवयवी तु व्यासज्येत्यस्ति विशेषः । प्रत्येकव्यक्तिदर्शनेन जातेरुपलम्भात् सा प्रतिव्यक्ति वर्तते ननु कात्स्न्येन एकावयवदर्शनेनावयविन उपलब्धिर्विरहा दनेकावयवोपलब्धावेव तदुपलब्धे रवयवेषु व्यासज्य वर्तते इति कथ्यते गवाद्येकव्यक्तिदर्शनेन गोत्वादिबुद्धिवदेकतन्तुदर्शनेन पटबुद्धि र्न कस्यचिदनुभवसिद्धेति तत्वम् इदं पुनरिहावधेयं लोके हि स्रक्सूत्रं कुसुमेषु वर्तते इति व्यपदिश्यते तत्र नैकदेशेन सूत्रं तत्र वर्तते किन्तु तदवयवाः सूत्रं च कुसुमेषु इत्येवानुभवः तथाच सूत्रस्य कुसुमेषु वृत्ति न कात्स्न्यैकदेशाभ्यां किन्तु स्वरूपतः । एवमवयविनो ऽवयवेषु स्वरूपत एव वृत्तिः अयं पुनः विशेषः यत्सूत्रं सावयवमिति कुसुमेषु सूत्रं

तदवयवाश्च वर्तन्ते। अवयविन स्तु अवान्तराभावा स्स्वावयवेषु नावयवा वर्तन्ते किन्तु स्वरूपतः स्वयमेवेति न कस्यचिद्वृत्तिः कात्स्न्यैंकदेशव्याप्ता येन व्यापकीभूतकात्स्न्यैंकदेशनिवृत्या वयविनोऽवयवेषु वृत्ति र्निवर्तेत। किन्तु स्वरूपतोऽवयवेषु अवयवो वर्तते एवेति भावः। यदपि नित्याया जाते ज्ञानजननस्वभावचोद्यं तदपि न नित्यस्यापि ज्ञानजननस्वभावाङ्गीकारात्। यच्च स्वलक्षणान्येव स्वविषयज्ञानजननद्वारा घटादिविकल्पं साधयिष्यन्ति किं जातिकल्पनयेति तदपि न। जातेः प्रत्यक्षप्रमाणसिद्धत्वेन कल्पनाविरहात्। 'तदतद्रूपिणोभावा स्तदतद्रूपहेतुजा' इतित्वदीयसिद्धान्ता दत्यन्तविलक्षणानां स्वलक्षणानामेकज्ञानजननसामर्थ्यासम्भवात्। अस्मन्मते तु स्वस्वकारणाधीनेन तादात्म्येन समवायेन वात्यन्तविलक्षणासु व्यक्तिषु सामान्यसंवन्धः सम्भवतीति नाव्यवस्थेत्यलमतिप्रसंगेन। अपोहनिराकरणं वार्तिके द्रष्टव्यम्

नेह प्रतन्यते विस्तरभया दथ भाष्यव्याख्यानम्। सास्नादिविशिष्टाकृतिरिति नन्ववयवातिरिक्तस्यावयविनः स्वीकाराद्गोत्वादिजातेरवयविवृत्तित्वेनावयववृत्तित्वाभावात्सास्नादिविशिष्टाकृति रितिभाष्य मनुपपन्नमितिचेन्न सास्नादीनामेकावयविसंबन्धितया गोत्वादे रुपलक्षकत्वा दन्यथागोत्ववत्सत्वादेरपितत्रसत्वेन तद्व्यवच्छिन्नगोत्वादे र्गोपदादिवाच्यत्वावधारणं दुःशकंस्यात् तदुपादाने न सत्वादिषु गोपदवाच्यत्वप्रसंगः सत्वस्याश्वादावपिसत्वेन तत्रसास्नादेरभावान्न तदुपलक्षकत्वम् एतेनसास्नाद्युपादानाद्विशिष्टस्यैव शब्दार्थत्वं नाकृतेरित्यपास्तं तस्योपलक्षकतयैवोपादानात् यदपि गोत्वस्य स्वातन्त्र्येण ज्ञानं न भवतीति मत्वा तत्परिचायकसास्नात्वादिसामान्यप्रदर्शनाय सास्नादिविशिष्टाकृतिरित्युक्तं भाष्यकारेणेति केचिदाहुस्तन्न को गोशब्दार्थ इति प्रश्ने सत्वादिविविक्तगोत्वस्य प्रकारान्तरेण दर्शयितुमशक्यतया

तत्परिचयाय सास्नादीनामुपलक्षणपरतयोपा-
दानात् अन्यथा गोत्वज्ञानाय सास्नात्वादेस्त-
स्यापि सामान्यत्वाविशेषात्तज्ज्ञानाय पुनः सामा-
न्यान्तरापेक्षाया मनवस्था स्यात् दूरस्थितगवा-
दिव्यक्तेः सास्नात्वादेर्विरहेऽपिग्रहणाद् घटस्थनी-
लादे रिवाविशेषणत्वाभावात् एवंचावयविनि
महत्त्वग्रहणेऽवयवानां यथासत्तामात्रेणोपयो
गित्वं नतुज्ञानद्वारा तथावयविनि गवादौ स-
मवेतस्यगोत्वस्य ग्रहणे सास्नादीनां सत्तामात्रे-
णैवोपयोगित्वं संयुक्तस्यावयविनीव संयुक्तसम-
वेतस्य चक्षुःसन्निकर्षस्य तत्राप्यविशिष्टत्वात्
अन्यथावयवानां परमाणूनामग्रहणादवयविनो
ग्रहणं न स्यादिति ननुसास्नादीना मभिव्यंज-
कत्वानुपगमे तदग्रहेऽपि गोत्वग्रहःस्यादितिचेन्न
अन्यत्रतत्सत्त्वानभ्युपगमात् तद्ग्राहकसन्नि-
कर्षाभावाच्च गोत्वग्रहणे संयुक्तसमवायस्ये व
तदन्तर्गत संयुक्तसंन्निकर्षस्यापि सत्वेन नान्तरीय
तयासास्नादिग्रहणं नतु तद्धेतुतया यद्वा न व्यक्ते

रत्यन्तभिन्ना जातिः किन्तुतदात्मेति बोधनाय- सास्नादिविशिष्टाकृतिरित्युक्तं भाष्यकृता तथा सास्नादेर्विशेषणात्वमेव नतूपलक्षणत्व मवय- वावयविनोरिव जातिव्यक्त्योरपि भेदाभेदपक्ष एव सम्मतः ननुजाति र्नव्यक्तिभिन्ना तद्व्यतिरे- केणाज्ञायमानत्वाद् वृक्षसमुदायातिरिक्तवनादि वदित्यनुमानेन सौगतैर्जातेर्निराकरणाद् वाच्य- त्वसिद्धये पूर्वं जातिरेव साधनीयेत्याशंक्य प्रत्यक्ष- प्रमाणसिद्धत्वान्न सा साध्यतामर्हतीत्यभिप्रय- न्नाह नप्रत्यक्षासतीसाध्याभावितु मर्हतीतिभा- ष्यम् तथाचप्रत्यक्षसिद्धत्वा त्सौगतानामाकृत्य- भावानुमानं कालात्ययापदिष्टमिति लोकप्रसिद्ध- पदार्थे तर्काभासेन परोक्तं दूषण मुद्धृत्य तेनैव- व्यवहर्तव्यंमीमासकैर्नत्वपूर्वपदार्थसाधनाय प्रय- तनीयमितिभावः नचाकृतेः प्रत्यक्षत्वे तत्रविवा- दएव न स्यात् नहिप्रत्यक्षंघटे क श्चिद्विवदते इति वाच्यम् वाह्यपदार्थापलापिनां सौगतानां प्रत्यक्ष- प्रमाणसिद्धेप्यर्थे कु तर्केण विवाददर्शनात् तेषा-

माकृतौविवादोऽश्रद्धेय एव ये पुनः प्रामाणिका महाजनाः तेषां नाकृतौ विवादः सर्वेभ्योब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यादौ तद्व्यवहारदर्शनात् विशेषविहितं तक्रदानं सामान्य वचनप्राप्तदधिदानस्य निवर्त्तकं ब्राह्मणशब्दस्य जातिवाचकत्वाभावेतु सामान्यविशेषभाव एव दुर्घटइति स्पष्टमन्यत्र। आकृतेःप्रत्यक्षत्वमेवोदाहरणेन स्पष्टयति रूचकःस्वस्तिको वर्द्धमानक इति अत्र रुचकत्वादिजातिः प्रत्यक्षेणैव गृह्यते तदाहप्रत्यक्षामिति केचित्तु रुचकादिदृष्टान्तेनावयवसंस्थानरूपैवजाति रभिमता भाष्यकृत इत्याशय मुन्नावयन्ति तत्तु च्छम् तादृशाकृतेःप्रति व्यक्ति भिन्नत्वेनैकत्वासम्भवात् अनलानिलादौतादृशाकृत्यभावादनलत्वानिलत्वादे र्जातित्वाभावप्रसंगाच्च अवयवसंस्थानत्वेन गवादिसंस्थानस्य सर्वस्य ग्रहणेतु अश्वादिसंस्थानस्यापि तेन रूपेण ग्रहणापत्या तत्रापि गवादिप्रत्ययप्रसंगः सत्ताव्याप्यजात्याश्रयत्वंतु नगोत्वादे रस्ति

मनुष्यादिचित्रेऽपि तादृशाकृतिसद्भावात्तत्रापि तत्प्रतीत्यापत्तेः तस्मात्संस्थानातिरिक्तैवजातिः स्वीकार्येति द्रव्यगुणकर्मणां सामान्यमात्रमाकृतिरितिभाष्येणावयवसंस्थानातिरिक्तैवजातिरितिस्पष्टमेव लभ्यते तत्रावयवसंस्थानासंभवात् । रुचकादितनयगतसुवर्णत्वजात्यभिप्रायेण वोदाहरणत्रयम् नतु रुचकत्वादिजातिप्रदर्शनायेति संस्थानपक्षत्वं सुदूरनिरस्तम् एकस्यसुवर्णत्वस्य भिन्नरुचकादितृतयावयवसंस्थानत्वासम्भवात् । वस्तुतस्तुजातिव्यवहारो महाजनानामस्तीत्येतत्प्रदर्शनाय महाभाष्यकारोक्तरुचकाद्युदाहरणत्रयमितिप्रतीमो वयमिति संदेहदर्शनादपिजातेः प्रत्यक्षत्वं तथाहि दूरात्पुरुषं दृष्ट्वा संशेते जनोयं ब्राह्मणो नवेति सन्देहश्च साधारणधर्मदर्शनात्साधारणधर्मश्च नरत्वम् ब्राह्मणत्वतदभावोभयसहचरितत्वादिति नरत्वं प्रत्यक्षमित्यङ्गीकार्य्यं नच सामान्यस्य प्रत्यक्षत्वोपगमे नरत्ववद् ब्राह्मणत्वस्यापि प्रत्यक्षत्व मेव-

स्यादितिकथं संशयः तत्परिचायकाभावात् परिचायकश्च मातापितृसंबंधः तज्जाज्ञानेऽयं ब्राह्मण इतिनिश्चयः क्वचिच्च राजरचिताचाराद्ब्राह्मणत्वादिनिश्चयोयं देशापेक्षः कालापेक्षस्तु वसंताग्न्याधानेन रूपाद्यपेक्षैरिन्द्रियैः सुवर्णत्वादिनिश्चयः इतिसामान्यस्य कात्स्न्यैकदेशाभ्यां वृत्तेराक्षेपः पूर्वमेव समाहितः प्रयोगश्चाकृतिसद्भावे पिण्डेषु गोबुद्धिरेकालम्बना गवाभासत्वादेकरूपत्वाद्वा यद्गवाभासमेकरूपं वा ज्ञानं तदेकालम्बनं यथैकपिण्डे गोबुद्धिरिति एवमनुमानान्तरमपि बोध्यम् वृक्षसमुदायातिरिक्ताभावेऽपिवनमितिप्रतीतिवदाकृते रभावेऽपि तद्वगाहिप्रत्ययो भ्रम एवेत्याशयेनाह व्यामोह इति कारणदोषे बाधकज्ञाने चासति प्रत्ययस्य भ्रमत्वाभावादाह नेति। सौगताः अर्थं विनापि प्रत्ययं दर्शयन्ति पङ्क्तिर्यूथमिति निराकरोति नेति असंबद्धमिति ननुकथमिदमसंबद्धं व्यक्त्यतिरिक्तजातिसाधनव्यभिचारग्राहकत्वेन संबद्धत्वात् सि-

ध्वान्तिना जातिर्व्यक्त्यतिरिक्ता व्यतिरेकेण गृह्यमाणत्वादिति साधने प्रयुक्ते तत्र सौगतो व्यभिचारं ग्राहयति पंक्तिर्यूथमित्यादि अयमभिप्रायो यथा वृक्षातिरेकेण जायमाने वनप्रत्ययेऽपि नातिरिक्तार्थसिद्धिः तथा व्यक्त्यतिरेकेण जायमानजातिप्रत्ययेपीति व्यभिचारित्वाद्धेतो र्नातिरिक्ताकृतिसिद्धिरिति संबद्धत्वमेवेतिचेन्न प्रत्यक्षविरोधस्यैवप्रदर्शितत्वेन जातिसाधनोपन्यासाभावात्; पूर्वोक्तानुमानेन यदिजातिसाधनं मयोपन्यस्येत तदा तत्र व्यभिचारग्राहकत्वेनेदं वचनं संबद्धं स्यात् मयातु प्रत्यक्षविरोधः प्रदर्श्यते रुचकः स्वस्तिक इत्यादि प्रत्यक्षमेवजातिग्राहकं तत्र व्यभिचारप्रदर्शनमसंबद्धमेव तस्या व्यभिचारापेक्षाविरहात्। अत्रोच्यते सौगतै र्हि वनबुद्ध्यादि दृष्टांतेन सामान्यस्यासत्वं साध्यते तत्र भाष्यकारेण रुचकइत्यादि जातिग्राहकप्रत्यक्षेण बाध उदीरितः ततस्तेन वनबुद्धिवज्जातिप्रत्यक्षमप्याभास एवेत्यभिप्रायेण यूथः पङ्क्तिरित्यु-

क्तं तत्र भाष्यकारेणोच्यतेऽसम्बद्धमिदं वचनं न-
हि वनबुद्धे र्मिथ्यात्वे जातिबुद्धिर्मिथ्या भवितु
मर्हति रूपरसादिबुद्धिवदन्यत्वात् नच वनबु-
द्ध्यपेक्षया जातिग्राहकप्रत्ययो को विशेषः येन
वनबुद्धिर्मिथ्या न जातिबुद्धिः प्रत्यक्षस्योभयत्र
समत्वादितिवाच्यम् तत्रदूरत्वादिदोषस्य सत्वेन
तादृशबुद्धे र्मिथ्यात्वेऽपि जातिग्रहे तदभावात्
एवंच दोषसद्भावासद्भावयो रेव विशेषत्वम्
सन्निकृष्टस्य पुनःवृक्षेषु एकत्वबुद्धि र्निवर्तते अतो-
दूरत्वनिबन्धनमेव वृक्षेषु एकत्वबुद्ध्या वनमितिप्र-
त्ययोऽतः आभास एव जातिबुद्धिः सन्निकृष्ट-
स्यापि दृश्यत एवेति नासावाभासः ननु वनमध्य-
मध्यासीनस्यापि वनशब्दाज्जायमानाया बुद्धेः
कथमाभासत्वं तत्रदूरत्वादिदोषाभावात् तादृश-
दोषविरहेपि तद्बुद्धे र्मृषात्वे जातिबुद्धे रपि किन्न
मृषात्वमिति चेत्सत्यम् या दूरस्थितस्य वृक्षै-
कत्वग्रहनिबन्धनतदतिरिक्तवनविषयिणीन्द्रियस-
न्निकर्षजा बुद्धिः दूरत्वादिदोषेण सा भ्रांतिरेव या

पुनर्वनमध्यमध्यासीनस्य शब्दजा वनैकत्वावगाहिनी बुद्धिः तस्याऽपि प्रत्यक्षादिमूलाभावाद्भ्रमत्वमेव ननु शब्दस्यैव मूलत्वात्किं मूलांतरान्वेषणचिन्तया लौकिकशब्दस्य प्रमाणान्तराधिगतार्थज्ञापकत्वेनानुवादकतया प्रामाण्यानभ्युपगमात्। अन्येतु शब्दजाया वनैकत्वावगाहिबुद्धेःप्रमात्वेन तद्दृष्टांतेन सामान्यावगाहिप्रत्यक्षस्याभासीकरणमशक्यमित्याहुः नच प्रमाणान्तरसंवादाभावान्मिथ्यात्वम् रसनेन्द्रियजन्यरसादिसाक्षात्कारस्येन्द्रियांतरेण संबादाभावेऽपि प्रामाण्याभ्युपगमात् सत्यत्वाय प्रमाणांतरसंबादस्यानपेक्षितत्वात्। नच संबादं विना चक्षुरादीनामप्रमाण्यदर्शनात् पदेऽपि तत्कल्पनमावश्यकमितिवाच्यं पदस्य गृहीतसंबन्धस्यैव प्रत्यायकत्वं तत्र संबन्धग्रहणाय प्रमाणान्तरापेक्षणेऽपि अगृहीतसंबन्धप्रत्यायकशब्दस्थले तदपेक्षाविरहात् सर्वत्रगृहीतसंबंधस्यैव प्रत्यायकत्वमिति नियमे मानाभावात् अगृहीतैकत्वसंबन्धादेव वनशब्दादेकत्वज्ञानमिति

प्रमाणांतराभावेऽपिप्रमाणत्वमेव। ननु नायं पक्षः समीचीनः अगृहीतसंबन्धस्यापि शब्दस्य प्रत्यायकत्वे प्रथमश्रवणेऽपि अर्थप्रतीत्यापत्तेरितिचेत्सत्यम् एवं तर्हि वृक्षाणां प्रत्यक्षेणैवाधिगमा देकत्वस्य च घटादौ ग्रहणान्नागृहीतार्थकत्वं वनपदस्यापि नच सकृदुच्चरितेन वनपदेनानेकार्थाभिधानं कथम् एक शेषस्थले सकृदुच्चरितेनापि अक्षादिपदेनानेकार्थबोधदर्शनात् नचैकशेषस्थलेऽनेकार्थबुबोधयिषया द्विबचनांतबहुवचनांतस्यैव दर्शनेन प्रकृते वनपदेनैकवचनांते नानेकार्थाभिधानं न युज्यते इतिवाच्यम् अस्तु तर्हिएकत्वाविवक्षयापिशब्दसाधुत्वायैकवचनप्रयोगः प्रातिपदिकस्य केवलस्य प्रयोगात् ब्रह्मशब्दोत्तरैकबचनप्रयोगवत् अद्वादिपदोत्तरैकवचनप्रयोगवद्वा यद्वा एकवचनस्य सर्वत्रैकार्थप्रतिपादकत्वं दृष्टमितिसामान्यतोदृष्टेनैकवचनेन देशांतरप्राप्तिलिङ्गेन सूर्यगतिरिव वनेऽपि एकत्वमनुमीयेत इतिनानुपपत्तिः नचात्र-वृक्षेषु बहुत्वस्य प्रत्यक्षेणोपलम्भात्तद्विरुद्धैकत्वा-

नुमानेऽग्नावनुष्णत्वानुमानवत्प्रत्यक्षबाधः एवं त-
र्हि वृक्षत्वे बहुत्वे वा एकत्वान्वयतात्पर्येणैव एक-
वचनप्रयोगो बोध्यः तत्र विशेषणविशेष्यभावे का-
मचारःवृक्षाश्रयं वा बहुत्वं बह्वाश्रयं वा वृक्षत्वमिति
तत्रैकत्वसत्वा देकवचनोपपत्तिः समीचीनैव य-
द्वा समुदायैकदेशेषु वृक्षेषु प्रत्येक मेकत्ववनत्वयोः
सत्वान्नानुपपत्तिः ननु वनत्व मेकाश्रयं विना
कथं सामान्यं भवेत् एकाश्रयं विनापि नानावयवे-
षु अवयविनः समवायवद् वनत्वस्यापिवृक्षैरसंयु-
क्तैरेवाभिव्यक्तिसंभवेन सामान्ये आश्रयैक्यापेक्षा-
भावात् नचवनत्वस्य सामान्यत्वे प्रमाणाभावः
इदंवनमिदं वनमित्यनुगतप्रतीते रेवान्यत्रे वात्रा-
पि प्रमाणत्वात् नचासंयुक्तेषु सामान्यं न दृष्टचरं
अनवस्थितावयवेषुभ्रमणेषु भ्रमणत्वसामान्यस्य-
दर्शनाददृष्टचरत्वाभावात् येषां मते वनत्वं न सा-
मान्यं वनमितिबुद्धिस्तु एकदेशावस्थितनानावृ-
क्षोपाधिनिबन्धनैव तेषां मते यथा गकारादयोऽनेके
वर्णा एकार्थविषयकबोधरूपमेकं कार्यं जनयन्तः

समुदायवाचिना एकवचनान्तेन गवादिपदेना-
भिधीयन्त एकं पदमिति तथा वृत्ता नाना-
जातीयाः स्वविषयकं ज्ञानरूपमेककार्यं जनयन्तः
समुदायवाचिनैकवचनान्तेन वनपदेनाभिधी-
यन्ते वनमिति समुदायोपाधिनिबन्धनैकत्वव्यप-
देशो न वनत्वसामान्यनिमित्तकः समुदायिषु
समुदायोनाम व्यासज्यवृत्ति गुणविशेषः अ-
तएव भिन्नदेशकालावस्थितनानाजातीयवृक्षाणां
तादृशैककार्य्यकारित्वा भावान्न वनशब्देन व्यप-
देशः। अथवा द्रव्यैक्यं विनापि समुदायोत्पत्ति-
कारणीभूतदेशकालक्रियागतैकत्वे लक्षणास्वी-
कारेणैकवचनांतोपपत्तिरिति बोध्यम्। तथा च व-
नादिबुद्धेरपि सत्यत्वान्न तद्बलेनाकृतिज्ञानस्य
मिथ्यात्वं वक्तुं शक्यते नच यथा वनादिबुद्धिः
वृक्षसमुदाय मालम्बते नार्थान्तरं तथा गवादिबु-
द्धिरपि पिण्डसमुदायालम्ब नैवास्ताम् किंसामान्य-
स्वीकारव्यसनेनेतिवाच्यम् वैषम्यात् दृष्टान्ते हि
नैकैकस्मिन्वृक्षे वनबुद्धिः किन्तु तत्समुदाये एव

दार्ष्टान्तिकेतु एकैकस्मिन् पिण्डे गोबुद्धि र्न समुदाये इति न तद्दृष्टान्तवशेन सामान्यापह्नवः कर्तुं शक्य इतिभावः नच सास्नादिसमुदायालम्बनैव गोबुद्धि रस्तु सर्वगोपिण्डेषु अनुगतगवादिप्रत्ययानोपपत्तेः तादृशसमुदायस्य प्रतिव्यक्तिभेदात् गवादिप्रत्ययस्य समुदायालम्बनत्वावश्यकत्वेऽवयवसमुदायालम्बनत्वस्वीकारेण वरमवयविनोपलापो न पिण्डान्तरानुवृत्तगवादिप्रत्ययासाधारणकारणगोत्वादिसामान्यस्य वस्तुतस्तु करचरणादीना मवयवानां भेदादयं देवदत्त इतिद्रव्यैक्यावगाहिप्रत्ययान्यथानुपपत्त्यावयविस्वीकार आवश्यक एव आतानवितानसंयोगविशेषविशिष्टास्तन्तव एव द्रव्यैक्यमापन्नाः पटइतिबुद्धिव्यवहारभाज इत्यवयवावयविनोर्नैकांततोभेदः किन्तुभेदाभेदोभयमित्यसकृदुक्तम् नन्वेकत्र भेदाभेदोभयस्वीकारेऽवयविनोऽवयवभेदाभेदयोरेकतरस्यानवधारणाभावा त्तत्रभेदाभेदोभयावगाहिज्ञानं स्थाणुर्वापुरु-

षोवेति संशयवदप्रमाणं स्यात् एकतरकोटिनिश्चायकाभावादितिवाच्यम् कोटिद्वयशून्ये धर्मिणि कोटिद्वयावगाहिनः संशयस्य विषयबाधेन मिथ्यात्वेपि वस्तुतोभेदाभेदोभयविशिष्टे धर्मिणि तदुभयावगाहिज्ञानस्य विषयाबाधेन प्रामाण्योपगमात् जातिवदत्रापि कार्त्स्न्यैकदेशनिमित्तको वृत्तिविकल्पः परासनीय इतिदिक्। तथाच वृक्षसमुदायस्यैव वनपदार्थतया वनमिति प्रत्ययो नार्थशून्य इतितद्दृष्टान्तेनाकृतिज्ञानस्य न मिथ्यात्वं वक्तुं शक्यते इत्यभिप्रायेणाह-किमसति वनेइति। यदि वनमिति प्रत्ययो वृक्षसमुदायं विनापि भवतीत्याकृतिं विनापि गवादिष्वनुवृत्तप्रत्यय इत्युच्यते तदाप्रत्यक्षप्रमाणासिद्धार्थापलापित्वात्सर्वैरश्रद्धेय इत्याह प्रत्युक्तः स माहायानिकः पक्षः महायानाः सौगतास्तेषां पक्ष इत्यर्थः। वनादिदृष्टान्तं प्रदर्शयतः शून्यवादिन आशयं पृच्छति किमिति—

भा० अथ किमाकृतिसद्भाववादी उपालभ्यते, सिद्धान्तान्तरं ते दूष्यति इति वनेऽपि सति वनप्रत्ययः प्राप्नोति इति। एवमपि, प्रकृतं दूषयितु मशक्नुवत स्तत्सिद्धान्तान्तरदूषणे निग्रहस्थानमापद्यते, असाधकत्वात्। सहि वक्ष्यति-दुष्यतु यदि दुष्यति। किं तेन दुष्टेन, अदुष्टेन वा प्रकृतं त्वया साधितं भवति, मदीयो वा पक्षो दूषितो भवति? इति। न च वृक्षव्यतिरिक्तं वनं यस्मात् न उपलभ्यते. अतो वनं नास्ति इत्यवगम्यते। यदि वने अन्येन हेतुना सद्भावविपरीतः प्रत्यय उत्पद्यते, मिथ्यैव वनप्रत्ययः इति। ततोवनं नास्ति इत्यवगच्छामः। न च गवादिषु प्रत्ययो विपर्येति,

न ते न सन्ति इति। अथ वनादिषु नैव विपर्य्यंति, न ते न सन्ति इति। तस्मात् असम्बध्यः पंक्तिवनोपन्यासः। अत उपपन्नं जैमिनिवचनं आकृतिः शब्दार्थः इति। यथा च आकृतिः शब्दार्थः, तथोपरिष्टात् निपुणतर मुपपादयिष्याम इति।

यथा गवादिज्ञानेनाकृतिसद्भावः स्वीक्रियते तथा वनादिप्रत्ययेन तत्सद्भावोपि स्वीकार्यःस्यादित्या-शयरुग्णे इत्याह वनेऽपीति तर्हि प्रकृतमाकृति-सद्भावदूषणामुद्देश्य सिद्धान्तान्तरदूषणे तत्र नि-ग्रहः स्यादित्याह निग्रहस्थानमिति। न च प्रति-ज्ञार्थसाधनौपयिकार्थान्तरविचारो न निग्रह-स्थान मापादयति प्रतिज्ञातार्थ निर्वाहकत्वात् तथा चापसिद्धान्तभयेन त्वयातिरिक्तवनपदार्थो ना-भ्युपगन्तुं शक्यते इति आकृतिज्ञानेऽपि नार्थ-सिद्धिरित्याशंक्य निराकुरुते असाधकत्वादिति।

वनप्रत्ययस्य वृक्षातिरिक्तार्थावगाहिन आभास-त्वा त्तदृष्टान्तेन समीचीनस्याकृतिज्ञानस्या-भासीकरणासंभवात्। नहि शुक्तिरजतज्ञानस्या भासत्वेन वस्तुतो रजतज्ञानमाभास इति तदाह सहि दुष्यतु इति कथकाभ्यां स्वपक्षसाधनाय परपक्षदूषणाय पदार्थाभिधानं कर्तव्यं येन स्व-पक्षसाधनं परपक्षनिराकरणं वा न संभवति व्यर्थत्वात्तदुपादानं निग्रहस्थानापादकमेवेत्याह किन्तेनेति उपलंभकप्रमाणवैधुर्यान्न वृक्षातिरिक्त-वनसिद्धि रित्याह न चेति वृक्षातिरिक्तं वनं न च। अत्र हेतुमाह यस्मादिति यस्मादतिरिक्तं नोपलभ्यते तस्मादतिरिक्तं नास्ति किन्तु वृक्ष-समूह एव वन मित्यर्थः प्रमाणाभावेन प्रमेयाभाव-सिद्धिः सप्तमरसाद्यभाववदितिभावः। तदेतदाह अतोवनं नास्तीति। प्रमाणाभावेन प्रमेयाभावं प्रदर्श्य मिथ्याज्ञानादपि न प्रमेयसिद्धिरित्याश-येनाह यदीति। अन्येन हेतुना दूरत्वादिदोषेण सद्भावविपरीतः प्रत्ययः दोषज्ञानं तेन वनप्रत्य-

यस्य मिथ्यात्वबोधनान्न तत्सिद्धिः यद्वा अन्येन हेतुना समीपं गतस्येन्द्रियसन्निकर्षादिना स-द्भावविपरीतः प्रत्ययः वृक्षनानात्वावगाही बाधकः प्रत्यय एतेन बाधकप्रत्ययेन वनप्रत्यय-स्य मिथ्यात्वनिर्णयान्नातिरिक्तवनसिद्धि रित्याह ततो वनं नास्तीत्यवगच्छाम इति न चैवं गवा-दिषु वक्तुं शक्यते समीपस्थितस्यापि गौरित्या-कृत्यवगाहि ज्ञानं दृश्यते न च तत्र दोषज्ञानं बाधकप्रत्ययो वेति तज्ज्ञानं प्रमैवेति वनाद्याभास-ज्ञानदृष्टान्ते नाभासजातिज्ञानस्य न मि-थ्यात्वं द्वयोर्वैधर्म्यादित्याह न च गवादिषु इति।
अथ वनादिषु नैव विपर्य्येतीति अथ बाधकप्रत्य-यवशात्पूर्वं वनादेरसत्वमुपेत्य पुनस्तत्सत्वोपग-माय अथ वनादिष्विति किमर्थं भाष्यकृतो-च्यते? न चेदृशाभिधानेन तत्वनिर्णयः सम्भवति तदेकफलत्वाच्छास्त्रस्येति चेदयमभिप्रायः यथा वैशेषिकादिभिः स्वशास्त्रे पृथिव्यादयः पदार्थाः स्वतन्त्रेण निरूपिताः तथा मीमांसकैर्न स्वत-

न्त्रेण केचित्पदार्थाः स्वीकार्याः किन्तु लोकप्रमाणसिद्धैरेव पदार्थैर्व्यवहर्तव्यं तथा च लोकेवनादिप्रत्ययो मिथ्येति पूर्वं यदि वनेऽन्येनेत्यादिभाष्येणोक्तं यदि तु नायं प्रत्ययो मिथ्या घटते इति कश्चिदभिनिविशेत तंप्रति अथ वनादिष्विति भाष्यं वनादीनां सत्त्वाभ्युपगमेपि न नः किञ्चिदपचीयते इत्याशयेनाह न तु इति। द्वौ नञौप्रकृतदार्ढ्यबोधकाविति न्यायात्ते सन्त्येवेत्यर्थः। उपसंहरति तस्मादिति आकृतेः शब्दार्थत्वे सूत्रकारस्य सम्मतिमाह उपपन्नमिति युक्तियुक्तमित्यर्थः। युक्तिविशेषप्रदर्शनं प्रथमाध्यायस्य तृतीयपादे आकृतिस्तु क्रियार्थत्वादिति सूत्रे करिष्यते तदाह उपरिष्टादिति

इति कल्पकलिकायां वनवादः।

आस्तां तावदीदृशं शब्दार्थद्वयं यदर्थस्तु एतावान् प्रयासः स संबन्धः कीदृश इत्यभिप्रायेण पृच्छति अथ संबन्धः क इति

भा० अथ सम्बन्धः कः? इति। यत्

शब्दे विज्ञातेऽर्थो विज्ञायते, सतु कृतक इति पूर्वं [१४। १८] उपपादितम् तस्मात् मन्यामहे केनापि पुरुषेण शब्दानामर्थैः सह सम्बन्धं कृत्वा संव्यवहर्त्तुं वेदाः प्रणीता इति। तदिदानी मुच्यते अपौरुषेयत्वात् सम्बन्धस्य सिद्धमिति।

कथं पुनरिदमवगम्यते अपौरुषेयः एषः संबन्ध इति पुरुषस्य संबन्धुरभावात्। कथं संबन्धो नास्ति ? प्रत्यक्षस्य प्रमाणस्याभावात्, तत्पूर्वकत्वा च्चेतरेषाम्।

ननु प्रत्यायस्य प्रत्यायकस्य च यः संज्ञासञ्ज्ञिलक्षण इतिभाष्येण संबन्धस्य पूर्वमेव कथितत्वात्पुनस्तत्प्रश्नो न युज्यते तथा यच्छब्दे विज्ञातेऽर्थो विज्ञायते इत्युत्तरमपि न सत् स्वरूपकथनाभावात् नहि ज्वरस्य किमौषधमिति प्रश्ने येन ज्वरः

प्रणश्यति तदित्युत्तरं समीचीनं स्वरूपनिर्देशाभावेन तदर्थिनः प्रवृत्त्यनुपपत्तेरिति चेदत्र केचित् पूर्वप्रदर्शित संबन्धेऽपरितोषा त्संबन्धान्तराभिधित्सयाऽथ कः संबन्ध इति प्रश्नः अपरितोषकारणं च शब्दार्थसंबन्धग्रहणादेव शब्देनार्थप्रतीतिः संज्ञात्वं तु शब्दार्थप्रतीत्युत्तरकाले भवति उत्तरकालभाविनश्च नाङ्गत्वं पूर्ववर्त्तिन एव कारणत्वात् संज्ञात्वमजानानस्य संबन्धान्तरेणैवार्थप्रतीतिः पूर्णं भवति पश्चाज्जिज्ञासमानोऽयं संज्ञीयं संज्ञेत्यवधारयति अजिज्ञासोस्तु तथापि न भवति अतः संज्ञात्वं न प्रकृतोपयोगि किन्तु तमेवाविनाभावलक्षणं संबन्धं पृच्छति यद्विना ज्ञातेशब्देऽर्थबोधो न स्यात् ननु अविनाभावः कथं भाष्यात्प्रतीयते नहि तद्बोधकं पदं तत्र श्रूयते सत्यं न श्रूयते किन्तु यतः शब्दे ज्ञातेऽर्थो ज्ञायते इत्युक्तयैवाविनाभावः प्रतीयतेऽन्यथान्यज्ञानेनान्यज्ञानासम्भवा दसंगतं स्यात् नहि अविनाभावं विना धूमेन वह्निज्ञानं कस्यचिदभिमतमित्याहु

स्तन्न भाष्येऽविनाऽभावबोधकशब्दाभावात् यदि यथा श्रुतभाष्येणानुक्तोप्यर्थः कल्प्यते तर्हि अविनाभावोपि कल्पनीयः स्याद्विनिगमनाविरहात् किंच यदि अविनाभावेन शब्दादर्थप्रतीतिः स्यात्तथा संज्ञात्वस्य प्रतीत्युत्तरकालभावित्वेन प्रतीत्यनङ्गत्वं च स्यात्ततोऽस्यानेनैवाविनाभाव उक्तः स्यादिति तदभिधित्सया पुनः प्रश्नो युज्येतापि तदुभयन्तु प्रकृते नास्ति ननु संज्ञात्वस्य प्रतीत्युत्तरभावित्व मनुपदमेव प्रदर्शितं सत्यं प्रदर्शितं स्मर्य्यते किन्तु तन्न साधु यत्र प्रयोजकवृद्धेन देवदत्तमानयेति प्रयुक्तं ततः प्रयोज्यवृद्धेन देवदत्त आनीत इति व्यवहारे प्रतीतेः प्रागेव गमकत्वमवगतं पश्चाद्देवदत्त इतीयमस्य संज्ञेति विशिष्य निर्धारयति परन्तु एतद्विशेषनिर्धारणात्प्रागपि प्रयोज्यप्रवृत्तिदर्शनादेव देवदत्त इति पदं कस्यचिदर्थस्य गमकमन्यथा तत्र प्रयोज्यप्रवृत्तिर्न स्यादिति सामान्यतो यत्पदे गमकत्वमवगतं तदेवेन्द्रियादिविलक्षणं संज्ञा-

त्वमिति न प्रतीत्युत्तरभावित्वं किन्तु तत्पूर्वभावित्वमेवेति प्रतीत्यङ्गत्वमेव तस्येति नापरितोषलेशोपीति न संबन्धान्तराभिधित्सया पुनः प्रश्नो न वा पूर्वसंबन्धविलक्षणोऽविनाभावसंबन्धोऽत्राभिहित इति। ननु तर्हि किमर्थं पुनः प्रश्न इति भवतैवोपपाद्यताम् शृणोतु तावत् प्राक् कथितोपि संज्ञितलक्षणः संबन्धः शब्दार्थविचारेण व्यवहित इति स एव नित्यत्वकथनार्थं पुनः स्मार्य्यते। यदपि स्वरूपानिर्देशान्नोत्तरं युक्तन्तदपि न यच्छब्दे ज्ञाते इत्यनेनार्थबोधौपायिकशक्तिरूपसंबन्धस्यैवाभिधानात्। यच्चाभिधानक्रियां प्रति शब्दस्य करणत्वं कर्तृत्वं वा तदेव शक्तिस्वरूपं संज्ञित्वं गमकत्वं च तदयं भाष्यार्थः यच्छब्दज्ञानादर्थज्ञानं स ज्ञाप्यज्ञापकत्वलक्षणः संबन्धः सतु कृतक इति पूर्वमुक्तमित्यनुवादात्स एव संबन्ध इति स्पष्टमेवावगम्यते न चान्यस्य संबन्धस्य कृतकत्वं पूर्वमुक्तमिति अयंभावः न शब्दार्थयोर्मिथः संबन्धःस्वाभा-

विकः प्रथमश्रवणेऽर्थप्रतीत्यनुदयात् किन्तु नेत्र-निकोचादिवत्पुरुषसंकेतकृत इति पौरुषेयत्वाद-नित्यत्वमेवेत्याह केनापि पुरुषेणेति प्रणीता इति। तथाचातीन्द्रियार्थे न वेदाःप्रमाणं पौरुषेय-त्वाल्लौकिकवाक्यवदित्याक्षेपः। समाधातुमाह उच्यते इति अयंभावः यद्भवतोच्यते शब्दा-र्थयोः संबन्धः सामयिक इति तत्रेदं पृच्छ्यते समयः प्रतिपुरुषं वा प्रत्युच्चारणं वा सर्गादावेव केनचिदेकेन पुंसा कृतः आदिकल्पेपि प्रत्येकं सम्बन्धो भिन्न उत एक एवेति एकश्चेन्न तर्हि कृतक एकस्य वहुक्रियासम्भवाभावात् भेदप-क्षोपि न समीचीनः एकस्मिन्ननेकशक्तिकल्प-नापत्तेः किंच येन पुंसा यस्य शब्दस्य यस्मिन्नर्थे संकेतः कृतः तदर्थबुबोधयिषया प्रयुक्ताच्छब्दा-दपरस्य बोधो न स्यात् तस्य तदीयसंकेतग्रहा-भावात् अथपुरुषान्तरोच्चरितेऽपि शब्दे स्वसं-केतानुसारेणार्थबोधः श्रोतुरित्यपि न यस्मिन् शब्दे अनेकैःपुरुषैरनेके संबन्धाःकृताः तस्मा-

न्नानार्थसंकेतिताच्छब्दादर्थबोधानुपपत्तेः स्वसंकेतानुसरणायोगात्। न च यत्रैकस्मिन् शब्देऽनेकैःपुरुषैरनेकार्थविषयाः संकेताःकृता स्तत्र विकल्पोस्तु मैवं यत्रैकस्मिन्नेव पील्वादिशब्दे आर्य्यैर्वृक्षविषयः संकेतःकृतः म्लेच्छैस्तु गजविषयः संकेतःकृतः तस्मात्पीलुशब्दाद्विकल्पेन वृक्षो वा हस्तीवेति बोधापत्ते रिष्यते च तत्र म्लेच्छोक्तार्थबाधः सच न स्यादुभयत्रसंकेतसाम्यादिति। न चेदृशस्थले वृक्षगजसमुच्चयबोधोभीष्टः यत्किंचिदेकार्थबोधव्यवहारदर्शनात् सचायं नियमो न संबन्धस्य पौरुषेयत्वपक्षे घटते स्वाभाविकसंबन्धे स्थिते तद्धेतुकार्थबोधः आर्याणां स्वसंकेतबलादर्थबोधो म्लेच्छानामित्यार्यम्लेच्छ विभागः सूपपद्यते उभयो स्तत्र स्वसंकेताभ्युपगमे तु अर्थबोधौपयिकसंबन्धस्य व्यवहारानुरोधेनोभयकल्पितत्वाविशेषादाप्तोक्तार्थेन म्लेच्छार्थबाधो न स्यात् अनुभवविरुद्धश्च विकल्पः यद्येकस्मिन् शब्देऽनेकैःपुरुषैरेकार्थेऽनेके संबन्धाःकृता-

भवेयुस्तर्हि श्रोतु रर्थप्रतिपत्तिकाले संकेतकर्तरि प्रतिपत्तिःस्या त्तथाचैतत्कृतः संबन्ध एतत्कृतो वाश्रयणीय इति व्रीहियववत्सन्देहःस्यात् स च न दृश्यते इति न विकल्पः। यत्रैकः श्रोता तत्रास्तु विकल्पः यत्र तु बहवः श्रोतारस्तत्र स्वस्वबोधानुसारात्समुच्चय इत्यपि न एकार्थाभिधित्सयैव वक्तुः शब्दोच्चारणप्रवृत्ते रेकार्थबोधस्यैव न्याय्यत्वात् संबन्धान्तरे वक्तु स्तात्पर्याभावात् यदि तु वक्तु रेकस्मिन्संबन्धे सत्यपि तात्पर्ये श्रोतारः स्वस्वसंबन्धानुसारेणार्थभेदं प्रतिपद्यन्ते तर्हि उभयोः संबन्धबुद्धिभेदादार्यम्लेच्छयोरिव व्यवहारो दुष्येत् किंच प्रतिपुरुषं संबन्धकरणं न घटते श्रोतृसम्प्रतिपन्नस्य संबन्धस्य कृतत्वादेव करणत्वानुपपत्तेः अज्ञातस्याभिनवस्य प्रतिपादकत्वायोगादेव करणत्वानुपपत्तेश्च न चैवं घटादावपि कृति र्न स्यात् यस्यां च व्यक्तौ जलाहरणादिकार्यसामर्थ्यमवगतं तस्याः कृतत्वादेव करणत्वं न सम्भवति अनुत्पन्नायाश्च

व्यक्ते स्तादृशकार्यजननसामर्थ्यानुपलम्भादेव तदर्थिन स्तत्करणे न प्रवृत्तिरितिवाच्यं यज्जातीयस्य कार्यस्य यज्जातीयकार्यजननसामर्थ्यमवगतं तज्जातीयकार्यार्थिन स्तज्जातीयकार्थकरणे प्रवृत्त्युपपत्तेः आकृतेरनादित्वेन ततःप्राक् कथं तत्र सामर्थ्यावगम इति चोद्यानवतारात्। न चेयं गतिःसंबन्धे वक्तुं शक्या तस्या नित्यत्वाभ्युपगमात् यदि चैवं संबन्धेपि सामान्यं स्वीक्रियते तर्हि तत एवार्थबोधसंभवेन कार्यत्वस्वीकारानौचित्या त्सिद्धं नः समीहितं संबन्धनित्यत्वाभ्युपगमात् नित्यत्वानित्यत्वोभयाकारस्वीकारस्तु सर्वथाऽनुचितः प्रयोजनविरहात् गौरवाच्च तस्माच्छक्तिरेव संबन्धः साच बोधान्यथानुपपत्या कल्प्यते अतएव न भिन्ना एकशक्तिकल्पनयैवार्थबोधसंभवेनानेकशक्तिकल्पनायां गौरवापत्तेः न चैतादृशशक्तिसद्भावे प्रथमश्रवणेप्यर्थप्रत्ययापत्तिः ज्ञाताया एव शक्तेरर्थबोधौपयिकत्वाद्द ज्ञापकत्वस्वाभा-

ऽयात् ज्ञापकं लिङ्गादि ज्ञातमेवानुमापकं भवति नाज्ञातं सत्तामात्रेण तथा ज्ञापकत्वापरपर्याय-रूपा शक्तिरपि अर्थबोधनाय स्वज्ञानमपेक्षत इति न तदज्ञानदशायां शाब्दबोधापत्तिः सतोऽप्यर्थ-स्याज्ञानं दृष्टमिति नाज्ञानमात्रेण तदभावो वक्तुं शक्यः। ननु गृह्यमाणत्वात्सत्वमिवागृह्यमा-णत्वादसत्वमपि स्यादिति चेन्न अत्यन्तासतः कस्यापि गोचरत्वाभावात् प्रथमश्रवणेऽपि ज्ञातसं-बन्धानामन्येषां तदैव ग्रहणात् विरुद्धयोः सत्वा-सत्वयोर्युगपदेकत्र सद्भावासंभवात् ज्ञातत्वाज्ञा-तत्वयोस्तु पुरुषभेदेनैकत्र न विरोधः य एवार्थ एकेन ज्ञातः स एवापरेण न ज्ञात इत्येकस्मिन् पुरुषद्वयापेक्षया तत्सत्वात् एकपुरुषगतज्ञानेना-परपुरुषाज्ञानस्याविरोधात् सदसत्वयोस्तु एक संबन्धिनिष्ठतयैव वक्तव्यत्वा दापेक्षिकत्वाभावाद् विरोध एव। न च प्रतिपुरुषं संबन्धभेदादत्रापि कस्यचित्संबन्धस्य ज्ञातत्वं कस्यचिदज्ञातत्वमि-त्यापेक्षिकत्वात्सत्वासत्वयोरविरोधः शक्तिसंब-

न्वस्यैव व्यवस्थापितत्वेन संबन्धभेदस्यानुपद-मेव निराकृतत्वात् । एकस्मिन्नेव घटादौ अन्धानन्धयोर्ग्रहणाग्रहणयोर्दर्शनेन न विरोधः । ननु घटादिग्रहणे चक्षुः कारणमिति तत्सत्त्वासत्त्वाभ्यां तद्ग्रहणाग्रहणे प्रकृते तु किं कारणं यत्सत्त्वासत्त्वाभ्यां संबन्धस्य ग्रहणाग्रहणे जायेते तत्रेन्द्रियवदत्र व्यवहारदर्शनस्यैव तदुपायत्वात् व्यवहारदर्शिनां संबन्धज्ञानं तदर्दिशिनां तु नेति न काप्यनुपपत्तिः आधानवत्सकृज्जायमानस्य संबन्धग्रहणस्य तन्त्रेणोपकारकत्वान्न प्रतिप्रयोगावृत्तिः गृहीतविस्मृतसंबन्धस्य बोधवारणायाग्निप्रणयनवत्संबन्धस्मरणस्य प्रतिप्रयोगमावर्तनीयत्वात् अव्युत्पन्नो यदा व्यवहारेण शक्तिं गृह्णाति तदापि व्युत्पन्नस्य सबन्धग्रहणाच्छाब्दबोधो भवति एवं व्युत्पन्नस्यापि व्युत्पत्तिग्रहवेलायामन्यस्य संबन्धग्रहणाच्छाब्द-बोध इति पूर्वसिद्धस्यैव संबन्धस्य ग्रहणमिति न कार्यत्वमित्यनादिरेव संबन्धः प्रत्युच्चारणं

संबन्धनिवृत्तिर्नैकेनोच्चारणयत्नेन स्वार्थसंबन्धः संव्यवहारश्च शक्यते कर्तुमिति भाष्येण शब्दाधिकरणेनिराकृतैव। सर्गादिपक्षः केवलमवशिष्यते यथाहुःकुसुमाञ्जलौ "यदेतत्पटादिनिर्माणनैपुण्यं कुविन्दादीनां वाग्व्यवहारश्च व्यक्तवाचां लिपितत्क्रमव्यवहारश्च बालानां स सर्वः स्वतन्त्रपुरुषविश्रान्तो व्यवहारत्वात् निपुणतर शिल्पिनिर्मिता पूर्वघटघटनानैपुण्यवत् चैत्रमैत्रादिपदवत् पत्राक्षरवत् पाणिनीयवर्णनिर्देशक्रमवच्चेति"। आदिमान् व्यवहार एवम् अयन्त्वनादिरन्यथापि भविष्यतीति चेन्न तदसिद्धेः आदिमत्तामेव साधयितुमयमारम्भः न चैवं संसारस्यानादित्वभङ्गप्रसङ्गः तथापि तस्याविरोधात् नहि चैत्रादिव्यवहारोयमादिमानिति भवस्याप्यनादिता नास्ति तदनादित्वेऽपि न चैत्रादिव्यवहारोप्यादिमानिति। अस्त्वर्वागदृशी कश्चिदेवात्र मूलमिति चेन्न तेनाशक्यत्वात् कल्पादावादर्शाभासस्याप्यसिद्धेः साधितौ च सर्गप्रलयौ

नच व्यवहारयितृपुरुषः ह्यशरीरो समधिगतः न चेश्वरस्तथा तत्कथमेवं स्यात् शरीरान्वयव्यतिरेकानुविधायिनि कार्ये तस्यापि तद्वत्त्वात् गृह्णाति हीश्वरोपि कार्यवशाच्छरीर मन्तरान्तरेति । तदेतन्नैयायिकमतं निराकर्त्तु माशंकते केनापि पुरुषेणेति । पूर्वोक्तौ पक्षौ मन्दत्वात् भाष्यकृता स्वयं नोपन्यस्तौ तर्ककर्कशनैयायिकाभिमतस्यास्य पक्षस्य निराकरणं भाष्यकारः स्वयं करोति उच्यते इत्यादिना । नन्वेतन्मतनिराकरणमयुक्तं वेदप्रामाण्यस्वीकारात् प्रजापतिर्वा इदमेक एवाग्र आसीत् प्रजापतिर्वेदानसृजत इत्याद्यर्थवादेन पुराणादिना प्रतिपादितस्यैव सृष्टिप्रकारस्यात्राप्यनुसरणादिति चेन्न ज्ञानकारणाभावेन सर्वज्ञत्वस्य क्रियाहेत्वभावात्कारणत्वस्यचासंभवात् उत्पत्तेः प्राक् कारणस्याप्यभावेन सर्वारम्भानुपपत्तेश्च यदाच सर्वमिदं दृश्यं नासीत्तदा जगतः कीदृशी अवस्थेति बुद्धौ नारोहति क्वच प्रजापति-

वर्त्तताम् पृथिव्यादीनामभावात् सच शरीरी अशरीरी वा न तावच्छरीरीति सम्भवति शरीरारम्भकभूतादीनामभावात् नाप्यशरीरीसृष्ट्यौपयिकज्ञानेच्छाभावप्रसङ्गात् तदा ज्ञातुरभावे को जनान् कथयेदनेन सृष्टिःकृतेति नचाज्ञातं व्यवहाराय कल्प्यते साधनाभावाच्च नास्य सृष्टौ समीहा युज्यते नचेच्छामात्रेण भगवतःसृष्टिरिति हन्त शरीराभावे इच्छापि न संभवति अन्यत्रादर्शनात्। शरीरस्वीकारे कस्तच्छरीरस्य निर्माता-स्वयमित्यपि न अशरीरस्य स्वशरीरोत्पादनेच्छाकृत्ययोगादन्यथा स्वशरीरवज्जगदपि शरीरं विनैव कुर्यादिति वृथा स्वशरीरारम्भोद्योगः शरीरं गृहीत्वा शरीरोत्पादनेऽन्योन्याश्रयः शरीरान्तरं गृहीत्वा शरीरान्तरोत्पादने व्यक्तैवानवस्था अथ तच्छरीरं नित्यमिति नान्योन्याश्रयादस्तर्हि जगति कःप्रद्वेषः एतदपि तद्वन्नित्यमेव स्यात् अपिच दुःखबहुलेयं सृष्टिरीक्ष्यते नच करुणास्यमूर्तेः पितृसहस्राधिकवत्सलस्य सततसकलहितका-

शिणः परमेशितुरनुकूलेदृशसृष्टिः नच सुखम-
यीं सृष्टिं कर्तुमेव न जानाति सर्वज्ञत्वात् नच
तथाकर्तुमिच्छन्नपि केनचित्प्रतिबद्धः अप्रतिब-
द्धशक्तिकत्वात् तदिच्छाभिघातकाभावात्तस्मा-
दनादिपरंपरायात ईदृशसृष्टिप्रवाह एव
नतु केनचित्प्रेक्षापूर्वकारिणा कृत इत्येव-
युज्यते अस्तु वाशरीरस्यापीच्छा तथापि साधनं
विना नेच्छामात्रेण क्वचित्कार्योत्पत्ति र्दृष्टा ये-
नात्रापि तथा कल्प्येत नच भूतानां सुखदुःख भो-
जकादृष्टमेव साधनं सृष्टेः प्राक् तस्याप्यभावात्
अपिचा दृष्टमात्रसहायः कुलालादिःक्व घटं नि-
र्मिमाणो दृष्टः इति न तन्मात्रसहायः प्रजापति-
रपि जगत्कर्तुमर्हति नचासाधनोपि लूताकीटः
स्वकोशं सृजति तथा प्रजापतिरपि प्राणिभक्षण-
जन्यलालाया उपादानत्वाद् साधनत्वाभावात्
दुःखकटाहपाच्यमानान्प्राणिन उद्दिधीर्षया प्रवृ-
त्तिरित्यप्यसारम् सृष्टेः प्राक् दुःखकटाहाभा-
वेनानुकम्पासंभवात् । नचदुःखाभावे सुखमपि-

नास्तीति कथमिमे सुखिनःस्युरित्यनुकम्पा तथा सति सुखमयी मेव सृजेन्न दुःखमयी मपि अथ दुःखं विना सुखस्य उत्पत्तिस्स्थितिश्च न संभवतीत्यगत्या तत्सृष्टिः तस्यदुष्करत्वाभावात् अन्यथा स्वातन्त्र्यविघातापत्तेः न च प्रयोजनं विना मन्दोपि प्रवर्त्तते इतिन्यायात्प्रेक्षावतां प्रवृत्तिः स्वार्थपरार्थाभ्यां व्याप्ता न चास्य जगत्सर्गे किंचित्प्रयोजनं पूर्णकामत्वात् न च परार्थोऽपि सृष्टेः प्राक् परस्यैवाभावेन परार्थत्वस्य शङ्कितुमप्यशक्यत्वात् न च क्रीडार्था सृष्टिः क्रीडासाध्यसुखापेक्षिणोऽवाप्तकामत्वानुपपत्तेः स्वल्पप्रयाससाध्या क्रीडा भवति महीमहीधरमहार्णवादिरचनाऽतिव्यापार साध्या क्रीडेति न सचेतसां चेतसि विश्वासः पदमाधत्ते किंच सृष्टे रनुकम्पानिमित्तकत्वाभ्युपगमेऽपि संजिहीर्षायां किं निमित्तमिति वक्तव्यं नहि तत्रापि सैव निमित्तमिति शक्यमभ्युपगन्तुं विरुद्धकार्यद्वयस्यैकहेतुकत्वासंभवात् स्रष्टु-

ज्ञानं न कस्यचित्संभवतीत्युक्तमेव । नन्विदानीन्तनानां तदज्ञानेपि सृष्ट्युत्तरोत्पन्नानां त ज्ज्ञान संभव इतिवाच्यं कुतो वयमुत्पन्ना इतिज्ञान स्यैव तेषा मसंभवेन सृष्ट्युत्पत्तिज्ञानस्य दूरापास्तत्वात् यदि हि ते उत्पत्तेः प्राग् जगदसद्रूपं दृष्ट्वा ब्रह्मणोऽव्यापारानन्तरं पुनः सद्रूपं जगत् पश्येयुः तदावधारयेयु स्तत्स्रष्टृत्वं न चैतत्संभवति तेषामेव तदानी मसत्वात् अहमेव सर्वस्य स्त्रष्टेति प्रजापति वाक्याज्जानन्तीति न आत्मप्रशंसयापि तस्यैव मुक्तिसम्भवात् । वेदवाक्या दवगच्छन्ति तथा हि प्रजापतिर्वा इदमेक एवासीत्सोऽकामयत प्रजाः प्रशून् सृजेयेत्युपक्रम्य ततो वै स प्रजाः पशूनसृजतेति श्रुतेरिति न वेदस्यापि प्रजापतिप्रणीतत्वे तद्वदेवानाश्वासापत्तेः यदि वेदो नित्यः सृष्टेः प्रागपि स्थित एव तदाऽसृजत इतिभूतकालनिर्देशानुपपत्तिः स्त्रष्टा स्रक्ष्यति वेत्येव मुपादानस्यैव योग्यत्वात् नचैवं स्टष्टचपलापः सृष्टिवाकयस्य स्तुति

परत्वेन स्वार्थे तात्पर्याभावात् नहि सृष्टिवादः प्रमाणमूलः येन तदनङ्गीकारे अपलापः स्यात् तथाचोक्तं "पौर्वापर्यापरामृष्टः शब्दोऽन्यां कुरुते मतिम्, उपाख्यानादि रूपेण वृत्तिर्वेदवदेव नः", इति यथा धर्मविधावधर्मं प्रतिषेधे वेदस्यसृष्टचा द्युपक्रमेण प्रवृत्ति स्तथाभारताद्युपाख्यानस्यापीति न सृष्टिप्रतिपादनपरत्व मतस्तत्र न तत्प्रामाण्यम् यदर्थपरो यः शब्दः स तत्र प्रमाणमिति स्वीकारात् भारतेऽपिवेदवदध्ययनविधि दृश्यते श्रावयेच्चतुरो वेदानिति। तथाग्निहोत्रादयोपि धर्मा वर्णिताःक्वचित्तत्र स्मार्त्तधर्मा अपि रूपिता इति तस्यापि धर्माधर्मपरत्वमेव निर्णीयते इति न सृष्टिप्रतिपादने तस्य मुख्यं तात्पर्यमतः सृष्टचनङ्गीकारे नापलाप इतिभावः प्रजापतिवाक्यत्वे वेदस्यानादित्वं न स्यात्। ननु सृष्टेः प्रागपि प्रजापतिरासीदेव तत्र च वेदोपीति कथमनादित्वभङ्गः तस्मिन्ननविश्वासस्य पूर्वमेव प्रदर्शितत्वादितिदिक्। सांख्यवैशेषिकादिमतप्रदर्शनं

तन्निराकरणं च नेह प्रदर्श्यते विस्तरभयात् प्रकृ-
तभाष्यव्याख्याया मुपयोगाभावाच्च प्रत्यक्षस्य
प्रमाणस्या भावादिति प्रमाणाभावात्प्रमेया-
भावसिद्धिरित्यर्थः यदिकश्चिच्छब्दार्थयोः संब-
न्धःस्यात्तर्हि कस्यचित्प्रत्यक्षेणोपलभ्येत नचो-
पलभ्यते तस्मान्नास्ति नच प्रत्यक्षाभावेऽपि अ-
नुमान मेव तत्र प्रमाणं संबन्धः सकर्तृ-
कः शब्दार्थसंबन्धत्वाद्भित्थादिसंबन्धवदितिचेन्न
सादित्वस्य तत्रोपाधित्वात् सकर्तृकत्वस्य स्मर्य-
माणकर्तृकत्वप्रयोज्यत्वेन हेतोरप्रयोजकत्वा-
च्च यदि गवादिशब्दार्थयोः संबन्धस्य कश्चि
त्कर्ता स्यात्तदा तद्वदुपलभ्येत न चोपलभ्यते त-
स्मान्नास्ति तदाह तत्पूर्वकत्वाच्चेतरेषामिति न-
चार्थबोधान्यथानुपपत्या पौरुषेयसंबन्धकल्पनं
स्वाभाविकसंबन्धेनार्थबोधोपपत्ते रन्यथानुपपत्य-
भावात्। नचागृहीतसंबन्धाच्छब्दादर्थबोधान्य-
न्यथानुपपत्या तत्कल्पन मनादिवृद्धव्यव-
हारेण स्वाभाविकशब्दार्थसंबन्धग्रहणे नान्यथा

प्युपपत्ते रिति। यद्वा पूर्वोक्तानुमान मसत् डित्थादि शब्देऽपि शक्तिरूपसंबन्धस्य नित्यस्यैव स्वीकारेण सिद्धसाधनप्रसङ्गात् तादृशसंबन्धग्राहकसंकेतस्यानित्यत्वेन संबन्धेऽनित्यत्वावगमो भ्रमः वस्तुत स्तस्यनित्यत्वादिति संबन्धग्राहकव्यवहारस्यानादितया गवादिपदे पूर्वपूर्वगृहीतस्यैव संबन्धस्योत्तरोत्तरेण ग्रहणान्ना नित्यत्वभ्रमोपि निखिलविश्वस्यैकदोत्पत्तिप्रलयसद्भावे न किंचित्प्रमाणम् प्रजापतेःसर्वज्ञत्वमपि पुरुषत्वादेव न सिद्ध्यति बुद्धादिवत् बुद्धस्याप्यसर्वज्ञत्वं तत एव हेतो रस्मदादिदृष्टान्तेन साधनीयमिति प्रजापतेः सर्वज्ञत्ववज्जगत्स्रष्टृत्व मपि निरसनीयं तस्मात्सर्गप्रलययोः पदपदार्थसंबन्धस्य वेदानां च न कार्यत्वं पुरुषत्वादेवा स्मदादिव न्न तस्य प्रजापते रतिशय इत्यदृष्टहेतुक एव भवः स्वीकार्यः अदृष्टं चानुष्ठानसाध्य मित्यनुष्ठान मदृष्टभेदोत्पत्तये स्वीकार्य मनुष्ठानं च ज्ञानादृ ऋते न सम्भवति ज्ञानं च वेदं विना न वेदोपि पदपदार्थसंबन्धै

र्विना नेति सर्गात्प्रागपि पदपदार्थसंबन्धाः सन्त्येव यथाहु र्भगवान्मनुः-"सर्वेषांच स नामानि कर्माणि च पृथक् पृथक् वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे" इति तस्मात्स्रष्टु रेव वेदपूर्वत्वं न वेदस्य स्त्रष्टृपूर्वत्वमिति बोध्यम् । नच पदपदार्थं संबन्धस्य कर्ता चिरातीत इति इदानींतनैर्न स्मर्यते तत्स्मरणस्य प्रकृते उपयोगाभावात्सम्बन्धमात्रं स्मर्यते तस्यैवोपयोगादिति नास्मरणमात्रेण संबन्धुरभावःसिद्ध्यतीत्यभिप्रायेण शंकते नन्विति

भा० ननु चिरवृत्तत्वात् प्रत्यक्षस्याविषयो भवेत् इदानीन्तनानाम् । नहि चिरवृत्तः सन् न स्मर्य्येत । नच हिमवदादिषु कूपारामादिवत् अस्मरणं भवितुमर्हति । पुरुषवियोगो हि तेषु भवति, देशोत्सादेन कुलोत्सादेन वा । न च शब्दार्थव्यवहारवियोगो पुरुषाणामस्ति ।

स्यादेतत् सम्बन्धमात्रव्यवहारिणो निष्प्रयोजनं कर्तृस्मरण मनाद्रियमाणा विस्मरेयुः इति । तन्न । यदि हि पुरुषः कृत्वा संबन्धं व्यवहारयेत् व्यवहारकाले अवश्यं स्मर्तव्यो भवति । संप्रतिपत्तौ हि कर्तृव्यवहर्त्तोरर्थः सिध्यति न विप्रतिपत्तौ । नहि वृद्धिशब्देन अपाणिनेर्व्यवहारतः आदैचः प्रतीयेरन् पाणिनिकृति मननुमन्यमानस्य वा । तथा मकारेण अपिंगलस्य न सर्वगुरुस्त्रिकः प्रतीयेत, पिङ्गल कृति मननुमन्यमानस्य वा तेन कर्तृव्यवहारौ संप्रतिपद्येते । तेन वेदे व्यवहरद्भिरवश्यं स्मरणीयः सम्बन्धस्य कर्त्ता स्यात्, व्यवहारस्य च । न हि विस्मृते वृद्धिरादैच् (पा० १ सू० १) इत्यस्य सूत्रस्य कर्त्तरि वृद्धिर्यस्या-

इति किञ्चित् प्रतीयेत ।

चिरवृत्तमपि स्वशाखागोत्रव त्स्मर्त्तुं शक्यमित्याह नहीति नहि न स्मर्य्यंत किन्तु स्मर्य्येतैवेत्यर्थः । चिरातीतस्यास्मरणे निदर्शनमाह हिमवदादीति । तत्रास्मरणे कारण माह पुरुषवियोग इति अत्रापि विकल्पेन कारण द्वयमाह देश इति प्रकृते तदभावं दर्शयति नचेति । उपयोगाभावान्न कर्तृस्मरणमिति गूढ़ाभिसंधिनोक्तं स्पष्टयन्नाह निष्प्रयोजनमिति । निराकरोति तन्नेति अयंभावः इदानीं स्वकीयवेदादिव्यवहारस्य प्रामाण्यसिद्धये पदपदार्थसंबन्धस्य तादृशव्यवहारस्य च कर्तुःस्मरणं वोद्धुरावश्यक मन्यथा कर्तृव्यवहर्त्रो रसंप्रतिपत्या व्यवहारस्या प्रामाणिकत्वं स्यात् स्वाभाविकसामर्थ्यवशेन शब्दस्यार्थप्रतिपादकत्वानङ्गीकारा दाप्तोक्तत्वबलादेव शब्दोर्थं प्रतिपादयतीत्येवाङ्गीकारा त्तथाचा र्थबोधसमये तेन पुरुषेण श-

ब्दार्थसंबन्धाः कृताः तस्यैव चेदृशार्थप्रतिपादकप-
दघटितेदृशवाक्ये वेदव्यवहार ईदृश एवार्थोऽभि-
मत स्तस्येति समयव्यवहारयो रेककर्तृकत्वसिद्ध-
ये तत्कर्तृस्मरण मावश्यकं तदाह संप्रतिपत्तौ हि
कर्तृव्यवहर्त्रो रर्थःसिद्ध्यतीति। कर्तृव्यवहर्त्रो
रसंप्रतिपत्तौ तु न प्रामाणिकार्थसिद्धिरित्याह न-
विप्रतिपत्तावित्ति यथा बौद्धा यावदिदं बुद्धोक्तमि
ति न जानन्ति तावन्न तत्प्रतिपद्यन्ते आप्तोक्तत्वा-
नवधारणात् तथावेदवाक्या दर्थमवगच्छता त-
त्कर्तुराप्तत्वमवश्यमेव स्मर्त्तव्यं तन्निबन्धनत्वा
त्तदर्थनिश्चयस्य नच वेदवाक्यादर्थमवधारयतां
पदपदार्थसंबन्धकर्तुः तस्याप्तत्वैकत्वयोश्च स्म-
रणं दृश्यते इतिभावः पारिभाषिकशब्दा दर्थप्रति-
पत्तौ समयकर्तु र्नियमेन स्मरणं भवतीत्यत्र
दृष्टान्तमाह नहि बृद्धिशब्देनेति । अपाणिनेः
पाणिनिभिन्नस्य तस्य समयकर्तृत्वाभावात्

पाणिनिकृतिमिति वृद्ध्यादैच्पदपदार्थयोः समयस्य कर्ता पाणिनि रितिज्ञानं विनेत्यर्थः। तथा च समयव्यवहारयो रेककर्तृकत्वज्ञानं शब्दार्थप्रतिपत्ता वावश्यकमेव। अत्रैव दृष्टान्तान्तरमाह तथेति पिंगलः छन्दः शास्त्रस्य सूत्रकारः। अन्यत्सर्वं पूर्ववदेव बोध्यम्। समयव्यवहारयो रेककर्तृत्वज्ञानं विना नार्थप्रतिपत्ति रित्यत्र दृष्टान्तमाह नहि विस्मृते इति। तथाच व्यवहारसमये तत्स्मरण मावश्यक मिति। ननु नायं दृष्टान्तः प्रकृते संगच्छते वृद्धिर्यस्येति सूत्रे को वृद्धिपदार्थ इतिजिज्ञासाया मादैजिति व्याख्यातुः कथनेऽपि बोधदर्शना न्नियमेन सूत्रकारस्मरणाभावादिति चेन्न पाणिनिरिति स्वरूपेण सूत्रकारस्मरणाभावेऽपि यःवृद्धिपदस्य समयकर्ता तस्यैवायं व्यवहार इत्येवं रूपेणोभयकर्तृत्वेन तदीयस्मरणसत्वात्। गवादिशब्दे तु सास्नादिमतो गौरित्येवं संकेताभावान्न गां पश्येत्यादि व्यवहारदशायां तत्स्मरणावकाश इति नात्र संबन्धः पौरुषेयः

इति समयस्यापि वाक्यार्थज्ञानसाध्यतया सर्वशब्दार्थानां संबन्धाभावे कथं संभवः नहि अविज्ञाते सास्नादिपदार्थे सास्नादिमती गौरिति प्रयोक्तुं शक्यते। किंच वृद्धिर्यस्येत्यादिषु शब्दज्ञाधुत्वरूपदृष्टफलेषु समयव्यवहारयो रेककर्तृत्वस्याप्तोक्तत्वस्य च स्मरणं विनापि अर्थप्रतिपत्तिः भवेत् किन्तु योऽभ्युदयफलकः साधुशब्दप्रयोगः स पाणिनिस्मरणं विना न सम्भवति अनुशासनस्मरणपूर्वकसाधुशब्दप्रयोगे एव धर्मोत्पत्तिस्वीकारा दन्यथा सर्वो लोकोभ्युदयेन युज्येतेति स्पष्टं महाभाष्ये। एवमाश्वलायनघटकाद्याकारस्य वृद्धिनिश्चयः कितिचेति पाणिनीयानुशासनस्मरणादेव नान्यथेति तथादृष्टार्थक व्यवहारः समयव्यवहारकर्त्रोः संप्रतिपत्यभावेऽपि विप्रतिपत्यभावाद् भवतु अग्निहोत्रादिलक्षणो ऽदृष्टार्थकस्तु वैदिकव्यवहारे वाक्यमात्रप्रमाणको न वाक्यकर्तुराप्तत्वनिश्चयं विना भवेदित्यवश्यं तादृशव्यवहार मिच्छतः वेदसं-

बन्धयोः कर्तुः स्मरण मपेक्षितं । नच व्यवहार-काले तत्स्मरणं दृश्यते इत्यनुपलब्ध्या तद्-भावावगमा न्नित्यत्वमेव सम्बन्धस्येति संबन्ध-स्य पौरुषेयत्वखण्डनमुपसंहरति तस्मादिति

भा० तस्मात् कारणादवगच्छामः न कृत्वा सम्बन्धं व्यवहारार्थं केनचि च्छब्दाःप्रणीता इति । यद्यपि च विस्मरण मुपपद्येत, तथापि न प्रमाण मन्तरेण सम्बन्धारं प्रतिपद्येमहि, यथा विद्यमानस्याप्यनु-पलम्भनं भवतीति, नैनावता विना प्रमाणेन शशविषाणं प्रतिपद्यामहे । तस्मादपौरुषेयः शब्दस्यार्थेन सम्बन्ध इति

विस्मरण मभ्युपेत्याप्याह तथापीति दृष्टान्तमाह यथेति । यद्यपि चिरवृत्तस्यास्मरणं संभवति तथापि प्रमाणं विना न तत्स्वीकारः संभवति विपरीतस्यापि सम्भवात् अतएव विद्यमानस्यापि मूलकीलकादे रनुपलंभवच्छशविषाणस्या नुप-लम्भेपि न तत्स्वीकारः कदाचिदपि प्रमाणेना-नुपलब्धेः मूलकीलकादीनान्तु कदाचिदुपलंभ-दर्शना त्तदानी मनुपलम्भेपि स्वीकार इतिवैष-म्यमिति भावः । सिद्धमर्थं पुनराह तस्मादिति । पौरुषेयत्वे अर्थापत्तिप्रमाणमाशंकते नन्विति

भा० ननु अर्थापत्त्या सम्बधारं प्रतिपद्येमहि न ह्यकृतसम्बन्धाच्छब्दादर्थं प्रतिपद्यमानान् उपलभामहे। प्रतिपद्येरंश्चेत्, प्रथमश्रवणेऽपि प्रतिपद्येरन्। तदुपलम्भनादवश्यं भवितव्यं सम्बन्धा इति चेत्? न, खिद्धवदुपदेशात्। यदि सम्बन्धु रभावात् नियमतो नार्थाः उपलभ्येरन्, ततोऽर्थापत्त्या सम्बन्धारमवगच्छामः। अस्ति तु अन्यः प्रकारः वृद्धानां स्वार्थेन संव्यवहरमाणानां उपशृण्वन्तो बालाः प्रत्यक्षमर्थं प्रतिपद्यमाना दृश्यन्ते। तेऽपि वृद्धा यदा बालाः आसन्, तदान्येभ्यो वृद्धेभ्यः तेऽप्यन्येभ्यः इति नास्त्यादिः इत्येवं वा भवेत्। अथवा न कश्चिदेकोऽपि शब्दस्यार्थेन सम्बन्ध आसीत्, अथ केनचित् सम्बन्धाः प्रवर्तिताः इति। अत्र वृद्धव्यवहारे सति नार्थादापद्येत सम्बन्धस्य कर्ता। अपिच व्यवहारवादिनः प्रत्यक्ष मुपदिशन्ति, कल्पयन्ति इतरे सम्बधारम्। नच प्रत्यक्षे प्रत्यर्थिनि कल्पना साध्वी। तस्मात् सम्बन्धुरभावः।

भा० अव्यतिरेकश्च (८।४) यथा अस्मिन् देशे, सास्नादिमति गोशब्दः एवं सर्वेषु दुर्गमेष्वपि। बहवः सम्बन्धारः कथं सङ्गंस्यन्ते? एको न शक्नुयात्, अतो नास्ति सम्बन्धस्य कर्त्ता। अपरः आह अव्यतिरेकश्च नहि, सम्बन्धव्यतिरिक्तः कश्चित् कालोऽस्ति। यस्मिन् न कश्चिदपि शब्दः केनचिदर्थेन सम्बद्ध आसीत् कथं? सम्बन्धक्रियैव हि नोपपद्यते अवश्य मनेन सम्बन्धं कुर्वता केनचिच्छब्देन कर्त्तव्यः। येन क्रियेत, तस्य तेन कृतः अथान्येन केनचित् कृतः? तस्य केनेति तस्य केनेति? नैवावतिष्ठते। तस्मादवश्यमनेन सम्बन्धं कुर्वता अकृतसम्बन्धाः केचन शब्दाः वृद्ध-

व्यवहारसिद्धाः अभ्युपगन्तव्याः। अस्ति चेत् व्यवहारसिद्धिः, न नियोगतः सम्बन्धैर्भवितव्यमिति अर्थापत्तिरपि नास्ति।

भा० स्यादेतत्। अप्रसिद्धसम्बन्धाः बालाः कथं वृद्धेभ्यः प्रतिपद्यन्ते? इति नास्ति दृष्टेऽनुपपन्नं नाम। दृष्टा हि बालाः वृद्धेभ्यः प्रतिपद्यमानाः। नच प्रतिपन्नसम्बन्धाः सम्बन्धस्य कर्तुः। तस्माद्वैषम्यम्।

एतच्च पूर्वमेव व्याख्यातम्। सिद्धवदिति स्वाभाविकसंबन्धवशादेव शब्दा अर्थं प्रत्याययन्ति नतु पौरुषेयसंबन्धबला तत्समयग्रहाभावादेव प्रथमश्रवणे अर्थप्रत्ययो न पौरुषेयत्वाभावात् तथाच शब्दादर्थप्रत्ययस्यान्यथाप्युपपत्ते र्नार्थापत्तिः तस्य पौरुषेयत्वे प्रमाणम् तदाह अन्यःप्रकार इति। प्रकारमेव दर्शयति वृद्धानामिति। सर्वशब्दार्थानां संबन्धाभावे पूर्वोक्तरीत्या संबन्धकरणमेव न संभवति इत्याह न कश्चिदिति। अविरोधिनि प्रमाणे सति कल्पनापि स्यात्प्रकृते व्यवहारवादिनः प्रत्यक्षे विरोधिनि प्रमाणे जाग्रति कथं तत्कल्पनापीत्याह अपिचेति प्रत्यर्थिनि विरोधिनि एतावता प्रबन्धेन साधित-

मर्थमुपसं हरति तस्मादिति। शब्दार्थसंबन्धस्य पौरुषेयत्वानुपपत्तिं दर्शयितु माह अव्यतिरेकश्च अव्यतिरेका द्विधा देशाव्यतिरेकः कालाव्यतिरेकश्च तत्र प्रथममाह यथेति। ननु दुर्गमेषु कोगत्वा दृष्टवानत्रापि गवि गोशब्दः प्रयुज्यते इति यदि कश्चिद् गत्वा ददर्श तर्हि संबन्धोपि तथैव गच्छेदिति नानुपपत्तिः। अपिच परैरीश्वरः शब्दार्थसंबन्धस्य कर्तेति कल्प्यते तस्य चैश्वर्ययोगा त्सर्वत्र गमनमप्रतिहत मिति नानुपपत्तिः। बहूना मपि कार्यवशा देकत्र गमनं दृश्यत एव सर्वत्र समानशब्दार्थव्यवहारदर्शना त्कल्पनीयं बहूनां तेषा मेकत्रा गमनमिति अथवा मास्तु सर्वेषा मेकत्रागमन मेकेन कथितस्यापि लोके नान्यत्र नयनं बृद्ध्यादिव त्संभवति तथाच नानुपपत्तिः संबन्धस्य पौरुषेयत्वेपी त्यरुचेः पक्षान्तर माह अपर आहेति यदि कश्चित्कालः संबन्धशून्यः स्यात्तर्हि संबन्धक्रिया नोत्पद्यतेत्येत त्स्पष्टयति अवश्यमिति यदि

चैतादृशसंबन्धक्रियासिद्धये केचिच्छब्दाः प्रसिद्धसंबन्धा इति स्वीक्रियेत तै रेवा न्येषां संबन्धकरणं युज्येत तर्हि ते प्रसिद्धसंबन्धाः शब्दा इदानींतनोपलभ्यमानगवादिषु मध्ये सन्ति नवा नोचेत्तेषां तदा सद्भावे प्रमाणाभावः । अथ सन्तीति चत्के पुन स्ते नहि उपलभ्यमानेषु गवादिशब्देषु मध्ये अयं प्रसिद्धसंबन्धको नायमिति विवेकःकस्यचिद् दृश्यते येन तथा कल्पना स्यात् किंच शब्दार्थयो रनादित्व मेव संबन्धस्या नादित्वे हेतुः शब्दाधिकरणे शब्दस्याकृत्यधिकरणे आकृते श्चानादित्वं साधित मिति संबन्धस्यापि अनादित्वं सिद्धमेवा नर्थकस्य शब्दस्या संभवादिति ध्येयम् । अप्रसिद्धसंबन्धानां बालानां शब्दै र्व्युत्पत्ति र्न संभवति गृहीतसंबन्धानांमेव शब्दा दर्थप्रतिपत्तिदर्शना दित्याशंकते अप्रसिद्धसंबन्धा इति समाधत्ते नहि दृष्टे अनुपपन्नं नामेति । अयंभावः अप्रसिद्धसम्बन्धैः पदै र्वाक्यरचना तावन्न संभवति संबंध

यितुः संबन्धं जनयितुं प्रसिद्धसंबन्धज्ञापनाय तु प्रसिद्धसंबन्धैः पदै र्वाक्यरचना संभवत्येव केवलं जिज्ञासूना मज्ञातसंबन्धतया तदर्थबोधो न संभवती त्युच्यते तद्दृष्टविरुद्धं तदाह नहि दृष्टे ऽनुपपन्नं नामेति तर्हि कीदृश उपायः प्रयोजकवृद्धस्य प्रवृत्तिलिङ्गकानुमानावगतार्थ-बोधो ऽसकृद् दृश्यमानः अज्ञातसंबन्धस्य व्यु-त्पित्सोः शब्दार्थसंबन्धावगमोपायः । न चैवं सर्वशब्दार्थसंबन्धाभावेपि हस्तचेष्टादिना शब्दा-र्थसंबन्धो ज्ञातुं शक्यते पुरस्थित मङ्गुल्या निर्दिशन्निद मानयेत्यादि दर्शना दिति चेन्न हस्तचेष्टादीना मपि गृहीतसंबन्धानामेव बोध-कत्वात् कस्यचि द्धस्तचेष्टया कुत्रचि त्प्रवर्तमानं यदि कश्चित्पश्यति तदा ईदृशचेष्टया एवमर्थो बोध्य इति तादृशचेष्टाविशेषे तादृशार्थसंबन्धं गृह्णाति सर्गादौ तु तथादर्शनाभावा च्छब्दव च्चेष्टापि न संबन्धग्रहहेतु रिति कथं सर्गादा-वीश्वरोऽगृहीतसंबन्धान् तादृशैः शब्दैः चेष्टा-

दिभि र्वा अर्थान् प्रतिपादयेत् कथं च ते ततोर्थ-मवगच्छेयुः तस्मात्प्रत्यक्षेणाभिधेयान् पश्यतः प्रतिपन्नत्वा त्प्रयोज्यस्य तदीयबोधं प्रवृत्यादि-लिङ्गेनानुमिमानस्य अर्थापत्त्या तादृशोर्थाभि-धानसामर्थ्यं शब्दे कल्पयतः त्रिप्रमाणः संब-न्धग्रहो भवतीत्येव युक्त मिति।

भा० अर्थेऽनुपलब्धे (८।४) अनुपलब्धे च देवदत्तादावर्थेऽनर्थकं संज्ञाकरणम्, अशक्यश्च। विशेषान् प्रतिपत्तुं हि संज्ञाः क्रियन्ते विशेषांश्चोद्दिश्य तद्विशेषेष्वज्ञायमानेषु उभयमप्यनवक्लृप्तम्। तस्माद-पौरुषेयः शब्दस्यार्थेन सम्बन्धः। अतश्च तत् प्रमाणम (८।४) अनपेक्षत्वात् (८।५) नच एवं सति पुरुषान्तरे प्रत्ययान्तरञ्च अपे-क्ष्यते। तस्माचोदनालक्षणः एव धर्म्मो नान्यलक्षणः। बादरायण-ग्रहणमुक्तम् (८।१८)।

अर्थेचानुपलब्धे इति व्याचष्टे सतो हि संज्ञिनः संज्ञया भवितव्यं विशेषावगमाय अनुपलब्धेऽसतीव व्यावृत्तिबुद्ध्यभावा त्संज्ञा-करण मशक्य मनर्थकं चेति भावः संबन्धस्य पौरुषेयत्वाभावान्न तद्द्वारापि सापेक्षत्व मिति-भावः। चोदनाप्रामाण्यसमर्थन मुपसंहरति तस्माच्चोदनालक्षण इति।

इति कल्पकलिकायां संबन्धाक्षेपपरिहारः।

शब्दार्थसंबन्धानां नित्यत्वं प्रसाध्य पूर्वोक्तं चित्राद्यप्रामाण्याक्षेपं परिहर्तु मनुवदति यदुक्तमिति

भा० अथ यदुक्तं (१२।११) अनिमित्तं शब्दः कर्मकाले फलादर्शनात् कालान्तरे च कर्माभावात् प्रमाणं नास्ति इति। तदुच्यते न स्यात्प्रमाणं, यदि परुचैव प्रमाणान्यभविष्यन्। येन येन हि प्रमीयते तत्तत्प्रमाणं, शब्देनापि प्रमीयते ततः शब्दोऽपि प्रमाणं यथैव प्रत्यक्षम्। नच, प्रमाणेनावगतं प्रमाणान्तरेणानवगतम्-इत्येतावता अनवगतं भवति। न चैवं श्रूयते—कृते कर्मणि तावतैव फलं भवति। किन्तु कर्म्मणः फलं प्राप्यते इति, यच्च (१२।२१) कालान्तरे फलस्यान्यत्प्रत्यक्षं कारण मस्ति इति। नैष दोषः, तच्चैव हि तत्र कारणं शब्दश्चेति।

तत्र चित्रादिचोदनानां दृष्टफलानां निष्फलत्वसाधनाय कर्मकाले फलादर्शना त्कालान्तरे च कर्माभावा दितिहेतुद्वय मुक्तं तदुभय मसिद्धम् तथाहि यदि चित्रायागानुष्ठानानन्तरं पशुफलं भवती त्याम्नायो बोधये त्तदा तदनुष्ठानान्तरं पशुफलोत्पादादर्शना त्तदप्रमाणमित्याशंक्येतापि। तत्तु न आनन्तर्यप्रतिपादक-

शब्दश्रवणाभावात् तथाचा नन्तयस्य फलदानकालत्वेन विधानाभावा त्स्वकाले फलादानमसिद्धम् तथानन्तर्यविधानाभा वात्कालान्तरभाविनोऽपि पश्वादेः तत्फलत्वाद्व्यापारद्वारा चित्रादे स्तदापि सत्वात् कालान्तरे कर्माभावादिति द्वितीयोपि हेतु रसिद्धः कालान्तरस्यापि स्वकालत्वा त्तत्र फलदानं स्वसद्भावश्चेत्युभयमेवास्ति, नत्वेतदुभयाभाव इति त्वदीयहेतुद्वयमसिद्धमेवेति । नचानन्तर्यप्रतिपादकशब्दाश्रवणेऽपि सामर्थ्यादेव तल्लाभ इत्युक्तं सत्यमुक्तं दुरुक्तं तु तत् कृष्यादिवत्कालान्तरेपि कर्मफलदर्शनात् कर्मस्वभावा दानन्तर्यलाभासंभवात् नचानन्तर्याविधानेऽपि मर्दनादिफलव त्कुतोऽनन्तरमेव न जायते देशकाला द्यपेक्षया कर्मणां विचित्रस्वभावत्वात् कानिचि त्कर्माणि वृक्षारोपणादिव त्स्वतः चिराय फलजननसमर्थानि कानिचि द्देशकालापेक्षयाविलम्बफलानि कानिचित् स्वविपरीतेन फलं ददानेन कर्मणा प्रति-

बद्धानि कालान्तरे फलदानाय तिष्ठन्ति इति यदपि प्रत्यक्षविसंवादेना प्रामाण्य मुक्तं तदपि न भिन्नविषयत्वात् अनन्तरफलानुपलम्भा-ज्जायमानः प्रत्यक्षविसंवादः अविशेषप्रवर्तिनीं चोदनां बाधितुं नोत्सहते विषयभेदात् यदि तु मर्दनवत् चित्राकर्मणोऽ नन्तरफलकत्व मनु मीयते तर्हि समानविषयकत्वा त्प्रत्यक्षेणैव बाधः अनन्तरफलादर्शनात्। अथ कृष्यादि-कर्मणो ऽङ्कुरादिरूपं फल मचिरेणै वोत्पद्यते प्रकृतेऽपि चित्रादिजन्य मपूर्व मचिरेणैवोत्पद्यते इति समं यथाङ्कुरस्य सूक्ष्मत्वा दनुपभोग-योग्यत्वा न्न फलत्वं तथा चित्राया अपि अपूर्वं बोध्य मित्यपि समं स्थूलीभूतं फलात्मना परि-णतं तूभयमपि भोगयोग्यत्वा त्फल मित्युच्यते तदेत त्सर्वं मभिप्रेत्याह भाष्ये उच्यते इति नच प्रमाणान्तरसम्वादाधीनं प्रामाण्यं स्तज्ज्ञानस्य प्रमाणान्तरासंवादेऽपि प्रामाण्याङ्गीकारा-दित्याह नच प्रमाणेनावगत मिति। आनन्त-

र्थस्याशाब्दत्वं स्फुटयति नचैवमिति। तथाच पूर्वपक्षिणो हेतुद्वयस्या सिद्धिः प्रदर्शिता भाष्यकृता। कालान्तरेपि दृष्टस्य प्रतिग्रहादे रेव पश्वादिफलं न चित्राया स्तथा च नैष्फल्यं दुर्वार मित्याशंकते कलान्तर इति। तन्नैवेति स्वामिप्रसादहेतुकः प्रतिग्रहादिः कुतः तस्यैव नान्यस्य सेवापि व्यभिचारिणो सेवमानस्य कचित्ता दृशप्रतिग्रहलाभो न भवति भवति त्वसेवमानस्य तस्मा दव्यभिचारिकारणान्तराभावात् चित्रायाः कारणत्वं स्वीकार्यं केचित्तु कार्यमात्रं स्वत एव भवन्ति कि दृष्टादृष्टहेतुकल्पनेने त्याहु स्तदसत् सर्वप्रमाणविरोधात् मर्दनतत्फलयोः प्रत्यक्षेणैव हेतुफलभावो दृश्यते अन्येषा मनुमानादिना इति नाकारणोत्पत्तिः कस्यचिदपि। ननुप्रतिग्रहादे रनन्तरं फलोत्पत्तिदर्शना त्तस्यैव कारणत्व मस्तु प्रत्यक्षसंप्रतिपत्तेः चित्रादीनां कारणत्वन्तु कुतः शब्दप्रामाण्येन तस्यापि कारणत्वात् नहि एकेन प्रमाणेना वगतं प्रमाण-

न्तराप्रवृत्त्या तदप्रमाणं भवति रसादिवृद्धे-रतथात्वस्य दर्शितत्वात् इदं पुन रिह विचार्यं कालान्तरेऽपि जायमानं पश्वादिफलं चित्रादि-कर्मणो भवति तत्रानन्तर्यानुपादाना दिति तावत्सिद्धं तच्चेहैव जन्मनि जन्मान्तरेऽपि वा भवतीति केचित्तु इहैव जन्मनि यदा कदा चिद्भ-वति इत्याहु स्तन्न प्रमाणाभावात् नहि केनचि-च्छब्देन इहैव जन्मनीति । विशेषः श्रूयते न वा सूत्र भाष्ययो रेवं समर्थित मिति नच 'स्वधर्म-निष्ठाः प्रेत्य कर्मफल मनुभूय ततः शेषेण विशिष्टजात्यादिमन्तो जन्म प्रतिपद्यन्ते' इति गौतमवचना दकृतचित्रादियागाना मपि भुक्ता-वशिष्टज्योतिष्टोमादि कर्मलेशेनैव पश्वादिफलं भवतीति न चित्रादीनां तत्र हेतुत्व मिति वाच्यम् अन्यफलकस्य कर्मणः फलान्तरसाध-नत्वासम्भवात् गौतमवचनं तु चित्रादिसापेक्ष-ज्योतिष्टोमादिकर्मशेषपरं बोध्यम् अन्यथा तत्त-त्कर्मानुष्ठानं विनापि तत्तत्फलप्राप्तौ म्लेच्छादयो

वैदिकं कर्म अननुष्ठायापि पश्वादिफलं लभे-
रन्निति वेदाप्रामाण्यमेव स्यात्। नैयायिकास्तु
अनन्तरफलानुत्पत्तिदर्शना च्चित्रादिचोदनाना-
मप्रामाण्य माशङ्क्य कर्तृ कर्मसाधनवैगुण्या-
दिना परिहरन्ति तत्तु न मनोरमं तथा सति ऐहि-
कमात्रफलकत्वाभ्युपगमापत्त्या अकृतचित्रादि-
कर्मणा मिह जन्मनि दृश्यमानपश्वादिफलस्य
निर्निमित्तकत्वापत्तेः। ननु स्वर्गस्यापि पश्वादि
फलवदनियतकालत्वापत्तिः तद्बोधकवाक्येऽपि
कालविशेषश्रवणाभावादितिचेन्न तदामुष्मि-
कत्वस्य षष्ठे स्थापयिष्यमाणत्वात् एतच्च
तत्रैव निरूपयिष्यते यस्तु फलानुरागात् त्वरया
अद्यैव मे पशवः स्युरिति कामयमान श्चि-
त्रादिकर्मानुतिष्ठति तस्येहैव जन्मनि पशवो
भवन्ति सद्यःकिंवा नेति जिज्ञासायां नेत्युत्तरं
नहि सद्यः फलेच्छया वृक्षमारोपयत स्तदैव
फलोपलब्धि दृष्टा तत्कस्य हेतोः त्वरितफले-
च्छावशेन साधनस्वभावापरिवर्तनात् यद्व यथा

यदा फलजननसमर्थं तत्तथैव तदैव फलं प्रसूते त्वरादिकं तत्राकिंचित्कर मिति। वृष्टयादिकं पुन रहिक मेव फलं यदा कदाचि ज्जायमानायाः वृष्टेः कामनाविषयत्वाभावात् शुष्यच्छष्पादिर-क्षार्थ मनन्तरमेव कामनाविषयत्वात्। नचात्रापि कालविशेषश्रवणाभावा च्चित्रादिव दनियतफल-कत्व मेव स्वीकार्यम् वैषम्यात् यदाकदाचि द्भवन् पश्वादिः कामनाविषयो भवति वृष्टिस्तु अन-न्तरमेव भवन्ती कामनाविषयो नतु यदाक-दाचि दित्यस्या ऐहिकत्व मेव। ननु तथापि कारीरीयागानुष्ठानान्तरं नियमेन वृष्ट्युत्पाद-दर्शनाभावा त्तत्राप्रामाण्य मवतरद् भिक्षुपादप्र-सारणन्यायेन सर्वचोदनासु प्रसज्ये दिति स्फु-लिङ्गक्रीडयै वातिश्रमरचितनगरदाहः सपन्न इति चेन्न पूर्वजन्मानुष्ठितेन वृष्टिप्रतिबन्धकेन विविधप्राणिकर्मणा प्रतिरोधेन फलाजनकत्वेपि साधनत्वानपायात् नहि मणिमन्त्रादिना प्रतिबद्धो वह्नि दाहं न जनयति इति तस्य तदसाधनत्वं

कश्चिदनुन्मत्तः प्रतिजानाति तथाच त्रिवृत्पान-विरेकव न्नियमेनानन्तरफलोत्पादकत्वाभावेऽपि अप्रतिबन्धके सति यदाकदाचि त्फलोत्पादकत्वेन न प्रामाण्यविघातः यत्र देशे कारीरीयागो नानुष्ठीयते तत्र वृष्टिस्तु अन्नादिप्रापकजन्मान्तरानुष्ठितकर्मान्तरादेवेति दिक् ।

इति कल्पकलिकायां चित्राक्षेपपरिहारः ॥

पूर्वपक्षिणा चोदनाप्रामाण्यप्रयोजकतया प्रदर्शितं तृतीयं हेतुं निरसितु मनुवदति यत्त्विति

भा० यत्तु प्रत्यक्षविरुद्धं वचन मुपन्यस्तं (१३।२) स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति इति प्रत्यक्षं शरीरकं व्यपदिशति इति । तदुच्यते, शरीरसम्बन्धात्, यस्य तच्छरीरं, सोऽपि तै र्यज्ञायुधैः यज्ञायुधी इत्युच्यते । आह कोऽसावन्यो ? नैन मुपलभामहे । प्राणादिभि रेन मुपलभामहे, योऽसौ प्राणिति, अपानिति, उच्छ्वसिति, निमिषति, इत्यादि चेष्टितवान् । सोऽत्र शरीरे यज्ञायुधी इति । ननु शरीर मेव प्राणिति अपानिति च । न, प्राणादयः शरीरगुणविधर्माणोऽयावच्छरीरभावित्वात्, यावच्छरीरम् तावदस्य गुणा रूपादयः । प्राणादयस्तु सत्यपि शरीरे न भवन्ति । सुखादयश्च स्वयमुपलभ्यन्ते, न रूपादयः इव शरीरगुणाः परेणापीति । तस्माच्छरीरगुणवैधर्म्यादन्यः शरीरात् यज्ञायुधीति ।

कुत्सित मल्पं वा शरीरं शरीरकमित्यर्थः। यज्ञायुधिशब्दस्य तादृशशरीरसंबन्धिनि आत्मनि लक्षणेति न प्रत्यक्षविरोध इत्याह शरीरसंबन्धादिति। एत्र मेष इति शब्देनोक्तं प्रत्यक्षं देहस्य मात्मनि उपचर्यते इति न तद्विरोधोऽपि यद्वा एषयज्ञायुधिशब्दौ स्वार्थपरावेत्र स्वर्गगमनं यजमानत्वं च शरीरे उपचर्येते यूपादित्यादिवाक्यवदिति न प्रत्यक्षविरोधः। ननु प्रत्यक्षेण शरीरातिरिक्त आत्मा नोपलभ्यते इति सतमरसादिव न्न तत्सत्तेत्यभिप्रायेण शंकते कोऽन्ना वन्य इति। अतिरिक्ते प्रमाण माह प्राणादिभिरिति यथा रथगत्या सारथि र्ज्ञायते तथा प्राणादिचेष्टया शरीराद्यधिष्ठातात्मापीति भावः। शरीरधर्म एवास्तु चेष्टा तथा नातिरिक्तात्मसिद्धिरित्याह शरीरमेव प्राणितीति। रूपादिवद् याव-च्छरीरभावित्वाभावान्न प्राणादयः शरीरधर्मा इत्याह न प्राणादय इति। किंच शरीरगुणा रूपादयः परेणा प्युपलभ्यन्ते आत्मगुणाः सुखा-

दयः केवलं स्वेनैव न परेणेति वैधर्म्या च्छरीरा-
तिरिक्तात्मसिद्धि रित्याह सुखादयश्चेति। ननु
यूपादित्यादिवाक्यवदेष यज्ञायुधीत्यादिवाक्या-
ना मुपचरितत्वेनो पपादनाच्छरीराद्यतिरिक्तात्म-
साधने कोभिप्रायो भाष्यकृत इतिचे दयमभि-
प्रायः शरीरातिरिक्तात्माभावा त्स्वर्गादिफलचो-
दनाना मप्रामाण्यं शरीरादे रिहैव भस्मीभावा
त्स्वर्गादिगमन मशक्यं शरीरान्तरपरिणतेऽपि
तस्य कर्तृत्वाभावा न्न भोक्तृत्वं किंच आशानां प्रति
क्षणपरिणामितया न कर्तुः कस्यचिद्द भोक्तृत्वं
विज्ञानस्वरूपस्याप्यात्मनः कर्तृत्वभोक्तृत्वयो
रसंभवः क्षणिकत्वात् एवंचा प्रदत्तस्वर्गादिफल-
कयागचोदनानाम प्रामाण्य मिति नैरात्म्यवा-
दिना माक्षेपसमाधानाय शरीराद्यतिरिक्तात्म-
साधने भाष्यकारप्रवृत्ति रिति ध्येयम्। ननु यदि
आत्मा नित्यः कथं तर्हि "एतेभ्य एव भूतेभ्यः स-
मुत्थाय तान्येवानुविनश्यती" त्यागमः संगच्छते?
अत्रात्मनो भूतेभ्यः समुत्पत्तिः तत्रैव विनाश

इति स्पष्ट एव प्रतीयते इतिचेन्न एतादृशवच-
नस्य शरीरपरत्वात् शरीरस्य भूतोपादानकत्वात्
तत्र उत्पत्ति र्युक्तैवोपादाने कार्यलयाभ्युपगमाद्
विनाशोपि। ननु नित्यस्य स्पन्दशून्यस्या त्मनो
न कर्तृत्वभोक्तृत्वसंभवः संभवेपि मत्कृतकर्मण
इदं फलं मयोपभुज्यते इति भोगकाले तदपरा-
मर्शेना त्स्यत्वापत्त्या तत्र प्रवृत्ति र्न स्या त्सर्वोहि
फलानुभवकाले तादृशफलसाधनं जानान स्त-
ज्जातीये कर्मणि फलाभिनिवेशवशेन पुनः प्रव-
र्तते नान्यथा एवं निषिद्धेऽपि कर्मणि निवृत्ति र्न
स्यात् एतज्जातीयस्य निषिद्धस्यैतदनिष्टं फलं
यत्प्रतिकूलवेदनीयत्वेनोपनत मित्यपरामर्शे
तज्जातीये कर्मणि द्वेषानुपपत्तेः। एवंचा नित्य-
त्वपक्षे इव नित्यत्वपक्षेपि कृतनाशाकृताभ्योग-
मापत्ति स्तदवस्थैवेति वृथा नित्यत्वाभ्युपगम
इति चेन्न इष्टसाधनत्वज्ञानस्य प्रवृत्तिं प्रत्येव
हेतुतया प्रवृत्तिकाले तादृशज्ञानस्य विदुषां स-
त्वात्प्रवृत्युत्तरकाले जायमानफलानुभवे तत्पराम-

र्शविरहे त्तत्यभावात्। किंच भोगवेलाया मपि ममेदं कर्मणःफलं ममैव जन्मान्तरपातकाना मित्यादिपरामर्शो विदुषां जायत एव अविदुषां तत्राधिकाराभावा त्तेषां तदपरामर्शेऽपि न दोषः। तस्मा त्प्रवृत्तिसमये साधनज्ञानमपेक्ष्यते न भोगसमये अतएव स्वापसमये सुखरचितशयन-स्यापरामर्शेऽपि तत्र प्रवृत्ति रुपपद्यते। भोगावसरे साधनापरामर्शो वेदप्रामाण्यौपयिक एव अन्यथा ज्ञातज्ञापकत्वेना प्रामाण्यापत्ते रिति। यच्चोक्तं नित्यस्य विभो र्न कर्तृत्वभोक्तृत्वं तदपि न विभोः कर्तृत्वस्याग्रे वक्ष्यमाणत्वात् नित्यस्यापि अविक्रियस्य कर्तृत्वं भोक्तृत्वं चोपपद्यते। नच क्रिया स्वाश्रय मविकार्य नोत्पत्तु मर्हति विकारे च पूर्वस्वरूपप्रच्युतिः स्वरूपान्तरापत्तिश्चेति मृ-त्पिण्डव दनित्यत्व मेव स्यादुत्पत्त्यपायधर्मक-त्वात् किंच विकारः ततोऽतिरिक्तः अनतिरिक्तो वा आद्ये स पूर्ववदेवा कर्त्ता अभोक्ता द्वितीये विकारव त्तस्याप्युत्पत्तिस्वीकारा दनित्यत्वं वज्र-

लेपायितं स्यादिति नैवम् कर्तृत्वभोक्तृत्वादि-
ना विकाराभ्युपगमात् । नच तावता ऽनित्यत्वप्र-
सक्तिः तत्वेन प्रत्यभिज्ञायमानत्वात् । यश्च भे-
दाभेदविकल्पः सोपि तदुभयांगीकारादेव समा-
हितः कर्तृत्वभोक्तृत्वाद्यवस्थात्मना परिणामेऽपि
बालयुवादिव स्वरूपाच्छेदाभावेन नाकृताभ्या-
गमादिदोषः नहि अवस्थोच्छेदभयेन अवस्था-
न्तरोपभोगयोग्यशुभाशुभसाधनोपादानवर्जनम-
कुर्वन्नरो दृश्यते । नच युवावस्थायां सञ्चिता
त्साधनाद् वृद्धावस्थायां ततः फलभोगेऽन्यः
संचयकर्ता अन्यः फलभोक्तेति लोके व्यपदि-
श्यते किन्तु अवस्थासु आगमापायिनीष्वपि
अवस्थी एक एवानुवर्त्तते कनकमिव कुण्डला-
दिषु । नचावस्थायाः कर्तृत्वं भोक्तृत्वं येना-
कृताभ्यागमादेः शङ्का स्यात् किम्वा पूर्वावस्थाया
नात्यन्तसमुच्छेदः किन्तु उत्तरावस्थानुगुणयाया-
वस्थित्यात्मनि लयोऽर्थात्तदात्मना वस्थानमेव
नच कर्तृत्वाकर्तृत्वयो रवस्थयोः परस्परं विरोधा-

त्कथमेकस्मि न्नात्मनि समावेशः स्वरूपेण तयो र्विरोधेऽपि सामान्यात्मना विरोधाभावाद् वस्थात्वस्यो भयानुगतत्वादिति समावेशे नानुपपत्तिरिति। तथाच वेदप्रामाण्यसिद्धये शरीराद्यतिरिक्तात्मनिरूपण मत्यावश्यक मन्यथा शरीरात्माभिधानापत्या शरीरस्या नित्यतया परलोकगामित्वाभावां त्स्वर्गादिफलभोगानुपपत्या तत्फलकयागाद्यनुष्ठापकवेदाप्रामाण्यं स्यात्। ज्ञानात्मवादिनान्तु ज्ञानस्य क्रियाशून्यत्वादविभुत्वाच्च जन्मान्तर मेव न सम्भवति दूरे कर्तृ भोक्तृत्वादिकथा ज्ञानस्य क्षणिकत्वेन दीर्घकालानुष्ठेयकर्मकर्तृत्वासम्भवात्। नच ज्ञानानां त्वन्मतेऽवस्थावच्छिन्नत्वेऽपि स्थायिनः संतानस्य कर्तृत्वं त्वन्मते ज्ञानातिरिक्तस्य सन्तानस्याभावात् भोक्तु रत्यन्तभेदा दकृताभ्यागमो दुर्वारः कृतनाशस्त्वन्मतेन वक्तुं शक्यते कर्तु रभावात्। अथ व्यतिरिक्तः तदापि सर्ववस्तूनां त्वन्मते क्षणिकत्वेन न स्थायी स्याच्चेत्तर्हि अवस्तु स्या

त्ततो न किंचित्स्यात् अथ वस्तुस्वरूपः स्थायी तर्हि सर्वं वस्तु च्चणिकमिति तत्र सिद्धान्त-हानिः स्यात् योगाचाराणां ज्ञानातिरिक्तवस्त्वा-पत्ति रधिको दोषः स्यात् एवं च्चणिकानां चैत्य-वन्दनादिकर्मणां कालान्तर्भाविफलजनकत्वं न स्यात्। नच चित्तस्थितवासनयैव फलं सिद्ध्येत् च्चणिकज्ञानानां वास्यवासकभावस्य पूर्वमेव निराकरणात्। नचैकसन्तानजातयोः कर्तृचित्तभोक्तृचित्तयोः सन्तानद्वारैककर्तृकत्वा-न्नानुपपत्तिः तच्चित्तजत्वस्यैकधर्मस्य त्वन्मते ऽभावात्तेनोभयत्रैकबुद्ध्यनुगमासम्भवात् तथा-च यः कर्ता स भोक्ता इति बुद्धिदुरुपपादैव। तथाचात्मभरणेच्छया पुत्रादिभरणे प्रवृत्ति र्न स्यात्तदानी न्तस्यासत्वात् नचात्मभरणेच्छां विनापि तिरश्चा मपत्यभरणे यथा प्रवृत्ति स्तथा पुंसामपि किन्न भवेत् अज्ञानवशा त्तेषां तत्र प्रवृत्तिसंभवोऽपि ज्ञानिनां तथा वक्तु मशक्यत्वात्। ज्ञानस्य निष्क्रियत्वा त्पूर्वदेहत्यागोत्तरदेहो-

त्पादौ चाशक्यौ । यथा वायुप्रेरितज्वालादेरन्यत्र संचार स्तथा न बुद्धेः कश्चि त्प्रेरकः अमूर्त्तत्वात् अतएव नस्वय मुत्प्लुत्यापि गन्तुमर्हति तस्मात् स्थिरः पुरुषोऽङ्गीकार्य इतिसं क्षेपः । नन्वात्मनो विभुत्वा त्क्वचिदपि स्पन्दितु मवकाशाभावा त्कथं तत्र क्रिया तदभावे च न कर्तृत्वादि मैवं स्पन्दमात्रस्यैव क्रियात्वानभ्युपगमात् किन्तु धात्वर्थः क्रिया साच क्वचित्स्पन्दरूपा क्वचिदन्यैव अन्यत्रापि कर्मणि अन्यस्य कर्तृत्वं यथा हस्तादिनिष्ठायां स्पन्दरूपायां क्रियायामात्मनः कर्तृत्वं स्वनिष्ठज्ञानसत्तादिरूपधात्वर्थक्रियाया मात्मनः साक्षा त्कर्तृत्वं । नचहस्तादिनिष्ठक्रियायां कथ मात्मनः कर्तृत्वं नहि देवदत्तक्रियायां यज्ञदत्तः कर्ता भवति व्यधिकरणत्वा दिति वाच्यं मृते हस्तादौ क्रियाया अदर्शना न्न हस्तमात्रं स्वक्रियायां हेतुः किंत्वात्माधिष्ठित एवेत्यधिष्ठानद्वारा त्मनः तत्क्रियाकर्तृत्वं । यद्वोद्देश्यद्वारा यदाहि आत्मा हस्ता-

द्विपरिस्पन्द मुद्दिशति तदैव तत्र परिस्पन्दो नान्यथेति स्पन्दप्रयोजकत्वरूपकर्तृत्व मात्मनो वश्यमेवेष्टव्यम् यद्वा हस्तादीनां स्वातन्त्र्याभावा त्स्वतन्त्रकर्तृत्वमप्यात्मनः नच हस्तः स्पन्दते इत्यादौ धातुना हस्तव्यापार एवोच्यते इति धातूपात्तव्यापाराश्रयत्वरूपकर्तृत्वं हस्तादेरेव संभवति नत्वात्मन स्तद्व्यापारस्य धातुनानभिधाना दिति वाच्यम् यथा ऋत्विगादिद्वारा यजमानस्य कर्तृत्वं तथाहस्तद्वारात्मनः कर्तृत्वं वस्तुतस्तु न धात्वर्थव्यापाराश्रयत्वं कर्तृत्वं किन्तु आख्यातोपात्तभावनाश्रयत्व मेव तत्। आख्यातं च क्वचिद्धात्वर्थसमानाश्रयं व्यापारं वक्ति यथा विक्लिद्यन्ति तण्डुला इति क्वचिद्व्यान्याश्रयं यथा रोचन्ते मोदका इति क्वचिदुभयं पचति देवदत्तः पचन्ति तण्डुला इति तथाच सत्तामात्रेणा त्मनः सर्वक्रियासाधारणं कारणत्वं संकल्पादिभिस्तु प्रतिकर्म व्यवस्थितं नचैकरूपमेव सर्वत्र कर्तृत्वं तथाचोक्तम् "साधा-

रणेन कर्तृत्वं सत्ववत्वेन कर्मसु संकल्पनैः पुनर्भेदात् प्रतिकर्मास्य कर्तृता। नच सर्वत्र तुल्यत्वं स्यात्प्रयोजककर्मणां चलनेन ह्यसिं योद्धा प्रयुङ्क्ते छेदनं प्रति। सेनापतिस्तु वाचैव भृत्यानां विनियोजकः राजासन्निधिमात्रेण विनियुङ्क्ते कदाचन" इत्यलमतिविस्तरेण। तथाच शरीराद्यतिरिक्तो नित्यो विभु ज्ञानसुखादिगुणकः आत्मा यजमानः सच स्वर्गगामीति नानुपपद्यते एष यज्ञायुधीति वचनमिति नच शरीराद्यतिरिक्तात्मसाधनाय प्राणादी न्हेतुत्वेनोपादाय पुनः सुखादीनां तत्वेनोपादान मनर्थकम् विशेषाभावात्। नच परकीयदर्शनादर्शनाभ्यां विशेषः सुखादिव त्प्राणस्यापि शरीरान्तर्वर्तित्वेन परस्य परोक्षत्वात् मैवं प्राणस्य बहिर्वृत्ते रपि सत्वेन परापरोक्षत्वात् सुखादीना न्त्वान्तरत्वा त्परेन्द्रियगोचरत्वासम्भवात् केनं तर्हि परकीयसुखादिग्रहणम् प्रहृष्टवदनत्वादिलिङ्गेन अयं सुखी प्रहृष्टवदनत्वा दित्यनुमानेनैव सुखादिग्रहणं नचा-

न्तःस्थित्या व्यवधाना दिन्द्रियसन्निकर्षाभावेना-प्रत्यक्षत्वेऽपि शरीरान्तर्गतरूपादिव त्तद्धर्मत्व-मेवेति वाच्यम् उत्पाटितशरीरे तदन्तर्गतरूपा-दिवत्तदनुपलब्ध्या तद्गुणत्वे मानाभावात् तथा सुखादीनां गुणत्वा दाश्रयो ऽनुमीयमानः शरी-रादि र्न भवतीत्यतिरिक्तः आत्मा सिद्ध्यति प्रयोग श्चैवं सुखादिः क्वचिदाश्रितः गुणत्वाद्रू रूपवदिति सामान्यत आश्रये लब्धे शरीरादि-गुणत्वाभावा त्पारिशेष्येण तदाश्रयः आत्मा सिद्ध्यतीति स्पष्ट मन्यत्र तदेवं वैशेषिकनयेन शरीरातिरिक्ते आत्मनि साधिते तदसहमाना विज्ञानवादी प्रत्यवतिष्ठते कुत एष संप्रत्यय इति

भा० आह—कुत एषः सम्प्रत्ययः ? सुखादिभ्योऽन्यस्तद्वान् अस्तीति, नहि सुखादिप्रत्याख्यानेन तस्य स्वरूप मुपलभामहे। तस्मात् शशविषाणवत् असौ नास्ति। अथोच्यते, तेन विना कस्य सुखादयः ? इति। न कस्यचिदपि इति वक्ष्यामः। नहि, यो यः उपलभ्यते, तस्य तस्य सम्बन्धिना भवितव्यम् नहि चन्द्रमसं, आदित्यं वा उपलभ्य सम्बन्धान्वेषणं भवति कस्यायमिति। न कस्यचिदपि इत्यवधार्य्यते। तस्मान्न सुखादिभ्योऽन्यः तद्वान्

अस्तीति। अथ उपलब्धस्यावश्यं कल्पयितव्यः सम्बन्धी भवति। ततः आत्मान मप्यनेन प्रकारेणोपलभ्य कस्यायमिति ? सम्ब-न्धान्तर मन्विष्वेम। तमपि कल्पयित्वा, अन्यमपि कल्पयित्वा, अन्य मित्यनवस्थैव स्यात्। अथ कञ्चित् कल्पयित्वा न सम्बन्ध्यन्तरमपि कल्पयिष्यसि तावत्येव विरंस्यसि, तावता च परितोष्यसि। ततो विज्ञाने एव परितुष्य तावत्येव विरन्तु मर्हसि। अत्रोच्यते। यदि विज्ञानादन्यो नास्ति कस्तर्हि जानाति इत्युच्यते ? ज्ञानस्य कर्तु रभिधानमनेन शब्देन नोपपद्यते। तदेषः शब्दोऽर्थवान् कर्तव्यः इति ज्ञानाद् व्यतिरिक्त मात्मानं कल्पयिष्यामः इति।

अयमभिप्रायः यदि सुखादि गुणः स्या त्तदा तस्य शरीरगुणत्वासंभवा दन्याश्रयानुमा-पकत्वं भवे न्नच सुखादि गुणः किन्तु स्वतन्त्र-ज्ञानरूप एवेति किमनुरोधेना तिरिक्तात्मसिद्धिः नच सुखाद्यनुपहितः कदाचिदु पलभ्यते योग्य-विशेषगुणद्वारा तत्प्रत्यक्षस्य परैरप्यङ्गीकारात् तादृशगुणशून्यतत्स्वरूपो पलब्धे रभावादित्याह नहीति। नच सुखादीना मिष्टत्वा त्परार्थत्वं नहि द्राक्षा स्वात्मनं प्रिया भवति किन्तु यस्मै रोचते तथाच सुखादीना मपि कश्चिदर्थी ततो तिरिक्तः कल्प्यते इत्याह अथेति। यदीष्टत्वेन

परानुमानं क्रियेत तर्हि अनवस्थैव स्यात् सुखाद्यतिरिक्तात्मकल्पनाया मपि तस्यापीष्टत्वेन परार्थत्वा त्तदतिरिक्तोपि सिद्ध्येदेवं तस्य तस्यापि तत्तदतिरिक्तानुमापकत्वापत्तेरिति । नचोपलभ्यमानत्वं संबन्धिसत्ताव्याप्यं चन्द्रादौ व्यभिचारा दित्याह नहि चन्द्रमसमिति। तथाच व्यभिचारा न्नोपलभ्यमानत्वेना श्रयकल्पनेत्याह तस्मादिति । अतिरिक्तकल्पनाया मनवस्थां स्फोरयति अथेत्यादिना । अनवस्थाभयाद्यदि क्वचि त्संबन्ध्यन्तरकल्पनापरित्याग स्तावन्मात्रकल्पनया च सन्तोषः तदा ज्ञाने एव तदुभयमस्तु किं कल्पनाश्रमेणे]त्याह अथ किंचि त्कल्पयित्वेति । ननु आत्मनो विज्ञानानतिरिक्तत्वे जानातीत्यादौ कर्तृबोधनानुपपत्तिः विज्ञानस्यैव विज्ञानकर्तृत्वसंभवात् नहि छिदैव तत्कर्ता लोके व्यपदिश्यत इत्यभिप्रायेण पृच्छति कस्तर्हीति । तथाच जानातीत्यादिशब्दसार्थक्याय तदतिरिक्तात्मकल्पन मुचित मित्याह

तदेषशब्द इति । प्रमाणव्यापारं विना शब्दसा-र्थक्याय थान्तरकल्पना न युक्ता अन्यथा हुंफ-डादिशब्देऽपि तदर्थमर्थान्तरकल्पनापत्ति रिति तदाह वेदाइति

भा० आह—वेदा एनं शब्द मर्थवन्तं कल्पयिष्यन्ति, यदि कल्पयितव्यं प्रमंस्यन्ते । बहवः खल्विह जनाः अस्ति आत्मा अस्ति आत्मा इति आत्मसत्तावादिनः एव शब्दस्य प्रत्यक्षवक्तारो भवन्ति । तथापि नात्मसत्तां कल्पयितुं घटन्ते । किमंग पुनः जानाति इति परोक्षशब्ददर्शनात् । तस्मादसदेतत् ।

भा० उच्यते । इच्छया आत्मान मुपलभामहे । कथमिति ? उपलब्धपूर्वेहि अभिप्रेते भवतीच्छा यथा मेरु मुत्तरेण यान्यस्मज्जातीयै रनुपलब्धपूर्वाणि स्वादूनि वृक्षफलानि न तानि प्रति अस्माकं इच्छा भवति, नो खल्वन्येन पुरुषेणोपलब्धेऽपि विषयेऽन्यस्य उपलब्धु रिच्छा भवति । भवति च अन्येद्यु रुपलब्धे अन्येद्यु रिच्छा। तेन उपलम्भनेन समानकर्तृका सा इत्यवगच्छामः । यदि विज्ञानमात्र मेवेदमुपलम्भकम् अभविष्यत्, प्रत्यस्ते तस्मिन् कस्यापरेद्य रिच्छा अभविष्यत् ? अथ नु विज्ञानादन्यो विज्ञाता नित्यः, ततः एकस्मि-न्नहनि य एव उपलब्धा, परेद्यु रपि स एवैषिष्यतीति । इतरथा हीच्छा नोपपन्ना स्यात् ।

आत्मसत्तावादिनो विद्वांसो यदि आत्मनो विज्ञानातिरिक्तस्य सत्तां साधयितुं न समर्था

स्तर्हि वराको जानातिशब्दः कथं साधयितुं प्रभवेदित्याह पुनर्जानातीति। "हते भीष्मे हते द्रोणे कर्णे च विनिपातिते आशा बलवती राजन्! शल्यो जेष्यति पाण्डवानिति" न्यायादितिभावः। तदेवं विज्ञानवादं निरसिसिषु रतिरिक्तात्मसाधनप्रदिदर्शयिषयाह उच्यत इति हेतुमाह इच्छयेति। ज्ञानेच्छयोः समानविषयकत्वं समानकर्तृकत्वंच दर्शयति उपलब्धपूर्वे हीति अनुपलब्धे नेच्छेत्येत त्प्रदर्शनायाह मेरुमिति। नचान्येना प्युपलब्धे इच्छेत्येनत्स्पष्ट माह नोखल्विति। एवं चान्वयव्यतिरेकदर्शना दिच्छाज्ञानयोः समानकर्तृकत्वं निश्चीयते तदाह समानकर्तृका इति तथाच ज्ञानसमानकर्तृकेच्छाज्ञानातिरिक्तं स्थिर मात्मानं साधयतीतिभावः। ननु न दृष्टेऽनुपपन्नं नामेति न्यायेन समानसन्तानवर्त्ति ज्ञानेच्छयो स्तत्सन्तानवर्त्तिना ज्ञानेन दृष्टे वस्तुनि तत्सन्तानजज्ञानान्तरस्येच्छा भवति न भिन्नसन्तानजज्ञानस्येति नियमस्त्वी-

कारेण समानकर्तृकत्वाभावेपि च्चतिविरहा न्ना-तिरिक्तात्मसाधनावकाश इत्यभिप्रायेण शंकते अनुपपन्नमिति ।

भा० अत्रोच्यते—अनुपपन्न मिति नः क्व सम्प्रत्ययः । यन्न प्रमाणेनावगतम् । विज्ञानात्तावदन्यं नोपलभामहे, यन्नोपलभामहे, तत् शशविषाणवदेव नास्ति इत्यवगच्छामः । नच तस्मिन्नसति विज्ञानसद्भावोऽनुपपन्नः प्रत्यक्षावगतत्वादेव । क्षणिकत्वं च अस्य प्रत्यक्षपूर्वकमेव । नच ज्ञातरि विज्ञानादन्यस्मिन् असति,ज्ञाने चानित्ये अपरेद्यु रिच्छा अनुपपन्ना । प्रत्यक्षावगतत्वादेव । नो खल्वप्येतत् दृष्टं, य एवान्येद्युरुपलब्धा स एवान्येद्युरेषिता—इति । इदं तु दृष्टं यत् क्वचित् अन्येन दृष्टमन्यः इच्छति, क्वचिन्न समानायां सन्ततावन्य इच्छति सन्तत्यन्तरेणेच्छतीति । तस्मान्न सुखादिव्यति-रिक्तोऽन्योऽस्तीति । अत्रोच्यते नहि अस्मर्तार इच्छन्ति इत्युपपद्यते । न वा अदृष्टपूर्वं स्मृति र्भवति । तस्मात् क्षणिक-विज्ञानस्कन्धमात्रे स्मृतिरनुपपन्नेति ।

प्रमाणानुपलब्धं न स्वीकर्तु मुचित मि-त्याह यदिति । तस्मिन्निति विज्ञानातिरिक्ते स्थिरे आत्मनीत्यर्थः ज्ञानेच्छयोः समा-नकर्तृकत्वाभावं दर्शयति विज्ञानवादी नोख-ल्विति । समानसन्ततौ एकेन दृष्टमन्य इच्छति अन्यसन्ततौ तु नेत्येतदाह क्वचिदिति । उपसं-

हरति तस्मादिति। समाधानमाह अत्रोच्यते इति। स्मृतिलिङ्गे नात्मनोऽतिरिक्तस्य लाभः य एव द्रष्टा स एव स्मर्त्ता नहि देवदत्तदृष्टं यज्ञदत्तः स्मरति नच विज्ञानवादिनां स्थिरो द्रष्टा विज्ञानानां क्षणिकत्वादितिभावः। नन्विच्छास्मरणयो राक्षेपपरिहारौ तुल्यौ यथा ऽदृष्टे ऽन्यदृष्टे वेच्छा न भवति एवं स्मरणमपि इत्याक्षेपतौल्यं समानसन्तानजवासनातः परिहारस्यापि साम्य मित्यविशेषाद् भेदेनोभयोपादाने कोऽभिप्राय इति चेदय मभिप्रायः इच्छां प्रति नोपलब्धिः कारणं किन्तु स्मृतिरिति नोपलब्धिसमानकर्तृकत्व मिच्छायाः किन्तु स्मृतिसमानकर्तृकत्वमेवेति नान्यदृष्टस्थले इच्छापत्तिः तत्र स्मरणाभावात् स्मृतिस्तु पूर्वानुभवविषये एव भवन्ती समानकर्तृकत्वं नियमेन गमयति गर्भ इव पुंयोगमिति विशेषेण पृथक् स्मरणोपादानं बोध्यमिति। इच्छावत्स्मृतिरपि समानसन्ततौ भिन्नकर्तृका संभवत्येव वासनावशादित्यभि-

प्रायेण निराकरोति स्मृतिरपीति ।

भा० अत्राह स्मृतिरपि इच्छावत् पूर्वज्ञानसदृशं विज्ञानं पूर्वविज्ञानविषयं वा स्मृतिः इत्युच्यते । तच्च द्रष्टरि विनष्टेऽपि अपरेद्यु रुत्पद्यमानं नानुपपन्नं प्रत्यक्षावगत्वादेव । अन्यस्मिन् स्कन्धघनेऽन्येन स्कन्धघनेन यत् ज्ञानं तत् सन्ततिजेनान्येनोपलभ्यते नातत्सन्ततिजेनान्येन । तस्माच्छून्याः स्कन्धघना इति । अथास्मिन्नर्थे (बृ० उ० ६ अ० ५ ब्रा०) ब्राह्मणं भवति, विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति इति ।

उच्यते नैतदेवम् । अन्येद्यु र्दृष्टेऽपरेद्युः अहमिदमदर्शम् इति भवति प्रत्ययः । प्रत्यगात्मनि चैतद्भवति, न परत्र, अपरोक्ष्यसौ अन्येद्युर्दृष्टवान् । तस्मात् तद्व्यतिरिक्तोऽन्योऽस्ति, यत्रायं अहंशब्दः । आह परत्राप्यहं शब्दो भक्त्या दृश्यते । यथा अहमेव पुत्रः, अहमेव देवदत्तः, अहमेव गच्छामि इति । अत्रोच्यते न वयं अह मितीमं शब्दं प्रयुज्यमान मन्यमिस्मन्नर्थे हेतुत्वेन व्यपदिशामः । किं तर्हि शब्दाद् व्यतिरिक्तं प्रत्ययं प्रतीमो वयम् इममर्थं वयमेवान्येद्यु रुपलभामहे वयमेवाद्य स्मरामः तस्माद्वयमिममर्थ मवगच्छामः वयमेव ह्यः वयमेवाद्य इति । ये ह्यः अद्य च नते विनष्टाः । अथान्यस्मिन्नर्थे ब्राह्मणं भवति, (बृ० उ० ४ अ० ५ ब्रा०) । स वा अयमात्मा इति प्रकृत्य आमनन्ति अशीर्य्यो नहि शीर्य्यते इति तथा (बृ० उ० ६ अ० ब्रा० ५) अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्म्मा इति । विनश्वरश्च विज्ञानम् । तस्माद्विनश्वरादन्यः स इत्यवगच्छामः । नच शक्यमेव मनुगन्तुम् । यथोपलभ्यन्ते अर्थाः, न तथा भवन्तीति,

यथातु खलु नोपलभ्यन्ते तथा भवन्तीति। तथाहि सति शशो नास्ति शशस्य विषाण मस्तीत्यवगम्येत। नच अहं प्रत्ययो व्यामोहः इति शक्यते वक्तुम्, बाधकप्रत्ययाभावात्। तस्मात्सुखादिभ्यः व्यतिरिक्तोऽस्ति। एवंचेत् स एव यज्ञायुधी इति व्यपदिश्यते।

स्मृतिलक्षणां विकल्प्य दर्शयति पूर्वज्ञानेति दर्शनस्मरणयो भिन्नकर्तृकत्वेपि नानुपपत्ति स्तथादर्शनादित्याह द्रष्टरीति। चैत्रादिदृष्टस्य मैत्रादौ स्मरणं वारयति नातदिति एवंच समानसंताने एवान्येन दृष्टस्यान्येन स्मरणं नतु भिन्न सन्ताने इति दर्शनबला त्कल्प्यते रूपविज्ञानवेदनासंज्ञासंस्काररूपः पञ्चस्कन्धः सौगताना मात्मा नान्य स्तदाह स्कन्धघन इति। स्वोक्तेऽर्थे आगमं दर्शयति विज्ञानघन इति। समाधातुं निराकरोति नैतदेवमिति। अन्येद्यु रिति तथाच पूर्वापरकालस्थायिन मेकं ज्ञातारं विना प्रत्यभिज्ञेयं नोपपद्यते इत्यनया तथा ज्ञाता सिद्ध्यत्येव। पूर्वापरदर्शिनो रभेदमाह अपरो ह्यसौ इति। अपरो ऽभिन्न इत्यर्थः नचाहंप्रत्ययविषयो

विज्ञानं तस्य क्षणिकत्वेन पूर्वोत्तरकालस्थायित्वाभावात् यत्रेति अह मर्थस्यैवा त्मत्वादिति-भावः। ननु नाहमर्थस्या त्मत्व मन्यत्रापि प्रयोगदर्शना दित्याशंकते परत्रेति अहमेव पुत्र इति पुत्रत्वादेः शरीरधर्मत्वेनात्मधर्मत्वाभावात् ततश्चाहमर्थस्या नात्मत्वं स्पष्टमेव नचाहं गच्छामी त्यत्राहं शब्दस्य कथमनात्मपरत्वं उच्यते आत्मनो विभुत्वेना न्यत्र गमनासंभवा देहतात्पर्येणैव तादृशप्रयोगात् देहस्य गमनदर्शना त्तस्य चानात्मत्व मेवेति आक्षेपसमाधानायाह उच्यते इति। न शरीरा द्व्यतिरिक्त आत्मा ऽहंशब्दप्रयोगबलेन साध्यते येन तस्यानात्मन्यपि प्रयोगदर्शनेन व्यभिचारः शंक्येत किन्तु ज्ञातृविषयप्रत्यभिज्ञारूपं प्रत्यक्ष मात्मनः पूर्वापरकालस्थायितया विज्ञानातिरिक्तत्वे प्रमाणं प्रदर्शयामः। नच स्मरणव त्प्रत्यभिज्ञापि समानसंतानजवासनावशाद्भेदे ऽप्युत्पत्तु मर्हति नानया पूर्वापरदर्शी विज्ञानातिरिक्तः आत्मा सेद्धु मर्ह

तीति वाच्यम् अन्यार्थविषयप्रत्यभिज्ञास्मरणयो र्वासनयोपपत्तौ विज्ञातृविषयैक्यप्रत्यभिज्ञाया स्तयोपपादनासंभवात् वयमेव ह्यः वयमेवाद्य इति भाष्येण पूर्वोत्तरदिनस्थायिनो ज्ञातु रात्मन एकत्वेन प्रत्यभिज्ञानं स्पष्टमेव दर्शितं नचैतद्विज्ञानात्मनि संभवति क्षणिकत्वेन पूर्वापरकालस्थायित्वाभावात् नचेय मप्रमाणं बाधकाभावादित्यतिरिक्तात्मसिद्धिरिति नचेयं प्रत्यभिज्ञा ऽहंगौर इत्यादिवत् शरीरविषयैव किन्नेष्यते शरीरस्य भौतिकत्वेन चैतन्यायोगात्। नच भूतस्यैव चैतन्यं गुणो स्तु विकल्पप्रसंगात् प्रत्येकस्य चैतन्य मुत समुदायस्य नाद्यः सर्वेषां प्राधान्यापत्त्या समुदायारम्भानुपपत्तेः लोष्ठादावपि चैतन्यापत्तेश्च न द्वितोयः संघातस्य शयनादिवत्परार्थत्वेन चैतन्यायोगात् तस्मादहं गौर इत्यादिप्रतीतिः देहात्मनो र ववेकाद्देहगतं गौरत्वादि आत्मगतत्वेना ध्यवस्यति इति भ्रान्तिरेव मम शरीरं गौरं कृश मित्यादि प्रत्ययेनात्मशरीरादे

भेदावगाहनात् एकतरप्रतीते रवश्यमिथ्यात्वेना भेदावगाहिप्रत्ययस्यैव मिथ्यात्वं भेदावगाहिनस्तु यथार्थत्व मेवेति दिक्। ननु मम शरीरमितिव न्ममात्मा इत्यपि भेदव्यपदेशः ममात्मा न जानातीति लोकव्यवहारदर्शना दात्मान्तर मप्यङ्गीकार्य्यं स्यादितिचेन्न ज्ञानस्यावस्थात्मना कथंचि द्भेदस्वीकारेण भेदव्यपदेशोपपत्ते ज्ञानस्यात्मधर्मतया धर्मधर्मिणो र्भेदाभेदोभयस्वीकारात् नत्वात्मादेन्तया त्मनो भेदव्यपदेश इति तद्भेदस्वीकारः प्रमाणाभावात् नहि प्रमाणं विना प्रतीतिमात्राद्वस्तुसिद्धिः शुक्तिरजतादिवदारोपेणापि प्रतीत्युपपत्तेः श्रवणमननादिना कृतशरीरात्मविवेकस्यापि योगिनो ऽहमिति जानामीति च ज्ञानद्वयं न निवर्तते अन्यथा स्वात्मनि अहंबुद्धिनिवृत्त्या तदुपासनानुपपत्तेः जानामीति ज्ञाननिवृत्तौ शिष्योपदेशानुपपत्तेश्च। नचाहं जानामी त्यजानानः प्रामाणिकः परस्मै उपदिशति तस्माद्द योगिनोपि अहमिति जानामीति

ज्ञानद्वय मास्थेय मतएव भगवद्गीतायां "अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति" गुडाकेशं प्रत्युपदेशो भगवतो वसुदेवसूनो रहंमानवतः संगच्छते एवंच शरीराद्यतिरिक्तः पूर्वापरकाल-दर्शी आत्मा प्रत्यभिज्ञया सिद्ध्यति विनाश-कारणाभावा त्तस्च नित्यो नतु विज्ञानस्वरूपः अनित्यत्वप्रसङ्गा दत्रार्थे ब्राह्मणं प्रमाणयति अशीर्यो न ही शीर्यते अविनाशीवेत्यादि। ननु-वेदप्रामाण्ये विप्रतिपन्नं नास्तिकं प्रत्यागमोप-न्यासो निरर्थकः तस्य तत्राविश्वासा दिति चे त्सत्यम् न नास्तिकानां समाधानाय एतद्ब्राह्म-णवाक्य मुपन्यस्यते किन्तु ये आस्तिका विज्ञा-नघन एव एतेभ्यो भूतेभ्य इति वाक्येन भूतचै-तन्याभिधायिना नित्यात्मस्वीकारे विरोधमाशं-कन्ते तेषां समाधानायैवै तदुपन्यासः न केवलो-पनिषद्वाक्या देवा त्मनित्यत्वनिश्चयः पारलौ-किकस्वर्गादिफलकाग्निहोत्रादिचोदनावाक्यादपि तन्निर्णयो ऽन्यथा तस्या प्रामाण्यापत्ते रिति

ध्येयम् यथाप्रमाणं पदार्थो ङ्गीकार्यो न वैपरी-त्येन अत्र सोपहास माह शशो नास्तीति । प्रमा-णानादरे शशो नास्ति विषाणमस्तीति वदतः किमुत्तरं स्यादित्यभिप्रायः सुखाद्यतिरिक्तनि-त्यात्मस्वीकारे प्रयोजनं दर्शयति स एव यज्ञा-युधोति प्रमाणप्रदर्शनाशक्यतया शशविषाणवन्न विज्ञानातिरिक्तात्मसिद्धि रित्यभिप्रायेण शंकते यदिविज्ञानादिति ।

भा० आह—यदि विज्ञानादन्यदस्ति विज्ञातृ, विज्ञानमापस्य तन्निदर्श्यताम्, इदं तत्, ईदशश्च इति, नच तत् निदर्श्यते । तस्मान्न ततोऽन्यदस्ति इति । अत्रोच्यते स्वसम्वेद्यः स भवति, नासावन्येन शक्यते द्रष्टुम्, कथमसौ निदर्श्येत ? इति । यथाच कश्चित् चक्षुष्मान् स्वयं रूपं पश्यति, नच शक्नोत्यन्यस्मै जात्यन्धाय तत् निदर्शयितुम् । नच तत् न शक्यते निदर्शयितुम् इत्येतावता नास्ति इत्यवगम्यते । एवमसौ पुरुषः स्वयमात्मान मुपलभते, नचान्यस्मै शक्नोति दर्शयि-तुम् अन्यस्य द्रष्टुस्तं पुरुषं प्रति दर्शनशक्त्यभावात् । सोऽप्यन्यः पुरुषः, स्वयमात्मान मुपलभते, नच परमात्मानम् । तेन सर्वे स्वेन स्वेनात्मना आत्मानमुपलभमानाः सन्त्येव, यद्यपि परपुरुषं नोपल-भन्ते इति । अथाऽस्मिन्नर्थे ब्राह्मणं (वृ० उ० ६ अ० ३ ब्रा०) भवति शान्तायां वाचि किं ? ज्योतिरेवायं पुरुषः आत्मज्योतिः सम्रा-

डिति होवाच इति। परेण नोपलभ्यते इत्यत्रापि ब्राह्मणं (बृ० उ० ५ अ० ९ ब्रा०) भवति अगृह्यो नहि गृह्यत इति। परेण न गृह्यते इत्येतदभिप्रायमेतत्। कुतः? स्वयं ज्योतिष्ट्ववचनात्। अथापि ब्राह्मणं (बृ० उ० ६ अ० ब्रा० ७) भवति, अत्रायं पुरुषः स्वयं ज्योतिर्भवतीति। केन पुनरुपायेनाय मन्यस्मै कथ्यते इति तत्राप्युपाये ब्राह्मणं (बृ० उ० ६ अ० ३ ब्रा०) भवति, स एष न इति, न इति आत्मेति होवाच इति। असौ एवंरूपः इति न शक्यते निदर्शयितुम्।

स्वरूपलक्षणाभ्या न्निर्देश्य मित्याह इद-मीदृशं चेति अन्यत्वे प्रमाणोपदर्शनाश-क्यत्वा दाह तस्मान्नेति समाधातु माह अत्रोच्यते इति। यथा स्वकीयं सुखदुः-खादि परस्मै तत्वतः प्रदर्शयितुं न शक्यते उपायाभावात् तथापि स्वानुकूलप्रतिकूलवेदनी-यत्वेन प्रत्यात्मसिद्धं तदपह्नोतुं न शक्यते एव मय मात्मा स्वसंवेद्यो नान्यस्मै प्रदर्शयितुं शक्यते उपायाभावादेव तथापि प्रत्यात्मसिद्ध-त्वान्न प्रत्याख्यातुं शक्यः अत्र निदर्शन माह यथाचेति जात्यन्धायेति जन्मान्धायेत्यर्थः दर्शन-

शक्त्यभावादिति न दृष्टे र्द्रष्टारं पश्येदित्यादि श्रुत्या दर्शनशक्त्यभावो ऽवगम्यते परप्रत्यक्षा-योग्या अपि सर्वे आत्मानः स्वानुभूतिसिद्धा इत्याह सर्वं स्वेनेति। उक्तेऽर्थे आगमं सम्वाद-यति शान्तायामिति। अत्र स्वयंज्योतिश्शब्दो-पादानेन स्वसंवेद्य एव नान्योपाये नायं दर्शयितुं योग्य इति स्पष्टमेव लभ्यते। अग्राह्यो नहि गृह्यते इति सामान्योक्त्या ऽग्रहणं सामान्यतः प्रसक्तमपि स्वयंज्योत्क्तिष्ट्वगाचना त्यरे ग न गृह्यते आत्मना तु गृह्यत एवेति फलति तदाह परेण न गृह्यते इति। प्रसिद्धशरीरादिनिषेधेन नेति नेति बुद्ध्या परस्मै अयमुपदेष्टुं शक्य इत्याह स एष नेति दृश्यस्यात्मत्वप्रतिषेध एवात्मोपदे-शोपाय इत्याह यच्चेति।

भा० यच्च परः पश्यति, तत्प्रतिषेधस्तस्य उपदेशोपायः, शरीरं परःपश्यति, तेनात्मा उपदिश्यते—शरीरं नात्मा, अपितु शरीरादन्य इति, सचात्मा इति शरीरप्रतिषेधेनोपदिश्यते। तथा प्राणादयो ना-त्मानः, तत्प्रतिषेधेन तेभ्योऽन्यः उपदिश्यते। तथा परस्याः सुखादयः परेण लिङ्गै रुपलभ्यन्ते, तेऽपि नात्मानः इति तत्प्रतिषेधेनान्यः उपदिश्यते। यः स्वयं पश्यति, न ततोऽन्यः पुरुषः, इत्येतदपि पुरुष-

प्रवृत्याऽनुमीयते, यद्वाऽसौ पुरुषः पूर्वेद्युः सामिकृतानामर्थानां प्रतिसमाधाने शेषानुष्ठाने च यतते, अतः प्रवृत्याऽवगम्यते—नूनमसावनित्यान् नित्य मवगच्छति इति।

भा० उपमाना चोपदिश्यते, यादृशं भवान् स्वयमात्मानं पश्यति, अनेनोपमानेनावगच्छ—अहमपि तादृशमेव पश्यामीति। यथा कश्चिद्वात्मीयां वेदनां परस्मै आचक्षीत,—दह्यमानस्येव मे भवति, यात्यमानस्येव मे भवति, रुद्ध्मानस्येव मे भवति—इति। अतः स्वयमवगम्यमानत्वा दस्ति तद्व्यतिरिक्तः पुरुषः इति।

भा० यदुच्यते—विज्ञान मपास्य तत् निदर्श्यताम् (२५।१) इति। यद्य पायसेव निषेधसि, न शक्य मुपायमन्तरेणोपेयमुपेतुम्। अयमेवाभ्युपायो ज्ञातव्याना मर्थानां यो यथा ज्ञायते स तथा इति। तद्यथा कः शुक्लो नाम? यत्र शुक्लत्वमस्ति। किं शुक्लत्वं नाम? यत्र शुक्लशब्दप्रवृत्तिः। क्व तस्य प्रवृत्तिः यच्छुक्लशब्दे उच्चरिते प्रतीयते। तस्मान्न विज्ञानं प्रत्याख्याय कस्यचिद्रूपं निदर्शयितुं शक्यम्। नच, नियोगतः प्रत्यये प्रतीते प्रत्ययार्थप्रतीतो भवति। अप्रतीते हि प्रत्यये सति अर्थः प्रतीयते एव। नहि, विज्ञानं प्रत्यक्षम्। विज्ञेयोऽर्थः प्रत्यक्ष इति। एतत् पूर्वमेवोक्तम् (१०।२३) तदवश्यकर्तव्येऽपह्नवे कामं विज्ञान मपह्नुवीत। नार्थाः इत्येतदुक्तमेव (११।१३) तस्मादस्ति सुखादिभ्योऽन्यो नित्यः पुरुषः इति।

भा० अथ यदुक्तं (२४।१) विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञाऽस्ति इति—परिचोदनोत्तरकाले अपह्नुत्य मोहाभिप्रायमस्य वर्णितवान्—न वा अरे मोहं

ब्रवीमि, अविनाशी वा अरेऽयमात्माऽनुच्छित्तिधर्म्मा, मात्रासंसर्ग-स्त्वस्य भवति (बृ० उ० ६ अ० ५ ब्रा०) इति तस्मान्न विज्ञानमात्रम्। तस्माद्वैषम्यम्। यदुक्तं (१३। ५) नचैष याति—इति विधिशब्दः इति। माभूद्विधिशब्दः, स्वर्गकामो यजेत इति वचनान्तरेणावगत मनुवदिष्यते। तस्मादविरोधः।

तथाच प्राणादीना मात्मत्वेन प्रतिषेधात्तदन्य एवात्मा एवं सुखादिभ्योऽपि विवेकमाह तथेति पूर्वदिनानुष्ठितावशेषप्रतिसन्धानादनित्यसुखादिव्यतिरिक्त आत्मा प्रतिपत्तव्य इत्याह यदेति उपमानेनात्मोपदेशमाह यादृशमिति यद्यपीदृश मुपमानं न स्वमते संभवति प्रसिद्धसाधर्म्या त्साध्यसाधन मुपमानमिति गौतमसूत्रानुसारित्वात् नैयायिकमते हि सदृशा त्सदृशान्तरे बुद्धि रुपमान मिष्टं तथाचात्मदर्शनसाम्येन परात्मबोधन मुपमानफल मिति प्रदर्शनमयुक्तं तथापि शाब्द मेवेदं ज्ञानं प्रदर्शितं सादृश्यविषयत्वा दत्रोपमानपदं भक्त्या प्रयुक्तमिति बोध्यम्। स्वमते तु आत्मसादृश्यविशिष्टे परात्मनि अवगते तत्सा-

हश्यविशिष्टात्मावधारणं मेवोपमानं बोध्यम् । नच सति परात्मज्ञाने एवं वक्तुं शक्येत तदेव तु न संभवति उपायाभावा दितिवाच्यम् चेष्टा-दिलिङ्गस्य परात्मावधारणोपायस्य सत्त्वात् । यदपि विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति ब्राह्मणवाक्यं भूतचैतन्ये प्रमाण मुपन्यस्तं तदपि न उत्तर-ब्राह्मणवाक्येन तस्यातत्परत्वबोधनात् तथाहि श्रीयाज्ञवल्क्येन पूर्वमात्मनोऽजरामृतत्व मभि-धाय विज्ञानघन एव एतेभ्य इतिवाक्यमुक्तं ततः सदसद्रूपश्रवणाद् भ्रान्ता मैत्रेयी तमुवाच अत्रैव मा भगवान् मोहान्त मपीपद द्विरुद्धो-भयरूपाभिधानादिति । तत स्तत्सन्देहनिराकर-णाय अविनाशी वा अरे आत्मा अनुच्छित्तिधर्मा मात्रा ऽसंसर्ग स्त्वस्य भवतीत्यब्रवी त्स मुनि स्ततस्तस्यातत्परत्वं स्पष्टमेव लभ्यत इति नापरोक्ष मुपनिषद्दर्शिनां विदुषामित्युपरम्यते एतद्व्याख्यानादिति । यदपि याति इति न

विधिः लिङादे रश्रवणादिति तदभ्युपेत्य परिहरति माभूदिति । यागबोधकवाक्यान्तरस्य सत्वेनैतस्यानुवादकत्वात् वाक्यान्तरं विधायकं दर्शयति स्वर्गकामो यजेत इति । नचेदृशप्रतिपादना देहाद्यतिरिक्तात्मविवेके जातेऽपि पूर्ववदहं गौरोऽहं गच्छामीति देहाद्यालम्बनः प्रत्ययोनुवर्तत एवेति यादृशविवेके नेदृशप्रत्ययो न पुनर्भवे त्तादृशविवेकोपायः प्रतिपाद्यता मिति वाच्यम् तादृशोपायस्य श्रवणमननादे र्वेदान्ते प्रदर्शितत्वेनात्र तत्प्रदर्शनोपयोगाभावात् यावन्मात्रप्रतिपादनेन वेदप्रामाण्यं सिद्ध्यति तावन्मात्रस्यैवात्र प्रतिपादन मावश्यक मित्यनुसंन्धाय तावन्मात्रमेव प्रतिपादितं दृढात्मविवेकमधिजिगांसुभि र्वेदान्तोक्तः श्रवणमननादिरुपायोऽवलम्बनीय इति संक्षेपः ।

इति कल्पकलिकायामात्मवादः ॥

कार्यत्वानित्यत्वयोः परस्पर मविनाभावग्रहणात्प्रयत्नानतर्भावित्वेन कार्यत्वनिश्चया दुच्चारणान-

न्तरं विनष्टः शब्द इति प्रयोगाच्च शब्दस्या नित्य-त्वान्न संबन्धस्य नित्यत्वं वक्तुं शक्य मित्यभि-प्रायेण सूत्र मवतारयति कर्मैके तत्रदर्शनादिति

सू० कर्मैके तत्र दर्शनात् ॥६॥ (पू० १)

भा० उक्तं (८।४) नित्यः शब्दार्थयोः सम्बन्ध इति। तद-नुपपन्नं, शब्दस्यानित्यत्वात्, विनष्टः शब्दः, पुनरस्य क्रियमाणस्या-र्थेन अकृतकः सम्बन्धो नोपपद्यते। नहि प्रथमश्रुताच्छब्दात् कश्चि-दर्थं प्रत्येति। कथं पुनरनित्यः शब्दः? प्रयत्नादुत्तरकालं दृश्यते यतः। अतः प्रयत्नानन्तर्य्यात् तेन क्रियते—इति गम्यते। ननु अभि-व्यञ्ज्यात् स एनम्। नेति ब्रूमः। नहि अस्य प्राक् अभिव्यञ्जनात् सद्भावे किंचन प्रमाण मस्ति। सन् च अभिव्यज्यते, नासन्।

नन्वेतदधिकरणारंभो निष्प्रयोजनः सबन्ध-स्यानित्यत्वेपि वेदप्रामाण्योपपत्तेः संबन्ध-नित्यत्वप्रतिपादनस्य वेदप्रामाण्यसिद्धि रेव प्रयोजनं तच्च शब्दानित्यत्ववादिनो नैयायिका-दयोऽपि समर्थयन्ते यदि सबन्धानित्यत्वे शब्दा-दर्थप्रतीति र्न स्यात्किम्वा संबन्धकरणाय पुरुषा-पेक्षा स्यात्तदा अबोधकत्वा त्संबन्धार्थं पुरुषा-पेक्षणाच्चा प्रामाण्यं स्यादपि तदेतदुभयं नास्ति

अनित्यत्ववादिना मिथार्थप्रतीति रविशिष्टा शब्दार्थव्यवहारस्या नादितया न संबन्धांशे स्वान्तत्र्येण पुरुषापेक्षापीति संबन्धनित्यत्वसाधनं निष्फल मिति चे दसत्यम् नैयायिकादयो नित्यत्ववादिनः शब्दादर्थप्रत्यय मिच्छन्ति नैतावता पराभ्युपगममात्रेण शब्दा दर्थप्रतीतिः सिद्ध्येत् किन्तु न्यायेनेति तदर्थं तद्विचार आवश्यकः शब्दस्य क्षणिकत्वे संबन्धग्रहणानुपपत्तिः अगृहीतसंबन्धस्ये न्द्रियवत्प्रत्यायकत्वे प्रथमश्रवणेपि अर्थप्रत्ययापत्ति रिति संबन्धग्रहणाय नित्य एव शब्दः स्वीकार्यो ऽन्यथा शब्दस्य प्रत्यायकत्वा-योगा द्छ दार्थऽत्ययो निर्हेतुकः स्यादिति। लौकिकार्थप्रत्ययस्तु निर्मूलोपि संभवतीति न तद्दृष्टान्तेनाम्नायैकसमधिगम्यधर्मप्रत्ययः स्वीकर्तु मुचितः व्यवहारानादित्व मपि शब्द-नित्यत्वपक्षे एव युज्यते नान्यथा। नचानित्य-घटादिना प्युदकाहरणादिव्यवहारो ऽनादि दृश्यते तद्वदत्र किन्न स्यादिति वाच्यम् तादृश-

व्यवहारस्या नाद्याकृतिनिबन्धनत्वात् तथाहि अपूर्वघटव्यक्त्या जलाहरणमिच्छता पूर्वं तद्व्यक्तौ जलाहरणसामर्थ्य मवगन्तव्य मन्यथा तदसाधनेऽपि प्रवृत्त्यापत्तेः सामर्थ्यावगमश्च कार्यदर्शनलिङ्गकानुमानेनैव नान्यथा सामर्थ्यस्यैन्द्रियकत्वाभावात् कार्यदर्शनं चापूर्वव्यक्तौ नास्तीति तज्जातीये तादृशकार्यदर्शना दपूर्वव्यक्तौ इयं तत्कार्यसमर्था पूर्वदृष्टतत्कार्यसमर्थजातीयत्वा दित्यनुमानेन तदवगम्य तत्र प्रवृत्तिस्तथं नैवं शब्दे वक्तुं शक्यते सास्नादिमदर्थप्रतिपादनसामर्थ्य मपूर्वशब्दव्यक्तौ नावधृतं नच किंचि त्सर्वगोशब्दानुगतं सामान्य मस्ति यतोऽपूर्वशब्देऽपि तादृशसामान्यदर्शनलिङ्गेन तदर्थप्रतिपादनसामर्थ्यानुमानं स्यात् शब्दत्वस्याश्वादिशब्दसाधारण्या न्न ततो विशिष्टार्थप्रतिपादनसामर्थ्यावगमो वक्तुं शक्यते गोशब्दत्वसामान्यस्य च पूर्वमेव निराकृतत्वा दितिशब्दस्या बोधकत्वापत्त्या वेदप्रामाण्यं भज्येत

अतो वेदप्रामाण्यसिद्धये सम्बन्धनित्यत्वप्रतिपादन मावश्यक मिति ध्येयं। सूत्रस्थकर्मशब्दः कृतकत्वपर्यायः तथाच शब्दःकृतकः तत्र दर्शनादित्यस्य प्रयत्ने सति तदुत्तरकालदर्शनादित्यर्थः एवं च शब्दः कृतकः प्रयत्नानभिव्यङ्ग्यत्वे सति प्रयत्नोत्तर मुपलभ्यमानत्वाद् घटादिव दित्यनुमान मत्र विवक्षितम् शब्दस्यानित्यत्वे तत्सम्बन्धः सुतरा मनित्य इति शब्दानित्यत्वाक्षेपेण सम्बन्धानित्यत्वाक्षेपोपि सूचितः। ननु सूत्रे कर्मशब्दस्य कृतकत्वपरत्वात्तदनुरोधेन कृतकः शब्द इति प्रतिज्ञानं युक्तं तत्कथं भाष्ये ऽनित्यः शब्द इति प्रतिज्ञायते ॥ उच्यते अनित्यत्वकृतकत्वयोः परस्परव्याप्यत्वादेकसाधने ऽपरस्यापि सिद्धे रवर्जनीयत्वादित्यभिप्रायेण तथोपादाना देवं त्रिनाशतात्पर्येण प्रयुक्तो ऽस्थाना दितिहेतुः साक्षात्कृतकत्वसाधनानुपयुक्तोऽपि अनित्यत्वसाधनद्वारा कृतकत्वसिद्धये पर्यवस्यतीति बोध्यम्। प्रयत्ना-

नभिव्यंग्येति विशेषणासिद्धि माशङ्क्य परिहरति नेति अभिव्यञ्जनात् प्राक् यदि शब्दसद्भावे किंचित्प्रमाणं स्यात्तर्हि प्रयत्नेन तदभिव्यक्ति रेव स्वीक्रियेत नतु तदुत्पत्तिः नच तत्र प्रमाण मस्तीति घटादिव दुत्पत्ति रेव युक्तेत्याह नहीति सत एवाभिव्यक्ति र्नासत इत्याह सन्निति।

सू० अस्थानात् ॥७॥ (पू० २)

भा० नो खल्वप्युच्चरितं मुहूर्त मप्युपलभामहे। अतो विनष्टः इत्यवगच्छामः। नच सन् उपलभ्यते अनुपलम्भकारणानां व्यवधानादीना मभावेऽप्यनुपलम्भनात्। नच, असौ विषय मप्राप्तः आकाशविषयत्वात्। कर्णच्छिद्रेऽप्यनुपलम्भनात्।

सू० करोति शब्दात् ॥८॥ (पू० ३)

भा० अपिच शब्दं कुरु, मा शब्दं कार्षीः—इति व्यवहर्तारः प्रयुञ्जन्ते, न ते नून मवगच्छन्ति—स एवायं शब्दः इति।

नचोच्चारणानन्तर मवस्थानेऽपि व्यवधानेना श्रवण मुपपद्यते व्यवधायकानवगमात् तदाह अनुपलम्भेति इन्द्रियसम्बन्धाभाव माशंक्य निरस्यति आकाशेति शब्दस्याकाशे एव

स्थिति र्वाच्या आकाशस्य श्रोत्रत्वा त्तद्देश-स्थितौ सम्बन्धाभावो दुर्घट इति तस्य प्रत्यक्षत्वं स्यात्तस्माद् विनष्ट इत्येव कल्पना युक्ता तदाह कर्णाछिद्र इति। किंच घटं करोतीतिव च्छब्दं करोतीति व्यवहाराविशेषाद् घटवद्स्याप्यनि-त्यत्व मेवेत्याह करोतिशब्दादिति। साधकान्तर-माह सत्वान्तरे च यौगपद्यादितिसूत्रं।

सू० सत्वान्तरेच यौगपद्यात् ॥६॥ (पू० ४)

भा० नानादेशेषु च युगपच्छब्द मुपलभामहे, तदेकस्य नित्य-स्यानुपपन्न मिति। असति विशेषे नित्यस्य न अनेकत्वम्। कार्य्या-णान्तु बहूनां नानादेशेषु क्रियमाणानामुपपद्यते ऽनेकदेशसम्बन्धः, तस्मादप्यनित्यः।

नाना देशेषु युगपच्छब्दोपलम्भा दनित्यत्वं नच गोत्वादीनां युगप दनेकत्रोपलंभेऽपि अनित्यत्वानुपगमा दत्रैव हेतो र्व्यभिचारः। अविभुत्वे सतीति विशेषणीयत्वात् गोत्वादीनां-विभुत्वान्न व्यभिचारः। नच शब्देऽविभुत्व मिति विशेषणमसिद्धं शब्दोऽविभुः कात्स्न्र्येनैकत्रो-

पलभ्यमानत्वाद् घटवदित्यनुमानेना विभुत्वसिद्धेः। नच गोत्वादीना मप्येकत्र व्यक्तौ कार्त्स्न्येनो पलम्भा त्तेषा मप्यविभुत्वापत्तिः तत्तद्-व्यक्तिविशेषानुरञ्जितगोत्वादेः प्रत्यक्षेणोपलम्भान्नि खिलव्यक्त्यनुरञ्जनरूपकार्त्स्न्यस्य तत्र भानाभावात् तथाचैवं प्रयोगः युगपदनेकपुरुषोच्चरितो गकारः नाना अविभुत्वे सति युगपद-नेक देशोपलभ्यमानत्वाद् घटादिवदिति एकत्वे एकदेशस्थेन पुरुषेणोच्चार्य्यमाणः तद्देशे एव तदीयमुखवदुपलभ्येत कार्यत्वे तु क्रियाभेदात्प्रतिक्रियं कार्यभेदः घटादिव दुपपद्यते तदाह कार्याणामिति। नचैवं सोयं गकार इति प्रत्यभिज्ञा नोपपद्येत सेयं दीपकलिका तदेवेदं भवतः कार्षापणं यन्मथुरायां गृहीत मिति वत्सादृश्यनिबन्धनत्वेन तदुपपत्तेः ततो गकारादीनां भेदा त्कार्यत्व मेवेति। ननु कथं भेदात्कार्यत्व मवगम्यते भिन्ना एव नित्या गकाराः किन्न सन्तु मैवं भेदे नित्यत्वासम्भवात् भेदे

हि सति सोयं गकार इति तदेकत्वावगाहिप्रत्यभिज्ञायाः सादृश्यहेतुकत्वेन भ्रमत्वं सुखेन वक्तुं शक्यं नित्यत्वे तु भ्रान्तिनिदानाभावात्प्रमैव सा वक्तव्येति नित्यत्वहान्यापत्तेः अतएव भाष्यकारोपि वक्ष्यति अपिचैकरूप्ये सति देशभेदे च कामं देशा एव भिन्नाः स्युर्नतु शब्द इति ततश्च नित्यत्वे सति एकत्वमेवेति नानादेशोपलम्भो न स्यात् उपलभ्यन्ते च नानादेशेषु तस्माद्भिन्ना एव गकारादयो वर्णा इति तदेकत्वावगाहिप्रत्यभिज्ञाया भ्रमत्वं भ्रमत्वाच्च शब्दस्य कार्यत्वं तदाह नानादेशेष्विति। अयमर्थः तदेकस्येति हेतुः नित्यो ह्ययमेकः स्यादेकत्वे चानुपपन्नं नानादेशोपलम्भनमिति। नच भिन्ना नित्या गकारा एव किं न स्वीक्रियन्ते अत आह असति विशेष इति। विशिष्टरूपस्य गकारस्य नित्यत्वपक्षे नानेकत्वं संभवति तथा सति अविशेषबुद्धे रप्रामाण्यापत्तेः तदप्रामाण्ये च नित्यत्वहानि रिति। नच व्यञ्जक-

ध्वनिदेशभेदाद् व्यंग्यस्य शब्दस्य भिन्नदेशेषु उपलंभः प्रदीपादौ व्यभिचारात् व्यंजकानां ध्वनीनां देशभेदोऽपि नास्ति सर्वेषा माकाशदेशत्वा त्तस्य च स्वतो ऽवयवतो वा भेदाभावात् निरवयवत्वात् भवन्मते व्यङ्ग्यव्यञ्जकयो र्ध्वनिशब्दयो राकाश एको देश इति सर्वै रेकत्र शब्दाभिव्यक्तिः स्याद स्मन्मते तु वायवीयत्वा च्छब्दो वाय्ववयवदेश इति भिन्नदेशो भवतीति युक्तमिति। अनित्यत्वे साधकान्तर माह प्रकृतिविकृत्यो श्चेति सूत्रं

सू० प्रकृतिविकृत्योश्च ॥१०॥ (पू० ५)

भा० अपिच दध्यत्र—इत्यत्र इकारः प्रकृतिः यकारो विकृतिः इत्युपदिशन्ति। यद्विक्रियते, तदनित्यम्। इकारसादृश्यं च यकारस्योपलभ्यते, तेनापि तयोः प्रकृतिविकारभावो लक्ष्यते।

उपदिशन्ति व्याकरणसूत्रकाराः तथाच स्मृतिप्रामाण्या दिकारयकारयोः प्रकृतिविकृतिभावो दधिक्षीरवदवगम्यते इति तद्वदेवा नित्यत्व मपि बोध्यम्। अत्रत्यं भाष्यं निगदेनैव व्याख्यातम्।

साधकान्तर माह वृद्धिश्च कर्तृभूम्नाऽस्येति सूत्रम्

सू० वृद्धिश्च कर्तृभूम्नाऽस्य॥११॥ (पू०७)

भा० अपिच बहुभि रुच्चारयद्भि र्महान् शब्दः श्रूयते। स यदि अभिव्यज्यते, बहुभि रल्पैश्चोच्चार्य्यमाण स्तावानेवोपलभ्येत। अतो मन्यामहे—नूनमस्य एकैकेन कश्चिदवयवः क्रियते, यत्प्रचयादयं महान् उपलभ्यते।

कारणगताल्पत्वमहत्त्वाभ्यां कार्ये अल्पत्वमहत्त्वयो र्दर्शनाद्ध प्रकृतेऽपि बहुभि रुच्चारयद्भि र्महान् शब्दः श्रूयते इति भाष्येण शब्देऽपि कारणगतमहत्त्वादेव महत्त्वं मिति कार्यत्व मेव स्वीकर्तु मुचितं नहि व्यञ्जकेन व्यङ्ग्येऽतिशयः दीपसहस्रै रपि पटादौ महत्त्वादर्शना दिति भावः। समाधानसूत्रं समन्तु तत्र दर्शनमिति।

सू० समन्तु तत्र दर्शनम् ॥१२॥ (उ०१)

भा० तु शब्दात्पक्षो विपरिवर्तते। यदुक्तं (पू० १) प्रयत्नादुत्तरकाले दर्शनात् कृतकोऽयमिति। यदि विस्पष्टेन हेतुना शब्दस्य नित्यत्वं वक्तुं शक्ष्यामः। ततो नित्यप्रत्ययसामर्थ्यात् प्रयत्नेनाभिव्यज्यते—इति भविष्यति। यदि प्रागुच्चारणादनभिव्यक्तः प्रयत्नेनाभिव्यज्यते। तस्मादुभयोः पक्षयोः सममेतत्।

तु शब्दः पूर्वपक्षं व्यवच्छिनत्ति। अय मभिप्रायः प्रयत्नानन्तरोपलब्धि रिति हेतु रनैकान्तिकः अनेन हि प्रयत्नोत्तरकाले शब्दस्य सत्ता गम्यते नतु पूर्वकाले तत्प्रतिषेधोपि नच पूर्वकाले तत्सत्तायां प्रमाणाभावः सोयं गकार इति प्रत्यभिज्ञाया एव प्रमाणत्वात् नच प्रदीपकलिकादौ व्यभिचारा न्न पदार्थसत्ता साधनक्षमा सा तत्र प्रत्यक्षविरोधेन तदसाधकत्वेऽपि प्रकृते प्राक्काले तदसत्वग्राहिप्रमाणाभावेन विरोधा त्तत्साधकत्वाङ्गीकारा दतएवात्मनः पूर्वापरकालस्थायित्वप्रदर्शनार्थं प्रमाणत्वेन प्रत्यभिज्ञोपादानं सर्वत्र दृष्टं संगच्छते यदि परिसंख्यारूपेण प्रागूर्ध्वानुपलभ्यमानत्वे सतीति विशेषणं हेतौ प्रक्षिप्यते तदापि वैशेषिकमते शब्दत्वे व्यभिचारः सोप्येवंरूपो नचासावनित्यः सांख्यमते तु नित्यात्मचैतन्ये व्यभिचारः सुषुप्त्यादौ तदस्फुरणात् नच तदानी मसौ नास्ति नित्यत्वात् 'बुद्धिबोध्यं त्रयादन्य

त्संस्कृतं क्षणिकं च तदिति’ वादिनः शाक्य-स्यापि प्रतिसंख्यानिरोधादिभि र्व्यभिचारः प्रतिसंख्यानिरोधादि नेह प्रदर्श्यते ग्रन्थगौरव-भया दुपयोगाभावाच्च एवं भूमिजलावृत्त-माकाशं सदपि नोपलभ्यते खननोत्सेचनादि-प्रयत्नानन्तर मुपलभ्यते इति तत्रापि हेतु रनै-कान्तिकः आकाशस्यापि प्रत्यक्षत्व मग्रे स्फुटी-भविष्यतीति नोपलभ्यमानत्वं तत्रासिद्ध मित्य-वधेयम्। नचाकाशं सर्वगत मिति भूम्याद्या-वृत मप्यस्तु शब्दस्तु नैवंरूप स्तत्कथं प्रयत्ना त्पूर्वं वर्त्तेत इति भ्रान्तोसि शब्दोप्याकाशव त्स-र्वगत एवेति विशेषाभाव इति। अस्थानादिति हेतो र्व्यभिचारप्रदर्शनार्थं सूत्रं सतःपरमिति

सू० सतः परम् अदर्शनं विषयानागमात्

॥१३॥ (उ० २)

भा० यदपरं कारणमुक्तं (पू० २) उच्चरितप्रध्वस्तः इति अत्रापि यदि शक्ष्यामो नित्यतामस्य विस्पष्टं वक्तुं ततो नित्य प्रत्ययसामर्थ्यात् कदाचिदुपलम्भं कदाचिदनुपलम्भं दृष्ट्वा किञ्चि-

दुपलम्भस्य निमित्तं कल्पयिष्यामः। तच्च संयोगविभागसद्भावे सति भवतीति संयोगविभागावेवाभिव्यञ्जकौ—इति वक्ष्यामः। उपरतयोःसंयोगविभागयोः श्रूयते इति चेत्, नैतदेवम्। न नूनमुपरमन्ति संयोगविभागाः, यतः उपलभ्यते शब्दः इति नहि ते प्रत्यक्षाः इति।

अयं भावः यदा कूपपूरणप्रबन्धेनाकाश स्तिरोधीयते तदा तत्रा स्थानादितिहेतु रनैकान्तिकः नच तिरोधानं नाम व्यवधानेनादर्शन माकाशं तु सदैवा प्रत्यक्ष मिति किमत्र तिरोधानं मेवं तदप्रत्यक्षत्वे प्रमाणाभावात् तत्सिद्धि रेव न स्यात् नच शब्दगुणलिंगेन तदनुमानं शब्दस्य गुणत्वाभावात् किंचास्य गुणत्वस्वीकारेऽपि वायोरेवासौ गुणो नाकाशस्य वर्णाभिव्यक्तिजनककण्ठताल्वादिस्थानसम्बन्धाद्ध वायौ शब्दो गुण उत्पद्यते श्रोत्रं गते वायौ तत्रत्यशब्दं संयुक्तसमवायेन श्रोत्रं गृह्णाति नचानित्यसमवेतत्वेन शब्दस्या नित्यत्वं शङ्क्यौ सत्ताघटत्वादिव न्नित्यत्वात् नचाकाशस्य नीरूपत्वात्कथं प्रत्यक्षं नीरूपस्यापि रूपस्यप्रत्यक्षदर्शना त्प्र-

त्यक्षं प्रति रूपवत्त्वस्या प्रयोजकत्वात् नच नीरू-
पद्रव्यस्य न प्रत्यक्षत्वं गुणस्य द्रव्यत्वाभावा-
न्नीरूपस्यापि प्रत्यक्षत्वे बाधकाभावः कालस्य
नीरूपस्यापि प्रत्यक्षत्वाभ्युपगमेन तथापि रूप-
वत्त्वस्य तत्राप्रयोजकत्वात् आकाशस्यापि नील-
रूपवत्त्वेन नीरूपत्वाभावा दतएवेहाकाशे पतत्रो
पतति इति सर्वजनीनानुभवः संगच्छते वायु
र्नीरूपः स्पर्शवानाकाशस्तु निःस्पर्शो रूपवा
नित्यनयो र्विशेष इति दिक् । चक्षुषोनुग्राहक-
त्वादालोको यथा घटाद्यभिव्यञ्जकः तथा श्रो-
त्रसंकारकत्वाद्ध ध्वनिः शब्दाभिव्यञ्जकः नच
ध्वनीनां केन रूपेण संस्कारकत्व मिष्यते नहि
किंचिच्चिह्नं तत्र दृश्यते इति चेत्तर्हि केन
रूपेण शब्दजनकत्वं ध्वनीनामिति पर्यानुयोगः
जनकत्वपक्षेऽपि कर्तुं शक्यते चिह्नादे-
स्तत्राप्यसत्वात् शक्तिरूपं सामर्थ्यन्तु उभयत्रा-
प्यविशिष्टं तच्च कार्यानुमेयं न रूपादिव-
त्प्रत्यक्षमतीन्द्रियत्वा दित्यसकृदुक्तमेव ।

भाष्यकारेण गूढाभिसन्धिना संयोगविभागयो रभिव्यंजकत्व मुक्तं पूर्वपक्षिणा वायवीयसंयोगविभागाभिधानाभिप्रायानभिज्ञेन कण्ठताल्वादिस्थानसंयोगविभागपरत्वाभिमानेनाक्षिप्यते उपरतयोरिति । गूढाभिसन्धिं स्फोरयति न नूनमिति वायवीयानां संयोगविभागानां नोपरमोऽयमेव शब्दाभिव्यञ्जकः कण्ठादिसंयोगविभागयो रनभिव्यञ्जकत्वा त्तदुपरमे न क्षतिः न च वायवीययोः संयोगविभागयोः प्रत्यक्षत्व मित्याह नहि ते इति । यदि शब्द मित्यत आरभ्य प्रागभिधानेनहीत्यस्माद्ग्रन्थाद् गूढाभिप्रायावेव पूर्वोत्तरपक्षवादिनौ तथाहि अप्राप्ताश्चेत्संयोगविभागाः श्रोत्रस्योपकुर्यु रिति पूर्वपक्षिणा ताल्वादिसंयोगविभागाभिप्रायेणैव दोषा दर्शिता वायवीयानां तेषा मप्राप्त्यसंभवेन तदभिप्रायेण दोषासम्भवात् । ननु नहि ते प्रत्यक्षा इति सिद्धान्तवादिना संयोगविभागानां वायवीयत्वस्फारणा त्कथं पुनरत्र गूढाभिसन्धि

रिति चेन्न तात्वादिसंयोगविभागाना मपि वर्णाजनकशक्तिमत्वेन प्रत्यक्षत्वाभावा त्तत्तात्पर्ये-णापि तादृशोक्तिसंभवा दिति ध्येयम्। ननु ध्वनीना मभिव्यञ्जकत्वं संस्कारद्वारावाच्यं संस्कारः किं शब्दस्योत श्रोत्रस्याथवा द्वयो-रिति आद्ये नित्यस्य सर्वगतस्यैकस्य शब्दस्यै-कत्र देशे संस्कारे सर्वत्रोपलम्भः स्यात् अविशे-षात् अनित्यत्वे तु भेदा दन्येषा मसंस्कृतत्व-संभवेना नुपपत्तिपरिहारः स्यादपि न च शब्दा-धारस्यैक एव प्रदेशः संस्कृतो न सर्व इति यः प्रदेशः संस्कृत स्तत्र शब्द उपलभ्यते न प्रदे-शान्तरे ऽसंस्कृतत्वादिति वाच्यं व्योम्नो निरवय-वत्वेन स्वतोऽवयवतो वा प्रदेशासंभवात् तस्य चैकत्र संस्कारे सर्वत्र सर्वशब्दानां श्रवणं स्यात् द्वितीयेऽपि कल्पे आकाशमेव श्रोत्र मिति वादि-नां मते तस्यैकत्वा द्विभुत्वाच्च सर्वत्र प्राप्तौ सर्वशब्दानां सर्वत्र श्रवणं प्रसज्यत संस्कृतत्वा-विशेषात् किंचैतन्मते एकस्य शब्दश्रवणवेलायां

सर्वपुंसां श्रवणं स्यात् आकाशस्यैव श्रोत्रत्वात् तस्य चैकत्वादिति। नच धर्माधर्मोपगृहीताकाशभाग एव श्रोत्रं तस्य च धर्माधर्मभेदाद् भेद इति नाऽव्यवस्था अतएव न बधिरस्य शब्दश्रवणापत्ति रपि शब्दश्रवणादृष्टाभावेन तं प्रति नभसः श्रोत्रत्वाभावा दितिवाच्यम् आकाशस्य निष्प्रदेशत्वेनैतादृशकल्पनानवकाशात् सांख्याना मपि श्रोत्रस्या हंकारिकत्वेनेयमापत्ति स्तुल्यैव अहंकारस्या प्याकाशवन्निरवयवत्वाद् व्यापकत्वाच्च किंच सकृत् संस्कृतेन श्रोत्रेण सर्वशब्दोपलब्धिः स्यात् घटायोन्मीलितं चक्षुः पटमपि प्रकाशयतीति न्यायात् अन्त्यकल्पे पूर्वकल्पद्वयोक्तदूषणसमुच्चयो वाच्य इति। कृतकत्वाङ्गीकारे तु नायं दोषः एकशब्दश्रवणवेलायां न सर्वशब्दश्रवणापत्तिः शब्दान्तराणा न्तदानी मसत्वा दित आह भाष्ये यस्याप्यभिव्यञ्जन्तीति।

भा० यदि शब्दं संयोगविभागाः एवाभिव्यञ्जन्ति, न कुर्वन्ति आकाशविषयत्वाच्छब्दस्य, आकाशस्यैकत्वात, यः एवाय मत्र

श्रोत्राकाशः स एव देशान्तरेष्वपीति श्रुन्नस्थैः संयोगविभागै रभिव्यक्तः पाटलिपुत्रेऽप्युपलभ्येत। यस्य पुनः कुर्वन्ति, तस्य वायवीयाः संयोगविभागाः वाय्वाश्रितत्वा द्वायुष्वेव करिष्यन्ति। यथा तन्तवः तन्तुष्वेव पटम्, तस्य पाटलिपुत्रेष्वनुपलम्भो युक्तः श्रुघ्नस्थत्वात्तेषाम्। यस्याप्यभिव्यंजन्ति, तस्याप्येष न दोषः, दूरे सत्याः कर्णशष्कुल्याः अनुपकारकाः संयोगविभागाः, तेन दूरे यच्छ्रोत्रं, तेन नोपलभ्यते इति। नैतदेवम्। अप्राप्ताश्चेत् संयोगविभागाः श्रोतस्योपकुर्य्युः। सन्निकृष्टविप्रकृष्टदेशस्थौ युगपच्छब्दमुपलभेयाताम्। नच युगपदुपलभेते। तस्मान्नाप्राप्ताः उपकुर्वन्ति। न चेदुपकुर्वन्ति तस्मादनिमित्तं शब्दोपलम्भने संयोगविभागौ इति।

नैतदेवं, अभिघातेन हि प्रेरिताः वायव स्तिमितानि वाय्वन्तराणि प्रतिबाधमानाः सर्वतोदिक्कान् संयोगविभागान् उत्पादयन्ति यावद्वेग मभिप्रतिष्ठन्ते। ते च वायो रप्रत्यक्षत्वात् संयोगविभागाः नोपलभ्यन्ते। अनुपरतेष्वेव तेषु शब्दः उपलभ्यते, नोपरतेषु। अतो न दोषः। अतएव चानुवातं दूराद्दुपलभ्यते शब्दः।

अयंभावः आकाशस्य श्रोत्रत्वा नभ्युपगमा दभ्युपगमेऽपि तस्य निर्भागत्वान्ङ्कोकारा दिह पतति पतत्रीत्यादि प्रत्ययानुरोधात् तथाच श्रोत्रस्य प्रतिपुरुषं भिन्नत्वात्संस्कारद्वारा शब्दश्रवणभेद उपपद्यते नचैक श्रोत्रसंस्कारे सर्वश्रोत्रसंस्कारो वक्तुं शक्यते भिन्नत्वात्

एवंच यच्छ्रोत्रं संस्कृतं तेनैव शब्दग्रहणं नान्येन तस्यासर्वगतत्वा न्न सर्वत्रोपलम्भः शब्दनित्यत्वपक्षेऽपि तदाह दूरे इति श्रोत्रं स्वाभिमतं दर्शयति कर्णशष्कुल्या इति तथाच शब्दश्रवणान्यथानुपपत्त्या शब्दग्रहणसामर्थ्यं कर्णशष्कुल्यामेव स्वीक्रियते इति सामर्थ्यविशिष्टा सैव श्रोत्रमाकाशश्रोत्रवादिनापि तदवच्छिन्नाकाशे एव शब्दश्रवणसामर्थ्यं कल्पनीय मन्यथा बधिरस्याप्याकाशसत्त्वेन शब्दोपलम्भप्रसङ्गात् अथवास्तु तावन्निरवयवाकाशमेव श्रोत्रं तावतापि ध्वनिसंस्कारस्या धिष्ठानगतत्वेनाधिष्ठानस्य च प्रतिपुरुषं भेदात् सर्वश्रोत्रसंस्कारापत्ति रिति नाऽव्यवस्था नचाधिष्ठानसंस्कारे न श्रोत्रसंस्कार इत्यसंस्कृतेनैव श्रोत्रेण शब्दोपलम्भ स्तथा चासंस्कृतत्वाविशेषा च्छ्रोत्रान्तरेणापि तदुपलम्भापत्त्या सैवाऽव्यवस्थेति वाच्यम् अधिष्ठानद्वारा श्रोत्रस्यैव संस्कार इति स्वीकारा दसंस्कृतकर्णशष्कुलीकस्य तदुपलम्भ-

प्रसङ्गात् । नचाधिष्ठानद्वारा दूरस्थश्रोत्रं किन्न संस्क्रियते इत्यत्र आह अप्राप्ता इति प्राप्यैव ध्वनयः श्रोत्रसंस्कारं कुर्वन्ति अप्राप्तास्तु कथं तत्संस्कुर्युरिति । संयोगविभागा इति ध्वनीनामुपलक्षणम् नचैकश्रोत्रकल्पे एकस्मिन्नधिष्ठाने संस्कृते तद्द्वारा श्रोत्रं संस्कृतमेवेति दूरस्थस्यापि शब्दश्रवणप्रसंगः श्रोत्रस्यैकत्वा त्संस्कृतत्वाच्चेति वाच्यम् ज्ञानाङ्गं हि संस्कारो ज्ञानसमानदेश एव ज्ञानं च स्वशरीरप्रदेश एव नान्यशरीरे इति संस्कारस्यापि तत्रैव ज्ञानजनकत्वं न शरीरान्तरे वैगुण्यात् । नन्वात्मनोपि निरवयवत्वा न्निरवयवस्य च प्रदेशासम्भवा त्कथं शरीरप्रदेशे ज्ञानमुच्यते सत्यं निष्प्रदेश आत्मा तथापि शरीरावच्छेदेनै वात्मनि ज्ञानदर्शना देवंविधोक्तौ बाधकाभावात् । अथवा यथा घटाकाशसंयोगो नाकाशं व्याप्नोति किन्तु क्वचिदेवान्यत्र पटसंयोगादे रपि दर्शना त्तथाकर्णशष्कुल्यपीति तदवच्छेदोपि क्वाचित्क

एवेति न तदवच्छिन्नसंस्कारसांकर्य्यं मिति नाऽव्यवस्था यथा घटस्याऽव्यापकत्वा त्तदनुरोधित्वात्तदीयसंयोगस्य न व्यापकत्वं तथा कर्णशष्कुल्या अपि तादृशत्वा त्तदीयसंयोगोऽपि न व्यापक एवञ्च बधिरस्य न शब्दोपलम्भ आकाशात्मकश्रोत्राभेदेऽपि। तदीयाकाशस्य धर्माधर्मोपगृहीतकर्णशष्कुल्यवच्छिन्नत्वाभावात् ।ननु बधिरात्मनोऽपि व्यापकत्वे शरीरान्तरेऽपि सत्वादात्मान्तरवत्तदवच्छेदेनैव किन्न शृणोतीति चेन्न तदीयादृष्टोपार्जितशरीरेन्द्रियाद्यवच्छेदेनैव तद्भोगसम्भवेन ग्रामवासिनां सर्वेषां तत्स्वामित्वाभावव देहे सद्भावमात्रेण तत्स्वामित्वाभावेन तत्र श्रवणापत्तिविरहात् शब्दश्रवणादृष्टाभावात् । संस्कारकभेदादपि न शब्दश्रोत्राकाशसंस्कारसाङ्कर्यम् संस्कारका हि ध्वनयः प्रादेशिकाः सावयवाश्चेति तदाहितसंस्कारोऽपि प्रादेशिक इति नैकत्र संस्कारेणान्यत्रोपलम्भ इति यदप्युक्तं सकृत्संस्कारेण सर्वत्रोपलब्धि स्तदपि

न यथाकार्यं कल्पनाया औचित्येन प्रतिशब्दं संस्कारहेतुभूतध्वनिजातिभेदस्य कल्पनात् ध्वनिसंयोगस्यैवश्रोत्रसंस्काररूपतया स्थिरत्वाद्यपनयस्य तत्वाभावात् वर्णानित्यत्ववादिनां यथा वर्णान्तरजनकताल्वादिसंयोगेन वर्णान्तरस्योत्पत्तिवारणाय तत्तद्वर्णजनकतत्तत्ताल्वादिस्थानभेदःकल्प्यते तथा नित्यवादिनामपि तद्वर्णाभिव्यञ्जकध्वनिभेदकल्पनं सम मिति नातिरिक्तकल्पनागौरव मेवं ताल्वादिसंयोगजनकप्रयत्नतद्धेतुविवक्षाभेदेऽपि बोध्यं तदेतत्सर्व मभिप्रेत्याह तस्मादिति शब्दश्रवणरीतिं दर्शयति अभिघातेनेति अभिघातेन कण्ठताल्वाद्याभिघातेन स्तिमितानि स्थिराणि यद्यपि वायोः सदागतित्वान्न स्थिरत्वं तथापि सूक्ष्मो वायु र्यदा परान्न कम्पयति तदा स्थिर इव भवती त्यभिप्रायेण स्तिमितानी त्युक्तम् सर्वतो दिक्कान् सर्वदिक्भवान् वेगवत्त्वा च्छरादिवद् गच्छति तेन न सर्वत्र शब्दोपलम्भः संयोगविभागानुपलम्भे

हेतु माह वीयोरिति एवंचानुपरतेष्वेव शब्द उ-
पलभ्यते इति सिद्धान्तितः ईदृशरीत्या लोकमा-
र्गोप्यनुरुद्ध्यते लोको हि यं शब्दं परस्मै
श्रावयितु मिच्छति तमेवोच्चारयति नतु शब्दान्त-
रश्रावणेच्छया शब्दान्तरमुच्चारयति लोकरीतिश्च
परीक्षकैरनुसरणीया अन्यथा लोकस्य तत्रावि-
श्वासापत्तेः वैशेषिकास्तु संयोगाद्वा विभाग-
द्वा शब्दाद्वा शब्दनिष्पत्ति रित्यूचुः संयोगजः
शब्दो यथा भेरीदण्डसंयोगा जायते यः स द्वित-
तीयः पाट्यमानवेणुदलद्वयविभागजः कर्णगो-
चर स्तु शब्दजः शब्दः तत्र संयोगादे जायमानः
शब्दः वीचीतरङ्गन्यायेन स्वसमानजातीयान्
शब्दान् सर्वदिक्षु जनयपि तेषु निरन्तर मुत्प-
द्यमानेषु यो यः कर्णपथ मवतरति स स श्रूयते
इति सेयं कल्पना न युक्ता लोकविरुद्धत्वा त्क-
ल्पनागौरवाच्च यं श्रावयितु मित्यादिना लोकवि-
रोध स्तात्र त्प्रदर्शित एवैकोऽन्येन विरोधेन सह
कल्पनागौरव मिदानीं प्रदर्श्यते एकशब्देनैव

श्रवणोपपत्तौ तदर्थं मनेकशब्दकल्पनागौरवं किंच शब्दस्य शब्दान्तरारम्भकत्व मप्यदृष्टत्वा त्प्रमाणाविरुद्धम् अमूर्तस्य शब्दस्य निष्क्रियत्वा-दारंभकत्वानुपपत्तिः इयति देशे आरभते नान्य-त्रेति नियामकानुपलब्ध्या सर्वत्रारम्भापत्तिश्च अन्तिमस्यापि शब्दत्वाच्छब्दान्तरारम्भकत्वा-पत्तिश्च अनुवातं दूरेण शब्दोपलब्धिर समर्थिता च स्यात् । किंच बीचीसन्तानव देकदेशे शब्दा-रम्भः स्यान्न चतुर्दिक्षु बीचीनां सक्रियत्वाद् बी-च्यन्तरारम्भकत्वे युज्यते शब्दस्य निष्क्रियत्वान्न तदारम्भकत्वं कुड्यादिभिः शब्दान्तरारभकत्व-विघातानुपपत्या व्यवहितेऽपि शब्दान्तरारम्भा-पत्तिः अमूर्तस्य मूर्तैर्व्यवधानाभावात् नच श-ब्दो व्योमगुणो नच कुड्यमध्ये तदस्तीति कथं तत्र शब्द इति शक्यं कुड्येन व्योम्नो विनाशो-त्सारणासंभवात् नित्यत्वाद् व्यापकत्वाच्च नच शब्दस्यारम्भकत्वे किंचित्प्रमाणम् अर्थापत्ते स्त्वयानभ्युपगमा त्प्रकारान्तरेण शब्दश्रावणोपप-

त्तेश्च नापि समान्यतो दृष्टानुमानम् लिङ्गाभावात् प्रत्युत शब्दो न शब्दान्तरारम्भकः शब्दत्वा दन्त्यशब्दवदित्यनुमाने नानारम्भकत्वनिर्णय एवेति दिक्। आर्हतैस्तु शब्दस्यागमनं परिमाणं स्पर्शः अभिभवश्च स्पर्शवानपि त्वगिन्द्रियाग्राह्यः सूक्ष्माश्च पुद्गलभागा इति सर्वं दृष्ट विरुद्धं कल्प्यते एतन्मतेऽपि अदृश्यावयवै रवयविनः शब्दस्य रचनानुपपन्नैव द्रवत्वं विना संश्लेषोऽपि कथम् सक्तुवत्संश्लेषोपपादने तु वायुसंपर्कात्तद्देव विश्लेषः स्यात् लघूना मवयवानां केनापि निबन्धाभावेन वृक्षाद्यभिघातेन लोष्ठवद्विश्लेषापत्ति रिति न किञ्चिदेतत् प्रयोगस्य परमिति सूत्रम्।

सू० प्रयोगस्य परम् ॥१४॥(उ० ३)

भा० यदपरं कारण मुक्तं (पू० ३) शब्दं कुरु, मा कार्षीः इति व्यवहर्तारः प्रयुञ्जन्ते। यथसंशयं नित्यः शब्दः, शब्दप्रयोगं कुर्वीत भविष्यति। यथा गोमयान् कुर्विति समाहारे।

गोमयान् कुरु इति ननु कार्यत्वमात्रस्य

प्रतिज्ञातत्वेन गोमयादावपि तत्सत्वेन कथं हेतो रनैकान्तिकत्वं सत्यम् इद मुपलक्षण माकाशमात्रं कुरु इत्यत्र हेतो रनैकान्तिकत्वं द्रष्टव्यम् ननु आवरणाभावमात्रस्यैवाकाशत्वं वदतां बौद्धानां मते वस्त्वन्तरापसारणजन्यत्वा दाकाशेपि न व्यभिचार इति चेन्न तन्मतेऽभा- वस्य कार्यत्वानभ्युपगमेन व्यभिचारस्य दुरुद्ध- रत्वात् मतान्तरे तु आकाशस्य नित्यत्वेन व्य- भिचारः स्फुट एव। नचाकाशमात्रं कुरु इति प्रयोगो निष्फलः वस्त्वन्तरापसारणफलकत्वेन साथंक्यात्। अथाकाशे गौणः करोतिशब्दप्र- योगः एवं तर्हि शब्देऽपि गौण एव तस्यापि प्रत्यभिज्ञया नित्यत्वसिद्धे रप्रत्यूहत्वादिति आदित्यवद्यौगपद्यमितिसूत्रम्।

सू० आदित्यवद्यौगपद्यम् ॥१५॥ (उ० ४

भा० यत्तु (पू० ४) एकदेशस्य सतो नानादेशेषु युगपद् दर्शन मनुपपन्नमिति। आदित्यं पश्य देवानां प्रिय एकः सन् अने- कदेशावस्थित इव लक्ष्यते। कथं पुन रवगम्यते एकः आदित्यः—

इति ? उच्यते, प्राङ्मुखो देवदत्तः पूर्वाह्णे सम्प्रति पुरस्तादादित्यं पश्यति। तस्य दक्षिणतोऽवस्थितो न द्वौ पश्यति, आत्मनश्च सम्प्रति न तिरश्चीनं देवदत्तस्यार्जवे। तस्मादेक आदित्य इति। दूरत्वादस्य देशो नावधार्यते। अतो व्यामोहः। एवं शब्देऽपि व्यामोहादनवधारणं देशस्य। यदि श्रोत्रं संयोगविभागदेश मागत्य शब्दं गृह्णीयात्, तथापि तावदनेकदेशता कदाचिदवगम्येत, नच, तत् संयोगदेश मागच्छति। प्रत्यक्षाहि कर्णशष्कुली तद्देशा गृह्यते। वायवीयाः पुनः संयोगविभागाः अप्रत्यक्षस्य वायोः, कर्णशष्कुलीप्रदेशे प्रादुर्भवन्तो नोपलभ्यन्ते—इति नानुपपन्नम्। अत एव व्यामोहः,—यत् नानादेशेषु शब्दः इति। आकाशदेशश्च शब्दः इति, एकंच पुनराकाशं अतोऽपि न नानादेशेषु। अपि च एकरूप्ये सति देशभेदेन कामं देशा एव भिन्नाः नतु शब्दः तस्मादयमप्यदोषः।

सत्वान्तरे च यौगपद्य मिति सूत्रे यदनित्यत्वे कारणमुक्तमेकस्य नानादेशोपलम्भन मिति तत्र व्यभिचारमाह अनेन सूत्रेण एकस्यैव सवितु र्यथा नानादेशोपलम्भेऽपि नानेकत्व मेवं शब्देपीति न नानादेशोपलम्भन मनित्यत्वसाधन मादित्ये व्यभिचारादित्यर्थः देवानां प्रियो मूर्खः यद्यप्येवं-

विधशब्दोच्चारणं भाष्यकृतां न शोभते तथापि प्रत्यह मादित्यं पश्यन्नपि यस्तमेक मनेकदेशस्थं नावधारयति यस्मै च विशिष्यै तत्प्रतिपादनीयं स वस्तुत स्तथाविध एवेति तत्तात्पर्येणायं शब्दप्रयोगः समुचित एवेति बोध्यम्। वस्तुतो नादित्यो ऽनेकदेशस्थः किन्तु अनेकदेशस्थत्वेन ज्ञायते इत्यभिप्रायेणैव शब्दः प्रयुक्तः। आदित्यस्य नानादेशोपलम्भे अयं हेतुः यः पुरुषः प्राच्यां दिशि यावद्दूरं सूर्यं पश्यति ततः क्रोशसहस्राद्दूरं प्रतीच्यां स्थितः पुरुषः तावद्दूर मेव तं तत्र पश्यति ततो नानादेशोपलब्धिः स्पष्टैव नच तथा सति भिन्न एवादित्योऽस्तु मैवं योग्यानुपलब्धिविरोधात् अपिच मध्याह्ने सर्वोपि जनः स्वोपरि सवितार मीक्षते नच सर्वस्योपरितन एकदेशः तस्माद्भिन्नदेशं पश्यतीतिभावः कुतः कारणा देकः सविता नानादेशेषूपलभ्यते इदं कारणम् यो यत्र स्थितो यावद्दूरं वृक्षादि गृह्णाति तत्रैव संनिहितं सूर्यं पश्यन् तत्रैव देशे

स्थितं सूर्य मवधारयति पश्चात्तत्र गत्वा ततोपि देशा त्तावद्दूरमेव पुनस्तं पश्यति तत्रापि गत्वा पुनस्तावद्दूरं पश्यति ततोऽवगम्यते ऽयमतिदूरस्थोपि नानादेशस्थितैः पुरुषै स्तत्सान्निध्याभ्यासेन भिन्नभिन्नदेशे गृह्यते पूर्वं हि यो वृक्षादिदेशो स्वदेशत्वे नावधृतो नच वृक्षसूर्ययो रन्तरालं गृहीतं तत्र गतस्तु तयो रन्तरालं तावदेवा—वधारयतीति यथा सूर्यस्य तत्तद्देशविशेषादर्शना दनेकदेशस्थत्वज्ञानं तथा शब्दस्यापि व्यापकत्वा त्सर्वदेशे उच्चारणानन्तरश्रवणा दनेकदेशस्थत्वज्ञानं नच कात्स्न्र्येनैकदेशे उपलम्भाद्घटादिवच्छब्दस्याप्यविभुत्व मेवेति वाच्यम् निरवयवतया ऽवयवशो वृत्तिविरहा त्स्वरूपत एव तद्वृत्ते रुपगमात् अवयवशो वृत्तिविरहादेव कात्स्न्र्येनाभिव्यक्तिः नतु कात्स्न्र्येन वर्त्तमानतया निरवयवे तदुभयवृत्तिविकल्पासम्भवस्य पूर्वमेव प्रदर्शितत्वात् नच शब्दस्य सर्वगतत्वेनोपलम्भःस्यादिति वाच्यं व्यङ्ग्यमानस्य

व्यञ्जकाधीनतया व्यञ्जकानां ध्वनीनां प्रादेशिक-
त्वेन प्रदीपदेशे घटस्येव ध्वनिप्रदेशे एव तद्-
भिव्यक्तिस्वीकारात् व्यञ्जकानां ध्वनीना
मव्यापकतया सर्वत्र तदभिव्यञ्जनसामर्थ्यवि-
रहात् नाविच्छिन्नरूपेण सर्वत्रोपलम्भः किन्तु
यत्र यत्र देशे यदा यदा ध्वनि रुत्पद्यते तत्र तत्र
तदा तदा तदुपलम्भःअन्यत्रान्यदाच ध्वनीना
मभावा त्तदनुपलब्ध्या मध्ये तद्विच्छेदः प्रती-
यते इति तत्रादित्यव न्नानादेशस्थत्वोपलब्धि
रिति ध्वने रविभुत्वाच्छब्दे प्यविभुत्वबुद्धि रेवं
ध्वने गतिमत्वा द्गवदाच्च यदा येनाध्वना
ध्वनि रायाति निर्याति च तदा तेनैवाध्वना
शब्दोप्यायातीव निर्यातीवेति प्रतीयते इति
शब्दे तन्मार्गागमनप्रत्ययो ध्वनिगततन्मार्गा-
गमननिमित्तक एव परेषा मालोकगतिनिबन्धः
नान्धकारगतिवदिति बोध्यम् सांवतु रेकत्वं
साधयति प्राङ्मुख इति पूर्वाह्णे पुरस्तादादित्यं
पश्यतो देवदत्तस्य दक्षिणदेशस्थितः पुरुष

आदित्यद्वयं न पश्यति यदि पश्ये त्तदैकं देवदत्तस्याजंवे एकंच स्वस्येति इद मुपलक्षणं देवदत्तस्या प्यादित्यद्वयदर्शनापत्ति यद्वा सर्वस्यापि तथा दर्शनापत्तिरिति। नचैवं कश्चित्पश्यति तस्मादेक एवेति अनेकदेशस्थत्वमपि दर्शयति आत्मनश्चेति देवदत्तस्याजंवे स्थित मादित्य मात्मनस्तिरश्चीनं तस्य दक्षिणदेशस्थितो न पश्यति किन्त्वात्मनोप्याजंवे एव नचोभयो रेकदेशः भिन्नदेशस्थत्वात् तस्मा त्स्वस्वाजंवे दर्शना दनेकदेशस्थत्व मादित्ये प्रतीयते नचासौ भिन्नः पूर्वोक्तयुक्ते रित्ययमपिहेतु रनैकान्तिक इति नानेन शब्दाना मनित्यत्वं साधयितुं शक्यमितिभावः। नन्वेवं सूर्यस्यानेकदेशस्थत्वमनेकेनोपलब्धं न त्वेकेन शब्दस्यानेकदेशस्थत्वन्तु एकेनैवोपलब्ध मिति वैषम्या देकस्यानेकदेशदर्शनमि त्यस्यैव हेतुत्वेन विवक्षणान्न व्यभिचार इति चेन्न एकस्यापि पुंसस्तत्र तत्र गत्वा सवितृभिन्नदेशत्वदर्शनसंभ-

वस्यो पपादितत्वेन व्यभिचारस्य दुर्वारत्वात्। नच युगपदिति विशेषणान्न व्यभिचारः शब्द-स्तु युगपदनेकदेशेषू पलभ्यते नैव मादित्य इति वाच्यम् एकस्यापि देशान्तरं गतस्य तत्रापि तथैव सवितारं पश्यतोऽयं नानादेशस्थै स्तत्र तत्रोपलभ्यत इति युगपदेकस्यापि पुंस-स्तज्ज्ञानसम्भवात् यदि एकस्य एकेन्द्रियजन्य-मनेकदेशदर्शनं हेतूक्रियते तदापि जलादौ सौरेण तेजसा प्रतिस्रोतः प्रवर्त्तितेन चाक्षुष-तेजसा सवितु रनेकदेशस्थत्वग्रहणेन व्यभि-चारस्य तदवस्थत्वात् नच पात्रगतानां प्रतिबि-म्बाना मेवानेकदेशदर्शनं न सवितुः प्रत्यभि-ज्ञया बिम्बप्रतिबिम्बयो रभेदाभ्युपगमात् भेदे प्रमाणाभावात् चक्षुष श्चिपिटीकरणादिना एकस्यापि चन्द्रमसो ऽनेकधा दर्शनाच्चे त्यन्यत्र विस्तरः। नन्वादित्यस्य दूरस्थत्वा त्तदीयदेशा-नवधारणा दनेकदेशगतत्वप्रत्ययो भ्रम इति युक्तं शब्दस्य तु सन्निकृष्टत्वान्न तद्देशावधा-

रणो व्यामोह इति कथ मनेकदेशस्थत्वप्रत्यय
इत्याशङ्कयात्रापि व्यामोहं दर्शयति एवं
शब्देपीति यदि श्रोत्रं संयोगविभागदेश
मागत्य शब्दं गृह्णीया त्तदा तेन शब्दस्यैकदे-
शत्वं गृह्णीयादपि नच तथा किन्तु वस्तुतः स्व-
देशस्था कर्णशष्कुली स्वात्मप्रदेशे एव शब्दं
गृह्णाति तत्र स्वप्रदेशानवधारणा दुच्चारयितृप्र-
देशकल्पनया नानादेशगतत्वं भ्रान्त्या प्रतिप-
द्यते जनै रित्यभिप्रायेणाह यदिश्रोत्रमिति
श्रोत्रस्य संयोगादिदेशागमने कारणमाह प्रत्य-
त्वाहि कर्णशष्कुलीति। ननु न कर्णशष्कुली-
मात्रं श्रोत्रं बधिरेपि तत्सत्वेन शब्दश्रवणापत्तेः
किन्तु पूर्वोक्तधर्माधर्मोपगृहीतनभोभाग एव
सच न प्रत्यक्ष इति चेन्न रसनादीना मधि-
ष्ठाना दन्यत्र वृत्ते रदर्शना च्छ्रोत्रस्य बहिर्गमने
तदधिष्ठानकर्णशष्कुल्या अपि तत्र गमनापत्ति
रित्यभिप्रायात् अत्र भ्रमत्वप्रतिपादनप्रयोजन
मेकत्वसमर्थनमेव एकस्य हि नानेकदेशसम्बन्धः

संभवति तथा प्रतीतिस्तु भ्रान्तिरेव एकस्यादि-
त्यस्यानेकदेशावगतिवदित्यवधेयम् । इदं पुनरि-
हावधेयं यत्रानेके वक्तारः श्रोता च पुन रेक एव
तत्रैव श्रोत्रागमनप्रत्याख्यानेन शब्दस्यैकदेश-
त्वप्रत्ययः पारमार्थिकः । अनेकदेशत्वप्रत्ययश्चा-
पारमार्थिक इति व्यवस्थातुं शक्यते । यत्र तु
पुन रेक एव वक्ता श्रोतार श्चानेके तत्रैकदेश-
प्रतीति रेवापारमार्थिकी अनेकदेशप्रतीतिश्च
पारमार्थिकीति युज्यते बहुभिः स्वदेशे श्रूय-
माणः शब्दो वस्तुतो नानादेशः स्यात् श्रोत्रस्य
वक्तृदेशागमनाङ्गीकारे तु वक्तु रेकत्वा त्तद्दे-
शस्थ एव शब्दः श्रूयेत तथा च तत्रैकदेशस्थत्व-
प्रतीतिः प्रमास्या न्नान्यथेति श्रोत्रागमनप्रति-
षेधा देकदेशप्रतीतिः भ्रान्ति रेव नच विभोः
शब्दस्य वक्तृदेशगतैः ध्वनिभि र्व्यज्यमानतया
तन्निबन्धनप्रादेशिकत्वावगमो भ्रम एवेतिचे-
त्तथासति परत्रापि नानादेशस्थै र्ध्वनिभि रभि-
व्यज्यमानशब्दे तन्निबन्धननानादेशत्वप्रतीति-

रपि भ्रम एवेति श्रोत्रागमनप्रत्याख्यानं वृथैव भवतु तावदनेकदेशप्रतीति रिवैकदेशप्रतीति रपि भ्रान्ति रेव तथापि भाष्यकारेणै कदेशप्रतीते र्भ्रमत्वं न प्रदर्शित मप्रस्तुतत्वात् सूत्रकारो हि बहुषु वक्तृषु सत्सु श्रोतु र्युगपदनेकदेशादर्शनं शब्दस्या नित्यत्वसाधनाय पूर्वपक्षत्वेनोपन्यस्त-वान् तदनुरोधाद्ध भाष्यकारेणापि नानादेशप्र-तीते रेव भ्रान्तित्वं समर्थितम्। नच तर्हि श्वन्यागमनमेव प्रतिषेध्यं कृतं श्रोत्रागमननि-रासेन ध्वन्यागमनस्य भ्रान्तिं प्रति कारणत्वेपि तत्र प्रमाणत्वाभावात् नच शब्दवैभव मेव प्रमाणं किं प्रमाणान्तरान्वेषणेन तस्य परं प्रत्यसिद्धत्वात्। तस्मा त्तत्र प्रमाणत्वेन कर्ण-शष्कुलीप्रतिषेध एव प्रदर्शितः नह्यीय मेकदेश-स्था नानादेशगतान् शब्दान् ग्रहीतुं प्रभवतीति न नानादेशत्वं पारमार्थिकं येन शब्दभेदः कल्पयितुं शक्येत एवंच यत्र एक एव वक्ता श्रोतारश्चा नेके तत्र शब्दैकदेशगतत्वप्रतीते

र्मत्वेऽपि अप्रस्तुतत्वान्न तदुपपादितं भाष्य-
कृता तदनेकदेशप्रतीतेस्तु प्रस्तुतत्वा त्तदुपपा-
दित मिति निष्कर्षः नच संयोगादिदेशं यथा
श्रोत्रं न गच्छति तथा संयोगादयोऽपि श्रोत्र-
देशं नायान्ति तद्वदेवाप्रत्यक्षत्वात् तथाच कथं
शब्दग्रहण मतआह वायवीया इति तथाच
संयोगादीनां श्रोत्रदेशागमनं न प्रत्यक्षविरुद्धं
वायवीयत्वेना प्रत्यक्षत्वादिति तेषा मागमनं
कल्प्यते श्रोत्रस्य कर्णशष्कुलीरूपस्य बहिर्देश-
कल्पनं दृष्टविरुद्धत्वान्न युक्तमिति भावः असं-
भवश्च शब्दे नानादेश इत्याह आकाशदेश-
श्चेति। ननु बहुश्रोतृस्थले घटपटादिवच्छब्दे
भेदः पारमार्थिक एव आकाशदेशत्वेऽपि तत्प्र-
देशभेदा न्नानादेशत्वं वक्तुं शक्य मित्यत
आह अपिचेति संभवत्यपि देशभेदे प्रत्यक्षप्र-
त्यभिज्ञया शब्दैक्यसमर्थनान्न तद्विरुद्धनाना-
देशत्वानुमान मुत्पत्तुमर्हति नचैकस्या नेकदेश-
सम्बन्धोऽनुपन्नः कथमनपपन्नः। दृश्यते हि एक

एव देवदत्तः कदाचित्पाटलिपुत्रे कदाचिन्मथुरायामिति नचासौ भिद्यते इति कश्चिदनुन्मत्तः शक्यते कल्पयितुं प्रत्यभिज्ञाविरोधात् एवं शब्दोप्येकः सन्ननेकत्रोपलभ्येत न चासौ भिद्येतापि देशकालभेदेऽपि धर्म्यंशे तद्देव तत्वेन प्रत्यभिज्ञायमानत्वात् नच तस्य पर्यायेणानेकदेशसम्बन्धः शब्दस्य तु युगपदेवानेकदेशसम्बन्धः प्रतीयते इति वैषम्यं तस्याव्यापकत्वेन युगपदनेकदेशत्वासंभवा त्पर्य्यायेण भवति शब्दस्य तु व्यापकत्वाद्द युगपदेव सर्वदेशसंबन्धः प्रत्यभिज्ञाया उभयत्र साम्यात् पर्याययौगपद्यन्तु व्यापित्वाव्यापित्वप्रयुक्तमिति तद्वैषम्य मकिञ्चित्करं सर्वथासाम्ये दृष्टान्तभावो व्याहन्येत तस्य भेदघटितत्वात्। नच शब्दस्य व्यापित्वे प्रमाणाभावः तदेकत्वावगाहिप्रत्यभिज्ञायाः प्रमाणत्वेना सकृदुक्तत्वात् नच ज्वालादिवद्भ्रमत्वं बाधकज्ञानाभावात् प्रत्युतानित्यत्वकल्पनाया मेव बाधकं दृश्यते युगपदनेकेषा

मेकशब्दश्रवणानुपपत्ति रिति दूरान्तिकस्थि-तयोः क्रमेण शब्दश्रवणाय संबद्धस्यैव शब्दस्य श्रोत्रेण ग्रहणं वक्तव्यं नचोच्चारितस्यैकस्य सकृदनेकश्रोत्रसम्बन्धः शक्यसंभवः कदम्ब-कोरकन्यायेन शब्दान्तरारम्भो दृष्टविरुद्धत्वा-त्पराकृत एवेति प्रत्यभिज्ञाप्रामाण्याय शब्दनि-त्यत्वाङ्गीकार एव युक्तः अभिव्यञ्जकानुरोधा त्तदभिव्यक्तिः पुनः क्वाचित्कीति दिक्।

वर्णान्तरमविकार इतिसूत्रम्।

सू० वर्णान्तर मविकारः ॥१६॥ (उ० ५)

भा० नच दध्यत्र—इत्यत्र प्रकृतिविकारभावः (पू० ५) शब्दा-न्तरं इकारात् यकारः। नहि, यकारं प्रयुञ्जाना इकार मुपाददते। यथा, कटं चिकीर्षन्तो वीरणानि। नच, सादृश्यमात्रं दृष्ट्वा : विकृति र्वा उच्यते। नहि, दधिपिटकं दृष्ट्वा कुन्दपिटकञ्च, प्रकृतिविकारभावोऽवगम्यते। तस्मादयमप्यदोषः।

पूर्वपक्षे दध्यत्रेत्यादा विकारादे र्यकारा-दिविकारादिबोधकव्याकरणस्मृतिः प्रमाण-त्वेन प्रदर्शिता तस्या अतत्परत्व मनेन सूत्रेण दर्शयति तत्र व्याकरणसूत्रकारस्य भगवतः

पाणिने राचार्यस्य नाय मभिप्राय इकारस्य स्थाने तद्विकारभूतो यकारो भवतु किन्तु अनुपश्लिष्टस्येकारस्य प्रयोगप्रसंगे यकार-घटितदध्येति प्रयोगः कर्तव्यः स्वतन्त्रेण दधि दध्यशब्दयोः सिद्धयो रुत्सर्गतः कोष-पठितदधिशब्दस्यैव सर्वत्र प्रयोगप्रसक्तौ तदपवादभूतेकोयणचीत्यादिना संहिताया मचि परतः स्वतः सिद्धस्य दध्यशब्दस्यैव साधुत्वं तस्यैव च प्रयोगः कर्तव्य इति प्रयोगनियमे एव तात्पर्य मतएव कथं पुनरिद मित्याशंक्य सिद्धे शब्दार्थसंबन्धे इतिवार्त्तिकेन तत्रभवान् कात्यायनः नित्यपक्षे एव सूत्रकाराशयं स्फुटी-चकार श्रीमता महाभाष्यकारेणापि तथैव व्या-ख्यात मिति नापरोक्षं व्याकृतिं विदुषाम्। नच दध्यशब्दस्यापि स्वातन्त्र्ये दधिव दध्यशब्द-स्याप्युपादानं स्यादपवादरूपेण तु दध्योपा-दाना दवसीयते दधिशब्देकारस्यैव विकारो यकार इति वाच्यम् सर्वेषां स्थानिना मा-

देशानां स्वरूपतः पाठे गौरवापत्या साधुत्वव्यव-स्थानुपपत्या च लाघवाय संहितायां मचि यणा-न्तानां साधुत्व मन्यत्र गन्ताना मिति व्यवस्था-सिद्धये एकत्वमिव दर्शितत्वात् कार्यार्थी निय-मतः कारण मुपादत्ते इति यकारं प्रयुञ्जानो नियमत इकारमुपाददीत तत्तु न दृश्यत इत्याह नहि यकारमिति वीरणं वीरतरापरपर्यायं गांडर इति प्रसिद्धं तृणविशेषः। पूर्वपक्षोक्तं द्वितीयहेतुं निरस्यति सादृश्यमात्र मिति। दधिपिटक मिति पिटको मञ्जूषा नच दधिकुन्दयोः न सर्वथा सादृश्यं इकारयकारयो रपि सर्वथा सादृश्या-भावादसिद्धो हेतुः स्यादिति यत्किंचिद्रूपेण-सादृश्यविवक्षणे ऽनैकान्तिकमेवेत्याह नहि दधि-पिटकमिति। वृद्धिश्चकर्तृ भूम्नास्येति सूत्रो-क्तासिद्धिप्रदर्शनार्थं सूत्रं नादवृद्धिपरेति।

सू० नादवृद्धिपरा ॥१७॥ (उ० ६)

भा० यच्चैतत् बहुभि र्भेरी माध्मनद्भिः शब्द मुच्चारयद्भि र्महान् शब्द उपलभ्यते, तेन प्रतिपुरुषं शब्दावयवप्रचय इति गम्यते [पू० ६]

नैवम् । निरवयवो हि शब्दः, अवयवभेदानवगमात्, निरवयवत्वाच्च महत्वानुपपत्तिः—अतो न वर्द्धते शब्दः । मृदुरेकेन, बहुभिश्चोच्चार्य्यमाणे तान्येवाक्षराणि कर्णशष्कुलीमण्डलस्य सर्वां नेमिं व्याप्नुवद्भिः संयोगविभागैर्नैरन्तर्य्येण अनेकशो ग्रहणात् महान् अवयवान् इवोपलभ्यन्ते । संयोगविभागाः नैरन्तर्य्येण क्रियमाणाः शब्दमभिव्यञ्जन्तो नादशब्दवाच्याः । तेन नादस्यैषा वृद्धिः, न शब्दस्येति ।

भेरीं वाद्यविशेषमाध्मनद्भि र्नादयद्भि रनेन ध्वन्यात्मकः शब्दो निर्दिष्टः उच्चारयद्भि रित्यनेन वर्णात्मकः शब्दस्य निरवयवयत्वेनावयवान्तरप्रयुक्तमहत्त्वाभाव इत्याह निरवयवोहीति नच न महत्वं हेतुः किन्तु महत्त्वेन ज्ञायमानत्वं तच्च वस्तुतो महत्वशून्येपीति नासिद्धो हेतु रिति वाच्यं शब्दत्वे ऽनैकान्तिकत्वात् किंच महत्या मल्पायां च खातायां व्योम्नि महत्त्वाल्पत्वधी जायते नच तत्र कृतकत्वमिति हेतो रनैकान्तिकत्वं स्पष्टमेव व्यञ्जकगताल्पत्वमहत्त्वाभ्यामेव शब्दे तद्बुद्धि रित्येतदुपपादयति मृदुरेकेनेति । नादशब्दवाच्या इति । ननु नाद-

शब्देन वायवीयसंयोगविभागानां तद्विशिष्ट-वायो रेव वा ग्रहणं प्रत्यक्षत्वं न स्याद् वायो रप्रत्यक्षत्वात् वर्णात्मकशब्दस्यैव श्रोत्रत्वस्वीका-रेणावर्णात्मकशङ्खादिध्वनीना मश्रौत्रत्वापत्ते रितिचे दत्रकेचित् वायोरप्रत्यक्षत्वेऽपि तद्गुणभूतानां ध्वनीनां प्रत्यक्षत्वोपगमात्। नच वायो रेव शब्दाभिव्यञ्जकत्व, मिति सिद्धान्तो भज्येत ध्वनीना मेव व्यञ्जकत्वेन तेषां वायुत्वाभावादिति वाच्यम् वायोरभिव्यञ्ज-कत्वानङ्गीकारात् वायुगुणभूता ध्वनय एव मारुतप्रेरिताः श्रोत्रं संस्कारयन्तः शब्दस्य व्यञ्जका इत्येव सिद्धान्तः। नच वर्णोच्चारण-काले तेषा मश्रवणा त्कथमभिव्यञ्जकत्वं शब्दो-च्चारणकालेऽपि तेषां श्रवणस्यानजेनीयत्वात् अत एव दूरादुच्चारिते वर्णानामश्रवणेऽपि ध्वनीनां श्रवणं ग्रामीणापणादौ दूराज्जनतारवमात्रं श्रूयते न वर्णविशेषः द्राविड़भाषानभिज्ञस्य तद्भाषो-च्चारणे ध्वनिमात्रमेवा नुभूयते न वर्णविशेष

इति सार्वजनीनो ऽनुभवः। एवं च ध्वनयः कण्ठादिस्थानसंयोगविशेषलाभे वर्णानभिव्यञ्जयन्तः स्वय मप्युपलभ्यन्ते। अन्ये तु ध्वन्याख्यशब्दाभावेऽपि वायूना मेव नानात्वात् शङ्खादिध्वनिश्रवणोपपादकत्व मातिष्ठन्ते नच शङ्खादिध्वनौ शब्दत्वाभावे कथं वायुभिः तदभिव्यक्तिः निराश्रयजाते रभिव्यक्त्यसंभवा दिति वाच्यम् शब्दत्वस्य प्रतिवर्णं सद्भावस्वीकारेण निराश्रयत्वाभावात् नच तथापि शङ्खादिभिः कस्मिन् वर्णे शब्दत्वं व्यज्यते सर्ववर्णानां नित्यत्वेन विभुत्वेन चैतादृशपर्यनुयोगाभावा दिति दिक्। अथवास्तु ध्वनित्वं वर्णत्ववच्छब्दत्वव्याप्यो जाति विशेष स्तद्भेदोऽपि गकारादिभेदवत् पारमार्थिक एव सर्वथा वर्णनित्यत्वपक्षे यथा शब्दभेदः मनुष्यादौ वर्णोपलंभः शंखादौ नादमात्रोपलंभः तथा ध्वनीनां शक्तिविशेषः कल्प्यते केचिद्ध्वनयः वर्णान् व्यञ्जयन्ति केचित्तु नेति ध्वनयः वायवीया वा शब्दजातिविशेषो वा नात्र विशिष्या-

भिनिवेशः परन्तु नादस्य शब्दत्वावान्तरजातिविशेषवत्त्वाभ्युपगमे शब्दवदमूर्तस्य तस्य वृद्ध्यसम्भवा न्नादवृद्धीतिसूत्रे नादशब्देन तद्गुणकावयवा लक्ष्यन्ते इत्येतद्व्याकर्तुं संयोगविभागाश्च नादशब्दवाच्या इति भाष्यम् अथसिद्धान्तसूत्रम्

सू. नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् (१८सि.)

नित्यःशब्दो भवितुमर्हति । कुतः दर्शनस्य परार्थत्वात्,दर्शनमुच्चारणं, तत्परार्थं,परं अर्थं प्रत्याययितुम् ,उच्चरितमात्रे हि विनष्टे शब्दे न चान्योऽन्यान् अर्थं प्रत्याययितुं शक्नुयात् । अतः न परार्थ मुच्चार्य्येत । अथ न विनष्टः, ततो बहुशः उपलब्धत्वा दर्थागमः इति युक्तम् । अर्थवत्सादृश्यादर्थागमः इति चेत् ? न कश्चिदर्थवान् सर्वेषां नवत्वात् । कस्यचित् पूर्वस्य कृत्रिमः सम्बन्धो भविष्यति इति चेत् । तदुक्तं सदृश इति चावगते व्यामोहात् प्रत्ययो व्यावर्तेत । मालाशब्दात् मालाप्रत्ययः इव । यथा गावी शब्दात् सास्नादिमति प्रत्ययस्यानिवृत्तिः, तद्वत्क्रमिष्यति इति चेत् । नहि, गोशब्दं तत्रोच्चारयितु मिच्छा । । नेहान्यशब्दोच्चिचारयिषा । न चैकेनोच्चारणयत्नेन संव्यवहारः स्वार्थ सम्बन्धश्च शक्यते कर्तुम् । तस्माद्दर्शनस्य परार्थत्वात् नित्यः शब्दः ।

नित्यस्तु स्याद्दर्शनस्य परार्थत्वादिति अस्यार्थः शब्दो नित्यः दर्शनस्य परार्थत्वादिति

ननु प्रासादः शुक्लः काकस्य कृष्णत्वादिति वदत्रापि हेतोः पक्षधर्मत्वाभावः। दर्शनस्य परार्थत्वे किमायातं शब्दस्य येन नित्यत्वं साध्यते यदि दर्शनस्य परार्थत्वादित्यनेन परार्थदर्शनत्वादिति कथंचि द्विवक्ष्यते तदापि दीपज्वालाघटादिषु व्यभिचारो ऽनित्यत्वेऽपि तेषां परार्थत्वात् एवं दर्शनपदेनोच्चारणविवक्षणे उच्चारणस्य परार्थत्वा दित्यभिप्रेयते यदि तदा उच्चारणस्य पक्षमात्रवृत्तितया ऽसाधारणत्वापत्ति रिति चेन्न एतत्सूत्रस्या नुमानप्रदर्शनपरत्वाभावात् अनुमानप्रयोगे ईदृशदूषणं स्यात् तत्त्विह न विवक्ष्यते किन्तु अर्थापत्तिप्रदर्शन मनेन सूत्रेण क्रियते अर्थापत्तौ च दूषणद्वय मेव नाधिक मन्यथैवोपपत्ति रन्यथाप्युपपत्तिः एवंचात्रापि शब्दस्या नित्यत्वेऽपि अनित्यत्वे एव वा यद्यर्थप्रत्ययः स्या त्तदा अर्थापत्तौ दूषणं स्यात् तत्त्विह नास्ति नित्यत्वे एव शाब्दबोधोपपत्ते र्वक्ष्यमाणत्वात् क्षणिकत्वे संबन्धग्रहणानुपपत्त्या

अर्थबोधकत्वानुपपत्तिः स्यात् नहि अदृष्टार्थसंबन्धः शब्दोर्थं प्रत्याययति तथासति अगृहीतसम्बन्धत्वाविशेषात्सर्वशब्दात्सर्वार्थबोधापत्तेः नच यावता कालेन सम्बन्धग्रहो निष्पद्यते तावत्काल मस्तु कालान्तरे तत्सत्तायां प्रमाणप्रयोजनाभावान्न नित्यत्वसिद्धिः संबन्धज्ञानोपपत्तये कालान्तरेऽपि तत्स्थिते रावश्यकत्वात्। नच शब्दान्तरे संबन्धग्रहणात् शब्दान्तरेणा प्यर्थप्रत्ययोभ्युपेय इति न तदर्थं स्थायित्वापेक्षेति वाच्यम् तथा सति गोशब्दे संबन्धग्रहणा दश्वशब्देनाप्यर्थबोधापत्तेः नच स्वभावा त्कश्चिदेव शब्द एवमर्थबोधको न सर्वः नहि एकस्य यः स्वभावः परस्यापि स एवेति वक्तुं शक्यं विचित्रस्वभावत्वाद्धि भावानामिति मैवं क एवं स्वभावः को नेति निश्चेतु मशक्यत्वात् यतो ऽर्थप्रत्ययो दृश्यते स एव तत्स्वभाव इत्येवं रूपेण निश्चयः शक्य इत्यपि न श्रोतृणामेवं स्वभावनिर्णयसंभवेऽपि वक्तृणां तदसंभ-

त्वात्। अर्थप्रत्ययात्पूर्वं शब्दे तत्सामर्थ्यानव-
धारणे तदर्थविवक्षया तच्छब्दप्रयोगानुपपत्ति
रथायं शब्दोऽमुमर्थं बोधयिष्यतीति जानाति
वक्ता प्रयोगात्पूर्वमपि तर्हि शब्दे तादृशसाम-
र्थ्यावधारणं प्रागेवेति तदनित्यत्वानुपपत्तिः नच
तेजोवदगृहीतसंबन्धः शब्दोऽर्थप्रत्यायकः प्रथ-
मश्रवणे ऽप्यर्थप्रत्ययापत्तेः तस्माद् गृहीतसंबन्ध
एव प्रत्यायको मन्तव्य उच्चरितविनष्टे संब-
न्धग्रहणानुपपत्त्या न प्रत्यायकत्व मित्याह
उच्चरितमात्र इति। नित्यत्वे तु संबन्धग्रहः
सुकर इत्याह अथेति अर्थवत्सादृश्या दर्थावगम
इति गृहीतसंबन्धेना र्थवता शब्दान्तरेण सादृ-
श्याद् गृहीतसंबन्धत्वेन शब्दान्तरं भ्रान्त्यावगत
मर्थं प्रत्याययेदित्यर्थः। क्षणिकत्ववादे सर्वेषा
मभिनवत्वाद् गृहीतसंबन्धस्य स्थिरस्य कस्य-
चिच्छब्दस्याभावा त्कस्य सादृश्येन कस्य वाच-
कत्वं वक्तव्यं कस्यचिद् गृहीतसंबन्धस्य सत्वे
एवं स्या न्नान्यथेत्याह न कश्चिदिति। अह-

ष्टसंगतित्वेन सर्वेषां तुल्यवात् नच संकेतग्रह-
काले श्रुतानां गोशब्दाना मन्तिमः शब्दो
ऽर्थवान् व्युत्पत्तिकाले तत्साद्दश्या दन्ये शब्दा
अर्थं प्रत्याययन्तीति चेन्न य एवाश्रु ततज्जा-
तीयशब्दान्तरस्यानर्थकः स एव श्रुतशब्दान्तर-
स्यार्थवा नित्येकस्मिन् विरुद्धद्वयापत्तेः नच संके-
तग्रहकाले गवादिशब्दो मुख्यो ऽर्थवान् प्रती-
तिकाले तु तत्साद्दश्याद्ग गौण इत्यपि न एक-
स्यैव शब्दस्य श्रवणाश्रवणवशेन मुख्यत्वगौण-
त्वापत्ते रिति कस्यचि देकस्य जगदादिवर्त्तिनः
कृत्रिमो भविष्यति संबन्ध इत्याक्षेपस्योत्तरं
भाष्यं तदुक्तमिति संबन्धाकरणे या युक्तिः
पूर्वमुक्ता सैव तच्छब्देन परामृश्यते संबन्धाक-
रणे युक्ति रुक्तेत्यर्थः शब्दानित्यत्वपक्षे संबन्ध-
करणं दुःशकं क्षणिकत्वपक्षे त्वशक्यमेव शब्द-
स्तावदनुच्चार्य सम्बन्धेन योजयितु मशक्यः
उच्चारणापवर्गिणि तत्र सबन्धकरणे न किंचि-
त्प्रयोजन मेवं चाकृतसंबन्ध एव पूर्वो विनष्ट

इति नार्थवान् उक्त स्त्वकृतसम्बन्धः कथमर्थव-
त्त्वेन विज्ञायेत नचानुच्चरिते उच्चरितनष्टे
वा शक्यत्वाद् माभू त्संबन्धकरण मुच्चार्य-
माणस्यैव संबन्धकरणमस्तु बाधकाभावादिति
वाच्यम् सर्वशब्दार्थसंबन्धाभावे संबन्धाकरणा-
सम्भवात् जगदादौ प्रसिद्धैः कृतसंबन्धैः शब्दैः
सादृश्या दिदानीन्तनशब्देभ्यो ऽर्थप्रतीतिः
इदानीन्तनानां पुंसां तादृशशब्दज्ञानाभावा-
त्तत्सादृश्यस्येदानीन्तने सुतरां ज्ञानाभावात् देश-
कालपुरुषविप्रकर्षात्। संबन्धकरणवद भिधान-
मपि नोपपद्यते अर्थवत्त्वेन ज्ञातस्य पूर्वशब्दस्य
विनष्टत्वा त्तदभिधातु मशक्तुवन् वक्ता कतरं
शब्दं ब्रूयात् किमर्थवन्त मुत तत्सदृशं नाद्यः
अतीतत्वेन तद्भाषितु मसामर्थ्यात् नूतनस्या
र्थवत्त्वेनाग्रहणात् नाप्यन्त्यः अर्थवतः शब्दस्य
ग्रहणाभावात् तत्सादृश्यस्य दुर्ज्ञेयत्वात् वक्तु-
रपि श्रोतृत्ववेलाया मेष एव प्रसङ्गः तथाच
सर्वेषां वक्तृणा मर्थवान् शब्दो न कश्च

दिति न सादृश्यादर्थप्रतीतिः किंच सादृश्यं व्यक्तितो भिन्न मभिन्नं वा एव मेक मनेकं नित्य मनित्यं वा भिन्नैकत्वनित्यत्वे जातिरूप मेव स्यात् तच्च गत्वादिजातिनिराकरणादेव निराकृतम् अभेदानित्यत्वे शब्दव्यक्तिवदेव क्षणिकत्व मिति पूर्वोक्तदोषो ऽत्रापि समः भूयोवयवसामान्ययोगस्यैव सादृश्यत्वेन निरवयवेषु वर्णेषु न तत्सम्भवः प्रतिपदं वर्णानां भिन्नतया तत्रापि सादृश्यं दुर्धर मेवेति दिक्। सदृश इति यथा गवये ऽयं गौरिति व्यामोहा त्प्रत्ययो भवति पश्चादयं गोसदृश इति ज्ञाने जाते गोबुद्धि स्ततो निवर्त्तते गोसदृशस्य गोत्वाभावादेव मर्थवत्सादृश्यज्ञाने पूर्वार्थवच्छब्दबुद्धिः शब्दान्तरे व्यावर्त्तेत नाय मर्थवान् किन्तु तत्सदृश इतिभावः अत्र दृष्टान्त माह मालाशब्दादिति मालापदस्य प्रतिप्रयोगं भिन्नत्वा त्पदान्तरे तद्बुद्धि र्व्यावर्त्तते ननु तत्सदृशेऽपि तद्बुद्धि रनुवर्तते यथा गो शब्दसदृशाद् गावीशब्दा दित्याशङ्कते यथेति उत्तर

माह गोशब्दमिति नास्मन्मते क्षणिको गोशब्दः किन्तु स्थायी ततश्चार्थवन्तं गोशब्द मनुसृत्य गाव्यादिषु गोशब्दबुद्धि र्जायते गोशब्दाभिधित्सया तदभिधानसामर्थ्यवैकल्याद् गावीशब्दो ऽनेनोच्चारित इति मूलभूतगोशब्दज्ञानादेव ततो बोधो नतु गोशब्दसदृशो गावीशब्द इति ज्ञानादन्यथा यत्किंचित्सादृश्यस्य शालामालाशब्दयो रपि परस्परं सत्त्वात्ताभ्यां समानबोधापत्तिः स्यात् सर्वात्मना सादृश्यं तु गोगाव्यो रपि नास्त्येवेति गावीशब्दे गोशब्दप्रत्ययानुवृत्ति र्युक्तैव क्षणिकत्वेतु अर्थवच्छब्दोच्चिचारयिषया तत्सदृशस्यो च्चारणं स्यान्न तु तस्यातीतत्वादिति तत्प्रत्ययानुवृत्ति र्न स्यादिति भावः नच वर्णानां नित्यत्वेऽपि आनुपूर्वीविशेषविशिष्टस्य पदस्य वाचकत्वे नाभीष्टस्या नित्यत्वं दुर्वारं नित्यविभूनां वर्णानां स्वतो देशकालतो वा क्रमासंभवा दभिव्यंजकध्वनिक्रमारोपादेव क्रमवत्त्वं वक्तव्यं ध्वनिक्रमस्य विवक्षाधीनत्वेन पुरुषानुप्रवेशाच्छब्दस्य

स्वातन्त्र्याभावा त्प्रमाणत्व मपि न स्यादित्य-
णानां नित्यत्वेपि घटादे रनित्यत्वव द्वर्णानां
नित्यत्वेपि वाचकस्यानित्यत्वमेवेति वर्णनित्य-
त्वप्रतिपादनं मुधैव येषां मते वर्णातिरिक्तं पदं
यथा वैयाकरणानां पदे वर्णा न विद्यन्त इति
सिद्धान्त स्तेषां शब्दनित्यत्वकल्पना अर्थवती
येषां त्वारोपितक्रमविशिष्टस्य तादृशक्रमस्यैव
वा वाचकत्वं तेषां वर्णनित्यत्वकल्पना नार्थवती
वाचकाना मनित्यत्वा दितिचेद् ब्रोच्यते न पद-
निष्ठक्रमस्य वाचकत्व मस्मन्मते तथाहि
अन्यत्रैतदर्थप्रकाशकत्वायोगाद् द्वयमेवा वशि-
ष्यते क्रमोपेता वर्णाः वर्णनिष्ठक्रमश्चेति तत्र
क्रमोपेता वर्णा एव वाचकाः नतु क्रमः
क्रमः क्रमवता मङ्ग मिति न्यायात्। क्रमस्य
वर्णधर्मत्वेन धर्मधर्मिणो श्चाभेदाभ्युपगमेन
वस्त्वन्तरत्वाभावात् ततश्च प्रतीयमाना वर्णा
वाचकाः। नन्वेवमपि क्रमस्य पुरुषविवक्षाधी-
नत्वेन पौरुषेयत्वा द्विशिष्टवाचकत्वे ऽप्रामाण्यं

पूर्वपूर्वप्रयोगसिद्धक्रमस्यैवो त्तरोत्तरपुरुषेणाश्र-
यणा त्संबन्धवदनादित्वेन पौरुषेयत्वाभावात्
नच स्वातन्त्र्येण क्रमविवक्षाभावेऽपि वस्तुतः
पुरुषकृतत्वेना नित्यत्वमेवेति वाच्यम् कौट-
स्थ्यनित्यत्वानभ्युपगमात् व्यवहारानादितया
नित्यत्वोपगमात् गकारौकारविसर्जनीयानामेव
क्रमेणागवादिशब्दव्यवहारोऽनादि रिति तादृ-
शक्रमविशिष्टगोशब्दस्य नित्यत्वं नतु वर्णाना
त्कूटस्थनित्यत्वम् ननु तथापि पुरुषकार्यत्वं न
परिहृत मिति पौरुषेयत्वेना प्रामाण्यं स्यादेव
न सर्वथा पुरुषव्यापारः परिजिहीर्षितः असं-
भवात् किन्तु व्यापारे पुरुषस्वातन्त्र्यं सति पु-
रुषस्य स्वातन्त्र्ये तदधीनं प्रामाण्यं स्यान्न पार-
तन्त्र्ये नहि शाक्यादिवाक्य मुच्चारयता
मस्माकं गुणदोषाभ्या न्तत्प्रमाण मप्रमाणं वा
भवति तत्कस्यहेतो स्तदुच्चारणेऽस्माकं स्वा-
तन्त्र्याभावात्। नच पदवद्वर्णानामपि नित्यत्व
मस्तु किं कूटस्थनित्यत्वेन एवं सति घटवत्प-

रमाणूना मप्यनित्यत्वमेवास्तु किं नित्यकल्पनेनेत्यपि स्यात् नचोपादानाभावे द्व्यणुकारम्भानुपपत्त्यो घटाद्यनुत्पत्ति रेव स्यात् तर्हि वर्णाभावे किमुपादाय शब्दरचनापि स्यादित्यत्रापि दीयतां दृष्टिः नच वर्णावयवत्वेन तस्य पूर्वमेव निरासात् नच कण्ठादिसंयोगविभागाभ्यां संभवत्यारम्भ स्तस्मात्पूर्वोक्त मेव ब्रवीमि पूर्वश्रुतमेव शृणोमीत्यादि प्रत्यभिज्ञया नित्यत्वमेव तत्र प्रतीयते नत्वपूर्वरचनेति तदर्थं शब्दनित्यत्वस्वीकार एवोचितः। नचैवं पदक्रमयोरपि कूटस्थनित्यत्वप्रसङ्गः तत्रापि तथैव प्रत्यभिज्ञानादिति वाच्यम् तयो र्वर्णाभिन्नतया तन्नित्यत्वनिबन्धनैव तत्र तादृशप्रत्यभिज्ञेति स्वीकारादिति दिक्।

सू० सर्वत्र यौगपद्यात् ॥१६॥ (हे० १)

भा० गोशब्दे उच्चरिते सर्वगवीषु युगपत् प्रत्ययो भवति। अतः आकृतिवचनोऽयम्। नचाकृत्या शब्दस्य सम्बन्धः शक्यते कर्तुं, निर्दिश्य हि आकृतिं कर्ता सम्बध्नीयात्। गोपिण्डे च बहूना

माकृतीनां सद्भावा च्छब्दमन्तरेण गोशब्दवाच्यां विभक्ता माकृतिं केन प्रकारेणोपदेक्ष्यति ? नित्ये तु सति गोशब्दे बहुकृत्वः उच्चरितः श्रुतपूर्व श्चान्यासु गोव्यक्तिषु अन्वयव्यतिरेकाभ्या माकृतिवचन मवगमयिष्यति । तस्मादपि नित्यः ।

सर्वत्र यौगपद्यादिति सूत्रम् । नचाकृत्या शब्दस्येति ननु शब्दनित्यत्वाधिकरणे संबन्ध-नित्यत्वप्रतिपादन मयुक्त मप्रकृतत्वादिति चेदत्र केचित् प्रकरणं द्विधा महाप्रकरण मावान्तर-प्रकरणं चेति आद्यं संबन्धनित्यत्वप्रकरणं द्वितीयं शब्दनित्यत्वप्रकरणं तत्र महाप्रकरणेन संबन्ध-नित्यतायां प्रकृतायां संबन्धनित्यता शब्दनि-त्यतां विना न संभवतीति तदङ्गभूतशब्दनित्य-त्वचिन्तन मवान्तरप्रकरणेन कृतं तस्मिन् समाप्ते पुनः प्रकृतायामेव संबन्धनित्यतायां युक्त्यन्तर-मुपपाद्यते यौगपद्यादिति सूत्रेणेत्याहु स्तदयुक्तम् शब्दनित्यत्वचिन्ताया इदानीं समाप्त्यभावात् अन्ये तु शब्दनित्यत्वमेव संबन्धनित्यत्वद्वारा साध्यते विनश्वरेषु शब्देषु संबन्धनित्यत्वासंभ-वात् नच विनश्वरघटादिव्यक्तिषु घटत्वादिजा-

तिनित्यसंबन्धत्व स्प्रकृतेपि नित्यसंबन्धः किन्न स्याद् घटत्वादिजाते र्बहुव्यक्त्याश्रयत्वेन सर्वव्यक्तीना मुच्छेदाभावा दनुच्छेदरूपेण सतीषु व्यक्तिषु तन्नित्यसंबन्धो घटते गवादिशब्दाना न्त्वनुच्छेदरूपेण वर्तमानत्वाभावा न्न स घटते इति तदर्थं शब्दनित्यत्व मावश्यकं भेदाप्रतीत्या एकव्यक्तितयापि नित्यत्वमेवेति नच संबन्धनित्यत्वेन शब्दनित्यत्वप्रतिपादन मयुक्तं तत्रैव प्रमाणाभावा न्नैवं अज्ञातपदपदार्थसंबन्धस्य पुंसो व्युत्पादनाय अंगुल्या निर्दिश्य यत्र पुरःस्थितव्यक्तौ संबन्धः क्रियते तत्र व्यक्तिविशेषनिष्ठतयैव ग्रहणेन संबन्धस्य सर्वव्यक्तिसाधारणत्वेना ग्रहणा त्सर्वगवी बोधानापत्तेः नच गोत्वादिजातावेव संबन्धकरणा न्नानुपपत्तिः पार्थिवत्वद्रव्यत्वसत्वादीना मनेकधर्माणां तत्र सांकर्या त्सकृत्प्रयोगे निर्धारणासंभवात् तथाचैवं प्रयोगः अकृत्रिमः संबन्धो न विनाशी नित्येन नित्यसंबन्धा दाकाशपरमाणुवदिति । वस्तुतस्तु

संबन्धनित्यत्वं नानेन बोध्यते अप्रस्तुतत्वात् शब्दनित्यत्वमेवा नेन सूत्रेण बोध्यते भाष्यमपि तदभिप्रायकमेव संगच्छते संमुग्धानेकसामान्य-विषये सकृच्छ्रुतस्य गवादिशब्दस्य गोत्वादि-विशेषाभिधायकत्वं कथयितुं ग्रहीतुं वा न शक्यते बहुकृत्वः श्रवणे तु प्राणिशुक्लागमन-सास्नालाङ्गूलादिभ्यो विविच्या न्वयव्यतिरे-काभ्यां निष्कृष्य गोत्वमात्रे गवादिपदसम्बन्धो ग्रहीतुं कथयितुं वा शक्यते चिरेण नन्वेता-वता स्थायित्वमात्रं लभ्यते नित्यत्वं तु कुतः पश्चा न्नाशकाभावा न्नित्यत्वसिद्धे रप्रत्यूहत्वात् एतच्चानपेक्षत्वसूत्रे साधयिष्यते भाष्ये कर्तुं-मित्यनेन कथयितुं ग्रहीतुं वेत्युपलक्ष्यते स-कृच्छ्रुतस्य गवादिशब्दस्य बहुशः प्रयोगदर्शनं विना गोत्वादिमात्रवाचकत्वं ग्रहीतुं कथयितुं वा न शक्यते तदाह नचाकृत्येति। नित्यत्वप-क्षे तु तस्य बहुकृत्वः श्रवणादन्वयव्यतिरेकाभ्यां गोत्वादिमात्रवाचकत्वं शक्यनिर्णयं तदाह नित्यत्वे त्विति।

सू० संख्याभावात् ॥२०॥ (हे० २)

भा० अष्टकृत्वो गोशब्द उच्चरितः इति वदन्ति, नाष्टौ गोशब्दाः इति। किमतः ? यद्येवम्। अनेन वचनेनावगम्यते प्रत्यभिजानन्तीति। वयं तावत् प्रत्यभिजानीमो न नः करणदौर्बल्यां एवमन्येऽपि प्रत्यभिजानन्ति 'स एव अयमिति'। प्रत्यभिजानाना वयमिवान्येऽपि नान्यः इति वक्तुमर्हन्ति। अथ मतं, अन्यत्वे सति सादृश्येन व्यामूढाः 'सः' इति वक्ष्यन्ति। तन्न, नहि ते 'सदृशः' इति प्रतियन्ति, किन्तर्हि स एवाय मिति। विदिते च स्फुटेऽन्यत्वे, 'व्यामोहः' इति गम्यते। नच, अयमन्यः इति प्रत्यक्षम् अन्यद्वा प्रमाण मस्ति।

भा० स्यादेतत् बुद्धिकर्मणी अपि ते प्रत्यभिज्ञायेते, ते अपि नित्ये प्राप्नुतः। नैष दोषः। नहि ते प्रत्यक्षे, अथ प्रत्यक्षे नित्ये एव। ह्यस्तनस्य शब्दस्य बिनाशात् 'अन्योऽद्यतन' इति चेत्। नैष विनष्टः, यतः एनं पुनरुपलभामहे। नहि प्रत्यक्षदृष्टं मुहूर्त्त मदृष्ट्वा पुनरुपलभ्यमानं प्रत्यभिजानन्तो विनष्टं परिकल्पयन्ति। परिकल्पयन्तो द्वितीयसन्दर्शने मातरि, जायायां, पितरि वा नाश्वस्युः। नहि अनुपलम्भमात्रेण 'नास्ति' इति अवगम्य, 'नष्टः' इत्येव कल्पयन्ति। अप्रमाणतायां विदितायां नास्ति इत्यवगच्छामः। नहि, प्रमाणे प्रत्यक्षे सति, अप्रमाणता स्यात्। अस्तीति पुनः अव्यामोहेनावगम्यमाने न क्वचिदप्यभावः। नचासिद्धेऽभावे व्यामोहः, नच सिद्धोऽभावः तस्मादसति व्यामोहे, नाभावः। तदेतद्दानुपूर्व्या सिद्धम्। तस्मात् पुरस्तादनुच्चरितम् अनुपलभमाना अपि न 'विनष्टः' इत्य-

वगन्तु मर्हन्ति। यथा, गृहान्निर्गताः सर्वगृह्जन मपश्यन्तः पुनः प्रविश्य उपलभमाना अपि न प्राक् प्रवेशात् 'विनष्टः' इत्यवगच्छन्ति तद्वत् एनमपि न अन्यः इति वक्तु मर्हन्ति। येऽपि सर्वेषां भावानां प्रतिक्षणं विनाशमभ्युपगच्छन्ति, तेऽपि न शक्नुवन्ति शब्दस्य वदितुम्, अन्तेहि क्षयदर्शनात् ते मन्यन्ते, नच शब्दस्यान्तः, नच क्षयो लक्ष्यते। सः इति प्रत्यक्षः प्रत्ययः, सदृशः इत्यानुमानिकः नच, प्रत्यक्षविरुद्ध मनुमान मुदेति, स्वकार्य्यं वा साधयति। तस्मा न्नित्यः।

संख्याभावादितिसूत्रम्। क्रियावता मभेदे क्रियाभ्यावृत्तिगणने कृत्वसुच् प्रत्ययो विधीयते अष्टकृत्वः गोशब्द उच्चरित इति प्रयोगे कृत्वसुच्प्रत्ययदर्शना त्पूर्वोच्चरितगोशब्दे एवोच्चारणाक्रियावृत्ति रिति प्रतीयते क्षणिकत्वे तत्र पुनः पुनः क्रियाभ्यावृत्ति र्न स्यादिति स्थिरत्वमेव गम्यते इत्याह अष्टकृत्व इति। तत्रैव पुनः पुनरुच्चारणावृत्तौ अष्टकृत्व इत्युपपद्यते शब्दान्तरत्वे तु अष्टौ गोशब्दा इति स्यादित्याह नाष्टाविति अथ अष्टकृत्वो ब्राह्मणा भुक्तवन्त इत्यादौ द्रव्यभेदेऽपि कृत्वसुचो दर्शना दनैकान्तिकत्वेन न द्रव्याभेदसाधनक्षमत्व मित्यभि

प्रायेण शंकते किमत इति। न द्रव्याभेदसाधनाय कृत्वसुच् प्रत्ययस्य हेतुतयोपादानं येनानैकान्तिकदोषोद्भावनेनासाधकत्वमुच्येत प्रायः प्रत्यभिज्ञायां कृत्वसुच्प्रत्ययसाहचर्यदर्शनात्तदुपलक्षितप्रत्यभिज्ञाया एव प्रमाणत्वेनात्र विवक्षणा दित्यभिप्रायेणोत्तर माह प्रत्यभिजानन्तीति। ननु स्वसंवेद्यत्वा त्प्रत्यभिज्ञायाः साक्षादेव प्रमाणत्वेन प्रदर्शनसंभवात् किं कृत्वसुजुपलक्षणेन सत्य मात्मप्रत्यभिज्ञा स्वसंवेद्या तस्यास्तु हेतुदोषनिराकरणद्वारा सर्वानुभवसिद्धप्रामाण्यसिद्धये तदुपादानादित्याह वयमिति ज्वालाकार्षापणादौ सदृशेऽपि तत्प्रत्यभिज्ञादर्शना दनाश्वास स्तत्रेत्याशंकते अथेति। इन्द्रियदोषाधीना हि भ्रान्तिः सर्वस्य व्यापकतया निराकर्तु मही विषयदोषनिबन्धना तु सर्वेषां स्यादेवेति न प्रत्यभिज्ञा प्रामाण्य मित्याशङ्क्य निराकुरुते तन्नेति। नहि ते सदृश इति प्रतिपद्यन्ते कि न्तर्हि स इति परिहारभाष्यम् सदृश

एवेति यत्र निश्चय स्तत्र स इति प्रतिभिज्ञा-
नस्य भ्रमत्वं यथा दीपज्वालादौ सदृश इति
बाधकप्रत्ययदर्शनात् यत्र पुनः स एवेति नित्यं
प्रत्यभिज्ञानं जायते तत्र न भ्रमत्व मन्यत्वग्राह-
कप्रमाणाभावा दित्याह नहि ते सदृश इति।
नन्वेव मपि गृहीतग्राहितया प्रत्यभिज्ञानस्या-
प्रामाण्यं कलास्तित्वादे रधिकग्रहणेना गृहीत-
ग्राहित्वात् तथाच ज्वालादौ प्रमाणान्तरेणा-
न्यत्वे स्फुटे प्रत्यभिज्ञान मप्रमाणं शब्देत्व न्यत्व-
ग्राहकप्रमाणाभावा त्तत्प्रमाण मेवेत्याह विदिते-
इति। पुनःप्रत्यभिज्ञानस्या प्रामाण्यं शंकते
बुद्धिकर्मणी इति। नन्विद मयुक्तं बुद्धिकर्मणो-
र्नित्यत्वासिद्धेः शब्दनित्यत्वसिद्धे रप्रत्यूहत्वात्
तदनित्यत्वसाधकत्वाभावाच्च एवंच प्रकृतसा-
धनबाधनानुपयुक्तसिद्धान्तान्तरदूषणं निग्रहस्था-
नमेवापद्यते अतएवेदृशाभिधानस्यायुक्तत्वं
प्रकृतं दूषयितुमशक्नुवतस्तत्सिद्धान्तान्तरदूषणे
निग्रहस्थान मापद्यते इत्युक्त्या भाष्यकृता स्व-

यमुक्तमिति चेन्न तत्रानैकान्तिकत्वप्रदर्शनेन प्रत्यभिज्ञायाः शब्दनित्यत्वसाधनत्वं नेत्यत्रैव तात्पर्यात् तथाच प्रकृतशब्दनित्यत्वदूषणोपयुक्तमेवेति न निग्रहस्थान मिति नहि ते प्रत्यक्षे इति । नन्विद मुत्तर मसङ्गतम् । यदि परेण प्रत्यक्षत्वेन हेतुना बुद्धिकर्मणो रनित्यत्वं साधये-त्तदेदं दूषणं युज्येत तत्तु न घटादिषु व्यभिचारात् यदि वा अनित्यत्वव्याप्त मप्रत्यक्षत्वं भवे त्तदापि व्यापकानित्यत्वविरुद्धनित्यत्वसंभावनायै व्याप्याप्रत्यक्षत्वविरुद्धप्रत्यक्षत्वाभिधान मत्रोच्येत तदपि न संभवति अतीन्द्रियत्वा दाकाशादे रप्यप्रत्यक्षत्वेना नित्यत्वापत्तेश्च किंच यदि स्वरूपेण बुद्धिकर्मणो रनित्यत्वं साध्येत तत स्तद्द्व्यं स्यादपि यदा तु प्रत्यभिज्ञाया स्तत्र व्यभिचार उच्यते तदा तयो र्नित्यत्वविरहेऽपि प्रत्यभिज्ञाया स्तत्रदर्शना द्व्यभिचारः स्फुट एवेति नोत्तरं कथमपि संगच्छते इति चेदत्र केचित् यदि बुद्धिकर्मणोः प्रत्यक्षत्वं

स्यात्तदा तदेवेदमिति प्रत्यक्षमूलकप्रत्यभि-ज्ञानस्य तत्र दर्शना द्व्यभिचारेण प्रामाण्यं स्यादिति न तेन शब्दे नित्यत्वं साधयितुं शक्येतेति तयोः प्रत्यक्षत्वनिषेधेन तत्पृष्ठरूढप्रत्यभिज्ञानस्यापि प्रतिषेधा न्न व्यभिचार इति तत स्तन्नित्यत्वं सुसाध मित्युत्तरभाष्याशयः अथ ते प्रत्यक्षे इति तथाच विपक्षाभावा त्तत्र प्रत्यभिज्ञानस्य हेतोः सत्वेऽपि न व्यभिचार इतिभावः। ननु नहि ते प्रत्यक्षो यदि ते प्रत्यक्षो नित्ये एवेत्यनास्थोक्तेः कोऽभिप्रायः अय मभि-प्रायः बुद्धिकर्मणो र्नित्यत्वं वा स्यादनित्यत्वं वा नहि तेन मदीयः पक्षो दुष्यति प्रत्यक्षत्व नित्यत्वयो र्व्यवस्थितविषयत्वात् येन तत्तद्व्य-क्तात्मना बुद्धिकर्मणो रनित्यत्वं न तेन तयोः प्रत्यभिज्ञानविषयत्वं घटबुद्धा वश्वबुद्धिवत् येन तु शक्तिजात्यात्मना अनयोः प्रत्यभिज्ञानं तेन नित्यत्वमेव सर्वेषामिष्ट मित्याहुः तन्न प्रत्यभिज्ञानिराकरणाभावात् प्रत्यभिज्ञानिराक-

रणाभिप्राये तु न ते प्रत्यभिज्ञायेते इत्येवं वक्तव्यं स्या त्तथातु नोक्तं प्रत्यक्षशब्देन तद्ग्रहणो क्लेश इति न तन्निराकरणपरं भाष्यम् प्रत्यभिज्ञानं हि गवादाविव बुद्धि-कमणो रप्यविशिष्टं दृश्यते अयं गौ रयमपि गौरिति बदिथ मियं बुद्धिः अयं चलति अयम-पीति प्रत्यभिज्ञानं सर्वानुभवसिद्धं नापह्नव-मर्हति। नचाप्रत्यक्षत्वे बुद्धिकर्मणोः केन प्रमाणेन प्रत्यभिज्ञानं स्यात् येन तयो र्ग्रहण मिति ब्रूमः नच तयो रनुमानेन ग्रहणं भवति सामान्यविष-यत्वात् विशेषविषयत्वा त्तु प्रत्यभिज्ञानं न तेन संभवतीति वाच्यम् अनुमानस्यापि विशेषविषय-त्वात् व्यवहिताधीयानस्वरविशेषेण देवदत्तानुमा-नदर्शनात्। नच तदेवेदमिति प्रत्यक्ष मेव ज्ञानं प्रत्यभिज्ञानं तच्च न बुद्धिकर्मणोः परोक्षत्वादिति वाच्यम् परोक्षापरोक्षसाधारणगृहीतग्रहणस्यैव प्रत्यभिज्ञानत्वेन तथा विवक्षणे पूर्वपरिभाषापत्तेः वाङ्मात्रेण शब्देऽपि तत्प्रतिषेधसंभवाच्च यदि

तु प्रत्यक्षमात्रं प्रतिषिध्यते न प्रत्यभिज्ञानं तदा तत्प्रतिषेधवैयर्थ्यं व्यभिचारापरिहारात् विशिष्य प्रत्यक्षनित्यत्वनिराकरणं कर्मण्ययुक्तं स्वसिद्धान्तविरोधादित्यग्रे निरूपयिष्यते इति तस्माद् भाष्य मिद मेवं व्याख्येयम् नहि अस्माभि र्नित्यत्वसाधनाय प्रत्यभिज्ञानमुच्यते येन बुद्धिकर्मणो र्व्यभिचारं प्रदर्श्य तदाभासी-क्रियेत किन्तु अनित्यत्वे प्रत्यभिज्ञाप्रत्यक्ष-विरोधः प्रदर्श्यते नच प्रत्यक्षे व्यभिचारो दूषणं येन तदुद्भावनं प्रकृतदूषकत्वेनोपयुक्तं स्यादिति सिद्धान्तान्तरदूषणमात्रं स्यात् बुद्धिकर्मणोरपि प्रत्यभिज्ञाना न्नित्यत्वं स्यादित्याक्षेपे यद्यपि निग्रहस्थान मेव दूषणं वक्तुं शक्यं तथापि तदुपे-क्ष्य शब्दवन्न बुद्धिकर्मणो र्नित्यत्व मित्यत्र वि-शेषं दिदर्शयिषुणा न ते प्रत्यक्षे इत्युक्तं शब्दे हि अनुमानेनानित्यत्वं साध्यते तच्च न बलवता प्रत्यभिज्ञाप्रत्यक्षेण शब्दनित्यत्वसाधकेन विरो-धादिति तस्य नित्यत्वमेव बुद्धिकर्मणोस्तु

नित्यत्व मनित्यत्व मित्येतद्द्वयमानुमानिक- मेवेत्येकतरपक्षे बलाबलविशेषाभावा न्नावश्यं नित्यत्वमे वेत्यभिप्रायेणोच्यते नहि ते प्रत्यक्षे इति। यद्वा लिङ्गविधयापि प्रत्यभिज्ञानेन नित्यत्वं साधयितुं शक्यते तत्र प्रत्यभिज्ञानं प्रत्यक्षत्वेन विशेषणीयं बुद्धिकर्मणो स्त्वप्रत्यक्ष- त्वान्न तत्र प्रत्यक्षप्रत्यभिज्ञानव्यभिचारः नच प्र- त्यक्षप्रत्यभिज्ञानस्यापि घटादौ व्यभिचरितत्वेन न तत्साधनत्वमत्वं स्थायित्वमात्रस्यैव सिषाधयि- षितत्वेन व्यभिचाराभावात् अथवा श्रौत्रप्रत्यक्ष- त्वमत्र विवक्षितं नच पक्षमात्रवृत्तित्वेना साधारण्यं शब्दत्वेऽपि तत्सत्वेनासाधारण्या- भावात् नच तथापि ध्वनौ व्यभिचारः भूताव- यवधर्मध्वन्यन्यत्वे सतीति विशेषणात् तथाचोक्तम् 'हेतु रेव ह्यसौ स्पष्टो नित्यत्वस्यो पलभ्यते भूता- वयवधर्माख्यध्वन्यन्यत्वविशेषित' इति नच कर्मणः स्वमते प्रत्यक्षत्वात्तदप्रत्यक्षाभिधानं स्वसिद्धान्तविरुद्ध मिति वाच्यम् अतीन्द्रिय-

परमाणवाश्रितकर्माभिप्रायकत्वात् बुद्धे रप्रत्यक्ष-
त्वं तु साधितमेव घटादिवृत्तिकर्मणां शब्दवदेव
प्रत्यभिज्ञया प्रत्यक्षत्वं नित्यत्वं चैतदुभय मिष्ट-
मेवे त्यभिप्रायेणाह भाष्ये अथ प्रत्यक्षे नित्ये
एवेति। प्रत्यक्षेषु नित्यत्वे सिद्धे अतीन्द्रियेऽपि
तदेवोचितं वस्तुस्वभावपरित्यागानौचित्या दत
स्तदप्रत्यक्षवचन मुपक्रममात्र मिति। नचैषां
नित्यत्वे निरन्तरमुपलब्धिः स्यात् व्यञ्जकसद्भा-
वासद्भाववशेन तदुपलब्धेः कादाचित्कत्वात्
यद्भवतां कारणं तदेवास्माकं तदभिव्यञ्जक-
मिति नात्र तदनुयोगः शब्दस्वकर्तृत्वोपलब्धिव-
द्बुद्धिकर्मणो रपि न सतत मुपलब्धिः नच तद-
भिव्यञ्जनशक्ति स्तदाश्रये द्रव्ये सततमस्त्येवेति
कथं न सतत मुपलब्धिः कारणशक्ति रपि तथै-
वास्तीति किं न कार्य मपि सततम् सहकारि-
वैकल्यादितिचे दिहापि तदेवेति गृहाण नचा-
भिव्यक्त्युत्पत्त्योस्तुल्यदोषगुणत्वे किमित्यभि-
व्यक्तिपक्षे एव विशेषाभिनिवेशः प्रत्यभिज्ञान

मपि साजात्यालम्बनेन समर्थितमेवेति वाच्यम्
सौगतेषु सत्सु प्रथमं तावदाश्रयाद्भेद एव
क्रियासु दुर्वचः तत स्तद्विशेषोत्क्षेपणादिस्तत्र
क्रियात्वावान्तरजाति रासां प्रत्येकव्यक्तिवृत्ति-
रित्यादिबहुतरक्लेशः नच बुद्धि भेदा नुरोधा-
त्क्लेशः सोढव्यः आश्रयभेदादपि बुद्धिभेद-
स्योपपादयितुं शक्यत्वात् यथा वर्णे द्रुतादिभे-
दो न स्वाभाविक स्तथा कर्मण्यपीति दिक्।
बुद्धिरपि चैतन्यमेव पुंसः स्वाभाविकत्वा-
न्नित्यमेकंच नच घटपटादिबुद्धिभेदानुपपत्तिः
विषयभेदनिबन्धनत्वा द्बुद्धिभेदस्य नच पुंसो
नित्यचैतन्यस्वभावत्वे इन्द्रियादि व्यापारं विना-
पि सर्वदा विषयभानापत्तिः सहकारिवैकल्ये
शक्तिमात्रेण कार्योत्पत्त्यदर्शनात् यथा दहन-
कर्मा कृशानु रुपनीतं दाह्यं बिना न दहति
स्वच्छो दर्पणः स्फटिको वा विम्बसन्निधानं
बिना तच्छायां न गृह्णाति तथा नित्यचैतन्य-
स्वभावः पुरुषो देहवत्ति रिन्द्रियोपनीतान्

विषयान् गृह्णाति असावेव बुद्धि रितीन्द्रिया-
दिवैकल्यान्न सर्वदा बुद्धि रिति। ननु भाष्ये
बुद्धे रेव नित्यत्व मुक्तं न चैतन्यस्य तत्र बुद्धि-
शब्देन चैतन्यस्यैव विवक्षितत्वात् नच बुद्धौ
प्रत्यभिज्ञैव न दृष्टा नहि घटबुद्धिः पटबुद्धि-
त्वेन प्रत्यभिज्ञायते विषयविशिष्टत्वेन प्रत्यभि-
ज्ञानाभावेपि विषयोपराग मपहाय बोधात्मक-
त्वेन प्रत्यभिज्ञानस्य सर्वानुभवसिद्धत्वा दियं
बुद्धि रिय मपि बुद्धि रित्याकारेण घटपटोभय-
बुद्धौ तस्याः सत्त्वा च्छेदभानस्य विषयाधीनत्वा
दित्युक्त मेव तदेवं प्रत्यक्षद्रव्यवृत्तिकर्मा-
भिप्रायं चैतन्याभिप्रायं च अथ प्रत्यक्षे नित्ये
एवेति भाष्यम् नच चैतन्यं न प्रत्यक्ष मिति
कथमस्य प्रत्यक्षत्वेना भिधानं सत्यं चिति-
शक्ति नं प्रत्यक्षा किन्तु अत्र बुद्धिशब्देन
लक्षणया प्रमाता गृह्यते सच नित्योऽपि
प्रत्यक्षोऽपि तस्य ज्ञानरूपो विकारो ऽनित्यो
ऽप्रत्यक्षश्चे ति तदभिप्रायं पूर्वभाष्यम्। तदयं

भाष्यार्थः पूर्वपक्षवादी बुद्धिकर्मणो यन्नित्यत्वं प्रसंजयति तद्यदि ज्ञानाभिप्रायेण तदाऽसंगत मप्रत्यक्षत्वाद् ज्ञानस्य यदि चैतन्याभिप्रायेण तदा युक्तमेव पुरुषस्य नित्यत्वात्। किन्तु तत्र प्रत्यक्षत्वं नास्तीति ध्येयम्। उत्पत्तिविनाशाभ्यां पूर्वदिनोच्चरितशब्दा द्दिनान्तरोच्चरितशब्देऽन्यत्वमाशंकते ह्यस्तनस्येति। निराकुरुते नैष इति कारणमाह पुनरिति। प्रत्यभिज्ञाप्रमाणविरोधान्न भेद इति कुतो नाशादित्याह नहीति। अन्यथा दण्डमाह द्वितीयेति। नहि अनुपलम्भमात्रेणा-भावसिद्धि रतिप्रसङ्गा दित्याह नहीति कुतस्तर्हि अभावसिद्धि रित्यत आह अप्रमाणताया-मिति। योग्यस्य प्रमाणेनानुपलब्ध्याऽभाव-सिद्धि रिति भावः शब्दस्तु व्यञ्जकसद्भावे प्रत्यक्षेणोपलभ्यते इति आह नहि प्रमाणेति उपलभ्यमानत्वं शुक्तिरजतादौ व्यभिचारीत्यत आह अव्यामोहोनेति। नहि बाधकप्रमाणं विना व्यामोहः शुक्तिरजतादौ नेदं रजत मिति

बाधकेन रजताभावः सिद्ध्यतीति तत्र रजत-
प्रत्ययस्य व्यामोहत्वं नैवं प्रकृते शब्दाभाव-
साधकं प्रमाणमस्ति येन तत्प्रत्ययस्य व्यामोह-
त्वं स्यादिति भावः पुरस्तादिति सतोपि शब्द-
स्या भिव्यञ्जकाभावादेवा नुपलब्धिसंभवेन
विनाशकल्पनायां प्रमाणाभाव इति भावः। पूर्वा-
परदर्शने मध्ये तददर्शनेऽपि न तदानी मभाव
इत्यत्र सर्वानुभवं दर्शयति यथेति। इदमुपल-
क्षणम् गृहस्थलादे रपि तद्वद्विनाशे क्व निवर्तेत
सुषुप्ता वनुपलब्ध्या सर्वस्य प्रत्यह मुत्पत्तिविना-
शाभ्युपगमे ऽशौच मपि कपोतसूतकायितं
स्यादित्यल मसंभूतार्थनिराकरणेन स्थूलविनाशा-
न्यथानुपपत्त्या सिद्धं क्षणिकत्वं घटादीना मिव
शब्दस्या प्यविशिष्ट मिति वादिनां बौद्धानां
मतं निराकर्तु माह येपीति। घटादौ इव
अत्रापि तैरेव साधनैः क्षणभङ्गो निराकार्यः
ह्यस्तनो घटो ऽद्याप्यस्ति घटत्वा दद्यतनघटवदि
त्यनुमान मेकं क्षणभङ्गसाधन मपरं सोयं घट

इति प्रत्यभिज्ञा । नचानुमान मयुक्तं मुद्गरा-
भिहतघटे हेतो रनैकान्तिकत्वात् तस्यापि सत्व-
साधने प्रत्यक्षबाध इति चेदेवं तर्हि ह्यस्तनो
घटो ऽद्याप्यस्ति निष्प्रयत्नत्वे सति अवयववि-
श्लेषाभावे च सति अद्य यावत्स्थूलनाशानाक्रा-
न्तत्वाद् दृश्यमानघटवदि त्यनुमानं बोध्यम्
नच घटादिः क्षणिकः सत्वा दीपज्वालावदित्य-
नुमानेन सप्रतिसाधनत्व मितिवाच्यम् प्रत्यभि-
ज्ञाप्रत्यक्षविरोधेने दृशानुमानोत्पत्ते रनवकाशा
न्नचार्थक्रियाकारित्वान्यथानुपपत्त्या क्षणिकत्वं
सत्वपक्षे एवार्थक्रियाकारित्वोपपत्त्या वैपरीत्या-
त् नच क्षणिकस्यार्थक्रियाकारित्वानभ्युपगमे
ज्वालायाः प्रभारंभकत्वानुपपत्तिः ज्वालायाः
क्षणिकत्वानुपगमात् सूक्ष्माहि तदवयवाः शीघ्रं
देशान्तरं गच्छन्ति प्रभूतं पिण्डितं तेजः वर्ति-
देशे तिष्ठति तत्र यावदूर्ध्वं गच्छति तावज्ज्वा-
लेति कथ्यते ततो प्यतिक्रम्य यत् प्रयाति तत्प्र-
भेति ततोपि परं यत्प्रयाति तत्तु सूक्ष्मत्वा-

न्न प्रतीयते तथाचाविनष्टमेव तेजो ज्वालाया निःसृत्य प्रभा मारभते प्रभातो प्यविनष्ट मेव निःसृत्य ततोपि परं गच्छ दतिसूक्ष्मत्वा दहश्यता माप्नोतीति न क्षणिकत्वम् नचाविनष्टं सत् किमर्थ मूर्द्ध्वं व्रजति तत्रैव किन्नावतिष्ठते उत्तरावयवै रूर्द्ध्वदेशस्यावरुद्धत्वाद् यावत्तेषां देशान्तरे प्रसर्पणं न स्या त्तावत्पूर्वावयवाना मधोदेशगताना मूर्द्ध्वदेशगमनं न स्याद् यथा यथा तूत्तरे ऽवयवा व्रजन्ति तथा तथावकाशलाभा त्पूर्वपूर्वावयवा अपीति। ननु प्रभायां विरलेषु तेजस्सु सत्स्वपि तेजोन्तरसंक्रांति स्तत्र संभवतीति किमर्थं देशान्तरगमनं कल्प्यते स्थितैः पूर्वावयवै रुत्तरावयसंयोगात्सान्द्रतामापन्नै र्ज्वालाभि रिव तृणादिदाहापत्तेः गतिशीलानां तेजसा मेकत्र चिर मवस्थानासम्भवाच्च नच क्षणिकशरीरादौ व्यभिचारदर्शना त्प्रत्यभिज्ञाथाः न स्थैर्यसाधनक्षमत्वं शरीरादेः क्षणिकत्वाभावात् नच बाल्याद्यवस्थाना

मेकान्ततः शरीराद्भेदे घटवत्पृथगुपलम्भापत्ति रभेदे तु प्रतिक्षणमुत्पत्तिविनाशौ धर्मिणोपि तद्वदपरिहार्या विति कथं न क्षणिकत्वं शरीरादे र्बाल्याद्यवस्थात्मना परिणामांगीकारेण प्रतिक्षण-मुत्पत्तिविनाशकल्पनायां प्रमाणाभावा द्गौरवा-त्प्रत्यभिज्ञाप्रत्यक्षविरोधा च्चेति दिक्। तदाह-न शक्नुवन्तीति उदेतीति तथा चानुमानस्यो-त्पत्तिनिरोधलक्षणो बाधः शीघ्रप्रवृत्तिशीलेन प्रत्यभिज्ञाप्रत्यक्षेण भेदसाधकेना नुमानविषय-भेदापहाराद नुमानानुत्पत्ति रेव पूर्व मनुमान-प्रवृत्तौ तु पश्चाज्जातेनापि बलवता प्रत्यभिज्ञा-प्रत्यक्षेणा नुमाने मिथ्यात्वलक्षणो बाधो ज्ञाप्य-ते शुक्तिरजतज्ञानस्येव नेदं रजत मिति ज्ञानेन तस्य बाधं विनोत्तरोत्पत्ते रसंभवादिति न मिथ्याज्ञानस्य स्वविषयसाधकत्वं बाधितत्वा दित्याह। स्वकार्यमिति।

सू० अनपेक्षत्वात् ॥ २१ ॥ (हे० ३)

भा० येषामनवगतोत्पत्तीनां द्रव्याणां भाव एव लक्ष्यते, तेषामपि

केषाञ्चिदनित्यता गम्यते, येषां विनाशकरण मुपलभ्यते। यथा, अभिनवं पटं दृष्ट्वा। नचैनं क्रियमाण मुपलब्धवान्। अथवा अनित्यत्व मवगच्छन्ति रूपमेव दृष्ट्वा, तन्तुव्यतिषङ्गजनितोऽयं तन्तुव्यतिषङ्गविनाशात् तन्तुविनाशाद्वा "विनश्यति" इत्यवगच्छति। नैवं शब्दस्य किञ्चित् कारण मवगम्यते। यद्विनाशा द्विनङ्क्ष्यतीत्यवगम्यते।

अनपेक्षत्वादितिसूत्रम्। प्रत्यभिज्ञया शब्दस्य नित्यत्वे साधिते स्वारसिको विनाशो निरस्त एव हेत्वन्तराधीनो विनाशो विनाशकहेत्वभावा न्न संभवती त्यनेन सूत्रेण बोध्यते। अयंभावः कार्यनाशो द्विधा भवति समवायिकारणनाशा दस मवायिकारणनाशाच्च आद्यो यथा तन्तुनाशात्पटनाशःद्वितीय स्तन्तुसंयोगनाशा त्पटनाशः तदेतद्विनाशद्वयं पटस्य वर्तमानतादशाया मपि ज्ञातुं शक्यते तदाह यथेति नूतनं पटं क्रियमाण मदृष्ट्वापि तद्वर्तमानतादशायामेव तन्तुतत्संयोगसापेक्षोत्पत्तिकः पटो भवतीति निश्चित्य नून मयं तन्तुनाशा त्तदीयसंयोगनाशाद्वा विनङ्क्ष्य-

तीति तदनित्यत्व मवधारयति नैवं शब्दे कारणद्वय मस्ति यद्विनाशा देतद्विनाशोऽवगम्येत अतोऽवयवसंयोगादिकारणापेक्षत्वाभावा दसंभावित विनाशो नित्य एव शब्द इति समुदितार्थः ।

सू० प्रख्याभावाच्च योगस्य ॥२२॥ (हे०४)

भा० इदं पदेभ्यः केभ्यश्चिदुत्तरं सूत्रम् । ननु वायुकारणकः स्यादिति, वायुरुद्गतः संयोगविभागैः शब्दो भवतीति, तथाच शिक्षाकाराः आहुः "वायुरापद्यते शब्दता मिति" । नैतदेवं वायवीयश्चेच्छब्दो भवेत् वायोः सन्निवेशविशेषः स्यात् । नच वायवीयान् अवयवान् शब्दे सतः प्रत्यभिजानीमः । यथा पटस्य तन्तुमयान् । नचैवं भवति । स्याच्चेदेवं स्पर्शनेनोपलभेमहि । नच वायवीयानवयवान् शब्दगतान् स्पृशामः । तस्मान्न वायुकारणकः अतो नित्यः ।

प्रख्याभावाच्च योगस्य इति सूत्रम् साक्षात्पूर्वसूत्रेण संगत्यभावादाह इदमिति तथाच कैश्चि च्छब्दैः पूर्वपक्षं विधाय तदुत्तरं सूत्रं योजनीयं तथाहि वायुरा पद्यते शब्दता मिति शिक्षाकारोक्त्यनुसारा त्पटादिवदवयविद्रव्य-

विशेष एव शब्दः तथाच पटादिवदवयवसंयोगादिविनाशा दयमपि विनङ्क्ष्यतीति शब्दविनाशोपि सुज्ञान इत्याशंक्य तन्निराकरणाय प्रख्याभावाच्च योगस्येति सूत्रं पूर्वोत्तरपक्षाभ्यां योजनीयम् प्रकृष्टा प्रत्यक्षा आख्या धीः प्रख्या प्रत्यक्षप्रत्यभिज्ञा योगोऽवयवसन्निवेशविशेषः यदि शब्दो वायवीयः स्या त्तर्हि तदवयवसंयोगविशेषः शब्दे उपलभ्येतेत्याह वायवीय इति शेषं स्पष्ट मिति।

सू० लिङ्गदर्शनाच्च ॥२३॥ (हे० ५)

भा० लिङ्गं चैवं भवति, वाचा विरूपनित्यया इति, अन्यपरं हीदं वाक्यं वाचो नित्यता मनुवदति। तस्मान्नित्यः शब्दः।

लिंगदर्शना च्चेति सूत्रम् अन्यपर मन्यार्थद्योतकं वाक्यं लिङ्ग मुच्यते तच्चापि शब्दस्य नित्यत्वे दृश्यते लिङ्गमाह वाचा विरूपनित्यया इति अस्य लिङ्गत्वं स्फोरयति अन्यपरमिति रूपयतीति रूपो वाचः कर्ता विगतो रूपो यस्याः सा सा च नित्या च तया इत्यर्थः।

एवं चोच्चारणस्याभिव्यञ्जकत्वेन हेतुत्वाभावान्निरवयवत्वात्सर्वदेशकालगतत्वादपरोक्षत्वाच्चाकाशवन्नित्य एव शब्दो न कार्य इति संक्षेपः।

इति कल्पकलिकायां शब्दनित्यताधिकरणम्

सू० उत्पत्तौवाऽवचनाः स्युरर्थस्यातन्निमित्तकत्वात् ॥२४॥ (पू०)

भा०—यद्यप्यौत्पत्तिकः नित्यः शब्दोऽर्थसम्बन्धश्च तथापि न चोदनालक्षणो धर्म्मः, चोदना हि वाक्यं, नहि अग्निहोत्रं जुहुयात् स्वर्गकामः इत्यतो वाक्यादन्यतमस्मात् पदात् अग्निहोत्रात् स्वर्गो भवति इति गम्यते। गम्यते तु पदत्रये उच्चारिते। न चात्र चतुर्थः शब्दोऽस्ति अन्यत् अतः पदत्रयसमुदायात् नचायं समुदायोऽस्ति लोके यतोऽस्य व्यवहारादर्थोऽवगम्यते। पदानि अमूनि प्रयुक्तानि तेषां नित्योऽर्थः अप्रयुक्तश्च समुदायः। तस्मात्समुदायस्यार्थः कृत्रिमो व्यामोहो वा। न च पदार्था एव वाक्यार्थः, सामान्ये हि पदं प्रवर्त्तते, विशेषे वाक्यम् अन्यच्च सामान्यं अन्यो विशेषः। न च पदार्थाद्वाक्यार्थावगतिः असम्बन्धात्। असति चेत् सम्बन्धे, कस्मिंश्चित्पदार्थेऽवगतेऽर्थान्तरमवगम्येत, एकस्मिन्नवगते सर्वमवगतं स्यात्। न चैतदेवं भवति। तस्मादन्यो वाक्यार्थः।

उत्पत्तौ वाऽव्यचनाः स्युरर्थस्या तन्निमित्त-
कत्वादिति सूत्रम् अस्यार्थः औत्पत्तिकशब्देन
लक्षणया स्वाभाविकत्व मुच्यते एवं च पदार्थ-
संबन्धाना मेतावता पूर्वप्रबन्धेन नित्यत्वे साधिते-
ऽपि वेदशब्दाः अर्थस्य धर्मस्या वचनाः स्यु रप्र-
माणानीति यावत् वक्ष्यमाणप्रत्येकसमुदायवि-
कल्पेन वर्णपदादीनां वाक्यार्थबोधं प्रत्यहेतुत्वात्
अर्थस्य तन्नोक्त पदे वाक्ये चोभयत्र संबन्धः एत-
दर्थस्फोरणाय यद्यप्यौत्पत्तिको नित्यः शब्दार्थ-
संबन्धश्च तथापि न चोदनालक्षणोर्थो धम इति-
भाष्य मस्यार्थः यद्यपि पूर्वप्रबन्धेन पदार्थसंब-
न्धानां नित्यत्वं साधितं तथापि वाक्यार्थे वेद-
वाक्यानां न प्रामाण्यं सिध्यति वक्ष्यमाणरीत्या
तत्प्रतिपत्तौ मूलाभावात् निर्मूला च प्रतीत जा-
तापि प्रतिभावन्न प्रामाण्य मश्नुते इत्यफलः
पूर्वप्रयासः तथाच मूलाभावा त्पुनराक्षेपः यद्यपि
पदार्थनित्यत्वं न विशिष्य साधितं जातिसद्-
भावमात्रस्यैव प्रदर्शितत्वात् तथापि शब्दानित्य-

तासाधनोक्तदिशा तस्या अपि नित्यता साधिर-प्रायैव साधनस्य प्रत्यभिज्ञाप्रत्यक्षस्योभयत्र सा-म्यादिति अग्निहोत्रयागादिरूपधर्मो वाक्यार्थ एव न पदार्थः एतद्वाक्यघटकस्य कस्यचिदपि पदस्य तदभिधायकत्वाभावात् नच स्वार्थेऽगृही-तसंबन्धं वाक्यं पदवत्प्रत्यायक मव्युत्पन्नस्यापि प्रत्यायकत्वापत्तेः नच समुदाये शक्तिग्रहोपायः लोके तत्प्रयोगाभावेन व्यवहाराभावा न्नच समुदायोऽतिरिक्तः समुदायिनो येन व्यवहारा-त्स्वातन्त्र्येण तत्र शक्तिग्रहः स्यादित्याह नहीति अयंभावः पदानि प्रत्येक मर्थं गमयन्ति किम्वा संहतानि अथवा पदातिरिक्त एव समुदायः किम्वा पदार्था अत्रापि पूर्ववद्विकल्पः एवं स्मृति-संबन्धादीनामपि विकल्पनं संबन्धग्रहणाभावा दमीषां कस्यापि न गमकत्व मपूर्वत्वा द्वाक्यार्थ-स्य नच नेत्रादिवदगृहीतसंबन्धस्य प्रत्यायकत्व-मव्युत्पन्नस्यापि प्रत्यायकत्वापत्ते रतोधूमादिवद्-गृहीतसंबन्धस्यैव प्रत्यायकत्व मास्थेयम् यदि

चाप्रतीतोपि वाक्यार्थे पदसंबन्धः स्वीक्रियते तदा प्रयोजनाभावो धूमादिवत्प्रतीतसंबन्धस्यैव प्रत्यायकत्वात्तत्सत्त्वे प्रमाणाभावाच्च। ननु मास्तु वाक्यार्थे पदसंबन्धः वाक्यस्यैव तत्र संबन्धोस्तु चोदनालक्षणोर्थो धर्म इत्युक्तौ चोदनापदं वाक्यपरमेवेति तदेव वाक्यार्थे मूलमित्यलं मूलान्तरान्वेषणप्रयासेनेतिचेन्मैवं पदातिरिक्तवाक्याभावात् पदार्थातिरिक्तवाक्यार्थाभावाच्च तथाहि समुदायः समुदायिभ्योऽतिरिच्यते नवा आद्ये प्रत्येकातिरिक्तसमुदायस्यानुपलम्भेन सत्त्वैव न सिद्ध्यति कुतः प्रामाण्यं प्रमाणप्रमेयोभयाभावात् नच पदसमुदायो वाक्यं पदार्थसमुदायो वाक्यार्थ इति निरुक्त्या पदतदर्थातिरिक्तवाक्यतदर्थयोः सद्भावोऽस्त्येवेति वाच्यम् युगपद्ग्रहणाभावेन समुदायत्वासम्भवात्। नच युगपद्ग्रहणाभावेऽपि युगपत्सत्तया समुदायोस्तु सत्तायौगपद्यस्य व्यवहाराङ्गत्वाभावात् अन्यथा पदतदर्थादीनां नित्यतया सर्वे-

षां पदानामेकवाक्यतापत्ति स्तथा सर्वेषां पदार्थानां वाक्यार्थापत्तिश्चेति ज्ञानयौगपद्ये नैव तद्वक्तव्यं तच्च प्रकृते नास्ति ज्ञानानाम यौगपद्यादिति न पदार्थसमुदायो वाक्यार्थ इत्येतत्सिद्धम् । अपिच न पदसमुदायमात्रं वाक्यं पदार्थसमुदायमात्रं वा वाक्यार्थः गौरश्वः पुरुषो हस्ती शकुनि र्मृगो ब्राह्मण इत्यादावपि पदतदर्थसमुदायसत्वेन वाक्यतदर्थत्वापत्तेः तस्मात्संबद्धानि पदानि पदसंबन्धो वा वाक्यं संबद्धाश्च पदार्थाः पदार्थसंबन्धो वा वाक्यार्थ इत्येव वाच्यं संबन्धश्च प्रकृते न संभवति अपेक्षाविरहात् अपेक्षा हि अर्थतो वाच्या न स्वरूपतः अनर्थकेष्वपि दृष्टत्वात् अस्तु वा अपेक्षा तथापि एकवाक्यतानियामकः कश्चन संबन्ध एव नास्ति कमपेक्षेत नच कार्यकारणसंयोगादिसंबन्धाभावेऽपि एकार्थसमवायः सम्बन्धोस्ति कथमुच्यते नास्तीति किन्तु तस्योक्तानुक्तसाधारणेनाव्यावर्त्तकतया नुपयोगादिति दिक् । ना-

न्यः पदपक्षोक्तदूषणसंपातादिति । गम्यते तु इति । ननु एतत्पदत्रयसमुदाया दग्निहोत्रा त्स्व र्गो भवति इति बोधो यदि जायते तदैतत्समु-दायस्यैव तत्र मूलत्वसंभवेन निर्मूलत्वाभिधान-मयुक्त मिति चेन्न प्रत्येकं पदानां मूलत्वनिरा-करणतात्पर्येणै तद्भाष्यप्रवृत्तेः । नचायं समुदा-योस्ति इति अनेन भाष्येण न तावद्वैदिक-वाक्यरूपसमुदायो निराक्रियते युक्तिसाम्येन वैदिकसमुदायवल्लौकिकपदसमुदायस्यापि नि-राचिकीर्षितत्वात् तथाच नचायं समुदायोस्ति लोके इति भाष्यं नैवं जातीयकः समुदायोस्ति लोके इत्यर्थपरं बोध्यम् नच गामानयेत्यादि-वाक्यानां लोके सत्त्वा द्वाक्यमात्रनिषेधतात्पर्य-परत्वे भाष्यमिद मसंगतं स्यात् मैवं गौ रश्वः पुरुष इत्याद्यसंबद्धपदसमूहस्य वाक्यत्वनिरासाय संबद्धार्थकपदसमूहस्यैव वाक्यत्वाङ्गीकारेण सं-बन्धस्य सर्वथा निराकरणा दापाततः प्रतीय-मानस्यापि वस्तुत स्सत्वेन ज्ञायमानत्वाभावा

दसत्वोपचारान्न क्षतिः नहि सबन्धसिद्धिं विना लौकिकवैदिकयो रन्यतरस्यापि पदसमूहस्य वाक्यत्वं वक्तुं शक्यत इति भावः अतिरिक्तानतिरिक्तविकल्पेन समुदायासिद्धेश्च येषां लोके प्रयोग स्तेष्वेव संबन्धग्रहो ऽन्वयव्यतिरेकाभ्यां न समुदायस्य लोके प्रयोगो येन तत्र व्यवहारतः संबन्धग्रहः स्यादित्याह यत इति कानि तर्हि प्रयुज्यन्ते इत्यत आह अमूनीति तथाच पदानां लोके प्रयोगा स्तेष्वेव सम्बन्धग्रहो व्यवहारस्यो पायस्य तत्रैव सत्वात् पदार्थानां वाक्यार्थत्वं निराकुरुते नचेति द्वयोर्भेदं दर्शयति सामान्ये हीति नच समान्यविशेषयो रभेदः बुद्धिविशेषकत्वादित्याह अन्यच्चेति असंबन्धादिति परस्परमसंबद्धानां बहूनां पदार्थाना मनेकवाक्यार्थगामितया न नियमेनैकविशिष्टार्थगमकत्वं सम्भवति मिथः संगतानां तु तद्वाक्यार्थमात्रगामितया ऽसाधारणानैकान्तिकत्व मिति न पदार्थानां वाक्यार्थगमकत्व-

मिति भावः असंबन्धस्य गमकत्वे ऽव्यवस्था माह अर्थान्तरमिति विनिगमनाविरहादिति भावः। सव मिति असंबद्धत्वाविशेषात् ततश्च सर्वस्या नायासेन सार्वज्ञापत्तिः पदान्तरोच्चारणवैयर्थ्यं चेति भावः। नच पदार्था एव वाक्यार्थ इति एतन्मतं त्वयुक्तम् गौरश्वः पुरुष इत्यादावपि पदार्थसत्वेन वाक्यार्थत्वापत्तेः किंच अर्थान्तरान्वितपदार्थस्यैव वाक्यार्थत्वं न पदार्थमात्रस्येति चेत्तस्य मर्थान्तरान्वितोपि पदार्थ एव यत्र केवलं पद मुच्चार्यते तत्र तत्पदं केवलपदार्थस्वरूप मभिधत्ते यत्र पुनः पदान्तर-समभिव्याहृत मुच्चार्यते तत्र पदान्तरार्थान्वितं स्वार्थ मभिधत्ते इति पदान्तरान्वितस्वार्थस्य वाक्यार्थत्वाद् युक्त पदार्थस्यैव वाक्यार्थत्व मिति मैवं तथासति पदार्थे ऽनाश्वासापत्तेः क्वचिद् गोपदस्य सास्नादिविशिष्टार्थाभिधायित्वं क्वचिद् गामानयेत्यादा वानयनान्वितस्य क्वचित्पश्येत्यादिसमभिव्याहारे दर्शनान्वितस्य

स्वार्थस्ये त्यनेकपरित्यागस्वीकारापत्तेः नच सामान्यत इतरपदार्थान्वितत्वेना न्वितत्वमात्रेण वा स्वार्थत्वमिति नाऽन्यथास्था केवलपदोच्चारणे तदर्थप्रत्ययानापत्तेः। नचेष्टापत्तिः स्मरणमात्रस्वीकारा दिति वाच्यम् अनुभूतपरामर्शाभावेन स्मरणत्वायोगात् अन्वयव्यतिरेकाभ्यां पदजन्यत्वावधारणेन स्मृतिप्रमोषकल्पनानवकाशा दतः पदार्थस्वरूपमात्रं पदै रभिधीयत इति नान्विताभिधानसिद्धिः। तथाच न पदार्था वाक्यार्थः पदैः सामान्यतः पदार्थस्वरूपमात्राभिधानेऽपि विशिष्टवाक्यार्थविशेषस्य तै रभिधानाभावादिति बोध्यम् गृहीतसम्बन्धैः पदैः पदार्थावगम इत्येव नियमः वाक्यैः पुनरगृहीतसम्बन्धै रपि वाक्यार्थावगम इति कल्प्यते स्वभावविशेषादित्यभिप्रायेण शंकते अप्रयुक्तादपीति।

भा० स्यादेतत्, अप्रयुक्तादपि वाक्यादसति सम्बन्धे स्वभावाद्दर्थागमः इति यदि कल्प्येत शब्दो धर्म्म मात्मीयं व्युत्क्रामेत्। नचैष

शब्दधर्म्मः, यत् अप्रयुक्तादपि शब्दादर्थः प्रतीयते। नहि, प्रथमश्रुतात् कुतश्चिच्छब्दात् केचिदर्थं प्रतियन्ति। तदभिधीयते पदधर्म्मोऽयं न वाक्यधर्म्मः। वाक्याद्धि प्रथमावगतादपि प्रतियन्तोऽर्थं दृश्यन्ते। नैतदेवं यदि प्रथमश्रुतादवगच्छेयुः, अपि तर्हि सर्वेऽवगच्छेयुः। पदार्थविदोऽन्ये च न त्वपदार्थविदोऽवगच्छन्ति। तस्मान्नैतदेवम्। ननु पदार्थविद्भिरप्यवगच्छद्भिरवृत्त एव वाक्यार्थसम्बन्धो भविष्यति, पदार्थवेदनेन हि संस्कृताः अवगमिष्यन्ति, यथा तमेव पदार्थं द्वित्यादिश्रवणेन इति। नेति ब्रूमः। यदि वाक्येऽन्त्या वर्णाः पूर्ववर्णजनितसंस्कारसहिताः पदार्थेभ्योऽर्थान्तरं प्रत्याययन्ति, उपकारस्तु तदानीं पदार्थज्ञानादवकल्प्यते। तस्मात् कृत्रिमो वाक्यार्थप्रत्ययो व्यामोहो वा, न पदार्थद्वारेण सम्भवति वाक्यार्थज्ञानमिति।

इन्द्रियापेक्षया शब्दस्यायमेव विशेषः यत्तैरगृहीतसंबन्धैरपि अर्थोऽधिगम्यते शब्दैः पुनर्गृहीतसम्बन्धैरेवेति अगृहीतसंबन्धाद्वाक्यादर्थावगमस्वीकारे तु आत्मीयमिमं विशेषं ते जह्युरित्याह यदीति प्रथमश्रवणे शब्दादर्थप्रत्ययादर्शनेन अप्रयुक्तादर्थप्रत्यायकत्वं न शब्दधर्म इत्याह नचैष इति। ननु अप्रयुक्तादर्थप्रत्यायकत्वमिति न पदस्य धर्मं ब्रूमः किन्तु वाक्यस्येत्याह पदधर्म इति यतो नायं

पदधर्मः तत एव वाक्यधर्मोऽपि नायं युक्त-रुभयत्र साम्यादित्याह तस्मान्नै तदेवमिति। पुनः शंकते ननु पदार्थविद्भिरिति। उत्तर माह यदि वाक्येऽन्त्यवर्ण इति अयंभावः यदि वाक्यार्थे साक्षादेव वाक्यं प्रवर्तते तदा पदार्थ-ज्ञानस्य दृष्टोपकारित्वं बाध्येत पदार्थधीद्वारा वाक्यार्थधियो ऽनुपगमात् तथाचाज्ञातपदार्थ-स्यापि स्वभावादेव वाक्यादर्थबोधापत्तिः नचैवं दृश्यते तस्मा त्पदार्थज्ञानस्यो पकारित्वसंपाद-नाय तद्द्वारैव पूर्वपूर्ववर्णजनितसंस्कारसहितो वाक्यान्तिमवर्णः पदार्थातिरिक्तं वाक्यार्थं बोध-यतीति स्वीकार्य मेवं च वाक्यार्थबोधे पदा-र्थाना मनुरोधस्या वश्यकत्वेन तेषामेव मूलत्वं-स्या त्तच्च पूर्वोक्तरीत्या निराकृत मिति न वाक्यार्थे किंचिन्मूलम्। नच कथं तर्हि लोके गामानयेत्यादि वाक्याद् वाक्यार्थधी र्गवानय-नादिव्यवहारश्चेति प्रमाणं विनापि अर्थादेव ज्ञानव्यवहारोपपत्तिसंभवात् वेदार्थस्तु प्रमाण-

न्तरामूलकत्वेन शब्दमूलक एव तत्र चोक्तदिशा शब्दस्यापि मूलत्वनिरासेन निर्मूल एवापन्नः ततश्च याज्ञिकै र्वेदान् कृत्वा ऽस्य वाक्यस्याय-मर्थ इति संकेतः गुणवृद्ध्यादिव त्कृतः तत एव पुंसां वाक्यार्थावगम इत्याह तस्मात् कृत्रिम इति अतथाभूतस्याप्यर्थस्य याज्ञिकै स्तथापरि-भाषितत्वम् व्यामोहः न चोदनालक्षणोर्थो धर्मो मानाभावा त्किन्तु याज्ञिकै धर्मस्य चोद-नालक्षणत्वेन परिभाषणाद् व्यामोह इत्याह

भा० ननु एवं भविष्यति—सामान्यवाचिनः पदस्य 'गौः' इति वा 'अश्वः' इति वा, विशेषकं शुक्लः इति वा कृष्णः इति वा पदं अन्तिकादुपनिपतति यदा, तदा वाक्यार्थोऽवगम्यते। तन्न। नहि, कथमिव गौरिति वा अश्वः इति वा सामान्यवाचिनः पदात् सर्वगवीषु सर्वाश्वेषु च बुद्धि रुपसर्पन्ती श्रुतिजनिता, वाक्यानुरोधेन कुतश्चि-द्विशेषा दपवर्तेत। नच शुक्लः इत्यादे र्विशेषवचनस्य कृष्णादिनिवृ-त्ति र्भवति शब्दार्थः। नच अनर्थको माभूदित्यर्थपरिकल्पना शक्या। अतो न पदार्थजनितो वाक्यार्थः। तस्मात् कृत्रिमः। पदसंघाताः खल्वेते संघाताश्च पुरुषकृता दृश्यन्ते, यथा, नीलोत्पलवनेष्वद्य चर-न्तश्चारुसंरवाः नीलकौशेयसम्वीताः प्रणश्यन्तीव कादम्बाः। अतो वैदिका अपि पुरुषकृता इति।

ननु माभूदाश्रयैक्यनिबन्धन मेकवाक्यत्वं विशेष्यविशेषणवाचकाभ्यां गोशुक्लपदाभ्या मभिधेयद्वारै कव्यक्तिकत्वेनै कवाक्यत्व मिति चेन्न व्यक्तिषु अनेकत्वस्य प संभवात् गम्यमानैकत्वेन यद्येकसम्बन्धः स्या त्तदा घटवृक्षयोरपि पार्थिवत्वेनैकत्वस्य गम्यमानत्वा देकवाक्यतापत्तेः नच शुक्लपदश्रवणेन कृष्णगवीषु गोत्वं निवर्तते कृष्णगवीषु गोत्वस्य दृश्यमानत्वात् नच नार्थस्य निवृत्ति रुच्यते किन्तु बुद्धे रिति अर्थनिवृत्तिं विना बुद्धिनिवृत्ते रशक्यत्वा दर्थस्वभावानुरोधित्वा द्बुद्धे रिति शुक्लपदश्रवणेऽपि कृष्णगवीषु गोबुद्धि रनुवर्तते एव यद्वा श्रुतिबला जायमाना गोबुद्धि र्न शुक्लपदेनै कवाक्यताबलेन कृष्णगवीतो ऽपावर्तितु मर्हति वाक्यापेक्षया श्रुते र्बलीयसीत्वात् कृष्णादिव्यावृत्तिबोधकत्वे शुक्लपदस्य व्यवच्छेदोऽपि श्रौतः स्यान्न तु तदस्तीत्याह नन्वेवमिति। तथाच शुक्लपदश्रवणजा बुद्धि र्न गोपदैकवाक्यतया

अश्वादिभ्यो व्यावर्त्तते व्यावृत्य बोधने च नियतवाक्यार्थप्रत्ययाभावेन न शब्दस्य वाक्यार्थे प्रामाण्यमिति। नच नीलादिव्यावर्त्तकत्वाभावे शुक्लादिपदोपादान मेव व्यर्थं स्यादिति तत्सार्थक्याय व्यावृत्तिपरत्व मवसीयते इत्याशंकते नचेति शक्येति तथा सति अर्थान्तरकल्पनयापि सार्थक्यसंभवेन वाक्यस्या व्यवस्थितार्थबोधकत्वापत्ते रिति भावः वेदवाक्यं पौरुषेयं पदसङ्घातात्मकत्वाद् भारतादिवदित्यनुमानेन वेदवाक्यस्यापि पौरुषेयत्व मित्याह पदसङ्घाता इति। ननु पौरुषेयत्वेऽपि स्मृत्यादिवत्प्रामाण्य मस्तु को विरोध इति चेन्न स्मृत्यादीना माप्तोक्तत्वेनैव प्रामाण्याभ्युपगमा दतीन्द्रियार्थे कस्यचिदाप्तत्वाभावेना म्नायस्य धर्मादौ प्रामाण्यासंभवात् तस्मा न्मूलाभावाद् वेदवाक्यमप्रमाण मेवेति पूर्वपक्षसंक्षेपः अत्रोच्यते-प्रत्येकसमुदायविकल्पितानि पदानि पूर्वोक्तरीत्या यद्यपि वाक्यार्थबोधनक्षमाणि न तथापि

पदस्मारिताः पदार्था आसत्तियोग्यताकाङ्क्षादिसहकृता वाक्यार्थबोधनक्षमा इत्यन्वयव्यतिरेकाभ्या मवगम्यते सावयवस्य वाक्यस्य तु पदस्येव न साक्षाद्वाक्यार्थबोधकत्वं वाक्यार्थबोधनशक्तिविरहात्। नच वाक्यार्थबोधान्यथानुपपत्त्या वाक्ये शक्तिः कल्प्यतामिति वक्ष्यमाणन्यायेन पदार्थेभ्य एव वाक्यार्थबोधसंभवेनान्यथानुपपत्त्यभावात् नच विनिगमकाभावः वाक्यशक्तिकल्पनाक्लेशस्यैव विनिगमकत्वात् वाक्यार्थे वाक्यशक्तिं कल्पयता पूर्वपूर्ववर्णजनितसंस्कारसहितवाक्यान्तिमवर्णस्य प्रत्यक्षात्मिकायां युगपद् वाक्यघटकतावद्वर्णविषयकस्मरणरूपायां चित्रबुद्धौ सदसद्रूपाया मन्तिमवर्णोपलब्ध्यनन्तरं तावद्वर्णविषयकस्मरणे वा भासमानानां वर्णानां शक्तिः कल्पनीया स्यात् एवं च पदवाचकत्वे क्रमेणोपलब्धतिरोहितानां क्लेशेन युगपत्स्मरण माश्रित्य शक्तिः समर्थिता वाक्ये तु चिरोच्चरिततिरोहितानां युगपदनुसंधानं क्लेश-

तरेण स्यादिति न वाक्यशक्तिकल्पना समुचिता किंच पदार्थप्रतिपादनव्यापारेणोपयुक्तानां पदानां पुनर्वाक्यार्थबोधौपयिकव्यापारान्तरकल्पनायामपि गौरवमदृष्टव्यापारकल्पनापत्तेः पदार्थानां तु वाक्यार्थबोधसामर्थ्यस्य गम्यमानत्वेना पूर्वकल्पनाभावात् पदार्थप्रतीत्यनन्तरं वाक्यार्थबोधोत्पत्तेः सर्वानुभवसिद्धत्वात् यद्व्यापरानन्तरं यद् जायते तत्तद्धेतुक मिति नियमस्य सर्वसंमतत्वात् पदस्य पदार्थवाचकत्ववद् वाक्यस्य वाक्यार्थवाचकत्वमपि न संभवति तत्र तु पूर्वपूर्व वर्णजनितसंस्कारसहितस्या न्तिमवर्णस्य वाचकत्वमुक्तरीत्या प्रदर्शितं विजातीयव्यवधानाभावेना न्तिमवर्णश्रवणवेलायां सर्वेषां युगपत्स्मरणसंभवात् अत्र तु पदपदार्थसंबन्धबुद्धीनां व्यवधानाद् वाक्यान्तिमवर्णश्रवणवेलायां चिरतिरोहितानां तावद् वर्णानां पदानां युगपत्स्मरणासंभवात् नहि महावाक्येषु तावतां,वर्णानां पदानां वा स्मरणोत्तरं वाक्यार्थबोधः कस्यचिदनुभवसिद्धः किन्तु

तद्विनापि तावत्पदार्थस्मरणानन्तर मेव वाक्यार्थ-बोध इत्येव सर्वानुभवसिद्ध इति न वाक्यं नापि पदं साक्षाद् वाक्यार्थवाचकम् पदार्थवाक्यार्थो-भयबोधनव्यापारस्य कल्पनापि पदे न युक्ता एक-फलकव्यापारस्य फलान्तरकल्पनायुक्तैव शब्द-बुद्धिकर्मणां विरम्य व्यापाराभावात् फलान्तरो-पयिकव्यापारान्तरकल्पनापि निष्प्रमाणा वाक्या-र्थबोधस्यान्यथाप्युपपत्ते रिति। यत्तु वर्णातिरि-क्तपदाभावाद् वाक्याकारा बुद्धि रेव वाक्यम् तथा पदार्थभेदाभेदनिरूपणाशक्यतया ऽनेकजातिगुण द्रव्यादिसंसर्गाभासा जायमाना वाक्यार्थबुद्धि रेव वाक्यार्थ इति न वाक्यवाक्यार्थौ वाह्यौ किन्तु बुद्ध्यालम्बना वेवेति मतं तत्तुच्छम् वाह्यविष-यालम्बनं विना बुद्धिसद्भावस्य शून्यवादे निर-स्तत्वा देवं स्फोटवादिनां वैयाकरणानामपि वाक्यतदर्थबुद्धौ वर्णपदतदर्थाभासाः निष्प्रमाणा मिथ्याकल्पिताः स्युः वाह्यवाक्यतदर्थयोः स्वीका-रेऽपि निरंशत्वाङ्गीकारान्निरंशस्य वाक्यस्य

वाचकत्वकल्पनायां गौरवं स्वल्पपदपदार्थभेदै-र्बहुविधवाक्यतदर्था आरभ्यन्ते तत्र तत्तदर्थभेदेन तावन्ति वाक्यानि कल्पयितव्यानि तेषु च तत्त-दर्थबोधौपयिकानि सामर्थ्यानि कल्पयितव्यानि तदपेक्षया क्लृप्तसामर्थ्यैः स्वल्पपदैरेव तावद्वा-क्यार्थबोधः स्वीकार्यो लाघवादिति वैयाकरणा-स्तावद् वाक्यं निरवयव मङ्गीकृत्य तत्रावयवभानं प्रत्यभिज्ञां च सादृश्या त्समर्थयन्ते 'ध्वनयः सदृशात्मानो विपर्यासस्य कारणमित्युक्तेः अय-मर्थः यद्यपि वाक्यं निरवयवं पदे वर्णा न विद्यन्ते वर्णेष्ववयवा नचेत्युक्तरीत्या वाक्यस्फोटस्यैव निष्कर्षत्वेन प्रतिपादना दवयवानुसन्धानं न तत्र परमार्थतः तथापि वाक्यान्तराभिव्यञ्जकध्वनि-सदृशध्वन्यभिव्यज्यमानत्वेन ध्वनिगतं सादृश्यं तदभिव्यङ्ग्यवाक्ये आरोपितं प्रतीयते तत एव सावयवमिव वाक्यं तत्सादृश्यादेव चावयवप्रत्य-भिज्ञापि लक्ष्यते इत्याहुः तदपि न वस्तुतो वाक्यस्य निरवयवत्वे सादृश्यप्रयोजकवर्णपदा-

दिभागानां तत्रासत्त्वा त्सादृश्यस्य वक्तु मशक्यत्वात्। अस्तु वा निर्भागस्यापि कथंचि त्सादृश्यम् तथापि वाक्ये पदानि पदे वर्णा न सन्तीत्यभ्युपगमो न युज्यते अस्मिन् वाक्ये इदमाद्य मिदं मध्यम मिद मन्त्यं पदमेवं पदेऽस्मिन्निद मक्षरमाद्यमित्यादि व्यवहारस्य सर्वानुभवसिद्धस्यापलापापत्ते रित्यन्यत्र विस्तरः। नन्वस्तु वाक्यं सभागमेव तथापि स्वभागप्रतिपादितार्थज्ञानसहकृतं वाक्यमेव पदार्थान्वयरूपस्य वाक्यार्थस्य वाचकमास्तां किं पदार्थे व्यापारकल्पनेनेतिचेन्न वाक्ये पदव्यापारेणैव वाक्यार्थबोधसंभवेन वाक्ये तत्सामर्थ्यकल्पनायां प्रमाणाभावात् नच पदानां पदार्थोपस्थापनमात्रे व्यापारो न वाक्यार्थबोधे तत्कथं पदव्यापारा द्वाक्यार्थबोधः पदार्थानां प्रमाणान्तरसिद्धत्वेन तत्र तात्पर्याभावा दभिधाव्यापारस्य पदार्थोपस्थापनाङ्गत्वेन तद्धेतुत्वेऽपि वाक्यार्थतात्पर्येणैव तत्प्रयोगा त्तात्पर्यव्या-

पारस्य पर्यवसितत्वाभावेन वाक्यार्थबोधपर्यन्तत्वाद् यत्परः स शब्दार्थ इति न्यायेन तात्पर्यार्थे शब्दप्रामाण्याङ्गीकारा च्छब्दप्रमेयतया वाक्यार्थस्य शाब्दत्वोपपत्तेः। एतेन पदार्थोपस्थापनव्यापारमात्रेण पराङ्मुखेषु शब्देषु पश्चा त्पदार्थेभ्यो जायमानस्य वाक्यार्थस्या शाब्दत्वं स्यादित्यपास्तम् पदार्थानां शाब्दत्वेन तद्द्वारा जायमानवाक्यार्थबोधस्यापि शाब्दत्वात् शब्दस्य तत्रैव तात्पर्यात् तात्पर्यार्थे एव तत्प्रामाण्याभ्युपगमस्योक्तत्वादि त्याशयेन सूत्रमवतारयति।

सू० तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ॥२५॥ (उ०)

भा० तेष्वेव पदार्थेषु भूतानां वर्तमानानां पदानां क्रियार्थेन समुच्चारणम्। न, अनपेक्ष्य पदार्थान् पार्थगर्थ्येन वाक्यमर्थान्तरप्रसिद्धम्। कुतः? प्रमाणाभावात्, न किञ्चन प्रमाणमस्ति येन प्रमिमीमहे। न हि, अनपेक्षितपदार्थस्य वाक्यान्त्यवर्णस्य पूर्ववर्णजनितसंस्कारसहितस्य शक्तिरस्ति पदार्थेभ्योऽर्थान्तरे वर्त्तितुम् इति।

नतु अर्थापत्तिरस्ति, यत् पदार्थव्यतिरिक्त मर्थमवगच्छामः नच शक्ति मन्तरेण तदवकल्प्यते इति। तन्न अर्थस्य तन्निमित्तत्वात्, भवेदर्थापत्तिः यद्यसत्या मपि शक्तौ नान्यन्निमित्त मवकल्प्येत। अव गम्यते तु निमित्तम्। किम् ?। पदार्थाः। पदानि हि स्वं स्वं पदार्थ-मभिधाय निवृत्तव्यापाराणि। अथेदानीं पदार्थाः अवगताः सन्तो वाक्यार्थं गमयन्ति। कथम् ?। यत्र हि 'शुक्लः' इति वा 'कृष्णः' इति वा गुणः प्रतीतो भवति, भवति खल्वसावलं गुणवति प्रत्यय माधातुम्। तेन गुणवति प्रत्ययमिच्छन्तः केवलं गुणवचनमुच्चार-यन्ति, सम्पत्स्यते एषां यथासङ्कल्पितोऽभिप्रायः, भविष्यति विशि-ष्टार्थसम्प्रत्ययः, विशिष्टार्थसम्प्रत्ययश्च वाक्यार्थः, एवं चेत्, अव-गम्यते अन्यत एव वाक्यार्थः। 'को जातुचित् अदृष्टा पदसमुदा-यस्य शक्तिः, अर्थात् अवगम्यते' इति वदिष्यति। अपिच अन्वय-व्यतिरेकाभ्या मेतदवगम्यते, भवति हि कदाचिदियमवस्था, मानसा-दप्याघातात् यत् उच्चरितेभ्यः पदेभ्यो न पदार्था अवधार्य्यन्ते, तदानीं नियोगतो वाक्यार्थं नावगच्छेयुः। यद्यस्य अपार्थगर्थ्यमभविष्यत् नियोगतस्तु नावगच्छन्ति। अपिच अन्तरेणापि पदोच्चारणं यः शौक्ल्य मवगच्छति, अवगच्छत्येवासौ शुक्लगुणकम्। तस्मात् पदार्थप्रत्यये एव वाक्यार्थः नास्य पदसमुदायेन सम्बन्धः। यत्तु (३७। २१) श्रौतः पदार्थो न वाक्यानुरोधेन, कुतश्चिद्विशेषादप-वर्त्तितुमर्हति इति। सत्यं एवमेतत्। यत्र केवलः पदार्थः प्रयुज्यमानः प्रयोजनाभावादनर्थकः संजायते इत्यवगतं भवति। तत्र वाक्यार्थोऽपि तावद्भवत्विति विशिष्टार्थता वगम्यते। न सर्वत्र। एवञ्च सति, गुणान्तरप्रतिषेधो न शब्दार्थः (३७। २२) इत्येतदपि परिहृतं

भवति। अपिच प्रातिपदिका दुच्चरन्ती द्वितीयादिविभक्तिः प्रातिपदिकार्थो विशेषकः इत्याह। साच विशेषश्रुतिः सामान्यश्रुतिं बाधेत। यच्च (३८। १) एते पदसंघाताः पुरुषकृता दृश्यन्ते इति। परिहृतं तत् असमरणादिभिः (१५। २३) अपिच एवं जातीयकेऽर्थे वाक्यानि संहतुं न किञ्चन पुरुषाणां वीजमस्ति।

तद्भूतानां क्रियार्थेन समाम्नायो ऽर्थस्य तन्निमित्तत्वादिति सिद्धान्तसूत्रं। तद्भूतानां तेषु पदार्थेषु भूतानां वर्तमानानां पदानां क्रियार्थेन क्रियावाचकेन पदेन यद्वा अंशत्रयविशिष्टभावनार्थत्वेन समाम्नायः समुच्चारणं न पदार्थातिरिक्तो वाक्यार्थः कुतः अर्थस्य वाक्यघटकप्रत्येकपदाभिधेयस्य तन्निमित्तत्वात् वाक्यार्थावगमनिमित्तत्वात् पदेषु पदार्थानभिधाय विरतव्यापारेषु पश्चादाकांक्षायोग्यतादिवशेन पदप्रतिपादिताः पदार्था एव वाक्यार्थबोधं जनयन्तीत्यर्थः वाक्यस्य वाक्यार्थवाचकत्वं निर्मूलत्वं च वाक्यार्थज्ञानस्यानेन निरस्तं वेदितव्यम् तदाह तेष्वेवेति पदार्थातिरिक्तो न वाक्यार्थ इत्यत्र हेतुं पृच्छति कुत इति प्रमाणाभाव एव

प्रमेयाभावसाधक इत्यभिप्रायेणोत्तरयति प्रमा-णाभावादिति। शक्ति रस्तीति चिरोच्चरिततिरोहिततावद्वर्णसमुदायानुसन्धाने क्लेशतरस्य दर्शितत्वात्। विजातीयव्यवधानेन चित्रबुद्धे रसंभवाच्च। ननु वाक्यार्थबोधान्यथानुपपत्ति रेव वाक्यस्य वाक्यार्थवाचकत्वे प्रमाणं स्यादि त्याशंकते नन्विति। पदार्थद्वारा वाक्यार्थबोधस्यान्यथाप्युपपत्ते र्नार्थापत्ते रवकाश इत्याह तन्नेति। अत्रैव समाधानपरत्वेन सूत्रावयवं योजयति अर्थस्येति। अन्यथापि वाक्यार्थबोध मुपपादयति भवेदिति। अवगता इति पदादिति शेषः प्रमाणान्तरोपस्थितपदार्थेभ्यः शाब्दबोधानङ्गीकारादिति भावः पदार्थेभ्यः वाक्यार्थबोधोत्पत्तिप्रकारं पृच्छति कथमिति। यत्र गवादिसामान्ये शुक्ल इति कृष्ण इति वेति तथाच शुक्लो गौरानीयता मित्यादौ शुक्लगवादिपदद्वयप्रतिपाद्यार्थद्वयसामान्यस्य पदद्वयसमभिव्याहारा न्नीलगवादिव्यावृत्तगोव्यक्तिविशेषबोधतात्पर्यपर-

त्वावधारणाद् विशिष्टवाक्यार्थबोधकत्व मित्य-ङ्गीकारादेव वक्तु: संकल्पितोभिप्राय: सम्पद्यते तदाह यथासंकल्पितो ऽभिप्राय इति । ननु शक्त्यादिविशेषणविशिष्टगवाद्यर्थबोधेऽपि वा-क्यार्थबोधो न सपन्न इत्याशंक्याह विशिष्टार्थ-संप्रत्ययश्च वाक्यार्थ इति ननु नासंबद्धा त्सामा-न्याद् विशेषार्थबोधो ऽतिप्रसङ्गात् नाप्येकार्थ-समवायादि रविशेषादिति चेत्सत्यं संयोगसम-वायैकार्थसमवायादि र्न संबन्ध: प्रकृते संगच्छते तथापि सामान्यविशेषयो रविनाभाव एव संबन्ध: प्रकृते ग्राह्य: सामान्यस्य स्वविशेषं विनानुपपद्यमानत्वात् सामान्यसद्भावे विशेषो नियमेन वर्तते इति नासंबद्धसामान्यविशेषयो र्गम्यगमकभाव: नच तर्हि अनुमानमेवेदं स्यान्न शाब्द मविनाभावमूलकत्वादिति वाच्यम् अविनाभावसद्भावेऽपि अनुमितिकार-णैकदेशपक्षधर्मतादिविरहेणा नुमानत्वासंभ-वा त्कारणसमुदाये तदापत्ति र्नैकदेशा नच

पक्षधर्मतायाः सम्भवः पदार्थानां पक्षीकरणे तेषामेव च हेतुत्वे हेतुपक्षयो रैक्येन प्रतिज्ञार्थैकदेशतापत्तेः न वशेषिकमते यथा धूमविशेषस्य पक्षत्वं धूमसामान्यस्य च हेतुत्वं तथा प्रकृते पीति वाच्यं वैषम्यात् तत्र धूमसामान्यस्या तिरिक्तपक्षविशेषान्विताग्निगमकत्व मत्र तु सामान्यमेव वाक्यार्थविशेषान्वित मात्मानं गमयतीति प्रतिज्ञार्थैकदेशता दुर्वारैव। न्वचास्तु तर्हि वाक्यार्थ एव पक्षः पदार्थश्च हेतुः पर्वतादिदेशव द्वाक्यार्थस्य पदार्थप्रतीतेः पूर्वं समकालं वा प्रतीत्यभावेन पक्षत्वासम्भवात् वाक्यार्थज्ञानस्य पदार्थज्ञानजन्यत्वात् संभवे च नानुमानोपयोगः फलस्य वाक्यार्थावगमस्यान्यत एवोपपत्तेः पूर्वमेव वाक्यार्थावगमोत्पत्तौ पश्चाद्भाविनः पक्षधर्मत्वस्य तत्र मूलत्वानुपपत्तिः वस्तुतस्तु वाक्यार्थज्ञाने पदार्थाना महेतुत्वे वाक्यार्थज्ञानानुत्पत्तिरेव तदुत्पादकप्रमाणाभावादिति बोध्यम् पदार्थवाक्यार्थयो रन्वय

मजानतोपि शाब्दबोधो भवति सच न स्यात् अपिच वाक्यार्थाना मानन्त्यात्तैः सह पादार्थानां मन्वयोपि असर्वज्ञै दुर्ज्ञेयः नच वाक्यार्थान्तरैः सह गृहीतसम्बन्धेभ्यः पदार्थेभ्यो वाक्यान्तरार्थानुमान मिति शक्यं वक्तु मतिप्रसङ्गात् वाक्यार्थबोधस्य नियतत्वात् अपिच वाक्यान्तरार्थैः सह गृहीतसंबन्धेभ्यः पदार्थेभ्योऽन्य एवामी पदार्था येभ्योऽयमभिनवो वाक्यार्थबोध इष्यते नचैषु सम्बन्धग्रहः समजनि इति कुतोनुमानं स्यात्। ननु न तत्तत्पदार्थत्वेन पदार्थानां वाक्यार्थेऽन्वयः स्त्रीक्रियते येन पूर्वोक्तदोषः स्यात् किन्तु पदार्थत्वसामान्येन पदार्थानां वाक्यार्थेऽन्वयो नुमान इति न पक्षधर्मत्वाद्यनुपपत्तिः पदार्थविशेषाणां पक्षत्वा त्पदार्थत्वसामान्यस्य च हेतुत्वात् सामान्यस्य च पदार्थविशेषवृत्तित्वात् मैवम् वाक्यार्थ धियो विशेषविषयकत्वेन सामान्यार्थगोचरत्वानङ्गीकारात् विशेषे च संबन्धग्रहणाभावा दनुमानेन

तज्ज्ञानासंभवादिति ननु असंबन्धपदार्थेभ्यो वाक्यार्थबोधस्याभ्युपगमेऽ प्रामाण्यं स्यादिति चेन्न असंबन्धप्रतीतेरपि प्रामाण्याभ्युपगमात् संबन्धस्य प्रामाण्यप्रयोजकत्वे राजाज्ञाभावात्। ननु अस्तु प्रमाणमप्रमाणं वेति विचारः प्रतीतिरेव इयमनुपपन्ना संबन्धानङ्गीकारे मैवं नहि दृष्टे ऽनुपपन्नं नाम दृश्यते हि दूरदेशवार्तासु विज्ञातेभ्यः पदार्थेभ्यो वाक्यार्थबोधः आप्तोक्तिनिश्चयेन तत्प्रामाण्यविघातोपि न नच तेषां संसर्गोऽवगतः दूरदेशस्थत्वात् नच दूरदेशवार्त्तापरवाक्यप्रामाण्यमपि आप्तोक्तिनिर्णयानुमानाधीनमेवेति वाच्यम् प्रामाण्यनिश्चयस्य तादृशानुमानाधीनत्वेऽपि प्रामाण्यस्य तदधीनत्वाभावात् तावतापि तद्बुद्ध्युत्पत्ते रङ्गीकारात् आप्तत्वानाप्तत्वनिश्चयं विना तद्वाक्यार्थबोधे जाते पश्चादप्रामाण्यशंकाविधूननाया प्तोक्तिनिश्चयोऽपेक्ष्यते नतु तादृशवाक्यार्थबोधोत्पत्तये नहि तत्सत्यत्वनिश्चय एव

तद्वाक्यार्थबोधः किन्तु भिन्न एवेति सत्यत्व-निश्चया त्पूर्वमेव तादृशवाक्यार्थबोध इत्यविवादं तथाच सत्यत्वनिश्चयस्या नुमानिकत्वेपि वाक्यार्थबोधस्य नानुमानिकत्व मिति स्पष्टमेव लभ्यते नच वाक्यार्थबोधोऽपि आप्तवचनत्व-हेतुक एव भवति आप्तोहि यथार्थवादित्वेना-सकृदुपलब्धः तथाच वर्त्तमानवचनेऽपि एवमनु-मीयते एतद्वचनं वाक्यार्थबुद्धिपूर्वक माप्तोक्तत्वा त्पूर्वतद्वचनवत् यद्वा एते पदार्था मिथः संसर्गवन्तः आकांक्षायोग्यतासन्निधिमत्वे सति पदार्थत्वादिति न आप्तस्यापि कदाचिद न्यार्था-भिधित्सया भ्रमादिभिः पदान्तर प्रयोगदर्शनेन व्यभिचारात् नहि भ्रमप्रयुक्ततादृशवाक्यस्य तद्बुद्धिपूर्वकत्व मनाप्तत्वापत्ते र्नच यः कदाचि-दपि नान्यथा वदति स एवाप्तपदेन गृह्यते इति वक्तुं शक्य मेतादृशपुरुषरत्नस्य लोके अभावाद् भ्रान्तेः पुरुषधर्मतया शब्दप्रयोगस्य विरल-विषयत्वापत्ते र्निर्विषयत्वापत्तो र्वा प्रकृतवाक्य-

यर्थार्थज्ञानवत्त्वरूपाप्तत्वस्य प्रकृतवाक्यार्थबोधोत्तरकालिकत्वेन हेतुत्वासंभवात् एवमुत्तरानुमानेप्यनाप्तवाक्ये नद्यास्तीरे पञ्च फलानि सन्तीत्यादौ व्यभिचारः स्फुटः तस्मादाप्तानाप्तसाधारणवाक्यश्रवणसमनन्तरं वाक्यार्थबोधो दृश्यमानः शाब्द एव नानुमानिकः त्रिलक्षणलिंगजन्यत्वाभावात् अतः प्रमाणान्तरमेव शाब्दं नानुमानिकमिति-सिद्धम्। ननु तथापि असंबद्धेभ्यः पदार्थेभ्यो वाक्यार्थबोधो जायते इति बुद्धौ नाधिरोहति तथा प्रतिपत्तिप्रकाराप्रतिपादनादिति चेत्सत्यं तादृशः तकारो न प्रतिपादितः इदानीं स प्रतिपाद्यते तदित एवावहितेनाधिगम्यताम् भावनावाचकशब्द स्तावल्लोकवेदयो रविशेषं भावनां स्मारयति नात्र कस्यचिद्विप्रतिपत्तिः नच यजेत पचेत इत्यादौ भावनावाचको धातुः प्रत्ययो वेति निर्णयो न सुलभः बहुविदा मत्र विवाददर्शनादिति वाच्यम् अन्वयव्यतिरेकाभ्यां भावना आख्यातवाच्येति निर्णयस्य सुलभत्वात्।

यजते पचते इत्यादावाख्यातसत्वेन भावना-प्रतीयते इति भावनाख्यातयोरन्वयः यागः पाक इत्यादौ आख्यातविरहान्न भावनाप्रत्यय इति तयो र्व्यतिरेकः धातुना सह नैकांततोन्वयः यागपाकादौ सत्यपि धातौ भावनाप्रतीतिविरहान्न भावना धात्वर्थः अन्यथा अत्रापि तत्प्रत्ययापत्ते रित्येके अन्ये तु न केवलाख्यातप्रत्ययो भावना-वाचकः स्वातन्त्र्येण तत्प्रयोगाभावा त्तेनैवान्वय-ग्रहणायोगात् किन्तु तत्समभिव्याहृते धातावेव तत्रापि धातावेव शक्तिराख्यातसमभिव्याहारो ऽभिव्यञ्जक इति न यागपाकादौ तत्प्रतीति रभिव्यञ्जकविरहादित्याहुः समुदायेनैव सहा-न्वयव्यतिरेकदर्शना त्प्रकृतिप्रत्ययसमुदाय एव भावनावाचक इत्यपरे यागपाकादौ सत्यपि धातौ भावना न प्रतीयते अस्ति भवतीत्यादौ सत्यप्याख्यातप्रत्यये भावना न प्रतीयते इति यजेत पचेतेत्यादौ समुदायेनैवान्वयव्यतिरेकौ भावनावाचकत्वनिर्णायकौ एतन्मते साध संग-

च्छेते इति द्रष्टव्यम् । ननु भावनावाचकत्वनि-
र्णयो न सुलभ इति यदाशङ्कितं तदेवापन्नं
तद्विवेकोपायाभावादिति चेदापततु तदेव
किन्तद्विवेकेन नो प्रयोजनं धातु र्वाऽ ऽख्यातप्र-
त्ययो वा विशिष्टो वा वाचकः सर्वथा यजेत
इत्यादौ भावना प्रतीयते इत्यविवाद मेतावतैव
नः प्रयोजनमुपपद्यते तथाहि यजेत स्वर्गकाम
इत्यादौ प्रतीयमाना भावना साध्यं साधनमिति
कर्तव्यतां च सामान्यत आक्षिप्य तद्विशेष मन्य
तोभिकाङ्क्षति निष्पन्ने कामनाविरहा त्कामि-
पदसमभिव्याहारेण कामनाविषयत्वेन प्रतीय-
मानः स्वर्गसाध्यतया वगतो भावनामपेक्षते
तथाच साध्यसाधन मपेक्षमाणयोः स्वर्गभाव-
नयो र्योग्यत्वसन्निधिबलेन परस्परमन्वयो
ज्ञायते ततः साध्यांशलाभेन तदंशे निरपेक्षा
साधनमपेक्षमाणावतिष्ठते एव स्वसाधनं
च न धात्वर्थातिरिक्तं किंचिद्ध यदपि गोदोह-
नेनापः प्रणयेदि त्यादौ गोदोहनादीनां भाव-

नाङ्गत्वं श्रूयते तत्रापि न तेषां स्वरूपेण किन्तु प्रणयनादिधात्वर्थोपरागेणैवेति धात्वर्थ एव तत्साधनं सोपि यागादिः करणत्वबोधकतृतीयादिविभक्तिविरहेऽपि स्वभावतो भावनया करणत्वेन संबन्ध स्तद्द्वारा फलमपेक्षते साधनस्य-साध्यांशे उत्थिताकाङ्क्षत्वात् नच भिन्नपदोपात्तस्वर्गापेक्षया समानपदोपात्तत्वेन सन्निहितत्वाद्द धात्वर्थस्यैव साध्यत्वेन भावनाया मन्वयः किन्न स्वीक्रियते इति वाच्यम् क्लिष्टं कर्मेति न्यायेन धात्वर्थस्य यागादेः पुरुषार्थत्वाभावेन फलत्वासंभवादिति साधनं स्वरूपेणैवोपतिष्ठते यागेन भावयेदिति यागेन किं भावयेदित्यपेक्षा भावनान्वयेप्यस्त्येवेति योग्यत्वादिप्रत्यासत्तिनिमित्तः स्वर्गयागयोः संबन्धः स्वीक्रियते यागेन स्वर्गं भावयेदिति ननु कथं यागस्य करणत्वेनान्वयः तद्बोधकतृतीयाविभक्तिविरहादिति चेन्न करणत्वस्य तृतीयाविभक्तिव्याप्यत्वानङ्गीकारात् तन्निर्णायकप्रमाणसत्वे तृतीयाविभक्तिविरहस्या-

किंचित्करत्वात् नच तृतीयार्थसद्भावे किमिति सा नोत्पन्ना प्रातिपदिकत्वाभावादिति गृहाण नहि तदुत्पत्तौ तदर्थसद्भाव एव नियामकः प्रातिपदिकसंज्ञाया अपि तन्नियामकत्वात् प्रातिपदिकसंज्ञा च तद्विधायकसूत्रे ऽधात्विति पर्युदासान्न भवतीति यागेनेत्यत्र व यजेदित्यादौ न सा यजेतेत्यादिविधिवाक्यसामर्थ्यलब्धयजिकरणत्वस्य प्रयोगाभावेन तृतीयान्तयजिना व्याकर्तुमशक्यतया कृत्यप्रत्ययान्तेन यागेन स्फुटीकरण मिह बोध्यम् एवं प्रयाजादीनामपि कथंभावापेक्षया भावनया संबन्धो बोध्यः फलोपायमात्रापेक्षित्वाद् भावनायाः उपायश्च कश्चित्स्ववाचकपदेनोपात्तो यथा यागादिः कश्चिच्च पदान्तरेणोपात्तो यथा प्रयाजादिः अस्यापि साध्यापेक्षित्वाद् भावनाद्वारा स्वर्गादिरूपफलसंबन्धो बोध्यः पदवाक्ययो रपि परस्परापेक्षितत्वात् विश्वजिदादिव न्नादृष्टस्वर्गकल्पना तदापेक्षयाप्रत्यासत्तिवशेन फलवद्भावनांशकरणानुग्रहस्यैव

न्यायत्वात् स्पष्टीभविष्यति चैतत्प्रकरणाधिकरणे इति। ननु भावनान्वयिनां साध्यसाधनादीनां कथं मिथोन्वयः मिथोन्वये वा कथं भावनान्वयः उभयत्रान्वयाभ्युपगमे वाक्यभेदापत्ते रिति चेत्सत्यम् प्रथममेकस्यामेव भावनायां साध्यसाधनेतिकर्त्तव्यतानामन्वयः पश्चात्तेषा मुपकार्योपकारकभावेन परस्परमन्वयः करणं साध्यस्योत्पत्त्युपकारं करोति इति कर्त्तव्यतानुकरणस्य फलजननसामर्थ्य मिति तयोर्भेदः साध्यमपेक्षमाणा भावना तेनान्विता सती न स्वरूपेण साधनमपेक्षते किं साधनमिति किन्तु फलोपरक्तसाधनत्वेन किमेतत्फलसाधनमिति एवमितिकर्तव्यतापि न स्वातन्त्र्येण भावनायां साकांक्षा केन फलं भावयेदिति किन्तु साधनोपरक्तरूपेण कीदृशेन व्यापारेणेदं साधनं फलजननसमर्थं स्यादिति तथा च न वाक्यभेदः साध्यसाधनोभयांशविशिष्टभावनायाःस्वर्गादिफलं प्रति विधानादिति एवं गामानय शुक्लामित्यादा वेका—

नयनक्रियान्वितयोः गोशुक्लयोः परस्परसंबन्धावि-
च्छेदेनैवा नयनक्रियाया मन्वयः नच जाति-
गुणोभयाश्रितद्रव्यस्यै वानयनक्रियायामन्वयो
जातिगुणयो रिति कथं तयोरेकक्रियान्वयित-
यैकवाक्यत्व मित्थम् शुक्लो गौरित्यादौ गो-
त्वजाति र्यादृशगवादिव्यक्तिं परिच्छिनत्ति
तादृशी मेव शुक्लगुणोपि इत्युभय मेकाश्रय
परिच्छेदकत्वेना नयनक्रियाया मन्वेतीति
जातिविशेषणत्वं गुणस्योपपद्यते इति । ननु-
गोत्वशुक्लत्वयोरेकाश्रयकत्वे सिद्धे तादृशाश्र-
यद्वारा तयोर्मिथः संबन्धः स्यादपि तदेव तु न
सिध्यति साधकाभावात् नचैकानयनक्रियान्वयः
साधकः एकद्रव्याश्रयत्वे एकक्रियान्वय स्त-
स्मिन् एकद्रव्याश्रयत्व मिति परस्पराश्रयात्
मैव मत्रहि आनयनक्रियाप्रधानभूता गोत्वशु-
क्लत्वाभ्या मवरुद्धा अतज्जातीयमतद्गुणकं
चाश्रय मनपेक्षमाणा श्रुतौ गोत्वशुक्ला वेक-
स्मिन्नाश्रये नियमतो ऽपेक्षते इत्यरुणाधिकरणे

वच्यमाणत्वात् किंच जातिविनियोगे भवतोहशी जिज्ञासा किं गुणकं द्रव्यमनया जात्या परिच्छेत्तव्यं तथा गुणोऽपि कीदृग् जातिविशिष्ट मनेन परिच्छेत्तव्य मिति द्वयोः श्रुतत्वा त्परस्परसंबन्धेऽतोवोपकार इति मिथः संबन्धाज् जात्यन्तरगुणान्तरव्यवच्छेदः पदा त्साचादप्रतीयमानोपि अर्थादेव फलति नह्यस्ति संभवो यच्छुक्लगुणेन सहैकानयनादिक्रियाया मन्वितस्य गोत्वस्य नीलगुणादिभिःसंसर्गः वस्तुतो गोत्वं न नीलादिव्यावृत्तं स्वरूपेण तत्रापि सत्वात् किन्तु शुक्लो गौरानीयता मिति वाक्यस्य नीलाद्यसंकीर्णगोत्वप्रवृत्तिरेव निलादिव्यवच्छेद इति ध्येयम् । स्वतोऽसंवद्धानां पदाना मेकक्रियासंबन्धा देकवाक्यत्वं क्रियाद्वारा एषां परस्परसंबन्धे सिद्धे यद्यपि पदार्थाः अनेकवाक्यार्थगामितया अनियता स्तथापि तत एव संबन्धान्मिथो व्यवच्छिन्नत्वेन प्रतीयन्ते इति तैर्नियमेनैकवाक्यार्थावगति र्जायते

तथाहि यत्र गामानय शुक्लामिति वाक्यं प्रयुज्यते तत्र गामिति द्वितीयान्तपदेन गोः कर्मत्व मुच्यते तच्च यत्किंचिद्द् योग्यक्रियानिरूपितं नत्वा-नयनक्रियानिरूपित मेव अन्यत्रापि तत्प्रयोग-दर्शना त्तथा आनयति रपि आनयनमात्र-मभिधत्ते तच्चानयनं गवाश्वव्यक्तिसाधारणं लक्षयति नतु गवानयनमेवा न्यत्रापि तत्प्रयोग-दर्शना देवं शुक्लामित्यपि शुक्लगुणं यांकाञ्चि-द्व्यक्तिं नतु गोव्यक्तिमेव तत एव मिथः संब-न्धात्तु गामिति यां व्यक्तिं गोकर्मत्वेन बोधयति आनयति रपि तत्कर्मिकामानयनजातीयां क्रियां लक्षयति शुक्लपदमपि तामेव शुक्लगुणकत्वेन बोधयतीति गोशुक्लानयनैः समुदिते विशिष्टे एकस्मिन् बोधिते गोत्वजाति रानयनक्रियाति-रिक्तक्रियातः शुक्लगुणातिरिक्तगुणतो व्यव-च्छिन्ना आनयतिक्रियापि गोत्वातिरिक्तजाति-तश्शक्लगुणातिरिक्तगुणतः शुक्लगुणो जात्यन्त-रात् क्रियान्तराच्च व्यवच्छिन्नः प्रतीयते इति

नियतैकवाक्यार्थबोधः संपद्यते इति यद्यपि प्रत्यासत्तिवशेन समानप्रत्ययोपात्तां भावना मेव विधि विधातुं शक्नोति नेतरांशं विप्रकर्षात् तथापि अपरिपूर्णत्वा त्तावन्मात्रस्य विधाने ऽनुष्ठेये कर्मणि पुरुषप्रवर्त्तकत्वं विधे नं स्यात् साध्यसाधनसंबन्धं विना भावनामात्रेण पुरुष-प्रवृत्ते रशक्यत्वा दित्यतो योग्यतादिवशेन साध्यसाधनेतिकर्त्तव्यताविशिष्टैव पूर्णा भावना विधीयते पुरुषप्रवर्तनानुरोधा दिति दिक्। एव मुत्सर्गनिपातानां मपि स्वातन्त्र्येण प्रयोगाद-र्शनाद् द्योतकत्ववाचकत्वविवादेऽपि वाक्यार्थ-बोधोपयोगितया र्थवत्वमस्त्येव नहि स्वातन्त्र्येण प्रयोगदर्शनमेवार्थवत्वे नियामकम् स्वादीना मर्थवत्वस्य सर्वसंमतत्वात् तेषां च न स्वातन्त्र्येण प्रयोगः केवलानां प्रयोगस्या साधुत्वात् अपि-ङ्क्तः प्रकृया वृत्तःप्लक्षश्च त्यादा वितरसमभि-व्याहारे एषा मर्थवत्वं स्पष्टमेव लभ्यते आङादिसमभिव्याहारे ईषदाद्यर्थप्रतीति स्तद-

समभिव्याहारे तदर्थाप्रतीति रित्यन्वयव्यतिरेकसद्भावात् तत्र षदर्थादयः साक्षान्नाम्नैव संबन्धमनुभवन्ति ईषत्पिङ्गल आपिङ्गल इति यथा प्रादयस्तु क्रियाद्वारेण प्रगतं वयो यस्य स प्रवया इति यथा क्वचिच्च प्रकृष्टत्वाभिमुखत्वादीना मितिकर्तव्यतया भावनायां विधान मनुष्ठानं च यथा प्रवयसे दक्षिणां दद्याद भिक्राम जुहोतीत्यत्र। ननु प्रतिष्ठते इत्यादौ स्थाधात्वर्थगतिनिवृत्तिविपरीतप्रस्थानार्थबोधकप्रादीनां कथं धातुसंबन्ध स्तदर्थत्वापकत्वात् सत्यं नेदृशार्थका धातुविशेषणां किन्तु एते धातुभागसमा एव समुदितस्य प्रतिष्ठते गमने शक्ति रश्वकर्णवन्नतु स एव धातुरुपसर्गसहितः किन्तु स्थितौ प्रतिष्ठिति रन्य एव द्वयो रर्थभेदात् एकत्वे तु प्रोपसृष्टादपि स्थाधातो र्गतिनिवृत्तिबोधः स्यान्नचैवं दृश्यते तस्मादन्य एव यद्यपि एकस्यैव धातो स्तादृशार्थद्वये शक्ति रिति स्वीकारेऽपि उपसर्गस्या र्थविशेषद्योकत्वेन प्रशब्दश्रवण-

बेलायां गते ऽन्यत्र तन्निवृत्ते बोध इति नानुपपत्ति शापत्तिर्वा तथापि वृत्तिद्वयकल्पनापेक्षया समुदायशक्तिकल्पन मेवोचित मेवं सति अन्वयव्यतिरेकावपि सुखेनोपपद्येते इति बोध्यम्। नचोपसर्गाणां धातुभागत्वे पृथगुपादानं किमर्थं प्रातिष्ठत प्रातिष्ठिपदित्यादा वुपसर्गा त्पूर्वमडादिव्यावृत्तये नामत्वेन तेषां पृथगुपादानात् एवं प्रलम्बति रपि लम्बते ऽन्य एवेति। द्योतकतावादिन स्तु एकस्यैव धातो स्तत्तदुपसर्गवशेन भेदस्वीकारे शक्तताबच्छेदकादीनां भेदेन तत्र तत्र शक्तिकल्पनायां गौरवं स्यादिति स्थाधातोः क्रियासामान्ये शक्तिः क्लृप्तैव केवलं प्रादिसमभिव्याहारे क्रियाविशेषे शक्तिः कल्पनीया प्रशब्दविशिष्टस्य क्रियाविशेषवाचकत्वे तु प्रशब्दे सामान्ये विशेषे च शक्ति रक्लृप्तैव कल्पनीया स्यादिति द्योतकत्वे एव लाघव मित्याहुः। ननु द्योतकत्वस्वीकारे प्रतिष्ठते इत्यादौ प्रादेः कथं विशेषणत्वं विशेषणं हि विशेष्यार्थ मत्या-

जयत् विशेषे पयवस्थापयति नीलोत्पल मित्यादौ तथादर्शना न्नहि नील स्वार्थात्प्रच्याव्योत्पलपद मर्थान्तरे व्यवस्थापयति किन्तु स्वार्थविशेषे एव प्रादिस्तु अर्थान्तरे धातुं व्यवस्थापयतीति चे त्सत्य मेषां धातोः शक्त्यन्तराभिव्यञ्जकत्वेनैव विशेषणत्वादित्यन्यत्र विस्तरः ।

अथास्तु उपसर्गादे रेवं शब्दसंबन्धः वस्तुस्वरूपविरूद्धविकल्पप्रतिषेधादिबोधकस्य नञादेः कथं शब्दान्तरेण संबन्धः सदात्मना निरूपितस्य तदानीमेवा सद्भावेन निरूपयितुमशक्यतया संबन्धद्वाराभावादिति चेदत्रोच्यते नञर्थ स्तावत्त्रिविधः पर्युदासो ऽभावः प्रतिषेधश्च तत्राद्योऽब्राह्मणानीत्वणादौ नाम्ना संबद्धेन नञा ब्राह्मणभिन्नः क्षत्रियादिः धातुसंबद्धेन नेक्षेतो द्यन्तमादित्य मित्यादौ तेनेक्षणविरोध्यनीक्षणसंकल्पश्च वस्तुस्वरूप एव प्रतिपाद्यते तत्र वस्त्वन्तरप्रतिषेधो वस्त्वन्तरानुगुण एव सर्वस्य परस्पराभावात्मकत्वात्

यत्र चाख्यातेन नञः संबन्धो ऽन्नास्ति नासी न्न भविष्यतीत्यादौ निवृत्त्यात्मा ऽभावो-र्थ स्तत्रापि न वस्त्वभावः नञा क्रियते किन्तु संशयाज्ञानविपर्ययमात्रनिवृत्तिः घटोऽस्ति नास्ति वेति सन्देहे सति घटो नास्ती त्युक्त्या पाक्षिका-स्तित्वबुद्धि र्निवर्तते अथवास्तित्वबुद्धिनिवृत्ति रपि साक्षान्न क्रियते किन्तु घटो नास्तीति कथिते विरोधाद्स्तित्वबुद्धिः स्वयं निवर्तते एव मज्ञा नविपर्ययवारणा मप्यत्र यस्य तत्र घटनास्तिता-ज्ञानं नास्ति किम्वा घटास्तित्वबुद्धिरेव विपर्यय-रूपास्ति तं प्रति तत्र घटोनास्तीत्युक्त्या तद-ज्ञानविपर्ययौ निवर्तेते तदेव मज्ञानादिवारणं प्रत्यक्षस्थलेऽपि दृष्टमेव यथायं स्थाणुरिति ज्ञाने जाते स्थाणु र्वा पुरुषोवेति सन्देहः पुरुष एवेति विपर्ययः स्थाणो रज्ञानं च निवर्तते तथा नञो-ऽपि प्रमाणत्वा त्ते निवर्तन्ते इति न कश्चिद्विशेषः नचाभाव स्तुच्छात्मा न कश्चिद्वस्तुविशेषो ऽय-मेवच नञोर्थ इति कथ्यते तथा चानर्थकत्व मे-

वैतस्येति कथं पदान्तरेण समभिव्याहारः स्यादिति वाच्यम् अभावस्य वस्तुत्वं पूर्वमेव प्रतिपादित मित्यभावार्थकस्य नञो घटादिपदवदनर्थकत्वाभावात् नचाप्राप्तस्य प्रतिषेधायोगा त्प्राप्तस्यैव प्रतिषेधो वाच्य, स्तथाच प्रमाणान्तरेण प्राप्तस्य कथं प्रतिषेधः विरुद्धयो र्भावाभावयो रेकत्र समुच्चयासंभवादिति चेत्क एवमाह विधायकेन संबन्धाभावा न्नञः प्रतिषेधविधायकत्वानङ्गीकारा दभावस्वरूपमात्र मनेन कथ्यते अत्र च न प्राप्ते रुपयोगो ऽप्राप्तस्यैव घटादे रभावो घटो नास्तीत्यनेन बोध्यते इति। नन्वेव मपि सदर्थवाचिना घटशब्देना भाववाचिनो नञः संबन्धो न घटते सृष्टिप्रलययोरिव विरुद्धार्थकत्वादिति चेद्र भवेदेवं यदि घटपदं सत्वेन घटं बोधयेत्त्तु नाभ्युपगम्यते किन्तु सत्वासत्वोदासीनं घटस्वरूपमात्रं बोधयति घटश्च प्रादेशिकः क्वचित्सत्वेन वर्तते क्वचिदसत्वेनेति सत्वासत्वोभयसाधारणं घटसामान्यं घटपदाभिधेय मतएव

घटोऽस्ति घटो नास्ती त्युभयविधः प्रयोगः स-
ङ्गच्छते ऽन्यथा सत्वेन घटस्य तत्पदाभिधेयत्वे
घटोऽस्तीति प्रयोगो न स्यादुभयोः सत्वार्थकत्वेन-
पौनरुक्त्यापत्ते रेवमसत्वार्थकत्वेन तदभिधेयत्वे
घटोनास्तीत्यपि न स्या त्तत एवेति बोध्यम् नच
भवन्मते जातेरेव पदार्थतया तस्याश्च नित्यत्वे-
न कदाचिदपि नासत्व मिति कथं सत्वासत्व-
साधारणत्वं कस्यचिदपि जातौ सत्वासत्वविव-
क्षाविरहा-त्तदुपलक्षितव्यक्तितात्पर्येणैव तदुभय-
प्रयोगदर्शना त्तदभिप्रायेण तथोक्ते रेवं च श्रु-
तायां जातौ नास्तित्वतात्पर्येण नास्तीति प्रयो-
गाभावाद् व्यक्तितात्पर्येण तादृशप्रयोगसत्वे-
ऽपि तस्या अश्रुतत्वा न्न विरोधगन्धोपी त्यपर-
मनुकूलम् नच यत्र घटोस्तीत्यनेन पूर्वं सत्वे
घटं प्रदर्श्य पश्चात्तदसत्वबोधनाय घटो नास्ती-
ति प्रयुज्यते तत्र विरोधा त्कथमुभयविधः प्रयोग
इति विवक्षाभेदेन तदुभयोपपत्तेः तथाहि यत्र
घटोस्ती त्यनेन घटसत्वं प्रतिपाद्य पश्चा न्नास्ती-

स्यनेन तदसत्वं प्रतिपाद्यते तत्र तयो नैकवाक्य-त्वं किन्तु घटसत्वप्रतिपादकं घटोऽस्तीत्येकं वाक्यं तदसत्वप्रतिपादकं घटोनास्तीत्यपरं वाक्यं तथा च घटोऽस्तीत्येतद्वाक्यजन्यज्ञानस्य घटोनास्तीत्येतद्वाक्यजज्ञानेन बाध एव भवति यथा शुक्तिशकले इदं रजतमिति जातस्य ज्ञानस्यो-दीच्येन नेदं रजतमिति ज्ञानेन बाध इति न विरोधः अथवा भ्रान्त्या घटसत्व मवगच्छता घटोऽस्तीति वाक्यं प्रयुक्तं भ्रान्त्यवगतं सत्व मेवैत द्वाक्य मनुवदति पश्चात्तदभाव मधिगत्य भ्रान्तिप्रसक्ततत्सत्वापनोदाय घटोनास्तीति प्रयुज्यते पूर्वं भ्रान्त्याऽवगतो यो घटः स वस्तुतो नास्तीति एवंच नानयो र्विरोधः भ्रान्तिप्रतिपन्न-सत्वेन वास्तविकासत्वस्य विरोधाभावात् नहि शुक्तिशकले भ्रान्तिप्रतिपन्नस्य रजतसत्वस्य पारमार्थिकेन तदसत्वेन विरोधः कल्पितत्वाद् रजतसत्वस्येति अथवा कालभेदादुभयोर विरोधः घटोस्ति इति वाक्यं पूर्वकाले घटसत्वं बोधयति

घटोनास्ती त्येतद्वाक्य न्तु तदुत्तरकाले तदसत्वं बोधयति पूर्वकाले गृहीतो यो घटः स इदानीं नास्तीति तथा च भिन्नविषयतया ज्ञानयो वि-रोधः विषयभेदश्च कालकृत इति । ननु यत्र न हन्या न्न पिबेदित्यादौ विधिना नञः संबन्ध स्तत्र विरोधो दुर्वार एव प्रकारान्तरेण प्राप्तस्यैव प्रतिषेधो वक्तव्यो ना प्राप्तस्य विधिवैयर्थ्यापत्तेः हननपानादिप्राप्तिश्च रागादेव स्वीकार्या वचन-प्राप्तस्य वचनेन बाधायोगा च्छास्त्रद्-यप्रामाण्याय तत्र विकल्प एवेति सि-द्धान्तात् तथाच रागप्राप्तयोर्हननपानयो रभावं कथं नञ् बोधयेत् यदि वस्तुतः पुरुषेण हननं पानं वा कृतं तदा अनुष्ठितस्य हननस्य पानस्य च सत्ता जातैवेति कथं तदभावः शक्यते वक्तुं यदि वा न हननपाने प्रवृत्त स्तदा प्राप्तभावा त्प्रतिषेधानर्थक्य मित्युभयतः पाशा रज्जु रिति चेदत्रोच्यते यथा पचति न पचति पक्ष्यति न पक्ष्यतीत्यादीनां यथावस्थ-

तभावाभावगोचरत्वेन सत्यत्वं मिथ्यात्वं च भवति तथा न विधिनिषेधबोधकवाक्यानां यथावस्थितभावाभावबोधनाय प्रवृत्तिः यत स्तद्वदेव सत्यत्वं मिथ्यात्वं वा स्यात् किन्तु अन्यादृशी प्रवृत्तिः विधि र्हि कृतिसाध्येष्टसाधने तद्विषयकानुष्ठानसकल्पं जनयन् पुरुषं प्रवर्तयति विधिरेव विधेयस्येष्टसाधनभावे प्रमाणंच भवति एवं निषेधोऽपि अनिष्टकर्मणा स्तद्विषयकाननुष्ठानसंकल्पं कारयन् पुरुषं निवर्तयति स्वयं च तस्यानिष्टसाधनभावे प्रमाणी भवति अभावं व्यवस्थापयति च तथाच प्रतिषेधेषु रागादिप्राप्तहननपानादिकर्तव्यतारूपविध्यर्थोलिङा अनूद्य यदि नञा प्रतिषिध्यते यदि वा नञर्थो वर्जनरूपः प्रतिषेधो लिङा विधीयते उभयथापि हननपानादिव्यापारस्या निष्टसाधनत्वबोधना त्तदननुष्ठानसंकल्पजननेन विरोधान्निराकरणं साधु संगच्छते इति न विरोधशंकालेशोपीति ध्येयम् विकल्पविरोधेपि अनयैव रीत्या

निराकरणीयः विधिनिषेधविषये भवन् विकल्पोऽपि विधेये इष्टसाधनत्वबोधनद्वारा तत्र पुरुषं प्रेरयति प्रतिषिद्धे ऽनिष्टसाधनत्वबोधनद्वारा तद्विषयकानुष्ठानविरोधिसंकल्पजननेन ततो निवर्तयतीति न नञो विधिसमभिव्याहारे काचिदनुपपत्तिः ननु विधिनिषेधयोः प्रेरणानिवारणबोधकयो र्भिन्नविषयत्वाद् माभूद्विरोधः प्रेरणानिवारणोभयकार्यकारिणो विकल्पस्य स्वात्मनैव विरोधः स्फुटः प्रवृत्तिनिवृत्त्यौपयिकार्थद्वयकरणाद् वाक्यभेदश्च कथं तदेवेष्टसाधनत्वेनानुष्ठेयं तदेव चानिष्टसाधनत्वे नाननुष्ठेयमिति शक्यं प्रतिपत्तुम् एकं प्रति तदेकस्य युगपदिष्टसाधनत्व मनिष्टसाधनत्वं च कोऽविकल्पवाचा बोधयेत् प्राप्तस्य प्रतिषेधः अप्राप्तस्य तु विधानं नहि निषिषेधयिषया तदेव प्राप्तं विधित्सया च तदेवाप्राप्त मिति शक्यं वक्तुम् युगपदेकत्र प्राप्त्यप्राप्त्यो र्विरोधादिति चेन्न युगपद्विरोधेऽपि कालभेदेन विधिनिषेधयोः

समावेशेन विरोधाभावात् एवं च न वाक्यभेदोपि विकल्पो हि कदाचि त्प्रेरयति कदाचि न्निवर्तयति यदा च प्रेरयति तदा तदनुकूल एव वाक्यार्थः यदा चासौ निवर्त्तयति तदा निवृत्यनुकूल एव वाक्यार्थ इति सकृदुभयानुकूलवाक्यार्थाकरणा न्न दोषः एव मनुष्ठानमपि नाशक्यं पर्यायेण तदुभयानुष्ठानस्य कर्तुं शक्यत्वात्सकृदनुष्ठानस्य चाबोधनात् । स्थाणुर्वापुरुषो वा याति न यातीत्यादौ तु न विकल्पः परिनिष्ठिते वस्तुनि विकल्पासंभवात् किन्तु सन्देहमात्रकथनाय तथाप्रयोग इत्यल मतिप्रपञ्चेन तस्मा त्पदैः पदार्थाः प्रतिपाद्यन्ते प्रतिपादितैश्च पदार्थै र्वाक्यार्थबोधः सम्पद्यते इत्येवमार्गः पदानां क्रियार्थेन समाम्नायो न तत्स्वरूपप्रतिपिपादयिषया तत्स्वरूपाणां प्रमाणान्तरसिद्धत्वात् किन्तु वाक्यार्थबुबोधयिषयेति अभिधावृत्तेः पदार्थोपस्थापकत्वेन क्षीणत्वेऽपि तात्पर्यवृत्ते र पर्यवसाना त्तत एव वाक्यार्थः

पदार्थप्रतिपादनन्तु अवान्तरव्यापारः पाके काष्ठानां ज्वाला इवेति युक्तं तेषां क्रियावाचकपदेन सह समभिव्याहार इति तस्मा त्सुष्ठूक्तं सूत्रकृता क्रियार्थेन समाम्नाय इति । ननु वाक्यार्थबोधमात्रे यदि क्रियावाचकपदेन सह पदानां समाम्नायो हेतुतयापेक्ष्यते तर्हि कथं भाष्यकारः क्रियाशून्यमेव शुक्लो गौरिति वाक्यार्थ मुदाजहार इतिचेत्सत्य मुदाहरणस्या नादरणीयत्वात् पदार्थसंबन्धप्रदर्शनतात्पर्यपरत्वेन तदुपपत्तेः निष्प्रयोजनवाक्यप्रयोगादर्शनात् क्रियावाचकपदं विना वाक्यस्य प्रयोजनवत्त्वासम्भवादिति तत्राप्यानीयता मित्यध्याहारः द्वारमितिवद्वाक्यैकदेशे वाक्यप्रयोगः इति भावः । वाक्यार्थबोधं प्रति पदार्थानां कारणत्वावधारणाय अन्वयव्यतिरेक माह अपि चेति वार्त्तिके तु यत्तु श्रौतः पदार्थो न वाक्यानुरोधेनेति भाष्यं व्याख्याय प्रातिपदिका दुच्चरन्तीति भाष्यं व्याख्यातं ततोन्वयव्यतिरेका-

न्या मिति भाष्यं व्याख्यातं तेन ज्ञायते कलि-
कातामुद्रितपुस्तके भाष्यक्रमोन्यथयितः वार्त्ति-
ककारस्य व्युत्क्रमेण भाष्यव्याख्याने बीजा-
भावात् मया तु यथापाठं भाष्यं व्याख्यायते
तत्क्रमपरिवर्त्तनावसरे एतत्क्रमोऽपि परिव-
र्त्तितः स्यात् एवं पूर्वत्रापि बोध्यम् पदार्थावगम-
व्यतिरेके वाक्यार्थावगमव्यतिरेकं दर्शयति
कदाचिदिति। अपघातादिति अपचारादित्यर्थः
वस्तुतस्तु अपचारादित्येव भाष्यपाठः न्यायर-
त्नाकरे तथैव दर्शनादिति अपचारो विषयान्त-
रासक्तिः यथाचेदृशस्थले पदश्रवणेऽपि पदार्था-
वगमाभावादेव वाक्यार्थबोधो न जात इति
पदार्थावगमव्यतिरेके वाक्यार्थावगमव्यतिरेकः
स्फुटः। नन्वत्र पदावगमव्यतिरेकोप्यस्ति यतः
क्षणान्तरेऽवहितो ब्रूते नाह मेतदवादीधरम् मनो
न्यत्र मेऽभूत् तत्पुनर्ब्रूहीति पदावधारणे तु तत
एव पदार्थस्मरणसम्भवा त्पुनर्ब्रूहि त्यसंगतं
स्यादित आह अपिचेति शुक्लं किंचित्पद-

मपरिस्फुटं दूरादुपगच्छन् तत्रैव प्रदेशे हेषया अश्वासाधारणशब्देनाश्वं तत्खुरशब्देन गतिं चानुमिमानः तत्रेदृशान्यवस्तूना मनुपलम्भाद् गुणजातिक्रियाणां शुक्लाश्वत्वगतीना मेकत्रान्वयसापेक्षाणां योग्यानां मिथोन्वय मुपगच्छति श्वेतोऽश्वो धावतीति तथा चात्र पदाना मश्रवणेऽपि योग्यताकाङ्क्षासन्निधिवशा त्पदार्थानां सामान्यतो ऽन्वयबोधनक्षमत्वं क्लृप्तमेवेति केवल मर्थापत्त्या तद्विशेषनियमः कल्प्यते तथाच मानसापराधस्थले पदार्थज्ञानाभावादेव वाक्यार्थावगमाभावो न पदावगमाभावा त्सत्यपि पदग्रहणे पदार्थापरिज्ञाने वाक्यार्थबोधस्य कुत्राप्यजननादिति भावः पदार्थज्ञाने सत्येव वाक्यार्थबोधात्तस्यैव हेतुत्वं युक्तमित्यभिप्रायेणाह तस्मादिति वाक्यार्थेन वाक्यशक्ति रस्तीत्याह नास्येति पूर्वोक्ताक्षेपं निराकर्तु मनुवदति यत्तु श्रौतः पदार्थ इति प्रबलया गो-पदश्रुत्याऽविशेषेण सर्वगवीषु प्रसक्ताया गोत्वबुद्धे र्दुर्बलेन शुक्लादि सम-

भिव्याहारवाक्येन नीलादिव्यक्तिविशेषा दपवृ-
त्ति रयुक्तेत्याशयः शङ्कितुः समाधानमाह
यत्रेति अयंभावः शक्लोगौरित्यादौ शक्लगो-
त्वादीनां पदार्थानां परस्परासंबन्धे तत्स्वरूपयोः
स्वातन्त्र्येण प्रत्यक्षेणैव सिद्धतया तदभिधाने
प्रयोजनाभावाद् वाक्यमेवानर्थकं स्यात्तदनर्थ-
कत्वे श्रुतेरपि बाधः स्यादिति तत्सार्थक्याबाधा-
य व्यक्त्यन्तरा दपवृत्ति रेव श्रेयसीति वस्तुतस्तु
नात्र श्रुतिविरोधलेशः श्रुतस्य गोत्वस्य लक्षिता-
याश्च व्यक्ते र्न परित्यागः यस्य परित्यागः
क्रियते स नीलादिः न श्रुत इति तथाचोक्तं
"जातिव्यक्ती गृहीत्वैव वयं तु श्रुतिलक्षिते,
कृष्णादि यदि मुञ्चामः का श्रुति स्तत्र बाध्यते"
इति लक्षणापि नात्र बाध्यते श्रुति बाधस्य तु कः
प्रसङ्ग इति भावः केवलं गौ रानीयता मित्युक्ते
कीदृशो गौ रानेय इति यः संशयः स एव शुक्ल
इत्युक्त्या पनीयते न गोत्वं नवा व्यक्तिः संशया-
पनयनं च गोश्रुते रनुगुणमेवेति न श्रुति-

विरोधगन्धः प्रत्युत गोत्वशुक्लयो रसंबन्धे एव श्रुतिविरोधः वाक्यस्यैवा नर्थक्यापत्तेः तयोः प्रमाणान्तरसिद्धत्वा दितिभावः तदेतन्मनसि निधाय सोत्प्रास माह वाक्यार्थोपीति यदपि च सामान्यतः प्रसक्तायाः श्रुते विंशेषेऽवस्थापनं तदपि न सर्वत्र त्याह न सर्वत्र किन्तु क्वचिदेवेत्यर्थः पदार्थहेतुकवाक्यार्थबोधाभ्युपगमादेव नीलादिव्यावृत्ति रर्था त्सिद्धयतो त्यभिप्रायेणाह एवंच सतीति। यदुक्तं न सर्वत्र तद्दर्शयितुमाह प्रातिपदिकादिति तथाच गामिति द्वितीयान्तश्रुतिदशायामेव कर्मान्वितगोव्यक्तिविशेषावगमा त्सामान्यश्रुति रलब्धपदैव वस्तुतस्तु प्रातिपादिका दुच्चरन्ती द्वितीयादिश्रुतिविभक्तिरितिभाष्यपाठो न्यायरत्नाकरे दृश्यते तथाच गवान्वितकर्मत्वविशेषएव श्रुतिदशाया मवगम्यते न गवाश्वादिसाधारण कर्मत्वमात्रमिति सामान्यश्रुति रलब्धपदैव यथा द्वितीयां विनापि गवादिपदं प्रयुज्यते एवं प्रा-

तिपादिकं विना केवलद्वितीयादिप्रयोगः स्यात्
तदा प्रातिपदिकार्थाविशेषितं कर्मत्वं सामान्य-
रूपेण लभ्येतापि नतु तदस्ति केवलप्रत्ययप्रयो-
गस्या साधुत्वात् यत्रापि इरियानित्यादौ केवल-
प्रत्ययः प्रयुज्यते तत्रापि तादृशप्रत्ययस्य प्रकृति-
प्रत्ययोभयार्थकत्व मेवेति प्रकृत्यर्थोपरक्तस्यैव
प्रत्ययार्थस्य भानं न केवलप्रत्ययार्थस्येतिभावः
विशेषयतीति विशेषकः यत्र प्रातिपदिका-
दुच्चरन्ती द्वितीयाविभक्ति र्दृश्यते तत्र प्राति-
पदिकार्थो द्वितीयार्थस्य कर्मत्वस्य विशेषकः
प्रकृत्यर्थानुरक्तस्यैव प्रत्ययार्थस्य भानं न केवल-
स्येत्यर्थः पदसंघाता इति। ननु संबन्धानित्यत्वा-
क्षेप एव कर्तुरस्मरणादिना परिहृतो न वेदा-
नित्यत्वाक्षेप स्तत्कथ मुच्यते परिहृतमिति येन
हेतुना संबन्धानित्यत्वं परिहृतं तेनैव वेदानित्य-
त्व मपि परिहर्तुं शक्य मिति परिहारहेतूना म-
भिहितत्वा त्परिहारोपि कृतप्राय इत्यभिप्रायेण
परिहृत मित्युक्तेः।

सू॰लोके सन्नियमात् प्रत्योगसन्निकर्षः स्यात् ॥ २६ ॥ (सि॰)

भा॰ लौकिकेषु पुनरर्थेषु प्रत्यक्षेणार्थ मुपलभ्य,सन्नियमः सन्निबन्धनं शक्यं तत्र संहर्तुम् एवञ्जातीयकानि वाक्यानि नीलोत्पलवनेष्वद्य । ३८ । २ । इति । तस्मात् अग्नि होत्रं जुहुयात् स्वर्गकामः इत्येतेभ्य एव पदेभ्यो ये अर्था अवगताः, तेभ्यः एवैतदवगम्यते अग्निहोत्रात् स्वर्गो भवतीति पदेभ्य एव पदार्थप्रत्ययः पदार्थेभ्यो वाक्यार्थ इति

सप्रतिसाधनत्वं च संघातत्वस्य हेतोः सर्ववेदाध्ययनं गुर्वध्ययनपूर्वकं वेदाध्ययनत्वादधुना वेदाध्ययनवदिति नच भारतादिष्वपि एव मनुमानसंभवा त्तेषामपि नित्यत्वं स्यादिति वाच्यम् तत्र कर्तृस्मरणेनैव मनुमानासंभवात् नच प्रजापति वेंदानसृजत इत्युक्त्या वेदेऽपि तदस्तीति वाच्यम् अर्थवादमूलकताहृशस्मृतेरनुभवमूलकत्वाभावेना प्रमाणत्वात् यदि कश्चिद्वेदस्य कर्तास्या त्तर्हि तत्प्रणयनकाले केनचिदुपलब्धो भवेत् तथाच स उपलब्धकर्तृकः

परस्मै कथयेद्यमस्य करोति सोऽप्यन्यस्मै सो-
ऽप्यन्यस्मै इति परंपरया भारतादौ व्यासादेरि-
वाधीयानकर्तृकं स्मरणं नियमेन स्यात् नतु
तदस्तीति तादृशस्मरण मर्थवादमूल कमेव ना-
नुभवमूलक मिति न प्रमाणम् नचार्थवाद एव
प्रमाण मस्तु किमत्र प्रमाणान्तरान्वेषणेन स्तु-
तिपराणा मर्थवादानां स्ववाच्यार्थे प्रामाण्या-
भावस्या र्थवादाधिकरणे वक्ष्यमाणत्वात् नच तादृ
शस्मरणप्रामाण्याय मूलान्तरमेव तर्हि कल्प्यतां
नहि कल्पनायामस्ति कश्चित्प्रतिरोध इति न
अस्ति तावत्प्रकृते प्रतिरोधः कः अर्थवाद एव
कथम् इत्थं पारंपर्याभावा त्स्मरणस्या नुभव
मूलकत्वे निरस्ते तदन्यथानुपपत्या किंचिन्मूलं
कल्पनीय मित्यपेक्षाया मयमेव तत्र मूलं भवत्क-
ल्पनाबीज मन्यथानुपपत्तिं प्रतिहन्ती त्यवदधात
नचेदं स्तुतिपरमिति कथमत्र मूलं स्यात् अन्य-
परवाक्यादपि भ्रान्तिसम्भवात् दृश्यते हीदानी-
न्तनपुरुषाणां तत्कार्यत्वस्मरणभ्रान्तौ मूलत्वेनेद

मेवेति ध्येयम् इति कल्पकलिकायां वेदनित्यताधिकरणम् ।

सू० वेदांश्चैके सन्निकर्षं पुरुषाख्याः ॥ २७ ॥ (पू० १)

भा० उक्तं (४।८।) चोदनालक्षणोऽर्थो धर्म्म इति, यतो न पुरुषकृतः शब्दस्यार्थेन सम्बन्धः । तत्र पदवाक्याश्रय आक्षेपः परिहृतः । इदानी मन्यथा ऽऽक्षेप्स्यामः 'पौरुषेया श्चोदना' इति वदामः, सन्निकृष्टकालाः कृतका: वेदा इदानीन्तनाः तेच चोदनानां समूहाः, तत्र पौरुषेयाश्चेत् वेदाः, असंशयं पौरुषेयाः चोदनाः । कथम् ? पुनः कृतका वेदा इति केचिन्मन्यन्ते ! यतः पुरुषाख्याः, पुरुषेण हि समाख्यायन्ते वेदाः । 'काठकं, कापालकं, पैप्पलादकं, मौहुलमिवि । नहि सम्बन्धादृते समाख्यानं, नच पुरुषस्य शब्देन अस्ति सम्बन्धः, अन्यतः कर्त्ता पुरुषः, कार्य्यः शब्दः इति । ननु प्रवचनलक्षणा समाख्या स्यात् । नेति ब्रूमः । असाधारणं हि विशेषणं भवति एक एव हि कर्त्ता बहवोऽपि प्रब्रूयुः । अतोऽस्मर्य्यमाणोऽपि चोदनायाः कर्त्ता स्यात् । तस्मान्न प्रमाणं चोदनालक्षणोऽर्थो धर्म्म इति ।

सू० अनित्य दर्शनाच्च ॥ २८ ॥ (पू० २)

भा० जननमरणवन्तश्च वेदार्थाः श्रूयन्ते 'ववरः प्रावाहणिरकामयत कुसुरुविन्दः 'औद्दालकि रकामयत' इत्येव मादयः ।

उद्दालकस्यापत्यं गम्यते औद्दालकिः, यद्येवं, प्राक् औद्दालकि-जन्मनः, नायं ग्रन्थो भूतपूर्वः । एवमप्यनित्यता ।

सू० उक्तन्तु शब्दपूर्वत्वम् ॥२९॥ (सि०)

भा० उक्त मस्माभिः शब्दपूर्वत्वमध्येतृ णाम् । केवलं आद्यो-परिहारो वक्तव्यः, सोऽभिधीयते ।

सू० आख्याप्रवचनात् ॥३०॥ (उ०) १

भा० यदुक्तं (१ पू०) कर्तृ लक्षणा समाख्या काठकादयेति । तदु-च्यते । नेयमर्थापत्तिः, कर्तृ भिरपि ह्येनामाचक्षीरन्,प्रकर्षेणवचनं अनन्य-साधारणं कठादिभिरनुष्ठितं स्यात्, तथापि हि समाख्यातारो भवन्ति । स्मर्य्यते च 'वैशम्पायनः सर्वशाखाध्यायी, कठः पुनरिमां केवलां शाखा-मध्यापयांवभूवेति' । स वहुशाखाध्यायिनां सन्निधा वेकशाखा-ध्यायी अन्यां शाखा मनधीयानः, तस्यां प्रकृष्टत्वा दसाधारण मुप-पद्यते विशेषणम् ।

सू० परन्तु श्रुतिसामान्यमात्रम् ॥३१॥ (उ० २)

भा० यच्च (२ पू०) प्रावाहणि रिति । तन्न, प्रवाहणस्य पुरुषस्या सिद्धत्वात् न प्रवाहणस्यापत्यं प्रावाहणिः । प्रशब्दः प्रकर्षे सिद्धः, वहतिश्च प्रापणे, नत्वस्य समुदायः क्वचित् सिद्धः इकारस्तु यथैवापत्ये सिद्धः, तथा क्रियायामपि कर्तरि । तस्माद् यः प्रवाहयति

स प्रवाहणिः । बवरः इति शब्दानुकृतिः । तेन यो नित्योऽर्थः तमेवैतौ शब्दौ वदिष्यतः । अतः उक्तम् परन्तु श्रुतिसामान्यमात्रम् इति ।

वेदां श्चैके सन्निकर्षं पुरुषाख्याः इति सूत्रम् पदपदार्थसंबन्धानित्यत्वप्रयुक्त आक्षेप स्तेषां नित्यत्वसाधनेन परिहृत इदानीं समाख्या-वशेन वेदस्य पौरुषेयत्वावबोधा त्तद्घटकचोद-नानां पुनरप्रामाण्यमाक्षिप्यते पौरुषेया इति ननु समाख्यया पौरुषेयत्वाक्षेपो न युक्तः साहि सामान्यतः प्राप्तं विशेषतो नियमयति यथा दक्षिणया परिक्रीताना मृत्विजां वैदिके कर्मणि यथेष्टं कर्तृत्वप्राप्तौ आध्वर्यव मित्यादिसमा-ख्यया अध्वर्यो रेव तत्र कर्तृत्वं नियम्यते आध्वर्यवं कर्म स एवानुतिष्ठति नान्य एवं वेदस्य सामान्यतो न केनापि प्रमाणादि ना कर्तृ-त्वं प्राप्तं यन्नियमाय समाख्या व्याप्रियेत किंच कठादिसमाख्या कठादिप्रोक्तत्वेना प्युपपद्यते इति न नियमेन तत्कर्तृकत्वं साधयितुं क्षमते तेन कृत मिति वत्तेन प्रोक्त मित्यर्थेऽपि तदुपपत्ते रिति चेन्न वैदिकं वाक्यं पौरुषेयं वाक्यत्वा

त्कालिदासादिवाक्यव दित्यनुमानेन सामान्यतः कर्तृजन्यत्वप्राप्तौ काठका समाख्यया तज्जन्यत्वं विशेषतो नियमयितुं शक्य मित्यभिप्रायात् नच वचनान्तरसाधर्म्यप्रयुक्ततदाक्षेपः पूर्वमेव परिहृतः तत्कुतः पुनरिदानीं स एवाक्षेपः क्रियते इतिचे दयमभिप्रायः वेदपौरुषेयत्वनिराकरणार्थ मिदं प्रकरणं तेन पौरुषेयत्वनिमित्तक स्तदाक्षेपोऽत्रैवोपन्यसनीयो निरसनीयश्च पूर्वत्र हृशाक्षेपतन्निरासौ त्वानागतावेक्षणेनोपन्यस्तौ एतत्प्रकरणाभावात् किंच भो भो भगवन्तः सभ्याः क्वेदं दृष्टं क्ववा श्रुतं लोके यद्वाक्येषु पदानां रचना नैसर्गिकी भवति 'यदि स्वाभाविकी वेदे पदानां रचना भवेत् पटे हि हन्त तन्तूनां कथं नैसर्गिकी न सा' शन्नो देवी रभीष्टये नारायणं नमस्कृत्य अस्त्युत्तरस्यां दिशि देवतात्मेत्यादितुल्ये रचनात्वे क्वचि त्कर्तृपूर्वकत्व मपरत्र तद्विपर्य इति महान् व्यामोह इति परोक्तरीत्या वेदवाक्यरचनान्यथानुपपत्त्या वेदेऽपि कर्ता प्रसज्यते

किंच बर्बरः प्रावाहणि रित्यनित्यार्थवाचकशब्द-स्य वेदे दर्शनाद्वेदः कृतक इति मति र्भवति प्रवाहणस्या पत्यं प्रावाहणि रिति व्युत्पत्या प्रवाह-णिशब्दार्थनिर्णयो भवति तेन ज्ञायते प्रवाहण-पुत्रोत्पत्त्यनन्तर मयं वेदः कृतः ततः पूर्वन्त्वयं कीदृशः स्यादिति वेदस्य कश्चित्कर्ता अवश्यमेवा श्रयणीय इति पूर्वपक्षसंक्षेपः तदेतद्भाष्ये दर्श-यति अन्यथा वक्ष्याम इत्यादिना। सन्निकृष्ट काला इति सन्निकर्ष मिति सूत्रावयवव्याख्यानं यतः कठादिपुरुषेण ख्यायन्ते वेदा अत स्तत्स-न्निकृष्टकालाः अन्यथा इदानीन्तनाना मिव कठादीना मपि तत्र निर्देशो न स्यात् तत्सन्नि-कृष्टकालत्वा त्तत्कृतत्वं वेदे संभवति भाष्यस्येयं योजना इदानीन्तना वेदास्त त्सन्निकृष्टकाला अत स्तत्कृता इत्यर्थः ननु वेदस्य कृतकत्वेऽपि किमायातं चोदनानामित्यत आह तेचेति पुरुषा-ख्या इति हेतुव्याचिख्यासया पृच्छति कथमिति द्वितीयोपपत्तये योग्यक्रियां दर्शयति मन्यन्ते

इति कार्यकारणभावः संबन्धः समाख्यानिमित्त इत्याह नहीति प्रवचनस्य समाख्यानिमित्तत्वं निरस्यति नेति प्रवचनकर्तृत्वयो र्भेदं दर्शयति असाधारणमिति असाधारणनिमित्तक एव व्यपदेशो लोके दृष्टः अस्मरणेऽपि समाख्यातस्ता-त्कर्ता सिद्ध्यतीत्याह अत इति आक्षेप मुपसंहरति तस्मादिति अनित्यदर्शनाच्चेति सूत्रम् अनित्यार्थाभिधाना दपि वेदोऽनित्य एव नहि एवंजातीयकार्थनित्येनाभिधातुं शक्यः तदानी मर्थाभावेन विवक्षासंभवात् अप्रमाणत्वापत्तेश्च पूर्वंतदर्थाभावादिति। उक्तं तु शब्दपूर्वत्व मिति सूत्रम्। वेदाध्ययनं गुर्वध्ययनपूर्वक मित्यभ्युपगमादाह उक्तमिति सूत्र मवतारयितु माह स इति। आख्याप्रवचना दिति सूत्रम्। नेयमर्थापत्ति रिति काठकसमाख्यान्यथानुपपत्ति र्वेदस्य जन्यत्वे यत् प्रमाण मुक्तं तदसत् साहि प्रवचन-निमित्तेना न्यथाप्युपपद्यते इतिभावः प्रवचनस्याप्य साधारणत्वं दर्शयति अनन्येति वस्तुतस्तु समा-

ख्यया न तत्कर्तृकं साधयितुं शक्यते सामा-
न्यत स्तदप्राप्तेः कर्त्तुःस्मरणे न किंचिन्मूल
मित्युक्तमेव प्रयोजनाभावादपि नास्य कर्ता
नहि कर्तृकल्पनातो वेदस्य किंचित्प्रयोजनं निर्व-
हति नच समाख्यैव तत्र मूल मिति शङ्क्यम्
प्रवचनेनापि तदुपपत्तेः एका दुर्बलाङ्गभूता समा-
ख्या भूयासं प्रधानं-शब्दराशिं नैव बाधितु
मुत्सहते तदुक्तं "श्रुत्यादे दुर्बला चासौ न शक्ता
तानि बाधितुम् अङ्गभूयांस मेकेयं शब्दराशिं
न बाधते" इति अथवा अवयवार्थशून्या रथन्त-
रादि वद् रूढि रेवेयमस्तु नच रूढिस्वीकारे
श्रुतिसामान्यमिति सूत्रविरोधः, अनित्यार्थ-
कत्वाभावेन समाख्याया मपि तदुपपत्तेः विरूप-
सामव त्सत्तामात्रेणैव कठो विशेषणं भवतीति
स्पष्ट मन्यत्र तथाचोक्तं 'सति साधारणत्वे वा
सम्भवेन विशेषणम् यथा वैरूप्य सामेति सत्त-
यैव प्रतीयते" इति अग्नीषोमयो र्विशिष्टयो रेव
देवतात्व मिव यदि प्रवचनत्व मनेकपुरुषसापेक्षं।

धर्मः स्यात्तर्हि यथा अग्नीषोमीयहविषः केवले नाग्नेयशब्देन व्यपदेशो न भवति न भवेदेवं शाखाया अपि काठकशब्देन व्यपदेशः तत्तु न तथा किन्तु मातृत्ववत्प्रत्येकापेक्षमिति प्रत्येकशब्देन व्यपदेष्टुं शक्यते डित्थडवित्थयो र्माता डित्थमातेति वत्कठतदितरपुरुषप्रोच्यमानापि शाखा कठशाखेति व्यपदिश्यते नच तत्प्रवचनस्य पुरुषान्तरसाधारणत्वे कठेनेव पुरुषान्तरेण किन्न साख्यायते व्यवहारफलकाख्यानस्यैकशब्देनैवोपपत्तौ पुरुषान्तरेण तदाख्याने प्रयोजनाभावात्। नच तेनैवाभिधाने नियमाभावात् कदाचित्पुरुषान्तरेणा प्यभिधानप्रसक्तिः सति कार्ये निमित्तानुसरण मिति न्यायेन निमित्तस्य सतः निरूपणे एवास्माक मधिकारात् समाख्यायाः अस्मदाद्यधीनत्वाभावे नेदृशपर्यनुयोगानर्हत्वात् दृश्यते च साधारणस्या प्यसाधारणशब्देन निर्देशः अगस्त्यतीर्थं कुमारिल तिर्थ मित्यादि। परन्तु श्रुतिसामान्यमात्र मिति सूत्रम् अनित्यार्थकत्वं

परिहरति यच्चेत्यादिना भाष्य मिदं निगदव्या-ख्यातम्। कृते वा विनियोगः स्या त्कर्मणः संबन्धादिति सूत्रम्।

सू० कृतेवा विनियोगः स्यात् कर्मणः सम्बन्धात् ॥३२॥

भा० अथ कथमवगम्यते—नायमुन्मत्तबालवाक्यसदृश इति? तथाहि पश्यामः वनस्पतयः सत्रमासत, सर्पाः सत्र मासत इति, यथा, जरद्गवो गायति मत्तकानि, कथंनाम जरद्गवो गायेत्? कथं वा वनस्पतयः सर्पा वा सत्र मासीरन्निति। उच्यते—विनियुक्तं हि दृश्यते, परस्परेण सम्बन्धार्थम्। कथं? ज्योतिष्टोमः इत्यभिधाय कर्तव्यः इत्युच्यते। केन? इत्याकांक्षिते सोमेन इति किमर्थं? इति स्वर्गाय इति। कथमिति इत्थं; अनया इति कर्तव्यतया इति। एवमवगच्छन्तः, पदार्थै रेभिः संस्कृतं पिण्डितं वाक्यार्थं कथमुन्मत्त-बालवाक्यसदृश मिति वक्ष्यामः?

ननु अनुपपन्न मिदं दृश्यते,—वनस्पतयः सत्र मासत इत्येव-मादि। नानुपपन्नम्। न अनेन अग्निहोत्रं जुहुयात् स्वर्गकामः—इत्येवमादयोऽनुपपन्नाः स्युः। अपिच वनस्पतयः सत्रमासत इत्येव-मादयोऽपि नानुपपन्नाः, स्तुतयो ह्येताः सत्रस्य, वनस्पतयो नामा-चेतनाः इदं सत्र मुपासितवन्तः, किं पुनर्विद्वांसो ब्राह्मणाः। तद्यथा लोके, सन्ध्यायां मृगा अपि न चरन्ति, किं पुनर्विद्वांसो ब्राह्मणा इति।

अपिच अविनीत:सुहृदुपदेशः सुप्रतिष्ठितः कथमिवाशङ्क्येत—उन्मत्तबालवाक्यसदृशः इति। तस्माच्चोदनालक्षणोऽर्थोधर्म इति सिद्धम्।

इति श्रीमच्छबरस्वामिनः कृतौ मीमांसाभाष्ये प्रथमस्य अध्यायस्य प्रथमः पादः। तर्कपादोऽयम्।

अयुक्तार्थकत्वे नोत्तरवाक्य वदप्रमाणत्व माशङ्कते वनस्पतय इति परस्परान्वितार्थकत्वाप्रामाण्यमेवेत्याह उच्यते इति तावतापि वनस्पतय इत्यादीनां प्रामाण्यं समर्थित मित्याह अनुपपन्ना इति स्तुतिपरत्वेन स्वार्थे तात्पर्याभावात्त्राप्रमाणत्वेऽपि स्वतात्पर्यार्थे प्रामाण्य मव्याहतमेवेत्याह स्तुतय इति अतिस्पष्ट मत्रत्यं भाष्यं न व्याख्यान मपेक्षते इति न पराक्रम्याभिहित मस्माभि रिति शिवम्॥

इति श्रीलक्ष्मीगर्भजेन पं० श्रीबलभद्रदत्तात्मजेन म० म० पं० श्रीहरिहरकृपालुद्विवेदिना विरचिता कल्पकलिका तर्कपादान्ता समाप्ता।

श्रीवैक्रमे नागनगाङ्कचन्द्रमिते कुजेऽब्दे शुचि पूर्णिमायाम्।
इमामहं पाटलिपुत्रमध्यविद्यालयस्थोऽरचयं मनोज्ञाम्॥
अस्मत्पितृपितामहेन सुधिया धाराधरेणस्वयस्।
लब्धायां भुवि निर्विवाद मभितो वासाय यो वासितः॥।
शुद्धःसार्थक एव पण्डितपुरं ग्रामः प्रयागात्स नः।
सार्द्धक्रोशचतुष्टयीपरिमितोऽत्राच्यां दिशि भ्राजते॥

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पंक्तिसंख्या
सद्राष्य	सद्राष्यं	१	११
तर्कै	तर्कैः	१	१२
त्रयो	त्रयी	२	४
लोपाय चेष्टैः	लोपायचेष्टैः	२	७
प्राच्यापद्या	प्राच्यपद्या	२	८
सर्वैसैः	सर्वज्ञैः	२	७
परिसूखलन्	परिस्खलन्	२	१४
मिघ	सिध	२	१७
कवि	क त्रि	३	२
मेयेर्थैप	मेयेर्थेऽपि	३	६
नीतार्थीनाम्	नीतार्थिनाम्	३	१६
प्रज्ञावान्	प्रेक्षावान्	४	३
सबन्ध	संबन्ध	४	५
चैकार	चकार	४	८
प्रवृत्य	प्रवृत्य	५	७
वा:यार्थ	वाक्यार्थ	५	६
प्रतिप्रदान	प्रतिपादन	५	१३

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पंक्तिसंख्या
तरपेक्षया	तरापेक्षया	५	१५
वश्कत्वात्	वश्यकत्वात्	५	१८
शद्वाथ	शब्दार्थ	७	१
मीमांशास्त्र	मीमांसाशास्त्र	७	२
रसायनाद्यानतर्यं	रसायनाद्यानन्तर्यं	७	१४
निःप्रयोजत्वात्	निष्प्रयोजनत्वात्	८	६
भिधने	भिधाने	८	७
भिधर्मिधाने	भिधाने	८	८
व्यथ	व्यर्थ	८	१०
निप्रमाण	निष्प्रमाण	८	१३
मवान्तर	मावान्तर	९	५
मङ्ग	माङ्ग	९	१६
ताध्या	नाध्या	१०	९
रूयायते	ख्यायन्ते	१०	११
वाख्येयाति	व्याख्येयानि	१०	१२
नेकर्थं	नेकार्थ	११	८
स्वमपि	स्यापि स्वी	११	१३
व्याख्यानं	व्याख्यान	११	१५
सानी	सन्ति	११	१७
प्रवत्ति	प्रवृत्ति	११	१८
ह्रिद्व	दिवत्	१२	२

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पंक्तिसंख्या
यदि	पदिश्येत	१२	५
प्रीत्या	प्रतीत्या	१२	७
न्याय्यतद्वा	न्याय्यतया	१२	८
प्रतीयाता	प्रतीता	१२	९
वृत्तिः	वृत्ति	१२	१०
बोध्य	बोध्या	१२	११
प्रकृतिप्रत्यत्यो	प्रकृतिप्रत्ययो	१२	११
वक्तु	वक्तु	१२	१३
व्यायन्ने	व्याख्यायन्ते	१२	१६
सत्रा	सूत्रा	१२	१८
सत्रे	सूत्रै	१२	१८
सूत	भूत	१३	१
स्वातन्त्रेण	स्वातन्त्र्येण	१३	२
सुत्राणि	सूत्राणि	१३	३
सुत्रेपु	सूत्रेषु	१३	४
व्याख्येपु	व्याख्येयेषु	१३	४
साति	सति	१४	९
येप	य	१५	५
र्थकत्व	र्थकत्वं	१५	८
कत्व	कत्वं	१५	९
द्वय	द्वयं	१५	१२

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिसंख्या
थः	र्थः	१६	१
क्यत्य	क्यस्य	१६	२
पास्योपेद्य	पयि	१६	५
हुंफत्त	हुंफड़ा	१६	१०
उताथ	उतार्थ	१६	११
स्फुरा	स्फुटा	१६	१२
वदे	वेद	१६	१५
कतुं	कर्तुं	१६	१८
किमथ	किमर्थ	१८	६
ज्योनि	ज्योति	२०	३
दुःष्येयु	दुष्येयु	२२	३
हविव	हवि	२३	३
ग्रह	ग्रहे	२५	८
पदर्यमे	पदद्वयमे	२७	४
ख्याने	ख्यानं	२८	५
धम	धर्म	३०	१७
अहन्य	अन्य	३१	१८
द्वदा	द्वेदा	३२	४
किचि	किञ्चि	३२	५
वैदा	वेदा	३२	११
क्तयाव	क्त्यैव	३२	१३

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पंक्तिसंख्या
शद्व	शब्दः	३५	३
अर्थे	अर्थं	३८	८
न्तय	न्तयं	४०	५
कवत्वं	कत्वं	४२	१
सान	स्नानं	४२	१७
विधिवि	विधिर्वि	४४	२
य्या	प्या	४४	६
चिद	चिद्	४५	१
क्रीयते	क्रियते	४५	१४
धर्म	धर्मं	४६	७
यादी	यद्वी	४७	७
न्तय	न्तर्य	४८	४
ल्य	ल्यप्	४८	८
बाध्यते	न बाध्यते	४८	१६
धर्मं	धर्मं	४८	१८
गच्छ	गच्छे	४६	२
स्नयाद्	स्नायाद्	४६	१३
नेयम	नेयम्	५	७
धम	धर्म	५१	१२
ष्ठाय	ष्ठाप	५२	८
धम	धर्मं	५३	१

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिसंख्या
कचि	काचि	५४	१६
निणय	निर्णय	६०	१
निष	निषु	६०	८
माकत्व	माणकत्व	६०	१७
प्रवृत्त	प्रवृत्ते	६१	७
वात	वात्	६१	१८
धम	धर्म	६२	७
धमः	धर्मः	६२	१७
त्येन	त्यनेन	६३	१३
त्वचे	त्वाचे	६४	१८
सगतः	सर्गतः	६५	११
तदुत्याद	तदुत्पाद	७१	१०
इन्द्रस्य	इन्द्रियस्य	७५	३
दोष	दोषा	७६	१६
कास्मि	कस्मि	७६	१७
घात	घत	७७	१६
शक्ति	शुक्ति	७९	२
तदानास्तवा	तदनाप्त	८०	१७
धमि	धर्मि	८१	१०
मित्येवा	मित्येव	८५	१८
कत्था	कत्वा	८६	६

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिसंख्या
एव भा	एव मा	८६	१२
कुव्हा	कुड्या	९०	८
सत्याभानि	सत्यामग्नि	९१	१७
तजेत	यजेत	९२	२
इत्यचो	इत्यादि	९२	२
विज्ञाने	विज्ञानेन	९४	४
विष	विप	९४	१७
च्चेत्	तच्चेत्	९४	१८
पश्यतं	पश्यत	९५	१८
शक्तिशुकत्वं	शुक्ति शकलं	९५	१८
विरोधो	विरोधे	९६	१२
कारण	कारणम्	९६	१४
स्यपि	स्यापि	९७	१४
नाम	मान	९७	१६
शक्य	शक्यं	९८	२
मतत्	तत्	१०३	६
प्रमाण्य	प्रामाण्य	१०४	९
स्तनि	स्तन्नि	१०५	२
सव	सर्व.	१०५	६
रंन	रेन	१०६	४
मपिवि	मप्यवि	१०८	

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिसंख्या
तदर्दी	तद्दर्शी	११०	५
माणा	माण्या	११०	११
वङ्क	शङ्क	११२	१३
प्रमा	प्रामा	११२	१८
प्रमा	प्रामा	११३	१०
पौरूषेयं	पौरूषेय	११३	१७
प्रमू	न्यम्	११४	४
भूतांज्ञा	भूतार्थज्ञा	११५	६
निर्णय	निर्णय	११७	६
मभ्युपेक्ष्य	मनभ्युपेय	१२०	१४
न्य	न्यत्वा	१२१	१४
दिनि	दिति	१२३	१५
जापय	जाय	१२४	१५
नुमानु	नुमाना	१२४	१७
धी	धीन	१२५	१८
पदाथ	पदार्थ	१२६	१६
दिः पश्ये	दि पश्ये	१२७	६
दशना	दर्शना	१२७	१७
दश	दर्श	१३०	२
पत्तः	पत्तेः	१३२	६
यत्तौ	पत्तौ	१३३	१८

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिसंख्या
तार्थ	तानर्थ	१३५	१८
श्वेना	श्येना	१३७	११
श्वेना	श्येना	१३८	२
च्चति	च्चेति	१३८	५
कर्तृता	कर्तव्यता	१३९	११
दम्रा	दम्रो	१३९	१७
दुःखातु	दुःखमनु	१४०	९
श्चेति	श्चे	१४०	११
दृष्टान्तरस्य	दृष्टान्तस्य	१४१	९
मण्या	माण्या	१४२	१४
जन	जनन	१४२	१५
शद्रा	शूद्रा	१४३	३
निरय	र्निरय	१४३	४
दग्निसोमय	दग्नीषोमीय	१४३	१०
तदपि	यदपि	१४३	१६
त्वव	व	१४७	७
सूत्रं चन	सूचन	१४७	१५
नाधेगत	नाधिगत	१४८	६
सत्रे	सूत्रें	१४९	९
याथ	योर्थ	१५२	१३
दिड़े	दिड	१५४	३

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिसंख्या
वत्तना	वर्तना	१५८	१४
भ्युय	भ्युप	१६१	१२
द्वष	द्द्वोष	१६२	१७
संगं	स गं	१६७	४
विकृष्ट	विप्रकृष्ट	१६८	१२
वत्तके	वर्तके	१६९	१
दू प्राप्य	दुप्राप्य	१६९	७
स्वन्यत्र	स्त्वन्यत्र	१७१	१०
तहि	तर्हि	१७३	११
रपेक्ष	रापेक्षा	१७३	१४
गमपि	गमेऽपि	१७५	१०
द्वद्धे	द्वद्धे	१७६	८
वशेषिक	वैशेषिक	१७६	१४
चोदन	चौदन	१७८	३
कष	कर्ष	१७८	११
दूपभय	दुभय	१७९	१०
वयधि	वंयधि	१८१	१
लाष्ठ	काष्ठ	१८१	११
त्वक	त्मक	१८२	३
वौद्ध	वौद्धा	१८२	१३
धर्म	धम	१८७	१२

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पंक्तिसंख्या
निवि	निर्वि	१८७	१७
चितं	चित	१८८	१५
नाम	ज्ञान	१८९	९
रति	इति	१८९	१३
गा	गो	१८९	१८
साहश	सादृश्य	१९०	२
मरायां	मण्या	१९१	१३
त्त्रावि	त्त्राति	१९१	१६
क्रियाकत्वा	क्रियानाश्रयत्वा	१९२	१
कुश्नादौ	स्थूणादौ	१९२	९
कुरूपस्य	स्थूणादेः	१९२	१०
क्षपार	कूपार	१९२	१३
हिमगिरि	हिमगिरिं	१९२	१४
निरिक्षमाण	निरीक्षमाण	१९२	१५
कमना	कर्मता	१९२	१६
मातण्ड	मार्तण्ड	१९३	१
तथीक्तः	तथोक्तः	१९३	९
हातं	होतं	१९३	१३
धम	धर्म	१९४	११
प्रमाण	प्रमाणं	१९८	१२
वयर्थ्या	वैयर्थ्या	२०१	१४

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पंक्तिसंख्या
यात्	स्यात्	२०६	४
णव	णैव	२०७	१
पयिक्यायाः	पयिक्याः	२१६	१
सद्रुप	तद्रुप	२१८	१५
चोदान	चोदना	२१६	१६
आस्त	अस्ति	२२६	४
मात	मिति	२२८	१
पूव	पूर्व	२३४	१३
सन्निकर्षेऽ	सन्निकर्षोऽ	२३७	१०
निणय	निर्णय	२४०	४
रवा	इवा	२४१	४
वोच्छा	वौद्धा	२४२	५
वाह्याथ	वाह्यार्थ	२४३	११
ह्यभाव	स्वभाव	२४६	१४
वाह्याथ	वाह्यार्थ	२४७	१
माथिक	मार्थिक	२५०	७
धूमि	धर्मि	२५१	१४
ना	नो	२५८	४
पता	पेता	२५८	४
सर्व	सर्व	२५६	५
वाक्याथ	वाक्यार्थ	२५६	६

अशुद्धम्	शुद्धम्	पृष्ठसंख्या	पङ्क्तिसंख्या
निवि	निर्वि	२६०	१६
सव	सर्व	२६०	१२
स्वोकारे	स्वीकारं	२६१	१८
मेवेत	मेवेति	२६४	६
शक्ता	शुक्ता	२६५	१०
अन्नादि	अनादि	२७२	६
ाचायं	ाचार्या	२७२	११
दावाव	दावव	२८६	४
त्यथः	त्यर्थः	२६३	४
त्यपण	तर्पण	२६३	१७
वत	वर्त	२६३	१८
पूर्वं	पूर्वं	२९५	४
त्याच्च	त्वाच्च	२६६	६
दृथ	दर्थ	३०१	१२
पूव	पूर्वं	३०१	१२
मथ	मर्थ	३०२	३
दृथ	दर्थ	३०४	२
ज्ञान नानयो	ज्ञानज्ञेययो	३०४	८
अथ	अर्थ	३०५	१
अथ	अर्थ	३०७	१
प्रदश	प्रदर्श	३०७	१

अशुद्धम्	शुद्धम्	पृष्ठ संख्या	पंक्ति संख्या
महती	महती	३०७	११
नाथ	नार्थ	३०८	४
मेवा	मेवाव	३०६	६
माथिक	मार्थिक	३०६	१०
न	र्न	३११	६
नाचितः	नोचितः	३११	१२
सवत्र	सर्वत्र	३१२	६
समथ	समर्थ	३१४	१
पूव	पूर्व	३१४	३
निदिष्ट	निर्दिष्ट	३१६	२
व्याप्ति न	व्याप्ति र्न	३१६	१८
धम	धर्म	३२०	१५
स्यम्नि	स्याम्नि	३२१	१३
ष्णत्वा	ष्णत्व	३२७	१०
श्रोत्राम्ना	श्रोत्राम्ना	३२६	१०
त्तहि	र्त्तार्हि	३३६	१२
माज्या	मात्रा	३४४	१४
व्यत्स्य	व्यत्त्य	३४८	१०
प्रत्याय च	प्रत्यायय	३४९	१३
त्वात् न	त्वान्न	३५१	२
कत्वन	कत्वेन	३५२	१
स्मय	स्मर्य	३५६	१

अशुद्धम्	शुद्धम्	पृष्ठ संख्या	पंक्ति संख्या
श्रया	श्रय	३५६	८
जावन	जीवन	३६६	१२
मवं	मेवं	३६८	१५
स्वभावः	स्वाभावः	३६९	६
रंकोनु	रेकानु	३७७	७
रूपारूपादि	रूपादि	३७७	७
मात्रव	भावः	३७७	१२
माधुय	माधुर्य	३७६	७
स्मय्त्र	स्मर्य्य	३८१	१
लिंग	लिंगं	३८१	१०
दशना	दर्शना	३८१	१८
भेद	भेदहं	३८४	१८
कम	कर्म	३६३	१
त्तहि	र्त्तांहि	३९७	१
कारका	कारको	४०५	१६
प्रयाग	प्रयोग	४०८	८
शद्वाथ	शब्दार्थ	४०६	६
विफलः	विकलः	४११	१३
त्यच	त्यत्र	४१४	६
श्रात्र	श्रोत्र	४१४	१४
द्रतादि	द्रुतादि	४१८	७
वर्ण रिति	वर्ण इति	४२१	४

अशुद्धम्	शुद्धम्	पृष्टसंख्या	पंक्तिसंख्या
द्रूण	द्रूर्ण	४२१	
मथ	मर्थ	४२१	१४
दाषः	दोषः	४२७	१८
जन्यनिष्ठा	जन्य व्रीहिनिष्ठा	४२८	१८
षपत्ता	पपत्तौ	४२६	५
संकार	संस्कार	४२८	१४
तै	तैः	४३२	१३
गम	गमे	४३३	४
कोऽथ	कोऽर्थो	४३४	११
वर्णाभ्यः	वर्णेभ्यः	४३६	१४
इत	इति	४३७	१
स्याथ	स्यार्थ	४३८	४
भिन्ना	भिन्ना	४४५	१
चतुविध	चतुर्विध	४४६	५
रूपणा	रूपेण	४५५	१६
भेदया	भेदयो	४५५	४
जात्व	गोत्व	४५५	१४
कष	कर्ष	४६१	१८
गात्व	गोत्व	४६१	११
दूष्यति	दुष्यति	४७४	१४
कुवत	कुर्वत	४७४	२
संज्ञित	संज्ञित्व	४८२	४
			७

अशुद्धम्	शुद्धम्	पृष्ठ संख्या	पंक्ति संख्या
काथ	कार्थ	४८४ —	३
हरायेत्	हार्य्येत्	४६६	४
कतृ	कर्तृ	५०३	५
रेका	रेको	५०७	३
ताहि	तर्हि	५०७	
चत्के	चेत्के	५०८	६
निदिश	निर्दिश	५०६	११
दशना	दर्शना	५०६	११
नन्तय	नन्तर्य	५१२	१
रहिक	रैहिक	५१७	३
धातुन्ना	धातुना	५२७	५
कतृत्व	कर्तृत्व	५२८	१
भदात्	भेदात्	५२८	१
माना	मानो	५२६	११
परेच	परेद्यु	५३२	१६
त्तश्च	त्तेश्च	५४०	१६
पहनोतुं	पह्नोतुं	५४३	१५
यद्यपाय	यद्यु पाय	५४५	१०
सा	तस्याः	५५६	८
कण	कर्ण	५६८	१८
वोयो	वायो	५७१	१
रम्भकत्वे	रम्भकत्वं	५७२	१०

॥ श्रीः ॥

वेदान्त-प्रबन्धः

आसीद् भूपालमौलिस्फुरदखिलकलोऽद्वैतवेदान्तदान्त-
स्वान्तः शान्तान्तरारिर्नयनिपुणमतिः पालितप्राज्यराज्यः ।
कर्मानुष्ठाननिष्ठः फलविरतिपरब्रह्मविद् ब्रह्मसेवी,
निस्सीमप्रेमकामः समजनि जनकः श्रीदहे विदेहे ॥१॥

तस्यैवागाधमेधः प्रियमधुरमुखः ब्रह्मविद्यालवद्याऽ
मुद्रश्रेयःसमुद्रो मिहिरमुखसुखाधीतदुष्प्रापवेदः ।
नानादिश्यैःस्वशिष्यैर्विरचितपदो भास्वरानश्वरश्रीः
गूढाम्नातार्थमन्त्रो सदसि समभवद्याज्ञवल्क्यो महर्षिः ॥२॥

बह्वीभिर्दक्षिणाभिः स नृपतिरजयत् तत्र चामन्त्रयत्तान्
पाञ्चालान् कौरवादींस्तदनु समुदयं वीक्ष्य विद्वत्तमः कः ।
एषामित्याशयेन व्रजमवरुरुधे शृङ्गयोः पञ्च पञ्च
प्रोटङ्क्य स्वर्णपादान् परमतिविदुषे दित्सया गोसहस्रम् ॥३॥

ब्रह्मिष्ठो वः स नूनं हरतु निजगृहे गोसहस्रं तदेतत्
उक्त्वा सम्राजि तूष्णीं स्थितवति दधृषुस्तेतु नाथो महर्षिः ।
एताः सामश्रवो गा गमयगृहमिति प्राह शिष्यं ततोऽन्ये
ऊचुः साक्रोशमीदृक् त्वमसि नहि गवां लिप्सया मे प्रवृत्तिः ॥४॥

दृष्ट्वाज्ञापत्रमेतद्बहुतिथ मभितो दूरवृत्तं तदेतत्
स्मृत्वा चेतः प्रहृष्यच्चिरमुचितमिदं निश्चिचीषत्यवश्यम् ।
वैदेहो नून मेतन्नृपतिवरमिषात्साध्वसातीतरत्तद्,
विद्यां श्रीयाज्ञवल्क्यो बहुमुख मवितुं मन्त्ररूपोवतीर्णः ॥५॥

विद्वांसोऽमी तदानीन्तनमुनय इव क्लेशविश्लेषकामाः
श्रौतस्मार्त्तस्वधर्मान् कलिलकलियुगे धारयन्तो नयन्तः ।
तज्जिज्ञासूनुपदासून् सदय मतिसुखं स्वल्पसेवाभिगाभिः
सन्तः सन्तोषभाजः समिति ममिमतां संश्रयन्ते समन्तात् ॥६॥

संकल्प्य स्वल्पमीशो जडमपरनिजै र्योजयित्वा चिदंशैः
निर्मुद्रामोद माप्तुं विहरति तदिदं कः सचेता श्चिकीर्षुः ।
सामर्थ्यैः स्वप्रदत्तै रहितफलभुजः किन्न जानाति देवः,
पश्यन् दुःखेषु मग्नान्निरवधिकदयो नोद्दिधीर्षे त्स्वतन्त्रः ॥७॥

वेदप्रामाण्यसिद्धौ तदवगततयाऽमुष्य कर्त्तापहर्त्ता
स्यादीशस्त त्प्रमात्वं तदभिहिततयाम्नात माम्नायवृद्धैः ।
इत्यन्योन्याश्रयः संपतति तदनु मां मानमेतस्य सिद्धं।
न्यायज्ञा भूमिशैलाद्यवयवरचना लोचनादाद्रियन्ते ॥८॥

सन्तानोयं भवानां भवति कलशसन्तानवत्सर्वनाशी
सन्तानत्वादितो वाजनि तदवयवै र्द्व्यसन्तानशून्यैः ।
कुम्भारम्भाणुवद्वा किमु जगदणवः पूर्व मुत्पादितैतज्-
जातीयान्यप्रपञ्चा अनवरततदारम्भकत्वादितो वा ॥९॥

सर्वज्ञो नापरोऽस्मात्प्रभवति क इवाचिन्त्यनिर्माणशक्तिः
जन्मस्थेमादयेऽस्य क्वच कपिलमुखानुस्मृते स्सतत्स्मृतित्वं ।
तज्ज्ञानात्पूर्वमेते यदि विमलधियः तर्हि तद्धीफलं किम् ?
नोचे देवानपीशः श्रुतिषु सुकृतिनः संविधत्ते भवादौ ॥१०॥

यज्जातीयं सपक्षे नियत मवगतं तत्सजातीय मिष्टम्
साध्यं पक्षेऽन्यथास्या ह्यनुमितिविलयः सर्वसाधर्म्यबाधात् ।
ज्ञानेच्छायत्नयोगा त्कृतमत्ररचनः कार्यताद्यैरमूर्तिः
सिद्ध्यत्येवानुमानैः प्रविशति न तनु व्यापकत्वेऽप्रमाणात् ॥११॥

देहाजन्यं न धीमज्जनितमिति तदाबाधिकेत्यप्ययुक्तम्
व्याप्यत्वासिद्धियोगात्प्रसजति च पुनस्तद्विना हेत्वसिद्धिः ।
अस्मात्तद्व्यापकासत्वमपि न गमकं न प्रमा खण्डतायाम्
सामान्यं कायजन्ये न किमपि न च तद्व्यञ्जकं स्वाविशेषात् ॥१२॥

कर्ता द्वारोत साक्षाद्विरचयितुमिदं कारकाण्यध्यतिष्ठत्
नाद्योधिष्ठानबाधात्प्रसजति चरमेऽणोस्तनूतेति चेन्न ।
चेष्टार्थाद्याश्रयत्वं न भवति पुरुषेऽकर्मणीशे तु साक्षात्
तद्यत्नाधिष्ठितत्वं भवतु नहि वयं द्विष्म एतत्परस्मिन् ॥१३॥

अघ्राते दोषगन्धैः प्रयतितुविदुषि धो ध्वंसते धर्मवन्नः
नोचेन्मोक्षोपि मास्तां क इव निगमविद्वेदितान्तर्निविश्य ।
श्रौतं मानं समानं न च विकलमिदं कस्यचिन्नैव किंचित्
सर्वेषां स्वप्रमाणाभिमतपरतया वर्णनं वा न केषाम् ॥१४॥

यातायातोपतापैः परिमृदितमना मन्दमोदोन्मदिष्णुः
दोषज्ञोपज्ञयज्ञप्रभृतिधुतमलः सत्फलद्देवसेवः।
दुःखाकूपारपूरैः प्रचुरपरिहृतः पारमस्योत्पतिष्णुः
जाग्रज्जन्मोज्जिहासः किमिव न यतते यातनापातनायै ॥१५॥

कुष्टक्लिष्टस्वकायाः कति च न कृतिनः क्लेशविश्लेषकामाः
वह्नावह्नाय चान्ये गिरिशिखरतटात्पातुका घातुकाः स्वम्।
आसन्नादीनवानां निपतननियमैरागमाः प्राहुरेषाम्
दुःखव्यूहोपशान्तिं तदिह कृतधियां किन्न मुक्तौ प्रवृत्तिः ॥१६॥

हायं हायं चिराय प्रशमक्रमपरं मृग्यते मेधया तत्
व्याघ्रोपघ्रात मेतत्तडिदिव न चिरं भानुभाम्भोनिभस्वा।
व्यालीव्यालीढ मन्यद्दवदहनदलन्मूलकूलद्रु देहम्
दर्शं दर्शं विदूनो भजति भवभयादुद्दिधीर्षु विरागम् ॥१७॥

सद्भिः साध्यादिभेदैः सदनुमिति रिवासद्भिरेभिः प्रपञ्चे
मिथ्यात्वस्यानुमानं किमिव न घटते पक्षहेत्वादिकोटौ।
सत्वासत्वाप्रवेशाद नुचितमिति चेत्स्यात्तवैवानवस्था
नास्मिन् लोकापलापव्यवहृतिविषये स्वस्वरूपप्रवेशात् ॥१८॥

रेखावर्णप्रतीतिस्तदवगतिकरी हेतुता चोभयस्मिन्
प्रज्ञामात्रेष्वियं चेत् प्रसजति सकलं प्रत्यसाधारणत्वात्।
मिथ्याबोधं प्रसूते स्वसदृशि विषये वस्त्वसच्छुक्ति रूप्यम्
हेतुत्वालीकभावौ कथमिव विहता वेकधर्म्याश्रितत्वात् ॥१९॥

हेतुत्वं साध्यबुद्धेर्विषयमुखतया तत्र चालीकभावः
स्वप्ने मिथ्यानुभूतं भवति च शकुनं तन्नराणां सुखादेः ।
धूलीबाष्पादिधूमभ्रमविषयभवा वस्तुतः पर्वतादौ
बाधाभावेन सत्यानुमिति रुदयते तत्समो हेतुभावः ॥२०॥

ज्ञानाधीना विजातिः स्त्रयमिव मसती बाधकासाधकाभ्याम्
तुच्छे वच्छेदकेस्मिन्नपि खलु तदिदं कः प्रतीयाद्विपश्चित् ।
वित्तिव्यावृत्तिरर्थे भवति न विरते नाप्यविज्ञातरूपै
रित्येतत्साधुसिद्धं सदिव सम मसत्कारणं तुल्ययुक्तेः ॥२१॥

आत्मा बुद्ध्यैव भाती त्यपि मत मनृत म्नेति वेति प्रवादे
संयोगादे रयोगा द्विषयविषयिता दुर्वचैकैकवृत्तिः ।
अव्याप्त्यात्माश्रयासिद्ध्यतिचरणमुखासंख्यदोषातिपातात्
प्रत्याख्येयं तदेते सततविजयिनो भ्रान्त्यनिर्वाच्यवादाः ॥२२॥

ब्रह्माध्यस्ते समस्ते स्फुरणनियतये तेऽपि संबन्धबन्धः
सत्यः क्वास्ते कुतस्ते व्यसनमविरतं सौगतीनां गतीनाम् ।
मैवं वृत्या निवृत्ते तमसि बहुमुखं विस्फुरन्त्या हि चित्या
साक्षाज्जुष्टं समस्तं स्फुरति न च ततः सत्यसम्बन्धसिद्धिः ॥२३॥

मूढोहं नैव जाने किमपि न मयि धीरित्यनेकप्रतीतिः
भावाज्ञानं स्फुटं गोचरयति न पुनः शेमुषीप्रागभावम् ।
धर्म्यादिज्ञानबाधादिह विषयभिदां नान्तराबुद्धिभेदः
तस्यात्रावश्यकत्वा त्प्रसजति न तरां तद्विशेषाद्यभावः ॥२४॥

अज्ञानं साक्षिवेद्यं स्वतं इति विषये वेद्यताद्वारभावात्
बाध्येऽस्मिन् मानवृत्या न भवति विहतिःसाक्षिणा बाधितत्वात् ।
ज्ञानाभावस्तु नेदृक् सहि निगमविदां षष्ठमानेन वेद्यः
बुद्धेऽबुद्धे विरोधात् कथमधिगतये सम्विदः स्यादभावः ॥२५॥

सामान्यादिः स्वधर्मौ यदि च नियमयेत्तत्रसम्बन्धिभावम्
नीत्या सौन्दोपसुन्द्याद्वयमपि न तदा स्यादिति क्लेशभूमा ।
नार्थं विद्मस्त्वदुक्तं कथमिव घटतां तद्विशेषैरभावो
व्याघातादित्यवोचं स्पृशति न पुनः साक्षिवेद्ये सदोषः ॥२६॥

प्रज्ञास्वप्रागभावापरविषयतिरोधाननिर्वास्यदेशो-
पेतान्यद्वस्तुपूर्वा तमसि च प्रथमोत्पन्नदीपप्रभावत् ।
अज्ञातज्ञापकत्वादितितदनुमितिर्मानमज्ञानसिद्धौ
आस्तां साध्यद्वयं वा सकलपदफलं कोविदैः सुप्रवेद्यम् ॥२७॥

चैत्री धी मैत्रधीवन्निरवधिकनिजप्रागभावातिरिक्तो-
न्मूलीमात्वादबाधा भवति पुरुषगा चित्तवृत्तिः प्रमेष्टा ।
मिथ्याबोधो विगीतः स्फुरति खलु निजोत्पादकाबाध्यभिन्नो-
पादानो विभ्रमत्वादभिमतवदियं चानुमा चित्सुखोक्ता ॥२८॥

यद्वा स्वप्रागभावापरनिरवधिकोदुबाधिका साधुमेधा
कार्य्यत्वात्कुम्भवत्सा भ्रमवदुत मतित्वाद् भ्रमो दीच्यमावत् ।
मात्वादेषा भ्रमात्तुत्तरमिति शिवा भ्रान्तिपूर्वप्रमावत्
धीत्वं वालोकतावन्निजविषयसमाच्छादि संछेदिसंस्थम् ॥२९॥

मायामूलं महेशो न स परिभजते मात्रया मन्युमोहम्
बिम्बेनोपाधिकार्यं भवति पुनरिदं सर्वदैवानुबिम्बे ।
नातः संसारदोषः प्रसजति परमे पुंसि चिन्मात्ररूपे
मिथ्याज्ञानोपनीत स्तपति भवभृतस्तेन तेषां मुमुक्षा ॥३०॥

मुक्ति र्वोऽज्ञाननाशोऽभिमत इति यदि ब्रूत साऽऽत्मस्वरूपा,
किम्वाभिन्नेति चोद्ये प्रसजति न कथं कृत्यसाध्यत्वमस्याः ।
अन्त्ये सत्याथ मिथ्येत्यपि यदि प्रथमाऽद्वैतहानिः स्फुटैवम्,
सान्त्ये विद्या विलासस्तदिह न घटतेऽद्वैतिनां मोक्षपक्षः ॥३१॥

मैवं वृत्त्योपरक्तो भवति चरमया प्रत्यगात्मैव मुक्तिः
स्वोपाधेः साध्यताया व्यवहृति रुदिते वोपलक्ष्येपि तस्मिन् ।
प्रत्यग्भिन्नत्वपक्षे भवति हि चरमा तत्प्रतीपैव वृत्तिः
ध्वंसोप्याधार रूपस्तदपरमपरै र्मन्दबोधार्थ मुक्तम् ॥३२॥

रूढा प्रत्यक्षवृत्तिं चिति रखिलभवाज्ञानभेत्री समीची
नातः सत्यानृतोत्थः प्रसजति कथमप्यत्र शङ्काकलङ्कः ।
प्राप्तब्रह्मानुबिम्बाविरह इव जनौ वृत्ति रेवास्तु किम्वा
स्वोपादानप्रणाशः कथमित इति कः संशयो नैगमार्थे ॥३३॥

अन्त्यज्ञानस्य जीवो न भवति विषयः किन्तु शुद्धाद्वयात्मा
नातःस्वस्यैव बाधोद्यमसदृश मिदं नाहमर्थः सदात्मा ।
वेद्यत्वादेष मिथ्या प्रसजति भवतामित्यविज्ञातृचोद्यम्
सत्तामात्रेण वृत्ते र्भजति विषयता मित्यमिथ्यात्वमेव ॥३४॥

ब्रह्माज्ञानोपधानं श्रुतिस्रमधिगतो जीव एवास्त्यबाध्यः
मूलाऽविद्याद्युपाधि र्वपुरिव स परं बाध्यतीं निर्विशङ्कम् ।
नोचेद्देहादिरागे स्मृतविमुखता स्यात्तदामुष्मिकार्थ-
स्वर्गापूर्वादिलोपे सति गति रपरा कास्ति लोके पुनस्ते ॥३५॥

भेदान् लोकप्रसिद्धाननुवददखिलं त्वक्षजादिप्रमाणम्
देहात्मा भेदबोधेष्विव तदविषयेऽद्वैतबोधावतीर्णा ।
ब्रह्माद्वैतश्रुतिः स्वप्रतिभटमखिलं बाधते निर्विशङ्कम्
नोचेत्तत्रासमर्थाप्रतिहतविषया सर्वथापार्थिका स्यात् ॥३६॥

दोषोत्थत्वाविशेषादपि भवति परं पूर्वबाधे समर्थम्
गोधाभ्रान्ते रुदीच्या विगलति नियतव्यालभीतिर्हि रज्जौ ।
एकत्रार्थे विवादाद् बहुनिगमविदां वस्तुतन्त्रो न दोषः
स्याद्वक्तुस्तस्य किन्तु श्रुतिषु निरसना द्वाधते मानमेषा ॥३७॥

अध्यक्षादिप्रमेयाननुवदति यतोऽतत्परं द्वैतवाक्यम्,
ब्रह्माद्वैतागमोक्त्या द्वितयविषयया बाध्यते तत्परत्वात् ।
युक्तापच्छेदनीतिः परवतिहि सदोपक्रमन्यायवृत्तेः
तच्चानूद्यैव बाध्यं चरमगुरु गिरेत्येव युक्तं प्रतीमः ॥३८॥

नाभेदो वेदबाध्योऽक्षज मिति विषयो भेदवन्नैवदिष्टम्
सर्वाद्वैतोपरोधादिति विकलवचो दूषणं भूषणं नः ।
ब्रह्मान्याभेदमेतन्मतनिपुणधियो मन्वते नैव केचित्
श्रौतेऽनिर्वाच्य भेदादृव्यवहृतिसमये नास्ति शूद्राधिकारः ॥३९॥

धर्मी निर्धर्मकश्चेत्कथमिव भविता सोभिलापादियोग्यः
मैवं मेयत्ववत्स्या दपिच सनियमो नास्ति शब्दाभिधाने ।
इष्टः प्राभाकरादे रथ गगनपदाद् धर्मिमात्रोपलक्षात्
अन्येषां प्रत्यभिज्ञावदतिपतति वो दुःसहात्माश्रयादिः ॥४०॥

धर्मी लोकप्रसिद्धो भजतु वहुविधं हेतुभावं ततोन्यः
धर्मी नात्माश्रयादेः क्वचिदपरविधो भाति तद्भिन्नभेदः ।
आधारात्सोपि नान्यो निपुणमनुसृतः स्पष्टदृष्टातिचारात्
तस्मान्मिथ्यैवमेतत्प्रविशति निखिल व्यक्ति मेकोहि धर्मः ॥४१॥

निर्दोषत्वा त्परत्वा च्चदितरविषये सावकाशत्ववाधात्
ज्ञातप्रामाण्यकत्वा दपिच वुधपरत्वादपच्छेदनीतेः ।
प्रत्यक्षं सावकाशं व्यवहृतिविषये भाविबाधै रुपेतम्
शब्दैराप्तै रपास्यं त्वनृतमपवलं तद्धि देहात्मधीवत् ॥४२॥

लोकःस्वप्ने विनेयानुपदिशति मृषा कल्पितानेव मस्मिन्
युक्तो मिथ्योपदेशै र्विरमति यदि धीःकिन्न वाच्यं सुधीभिः ।
शब्दो नासौ खपुष्पप्रभृतिसहचरो विभ्रमस्तेऽत्र नूनम्
यद्वा शिष्यादि सर्वं न किमपि भवतः कल्पनामात्रमेतत् ॥४३॥

तत्वं जानाति नोवा कथयति चरमे किं तदज्ञःपरस्मै
आद्ये कस्मान्न मुक्तिः पर मथ भवितेत्येव तस्यान्दुराशा ।
मैवं तत्वापरोक्षं जनकमभिमतं तत्तु नाद्यैव जातम्
जायेताम्नायमानादिति तु प्रववृते तत्र विश्वासदार्ढ्यात् ॥४४॥

सत्त्वं त्रैकालिकं नात्र न मतिविषयो बाधितत्वादसत्त्वात्
युक्तासत्त्वप्रतीति र्व्यवहृतिविषये तेन तात्कालिकेन ।
जीवाभेदे प्युपाधिर्गलनमपरथा नेति तत्त्वप्रबोधा-
पेक्षाप्रेक्षावतः सा श्रुतिशिखरगिरा स्तूयते संप्रदाये ॥३५॥

यस्मिन्साध्यं मृषात्वं तदधिकरणकान्यूनसत्ताकभेदः
हेतुर्नासौ परस्मिन्निति कथय कथं स्यादनैकान्त्यमीशे ।
सत्त्वासत्त्वोभयाभ्यां परमिह कथितं तद्विलक्षं मृषात्वम्
नातस्साध्याप्रसिद्धिः कृतसमयधियां स्पष्टमद्वैतसिद्धौ ॥४६॥

शुक्तौ रूप्यं न भायाद् गगनकुसुमवत्सर्वथा चेदसत्स्यात्
सत्ता देशान्तरस्था त्वनुभवजननी नेन्द्रियासन्निकर्षात् ।
बाधादेतन्न सत्यं न तदुभयविधं वस्तुत स्तद्विरोधात्
तस्मात्कोटित्रयीभ्यःपर मति गहनं गाहते धीर्यपैतत् ॥४७॥

नाना नेहान्यदार्त्तश्रुतिशतसचिवै र्भानिबाधासुतर्कैः
ब्रह्माध्यक्षादुदीची यदपि च जगतो नेष्यते क्वापि सत्ता
मध्येऽविद्याविलासात्तदपि बहुमतां लौकिकीं नैव सत्ताम्
प्रत्याचष्टे तदेत त्स्वहृदि चिरमलं स्थापयित्वा ध्रुवब्रम् ॥४८॥

यत्प्रागूर्द्ध्वं नचास्ते न भवति तदिदं मध्यमे पीति युक्तम्
भानन्त्वस्याविरुद्धं गगननगरव च्छुक्तिरूप्यादिवद्वा ।
अस्माकं हेतुसाध्ये न भवति विहति स्तत्त्वसत्त्वाप्रवेशात्
प्रागूर्द्ध्वादिव्यवस्था किमिव न सुवचा ध्याससम्बन्धमात्रात् ॥४९॥

आम्नायत्रातमेवं तदवगमयते ध्यक्षमानोपजीव्यात्
यूपादित्यादिवाक्यान्यलमुपचरितुं वाक्यशेषाविशेषात् ।
प्रत्यक्षाम्नाययो र्नः स्वविषयभिदया क्वापि नान्योन्यबाधः
वैलक्षण्ये नचार्थः क्वचिदपि कथितो नेति नेत्यादिवाचा ॥५०॥

अध्यक्षस्या प्रमात्वे ऽनुमितिनिगमयोः स्यात्प्रमात्वं तदस्याम्
इत्यन्योन्याश्रयस्ते सुदृढ इति स नो निर्व्यपेक्षप्रमात्वात् ।
मैवं देहात्मचन्द्रादिकपरिगणनाध्यक्षमिथ्यात्वदृष्टेः
प्राबल्यं तद्विरोधे श्रुतिषु विजयते त्वन्मतेप्येवमेव ॥५१॥

प्राबल्यं तत्परीक्षाभि रपि समुचितं नोपजीव्यत्वमात्रात्
भ्रान्तौ नार्थक्रियादि क्वचिदपि घटते जात्वघटीत्येतदाक्षे ।
तस्मादाक्षानुसारं निगमनियमनं युज्यते द्वैतवादे
मैवं देहात्मवादं त्वमपि दृढतमं बाधसे स्वागमैस्तैः ॥५२॥

प्रत्यक्षा लिङ्गजा धी र्यदि च बलवती वह्निशैत्यानुमित्या
बाध्येतोष्माक्षमेवेत्यसदधिकबलं तत्परीक्षाभि राक्षम् ।
ब्रह्माखण्डार्थबोधा त्प्रचुरपरिगतो षड्विधैश्चापि लिङ्गैः
तत्वं वाक्ये परस्मिन्पुनरुपचरिते नास्त्यमुख्यत्वशङ्का ॥५३॥

पुंसा दोषाविशेषेऽद्वयविषयतयैवास्ति सा सावकाशा
तत्राप्यस्यानिरोधे जितमहितगणे र्नास्तिकै राक्षशीलैः
निर्दोषापौरुषेय श्रुतिमतिरखिलं बाधते ज्ञातदोषम्
प्रत्याक्षादि त्वमुष्या भवति हि विषयाबाधनेन प्रमात्वम् ॥५४॥

अस्वातन्त्र्या त्स्वरूपं नहि भजति भिदां निर्व्यवस्थो न धर्मः
व्यावृत्ति र्वस्तुबुद्धौ स्फुरति नियमत स्तत्वतो दुर्निरूपा ।
निस्सीमाश्चर्यकर्मप्रकटननिपुणो नेतरो माययास्ते
तन्मूलत्वे मृषात्वं पुन रपवदितुं कः क्षमः क्षोणिकुक्षौ ॥५५॥

बुद्धि र्भेदं धुनाना कथय किमभिदां ग्राहते वा स्वरूपम्
आद्ये भेदं विनासौ कथमिव भविता सप्रकारोपलब्धेः ।
औदासीन्यावगाहे नहि गलति भिदा शास्त्रजोपाद्य नान्त्यः
मैवं मायामयोसौ भवतु बहुविद स्तात्विकत्वं द्विषन्ति ॥५६॥

भेदश्चेदात्मलाभं न भजति यदि चात्माश्रयादेर्हि दोषात्
तर्हि व्याहारमात्रं गतमिति भवता प्यर्थनीयोपपत्तिः ।
मैवं नाभासमात्राः क्वचिदपि सिसिधु र्व्याप्तयो दोषहृष्टौ
तस्मान्मायामयी सा व्यवहृतिरुदिता किं मृशाम्रेडितेन ॥५७

अर्थाकाराद्यवृत्तौ प्रतिफलितचिति र्वस्तुतो बुद्धिरिष्टा
नित्या जीवेऽपि सातः किमिव बिभुधियः स्या दनित्यत्वशङ्का ।
सत्वासत्वेन वृत्तो रखिलजनिभृतो वित्यवित्तिव्यवस्था
नित्या धी राविरास्ते परमपुरुषगा न भूमत्वादिशङ्का ॥५८॥

यावत्कार्यं यदीशः स्वयमिह तनुते निष्फलो जीवयत्नः
नानायोनिप्रवेशोपनत मघफलं स्वक्रियातः स भुंक्ते ।
किञ्चिन्निर्माणशक्तौ परिमितपतनो निष्क्रियः प्रेरणायाम्
मायि ब्रह्मैव तस्माद्बहुभवनधिया जिह्ममुज्जृम्भते स्म ॥५९॥

स्वच्छन्देच्छं तदेतज्जनयति जगतीं भोक्तृभोग्यस्वरूपाम्
आविर्भूय प्रविश्य स्वयमधिकुरुते भोक्तृभावं तदस्याम् ।
अज्ञानादेव पुंसा महमहमिकया मायया भिन्नबुद्ध्या
दुःखव्रातोपघातावगतिरपि चितिस्वप्नवद्भ्रान्ति रेषा ॥६०॥

विद्या वैश्वानराद्या श्रुतिसमधिगता ब्रह्मबुद्धेरुपायाः
तत्त ज्ज्ञानैः प्रबुद्धे विरजसि मनसि प्रोदयत्यात्मबोधः ।
कर्मज्ञानाश्रमोत्थै रखिलशुभफलै श्चित्तशुद्धिः स्वधर्मैः
मुक्तौ रेकाकृतित्वन्न भवति सकलं कारणं नापि चैकम् ॥६१॥

प्रत्यक्षानुस्मृतिः सा तव यदि घटते जाघटीति स्फुटं नः
वाक्या दध्यक्षभानं सुखममृत मतोनुश्रवाः श्रावयन्ते ।
भक्त्या लभ्यन्तु गीता सगुण मनुजगौ निर्विशेषापवर्गे
ज्ञानादन्यो न हेतुः श्रुतिषु च विशदं किं प्रभूताभिधानैः ॥६२॥

विप्रा स्तं दानवेदानुवचनतपसेत्यादिवाचा समूचुः
मुख्यार्थेच्छानुसारा त्पुरुषविविदिषा कारणं कर्मधर्म्यम् ।
सर्वापेक्षाधिकारस्वरसरसवशादन्तरंगं तदंगम्
इत्यप्येके समूचु स्तदिह बहुविदां नात्रमन्ये समत्वात् ॥६३॥

कश्चित्कर्माह बुद्धावुपकृतिजनकं भाष्यभावानुसारात्
अन्ये काम्यातिरिक्तं विधुरजनकृतं चाहु रेके तदस्याम् ।
नित्यानित्यादि सर्वं निजगदु रपरे व्यासयज्ञादिसूत्रात्
तस्मात्कर्मोपयोगे विविधमतभिदा दृश्यतेऽद्वैतवादे ॥६४॥

विद्यायां विप्रभिन्नः कथमधिकुरुते ब्राह्मणस्य श्रुतत्वात्
मैवं त्रैवर्णिके तत्पदमुपचरितं दर्शनात् क्षत्रियादेः
विद्याकामादिवाक्ये त्वधिकृतिविषये तत्पदस्या प्रवेशात्
संकोचो नाधिकारे विधिविषयवहिर्भावभाजा पदेन ॥६५॥

तुर्यं कैवल्यधाम श्रुतिषु परिचितं तत्र कर्मावसानात्
विद्याशान्त्यादियोगा ज्जनकसमगतिः पूर्वसंन्यासयोगात् ।
मोक्षो गौणो द्वितीयाश्रमवति कथितस्तेन माभूद्विरोधः
निर्वेदादेः समुत्थं चरम ममृतकं पूर्वमस्यैव चांगम् ॥६६॥

विचाररश्मिप्रदीप्ते सलिलसममृषा शेमुषीदोषशून्ये
धर्मादेः सैकताभे न मनसि विदुषः संप्ररोहाय कर्म ।
आरब्धं कर्म भुक्त्वा तदनु स विरजीभूय सद्ब्रह्मभूयम्
शुद्धः शास्त्रेषु गन्ते ह्यसकृदवगतं वीतरागस्य वृत्तम् ॥६७॥

धर्माधर्मौ हि जन्तो र्न यदि तव विभुर्ब्रह्मणः प्रीतिकोपौ
नित्याहेयामितोदारगुणसमुदयि ब्रह्म न स्यात् कथंचित् ।
अन्यादृष्टं न चान्योद्भवविलयकरं युज्यतेऽतिप्रसंगात्
आत्मोद्देशेन सर्वो विधिमधिकुरुते श्रद्धया तत्फलेच्छुः ॥६८॥

स्वादृष्टं स्वस्य भोगं जनयति न ततः सर्वतः सर्वभोगः
नोचेदेवं परस्मिन् प्रसजति सततं प्राणिवत्कर्मभोगः ।
किंचित् क्षिप्रं चिरस्यापर मनुफलदं कर्म जन्मान्तरेपि
ईशानो न्यायतन्त्रो न भवति स परं श्रूयते हि स्वतन्त्रः ॥६९॥

बोधो मुक्तेरुपायो भवति नियमतस्तत्त्वमस्यादिजातः
सर्वब्रह्मैक्यवेदी भ्रमविषयजगन्नाशयन् बोभवीति ।
अस्यैवाविर्भावार्थं विदधति यतयः कर्म वर्णाश्रमोत्थम्
एतन्मात्रंहि भक्तिः फलविरतिकृतं नापरा मुक्तिहेतुः ॥७०॥

शान्तिश्रद्धातितिक्षाखिलफलविरतिब्रह्मधीहेतुसंपत्
मात्रं भ्रूषेऽथ भक्तिं नहि खलु कलहःशब्दपर्यायभेदात् ।
युक्तं हेतुत्व मस्याः यदिह न मनसः संस्कृतिः स्तां विहाय
प्रोद्दीयात्तां विनैतन्न खलु बहुविदो मन्वते युज्यते वा ॥७१॥

प्रत्यक्षं शब्दतोपि त्वमसि दशम इत्यत्र दृष्टं यथैवम्
सूते साक्षाद्विबोधं विरजसि नियतं तत्त्वमस्यादिवाक्यम् ।
वाक्यार्थ ज्ञानमात्रान्न हि गलति भिदा तद्विना नास्ति मोक्षः
सेयं वेदान्तविद्या मननपरिकरा जायते शुद्धबुद्धेः ॥७२॥

शूद्रः संस्कारलोपान्न समधिकुरुते कर्म विद्यास्विवास्याम्
संस्कार्या न स्त्रिवर्णी स्मृतिरपहरते तस्य विद्याधिकारम् ।
यत्रानुज्ञापि तस्यास्तदितरपरता कर्म शूद्रानुरोधात्
जात्या शूद्रः स्वधर्मैः कथमतुलभतां कण्ठसूत्राधिकारम् ॥७३॥

स्मृत्याचारव्यवस्था निपुण मभिहिता वर्णभेदानुसारात्
हेतु नीर्थित्वमात्रं व्यभिचरिततया संकरत्वप्रसंगात् ।
नातोब्रह्मानुभूता वविधिवलवशात्तत्प्रवेशो विशंक्यः
स्मार्त्तैः धर्मैं द्विजत्वं गतवति सुवचः सोपि जन्मांतरेषु ॥७४॥

ध्यानादृष्टै र्विशेषोपरतविषयधीः स्यात्तयैवापवर्गः
भाषाग्रन्थव्युदस्त्यै नियमविधिरिहाश्रीयतेऽदृष्टमिष्टम् ।
ज्वालामालैक्यबोधो न गलति शतशो जायमानैः परोक्षैः
मुग्धः को वानुरूपां भवभयशमनीं ब्रह्मविद्यां नहीच्छेत् ॥७५॥

चित्रं चेत श्चरित्रं स्वयमतिविधुरं धावते यत्परस्मै
गन्धर्वग्रामवत्तद् गगनमिव मनाग्दोषगन्धै रजुष्टम् ।
वृत्त्या ब्रह्मोपलक्ष्यं भवति चरमया श्रोतनिर्णिश्चबुद्ध्या
भाव्यं तत्रानुयोगे करणमुखभिदा निर्विरोधं समास्ते ॥७६॥

विश्वं मिथ्या न मोक्षो विरहतनुरपि ब्रह्मभिन्नोपि नायम्
हेतोर्नाशेप्यनाशी निखिलभवभयत्राणदानैकयत्नः ।
नित्यो जीवः सचायं निरवधिकसुखो ब्रह्मभूयाय भूयात्
तत्वज्ञानै रुपाधे रुपशमनमियादित्यवस्थाव्यवस्था ॥७७॥

वाक्यार्थज्ञानमात्रादमृतमिति कथं चित्तविक्षेपदोषात्
क्षीणा जन्मान्तरे चेन्मननपरिकरै रिष्यते तस्य मुक्तिः ।
ध्यानादीनां विधानं न भवति वितथं सार्थकत्वात्परेषाम्
लब्धाद्वैतप्रकाशं प्रति यदि विफलं कस्तदत्रानुयोगः ॥७८॥

बिम्बाभिन्नो नु बिम्बो भवति तदुपधे भेददृष्ट्यानवद्यो-
नाशो जीवस्य नास्मिन्नपितु स तदुपधे स्तेन ब्रह्मात्मभावः ।
द्रष्टारोऽभ्यासवन्तो न वधिकजनुषस्संसृते र्नानवस्था
चित्तोपाधे रभेदात्प्रतिजनुरकृताभ्यागमादे रयोगः ॥७९॥

दृष्ट्वादर्शं मुखं स्वं कथयति निपुणो भासतेऽस्मिन् मुखम्मे,
भ्रान्ति नैक्यापरोक्षेऽपसरति सविधे संस्थितत्वादुपाधेः ।
बिम्बाभेदानुमानान्यतिकुशलधिया स्थापितान्यद्वयज्ञैः,
तस्मान्मुक्तौ स्वनाशोद्भवभयविमुखाः ज्ञानिनः किम्भवेयुः ॥८०॥

प्राङ्मीमांसोपदिष्टे गुरुतरविभवायाससाध्ये स्वरर्थे,
लोकस्येवापवर्गे किमिव न घटते साधु नित्ये प्रवृत्तिः ।
व्योम्नोपाधेःप्रणाशाद् घटगगनमिव ब्रह्मणा यात्यभेदम्,
जीवोच्छेदादिवादः प्रकटयति हृदो ऽद्वैतबोधोपरामम् ॥८१॥

दुष्पाकक्रूरकर्मोपचयपरिणतापारसंसारताप-
व्यूहाकूपारपारं पशुपतिपरमप्रार्थनाराधनाद्यैः ।
आकल्पं निस्तरन्ति प्रमुदमविरतं ते ऽनुभूयाथ कल्पे,
नश्यन्तीति प्रमाते कथमजनि जनः किन्न गायेदविद्वान् ॥८२॥

दुःखं पादेन पाणाविति वदति जनो यौगपद्यानुभूते,
स्व्यापित्वे विरोधो निगमशतपदीव्याहति श्चाधिका स्यात् ।
जीवाणुत्वं श्रुतीनां दुरधिगमतया बोधतात्पर्यकत्वम्,
यातायातादि लोकानुगतगतिरपि स्यादुपाधेः स्फुटैव ॥८३॥

यातावच्छिन्नजीवः क्रिमुत तदुपधिर्नान्तिमो भुक्त्ययोगात्,
आद्ये स्वोक्ते विरोधा दकृतफलभुजः प्राणिनश्चेति चेन्न ।
चित्तोद्वृत्त्या स्वरादा वनुभवति फलं स्वात्मन स्तत्र सत्वात्,
युष्माकं त्वाशरीरं सुखतदितरयोः प्रत्यभिज्ञाविरोधः ॥८४॥

आत्मानो ऽव्यापकाश्चेत्कथमिव युगपद् व्याप्नुयुःस्वाखिलाङ्गम्,
सिद्धौ चानेककार्यं स्वगुणधिषणया चेष्टनं त्वप्रसिद्धम् ।
तद्बुद्धिर्भूतभव्येष्वपि भवति परञ्चेष्टयन्ती न दृष्टा,
न स्यादिच्छासुखादे रवगति रणुताकल्पने वोऽपरोक्षा ॥८५॥

सर्वत्रैवानुमाने व्यवहृतिसमयात्तीणपक्षादिसत्वम्,
हेतुस्तन्नित्य मेवेत्यसदुभयमते न प्रसिद्धं यतस्तत् ।
तत्कालाबाध्यसाध्यादिक मिह सुवचं तच्च ते सत्यमिष्टम्,
अन्यत्सत्वानिरुक्तेर्नच गति रितरा स्यादसिद्धयादिदोषात् ॥८६॥

स्वाधिष्ठानप्रमित्या यदिह च विगलेद् रूप्यवत्तन्मृषेष्टम्
ब्रह्मज्ञानेन बाध्यं जगदिति बहु व्याहृतं श्रद्दधीथाः ।
वादाङ्गं वादिसिद्धं प्रभवति समसत्ताकमेव प्रमाणम्,
नान्यत्तत्राफलत्वा दिति किमिव न तत्स्यादगत्या जगत्याम् ॥८७॥

स्वस्याभावः स्वदेशेष्वपि भवति सदा साधुसंयोगवद्वः,
सर्वं त्वन्यूनसत्वं स्वसमबलतया बाधते स्वप्रतीपम् ।
मिथ्याहेत्वादि सर्वं गमकमभिमतं स्वस्वरूपानुरूपम्,
तस्मान्मिथ्यैव सर्वं परिहृत मखिलं तुल्यसत्वप्रवेशात् ॥८८॥

प्रत्यक्षे सुप्रमातं सदिति घटमुखं ब्रह्मसत्वोपरक्तम्,
तत्तादात्म्यावबोधान्न खलु तदपरं स्यात्स्वतन्त्रं तदस्मिन् ।
मात्रासावादगुरुत्वाद्व्यवहृतिविषयेऽप्यन्यथा सम्भवाद्वा,
सत्वं तन्नात्तयोरयं प्रमितमतमिदं प्रीयतां तत्त्वयास्मै ॥८९॥

आम्नातब्रह्मसत्ता निरूपधिकतया स्वप्रकाशा च नित्या,
संप्राप्तास्मिन्परोक्षप्रमितिभि रथवा नान्तरिक्ताग्निवद्वा ।
तद्यूक्तोऽस्थानिषेधः क्व न मम विमति र्वह्निसत्योष्णभावे,
आब्रह्मज्ञान मेतद्भ्रमविषयरतिं चेतसा चेतयध्वम् ॥६०॥

यद्यस्मिन्दृश्यते तन्निजविरहवति स्वाप्नवत्साध्यमिष्टम्,
दृश्यत्वात्सं प्रतीमः क्वचिदपि न वयं भिन्नसत्तासु बाधम् ।
एतत्साध्येप्युपाधिः क्व पुनरधिगतः पक्षकृत्ताक्षमत्वात् ,
आम्नायोस्मिन् प्रमाणं यदखिल मवदत्तत्त्वबुद्धिव्यपोह्यम् ॥६१॥

धर्मं धर्मानुयोगे त्वमपि न निपुणो धर्मिधर्मोपपत्तौ,
स्वस्वान्ये स्वप्रयुक्तव्यवहृतिरितितु व्यक्तमत्रापि बोध्या ।
स्वान्यापेक्षं मृषात्वं स्वयमिह च जगत्सत्यमेवेति सैवम् ,
सत्यन्त्वन्यानपेक्षं स्वयमिति भवतो प्येष सिद्धान्तघोषः ॥६२॥

मिथ्यासाध्येऽपि विश्वं न पुन रुदयते साधनस्याविशेषात्,
यत्रासौ नोभयस्मिन्भवति स भजतां तत्र सत्त्वं निषेध्यः ।
कुम्भे नष्टे क्व तस्य स्वपदमनुभवन्दृश्यते प्रागभावः,
नारोपानन्तरं तद्द्वितयनिरसने संशये वोपलब्धः ॥६३॥

साध्यं मिथ्येति कल्पः समुचितगतिकस्तत्र दृश्यत्वसत्वात्,
बाधादस्यापि तद्वत्प्रसजति न तरां सत्यभेदः परस्मिन् ।
पक्षीकारान्न बाधादिकमतिचरणं ब्रह्मरूपन्तु नैतत् ,
ब्रह्माभिन्ने निषेध स्त्वचिरमभिहितो विस्मृतः किन्त्वपापम् ॥६४॥

मायाविष्टे मयेष्टा ननु निरुपधिके दृश्यतेशे परस्मिन्,
वेद्यत्वादिश्रुतीनामुपहितपरता शुद्धसिद्धिः स्वतःस्यात् ।
स्वाधिष्ठानप्रकाशे स्वविधितदितरौ स्वप्रकाशेंऽजसा तौ,
यद्वा शुद्धादिवाचामुपचरिततया स्यादभिप्रेतसिद्धिः ॥६५॥

सा सोपाख्यप्रकारप्रमितिविषयता ब्रह्मवीताऽविगीता,
ब्रह्मण्येषा न युक्तेत्यवहितमनसा भूय एवावधेयम् ।
ब्रह्माखण्डैकवृत्तेर्विषय इति पुरस्तत्त्वमस्यादिवाचाम्,
अर्थं व्यक्तीकरिष्ये क्रमधिकधिया विष्टपेषानुवृत्या ॥६६॥

ज्ञानार्था संसृतिश्चेत्स्ववचनविहतिःस्याच्च लोकापलापः,
तस्मादास्तामिमिथ्येत्यतिविकलकथा तात्त्विकांशेऽप्रमाणात् ।
मिथ्यासंयोगवन्नो भवतु पुनरियं तत्स्वरूपानिरासात्,
बाध्यन्तान्तेपि तर्कै रलमपरमुखालोकनस्नेहनेन ॥६७॥

तुच्छाकारा हि वृत्तिर्न किमुदयते शाब्दबोधानुरोधात्,
दृक्सम्बन्धस्तु तस्मिन् कथमसति भवेत्कालसंबन्धबाधात् ।
अन्यायत्तापि सत्ता कथमिह घटतां सत्यसम्बन्धबाधे,
सामान्यं तद्विशेषेऽसति भवतु तदा मातरिश्वापि रूपी ॥६८॥

नीरोधादीशबुद्धिः सकलविषयिणी सेत्सिधीति स्वतःसा,
यो यत्काले यथास्ते स भवति विषयस्तत्र तस्यां तथैव ।
अर्थानामस्थिरत्वा द्विरतिसमुदये ऽप्यच्युति स्तत्स्वरूपे,
कुम्भध्वंसेपि नान्तर्गियति निविशते दोषलेशस्तदीयः ॥६९॥

नानाभोगैकहेतोस्त्यजनमनुगुणं कर्मणः स्यान्मुमुक्षोः,
एतत्सुत्यागवाचा निपुणमनुमता शेषकर्मप्रवृत्तिः ।
मुख्योपास्तेः पुराथ स्फुरदखिलधियः स्वाश्रमादिप्रमोकः,
योगारूढस्य यद्वोपगतशमदमस्यापि याहच्छिकोयम् ॥१००॥

आजीवं वर्तते चेदुपधि रपि कथं क्षीरमाधुर्यवत्स्यात्,
नोचेदामोक्षजीवस्थितिरपि नहीत्यादि चोद्यं परेषाम् ।
अद्वैतोक्तप्रकारानवगमजनितं तत्स्वरूपापवर्गात्,
सन्मात्रब्रह्मभागस्थितिरिह सततं जीवतोपाधिभेदात् ॥१०१॥

बुद्धिप्राणोपधीनां स्वकृतिवशभिदा दर्शनादुत्क्रमाणाम्,
तद्भेदोक्त्यैव जीवा न सिषिधु रणवः व्यापकत्वश्रुतिभ्यः ।
सूक्ष्मोपास्त्यर्थकास्तु श्रुति रनभिमता निर्भरोस्या नचास्मिन्,
तत्सृष्टानुप्रवेशश्रुति रधिकवला ब्रह्मणीवास्ति जीवे ॥१०२॥

तत्वज्ञानं प्रपञ्चं कवलयदखिलं नश्यति ब्रह्मणीदम्,
प्रज्ञेव प्राक् सुषुप्तेः कतकरज इव क्षोणिरेणुप्रपाते ।
दृष्टान्तोयं विभाव्य श्चिरमधिकधिया स्वापरव्यापृतौ नः
कालेच्छादेः समत्वाद्भवति पुनरयं दग्धदाह्योपि वह्निः ॥१०३॥

यावन्मायोपरामो भवति मम परं ब्रह्मसम्भ्रान्तजन्मि,
ग्रीवामालावदेत त्सततमविगतं किन्त्वविद्यानवाप्तम् ।
मत्वैव व्याकुलात्मा चिरमतियतते प्राप्तयेस्योपदेशैः,
प्राप्तं मत्वा चिरायाखिलमुकुलितधीः सन्ततानन्दमास्ते ॥१०४॥

शुद्धे ज्ञानाद्यभावात्तदधिकरणता कोटिकल्पोतिदुष्टः,
सत्यासत्यत्वशंका गगनकमलिनी पूतिगन्धायते यत् ।
सद्ब्रह्मैवेतरन्ने त्यसकृद भिहिते तत्सदाम्म्रे डितैः किम् ?
बुद्ध्याज्ञानस्य नाशादमृत मिति वहुश्रद् दधीताद्वितीयम् ॥१०५॥

नामन्दानन्दसम्विन्मयतनु रचलः कर्मदोषै रलिप्तः,
निर्भोगो निर्विकारो वहुपरिणतये स्यादलं स्थूलवृत्या ।
नोचेत्कृत्स्नाविलाङ्गः कथमिव स भवेदीश्वरो नित्यमुक्तः ॥
निष्कृष्टेऽस्मिन्निवा न्येष्वविकृतिभणितिः साधुजीवेष्वपि स्यात्१०६

ब्रह्मैवा ब्धिस्तरङ्गै रिव परिणमते चेतनाचेतनेशः,
तत्तच्छक्तिप्रभेदैः क्वचिदधिक मपि श्रूयते निर्विकारम् ।
द्वाराजन्यत्वभङ्गे किमिव मखमुखे स्वर्गहेतुत्वमीयात्,
भेदाभेदोपपत्तौ श्रुतिरति शरणं किन्तया सप्तभङ्ग्या ॥१०७॥

ब्रह्मादेश्यश्रूतीनां निरुपधिविषयः स्वोपधिस्यात्पारा सा,
इत्याम्नायद्वयीभ्या मनुशयमिदया बोध्यते तत्सदेकम् ।
सर्वं ब्रह्मेत्यभेदोन्मुखविधि रपृथक् कार्यसत्तां धुनीते,
भेदाम्नायस्तु लोकप्रमितवहुभिदां गाहमानोल्पवीर्यः ॥१०८॥

ईशो माया मृषा वा नच परिणमते तद्विकाराक्षमत्वात्,
विश्वोपादानमायां समधिगतवतः ब्रह्मणस्स्याद्विकारः
तद्धानाद्धान्यवस्थाद्वयविषयतया ब्रह्मणि ब्रह्मविद्या,
संजंगन्ति स्फुटं वा सगुणविगुणकोपासनायै नराणाम् ॥१०९॥

तृष्णादुःखमदप्रमादमदनद्रोहादयोपद्रव—
द्रव्यादानदमद्यु रागदुरितज्ञातापदेहादरैः ।
धर्माधर्मधराध्वरामृतजरानेमानपादीनवैः
योगावेगविरागभोगभजनैश्चात्मातिमुक्तः स्वराट् ॥११०॥

इति शुभम्भूयाद्
महामहोपाध्याय पण्डित श्रीहरिहरकृपालुद्विवेदिभि र्न्यायाचार्य्यै
र्विरचितः वेदान्तप्रबन्धःसमाप्तः
मनसुखराय पाठशाला, चौक पटना सिटी ।
